# संस्कृतव्याकरणम्

## कक्षा ७

नेपालसर्वकारः
शिक्षाविज्ञानप्रविधिमन्त्रालयः
पाठ्यक्रमविकासकेन्द्रम्
सानोठिमी–भक्तपुरम्

# संस्कृतव्याकरणम्

## कक्षा ७

नेपालसर्वकारः
शिक्षाविज्ञानप्रविधिमन्त्रालयः
पाठ्यक्रमविकासकेन्द्रम्
सानोठिमी-भक्तपुरम्

प्रकाशकः

**नेपालसर्वकारः**

**शिक्षाविज्ञानप्रविधिमन्त्रालयः**

**पाठ्यक्रमविकासकेन्द्रम्**

**सानोठिमी–भक्तपुरम्**

प्रस्तुतपाठ्यपुस्तकसम्बन्धिनः सर्वेऽधिकाराः पाठ्यक्रमविकासकेन्द्रस्य स्वामित्वेऽन्तर्निहितास्सन्ति। लिखितां स्वीकृतिं विनाऽस्य पुस्तकस्य पूर्णभागस्य एकांशस्य वा यथावत् प्रकाशनम्, परिवर्त्य प्रकाशनं तथा केनाऽपि वैद्युतेन साधनेन अन्येन प्रविधिना वा यन्त्रप्रयोगेण प्रतिलिपिनिस्सारणञ्च सर्वथा निषिद्धं वर्तते ।

सर्वेऽधिकाराः प्रकाशकाधीनाः

प्रथमसंस्करणम् - २०८०

# अस्मदीयं कथनम्

विद्यालयस्तरीयशिक्षामुद्देश्यप्रधानां व्यावहारिकीं सामयिकीं वृत्तिदायिनीं च विधातुं समये समये पाठ्यक्रम-पाठ्यपुस्तकविकास-परिमार्जनानुकूलनकार्याणि निरन्तरं सञ्चाल्यमानानि सन्ति । विद्यार्थिषु राष्ट्रराष्ट्रियते प्रति सम्मानभावनामुद्भाव्य नैतिकानुशासन-स्वावलम्बनादि-सामाजिक-चारित्रिक-गुणानामाधारभूत-भाषिकशिल्पस्य विकासपूर्वकं सहयोगात्मकस्य दायित्वपूर्णस्य चाऽऽचरणस्य विकासोऽद्यत्वे आवश्यको दृश्यते । अस्या एवावश्यकतायाः परिपूर्तये शिक्षासम्बद्धैर्महानुभावैः सम्मिलितानां गोष्ठीनामन्तःक्रियायाश्च निष्कर्षेण निर्मितं २०७८ तमस्य वैक्रमाब्दस्य पाठ्यक्रममनुसृत्य पुस्तकमिदं निर्मितं वर्तते । शिक्षा विद्यार्थिषु वर्तमानस्य ज्ञानपक्षस्यान्वेषणं विधाय शिक्षणशिल्पेन जीवनस्य सम्बन्धं स्थापयति । शिक्षया विद्यार्थिषु स्वाधिकारस्य, स्वतन्त्रतायाः, समानतायाश्च प्रवर्धनाय, स्वस्थजीवनस्याभ्यासाय, तार्किकविश्लेषणेन निर्णयाय, वैज्ञानिकविश्लेषणेन व्यक्ति-समाज-राष्ट्राणां सबलविकासाय चाग्रेसरणशीलं सामर्थ्यं विकसनीयम् । एवं व्यक्तेः नैतिकाचरणप्रदर्शनाय, सामाजिकसद्भावप्रवर्धनाय, पर्यावरणस्य समुचितप्रयोगशिक्षणाय, दृढशान्तौ प्रतिबद्धतायै च शिक्षायाः आवश्यकता समाजे अवलोक्यते । तेन समाजसापेक्षतया ज्ञान-शिल्प-सूचना-सञ्चार-प्रविधीनां प्रयोगसमर्थाः, स्वावलम्बिनः, व्यावसायिकशिल्पाभ्यासनिरताः, राष्ट्रं राष्ट्रियतां राष्ट्रियादर्शं च प्रति सम्मानविधायकाः, समाज-स्वीकार्याः, सदाचरणशीलाः, स्वसंस्कृति-संस्कारपालनपराः, परसंस्कृत्यादिषु सहिष्णवश्च नागरिकाः शिक्षया निर्मातव्याः । एवं कल्पनाशीलानां रचनाशिल्पिनाम्, नैरन्तरिकपरिश्रमेणोद्यमशीलानाम्, विचारे उदात्तानाम्, व्यवहारे आदर्शमयानाम्, सामयिकसमस्यानां व्यवस्थापने साफल्याधायकानाम्, स्वावलम्बिनाम्, देशभक्तानाम्, परिवर्तनोद्यतानाम्, चिन्तनशीलानाम्, समावेशिसमाजनिर्माणे योगदानं करिष्यमाणानां च नागरिकाणां निर्माणं शिक्षया विधातव्यमिति समाजस्यापेक्षा दृश्यते । इमानेव पक्षान् विचार्य 'राष्ट्रिय-पाठ्यक्रम-प्रारूप, २०७६' इत्यनुसारेण निर्मितस्य संस्कृतव्याकरणविषयकपाठ्यक्रमस्याधारेण सप्तम्याः कक्षायाः पाठ्यपुस्तकमिदं विकसितं वर्तते ।

इदं पुस्तकं प्रा. ध्रुवप्रसादः ज्ञवाली, उपप्रा. उपेन्द्रः दाहाल, निश्चलः अधिकारी, पुरुषोत्तमः घिमिरे- प्रभृतीनां महानुभावानां कार्यदलेन परिमार्जितं सम्पादितञ्चास्ति ।

अस्य पाठ्यपुस्तकस्य विकासे पाठ्यक्रमसिद्धान्तसंरचनयोः नवीनतमधारणामनुसृत्य परम्परागतानां शिल्पानामनुसरणं कृतमस्ति । अस्मिन् कार्ये अस्य केन्द्रस्य महानिर्देशकः अणप्रसादः न्यौपाने, प्रा.डा. माधवशरणः उपाध्याय, प्रा.डा. नुरापतिः पोखरेल, टुकराजः अधिकारी-प्रभृतीनां महानुभावानां विशेषसहयोगो विद्यते । अस्य टङ्कणं रूपसज्जा चेत्यादिकं खडोस सुनुवार इत्याख्येन महानुभावेन कृतमस्ति ।

पाठ्यपुस्तकं शिक्षणप्रक्रियाया महत्त्वपूर्णसाधनं भवतीति नाविदितं शेमुषीमताम् । सानुभवाः शिक्षकाः, जिज्ञासवश्छात्राः, सविधिकर्मकराश्च पाठ्यक्रमलक्ष्यीकृतान् विषयान् नैकविधस्रोतसां साधनानाञ्चोपयोगेन अध्यापयितुमध्येतुं कर्म कर्तुं च प्रभवन्ति । अनेकैः कारणैः सर्वेष्वेव विद्यालयेषु सरलतया पाठ्योपकरणानामुपलब्धेरभावाद् अध्ययनकार्यं केवलं पाठ्यपुस्तकाश्रितं भवतीति तथ्यमात्मसात्कृत्य प्रस्तुतमिदं पाठ्यपुस्तकं यथासम्भवं स्तरयुतं विधातुं प्रयासो विहितः, तथापि पाठ्यपुस्तकेऽस्मिन् यत्र यत्र त्रुटयोऽल्पताश्च विदुषां दृष्टिपथमागच्छेयुस्तत्र तत्र परिष्कारे परिवर्धने च दृग्गोचरीभूतानां त्रुटीनां परिमार्जनादिकार्यजाताय परामर्शप्रदानविधौ शिक्षकच्छात्राभिभावकपाठकविशेषज्ञानां महती प्रभावकारिणी भूमिका भवति । अत उक्तविषयेषु रचनात्मकपरामर्शदानेनोपकर्तुं पाठ्यक्रमविकासकेन्द्रमिदं तांस्तान् सर्वानेव महानुभावान् सप्रश्रयमभ्यर्थयते ।


नेपालसर्वकारः

**शिक्षाविज्ञानप्रविधिमन्त्रालयः**

पाठ्यक्रमविकासकेन्द्रम्

# विषयसूची


| पाठसङ्ख्या | पाठः | पृष्ठसङ्ख्या |
|---|---|---|
| प्रथमः | भूधातोर्लटि रूपसाधनम् | ६ |
| द्वितीयः | भूधातोर्लिटि लुटि लृटि च रूपसाधनम् | १७ |
| तृतीयः | भूधातोर्लोटि लङि विधिलिङि च रूपसाधनम् | २९ |
| चतुर्थः | भूधातोः आशीर्लिङि लुङि लृङि च रूपसाधनम् | ४३ |
| पञ्चमः | अतप्रभृतीनां परस्मैपदिधातूनां प्रयोगसिद्धिनिदर्शनम् | ५३ |
| षष्ठः | गुप्क्षिधातुप्रयोगसिद्धिः धातूनां सेडनिड्व्यवस्था च | ७० |
| सप्तमः | त्रप्-क्रमादिधातवः | ८५ |
| अष्टमः | ह्वृप्रभृतीनां धातूनां रूपसिद्धिप्रक्रियानिदर्शनम् | ९५ |
| नवमः | भ्वादिगणे आत्मनेपदी एधधातुः | १०५ |
| दशमः | भ्वादिगणे कमादिधातवः | ११७ |
| एकादशः | श्रिञादीनामुभयपदिधातूनां रूपसिद्धिनिदर्शनम् | १३१ |
| द्वादशः | अदादिगणे अद्-धातुः | १४२ |
| त्रयोदशः | हन्-आदिधातवः | १५१ |
| चतुर्दशः | अदादिप्रकरणे | १६७ |
| पञ्चदशः | शीङिङावात्मनेपदिनौ दुहाद्युभयपदिनश्च धातवः | १७६ |
| षोडशः | ब्रू-ऊर्णु-धातू | १८७ |
| सप्तदशः | जुहोत्यादिगणे हु-भी-ह्रीधातवः | १९६ |
| अष्टादशः | पृ-हा-मा-धातवः | २०४ |
| एकोनविंशः | डुभृञाद्युभयपदिनो धातवः | २१४ |

| पाठसङ्ख्या | पाठः | पृष्ठसङ्ख्या |
|---|---|---|
| विंशः | दिवादिगणे परस्मैपदिधातवः | २२० |
| एकविंशः | दिवादिगणे आत्मनेपद्युभयपदिधातवः | २२८ |
| द्वाविंशः | स्वादिगणपठिता धातवः | २३८ |
| त्रयोविंशः | अथ तुदादिप्रकरणम् | २४६ |
| चतुर्विंशः | अथ रुधादयः | २६९ |
| पञ्चविंशः | अथ तनादिप्रकरणम् | २८१ |
| षड्विंशः | अथ क्र्यादिप्रकरणम् | २९० |
| सप्तविंशः | अथ चुरादिप्रकरणम् | ३०१ |

ॐ श्रीगणेशाय नमः ।

ॐ श्रीसरस्वत्यै नमः ॥

येनाक्षरसमाम्नायमधिगम्य महेश्वरात्

कृत्स्नं व्याकरणं प्रोक्तं तस्मै पाणिनये नमः ॥

**तिङन्तप्रकरणपरिचयः**

नामपदानां क्रियापदानाञ्च समुचितसंयोजनेन वाक्यानि निर्मितानि भवन्ति। तत्र वाक्यनिर्माणप्रसङ्गे क्रियापदस्य महत्त्वपूर्णं स्थानं भवति । क्रियापदं विना वाक्यं परिपूर्णार्थं बोधयितुं नैव समर्थायते । अत एव सर्वं वाक्यं क्रियायां परिसमाप्यते इत्युक्तिरपि प्रचलिता अस्ति । तत्र सुप्प्रत्ययान्तानि पदानि नामपदानि कथ्यन्ते । तिङ्प्रत्ययान्तानि पदानि च क्रियापदानि सन्ति । पूर्वपठितायां षष्ठकक्षायां नामपदानां व्युत्पत्तेरभ्यासः कृतः । अधुना सप्तमकक्षायां क्रियापदानां व्युत्पत्तेरभ्यास आरभ्यते ।

क्रियाबोधका भूप्रभृतयः शब्दस्वरूपाः 'भूवादयो धातवः' इति पाणिनिसूत्रानुसारेण धातुसंज्ञया बोधिताः सन्ति । धातुतः कालबोधनाय विध्याद्यर्थबोधनाय च दश लकारा उत्पद्यन्ते । तेषु लकारेषु तिप् इत्यत आरभ्य महिङन्ता अष्टादश आदेशाः प्रवर्तन्ते । ते एव आदेशाः प्रत्याहारविधिना तिङ्पदेन कथिता भवन्ति । तिङादयो येषां शब्दानामन्ते भवन्ति तानि तिङन्तपदानि उच्यन्ते । तिङन्तपदानां सिद्धिप्रक्रिया यस्मिन् प्रकरणे निरूप्यते तस्य प्रकरणस्य नाम तिङन्तप्रकरणमिति कथ्यते ।

**भ्वादिगणपरिचयः**

पाणिनीयधातुपाठे पठितानां धातूनां विभागो विकरणभेदेन दशधा विहितो वर्तते। धातुतिङ्प्रत्यययोर्मध्ये ये शप्श्यनादयः प्रत्यया भवन्ति ते विकरणनाम्ना व्यवह्रियन्ते। धातुतो जायमानानां विविधविकरणानां प्रक्रियाधारेण धातवो दशसु गणेषु विभज्य पाणिनिना पठिताः सन्ति । धातूनां गणपाठे यो धातुः यस्य गणस्य आदौ पाणिनिना पठितः तदनुसारेण तस्य गणस्य नाम व्यवहृतमस्ति । ते च गणाः - भ्वादिः । अदादिः । जुहोत्यादिः । दिवादिः । स्वादिः । तुदादिः । रुधादिः । तनादिः । क्र्यादिः । चुरादिरिति निर्धारिताः सन्ति । धातूनां गणभेदानुसारेण रूपाणामपि भिन्नता भवति तथा हि भ्वादिगणे शप्, अदादिगणे शब्लुक्, जुहोत्यादिगणे शपः श्लुः, दिवादिगणे श्यन्, स्वादिगणे श्नुः, तुदादिगणे शः, रुधादिगणे श्नम्, तनादिगणे उः, क्र्यादिगणे श्ना, चुरादिगणे णिच् इत्यादीनि विकरणानि भवन्ति ।

| क्र.सं. | गणः | विकरणम् | उदाहरणम् |
|---|---|---|---|
| १. | भ्वादिः | शप् (अ) | भू - भवति । |
| २. | अदादिः | शप् (लुक्) | अद् - अत्ति । |
| ३. | जुहोत्यादिः | शप् (श्लु) | हु - जुहोति । |
| ४. | दिवादिः | श्यन् (य) | दिव् - दीव्यति । |
| ५. | स्वादिः | श्नु (नु) | सु - सुनोति |
| ६. | तुदादिः | श (अ) | तुद् - तुदति |
| ७. | रुधादिः | श्नम् (न) | रुध् - रुणद्धि |
| ८. | तनादिः | उ | तन् - तनोति |
| ९. | क्र्यादिः | श्ना (ना) | क्री - क्रीणाति |
| १०. | चुरादिः | णिच् (इ) + शप् (अ) | चुर् - चोरयति |

**भ्वादिगणः**

सत्तारूपक्रियाबोधकस्य भूधातोः गणस्यादौ पाठाद् अस्य प्रकरणस्य नाम भ्वादिगण इत्यस्ति । भ्वादिगणे पठितानां धातूनां दशसु लकारेषु रूपसिद्धिप्रक्रियाया अध्ययनं भ्वादिप्रकरणे कल्पितेषु पाठेषु वयं करिष्यामः ।

**लकाराणां परिचयः**

धात्वर्थक्रियायाः कालगतभेदस्य बोधनाय विध्यद्यर्थबोधनाय च पाणिनिना दश लकारा विविधैः सूत्रैर्विहिताः सन्ति । ते लकाराः - लट् । लिट् । लुट् । लृट् । लेट् । लोट् । लङ् । लिङ् । लुङ् । लृङ् । इति । एषु पञ्चमस्य लेट्लकारस्य रूपाणि केवलं वेदे एव प्रयुक्तानि सन्ति । लौकिकसंस्कृते तेषां प्रयोगो नास्ति ।

**दशलकारनिर्देशस्तेषां परिचयश्च**

**लट्, लिट्, लुट्, लृट्, लेट्, लोट्, लङ्, लिङ्, लुङ्, लृङ् । एषु पञ्चमो लकारश्छन्दोमात्रगोचरः ।**

लडादयो दश लकाराः सन्ति । लातिरिक्तानां वर्णानामनुबन्धलोपो भवतीति लकार इति एतेषां नाम । एतेषु दशसु लकारेषु पञ्चमो लेट्-लकारो वेद एव प्रयुज्यते । लौकिकसंस्कृते

एतस्य प्रयोगो न भवति। अतोऽत्र लेट्लकारस्य रूपाणि न व्युत्पाद्यन्ते। लिङ्लकारो विध्याद्याशीर्वादभेदेन द्विविधः। अतः तिङन्तप्रकरणे धातूनां लेड्भिन्नानां दशानां लकाराणां रूपाणि व्युत्पाद्यन्ते। लोट्-लकारस्यापि लिङ्वद् द्विविधत्वेऽपि प्रायेण रूपसाम्यात् तस्य विभाजनं न क्रियते, तत्र प्रथममध्यमपुरुषयोरेकवचने एव विध्याद्यर्थेषु आशिषि च रूपाणि भिद्यन्ते।

**लकारपरिचयः**

धातोर्विविधेष्वर्थेषु लडादयो लकारा भवन्ति। लकारेणैव धातुवाच्यक्रियायाः कालादीनां च बोधो भवति। इदानीं लकारबोध्यस्य कर्त्राद्यर्थस्य कालस्य च परिचयार्थं लकारार्थबोध आवश्यक इति तन्निरूप्यते।

| क्रमः | लकारः | अर्थः | प्रयोगनिदर्शनम् |
|---|---|---|---|
| १. | लट् | वर्तमानेऽर्थे विद्यमानाद्धातोर्लट्-लकारो विधीयते। वर्तमानेऽर्थे लट्-लकारस्य क्रियापदानि प्रयुज्यन्ते। | रामः पठति। अहं गच्छामि। |
| २. | लिट् | भूतानद्यतनपरोक्षार्थवृत्तेर्धातोर्लिट्-लकारो भवति। | त्रेतायां रामो राजा बभूव। |
| ३. | लुट् | भविष्यत्यनद्यतनेऽर्थे धातोर्लुट्-लकारो भवति। अनद्यतनभविष्यत्काले लुटः क्रियापदानि प्रयोक्तव्यानि। | अहं श्वो विद्यालयं गन्तास्मि। |
| ४. | लृट् | भविष्यदर्थाद्धातोर्लृट्-लकारो भवति। सामान्यभविष्यत्काले अस्य प्रयोगः कर्तव्यः। | त्वं पठिष्यसि। |
| ५. | लोट् | विध्यादिष्वर्थेषु आशीर्वादेऽर्थे च धातोर्लोट्लकारो भवति। | भवान् अत्र तिष्ठतु। (त्वम्) आयुष्मान् भव। |
| ६. | लङ् | अनद्यतनभूतार्थवृत्तेर्धातोर्लङ्लकारो भवति | यथा- स ह्यः कुत्र अगच्छत्? |
| ७. | विधिर्लिङ् | विध्यादिष्वर्थेषु द्योत्येषु धातोर्लिङ्लकारो भवति। | यथा-स पूजायामागच्छेत्। |

| क्रमः | लकारः | अर्थः | प्रयोगनिदर्शनम् |
|---|---|---|---|
| ८. | आशीर्लिङ् | आशीर्वादेऽर्थे द्योत्ये धातोर्लिङ्लकारो भवति । अप्राप्तस्य प्राप्तेरिच्छा आशीर्वादः । | यथा- शुभं भूयात् । |
| ९ | लुङ् | भूतार्थवृत्तेर्धातोर्लुङ्लकारो भवति । भूतार्थे धातोः लुङ्लकारस्य क्रियापदानि प्रयुज्यन्ते । | स अद्य प्रातः स्नानम् अकार्षीत्/अकृत । सोऽगमत् । ह्योऽद्य वाऽगमत् । देवश्चेदवर्षीत्, धान्यमवाप्स्म । |
| १०. | लृङ् | क्रियाया अनिष्पत्तौ गम्यमानायां हेतुहेतुमद्भावादि- लिङ्निमित्ते भविष्यत्यर्थे धातोर्लृङ्लकारो भवति । | सुवृष्टिश्चेदभविष्यत् तदा सुभिक्षमभविष्यत् । |

तत्र विशेषतः लट्, लोट्, लङ्, विधिलिङ् इति लकारेषु रूपनिर्माणार्थं विकरणज्ञानमावश्यकम् । अन्येषु लकारेषु विकरणज्ञानेन विनापि रूपावलिनिर्माणं कर्तुं शक्यत इति विकरणस्य तावान् प्रभावो न दृश्यते ।

**कालपरिचयः**

**भूतकालः**

अद्यतनानद्यतन-परोक्ष-सामान्याद्यवस्था भूतकालस्य भवन्ति ।

व्यतीताया रात्रेः पश्चार्द्धेन आगामिन्या रात्रेः पूर्वार्द्धेन च सहितः कालः (सकलो दिवसः) अद्यतनः, तद्भिन्नः कालोऽनद्यतनः । अनद्यतनकालो द्विविधः- भूतानद्यतनो भविष्यदनद्यतनश्च । अद्यतनभिन्नो व्यतीतः कालो भूतानद्यतनः, आगामी तु भविष्यदनद्यतनः । परोक्षत्वं प्रयोक्तुरिन्द्रियागोचरत्वम् । भूतानद्यतनपरोक्षे लिटः, भूतानद्यतने लङः, भूतसामान्ये लुङः क्रियापदानां प्रयोगः कार्यः ।

**वर्तमानकालः**

प्रारब्धापरिसमाप्तिक्रियाश्रयत्वं वर्तमानत्वम् । वर्तमानकाले लट्-लकारस्य प्रयोगो भवति ।

**भविष्यत्कालः**

अद्यतनानद्यतनभेदेन भविष्यत्कालो द्विविधः । अद्यतनभिन्नागामिकालो भविष्यदनद्यतनस्तत्र लुट्-लकारः प्रयोज्यः । सामान्यभविष्यत्काले लृट्लकारस्य क्रियापदानि प्रयोक्तव्यानि ।

**धातुपरिचयः**

सर्वेषामपि धातूनामर्थद्वयं भवति- फलं व्यापारश्च । तत्र व्यापारो नाम क्रिया, स च फलजनको भवति । व्यापारस्य आश्रयो यो भवति स कर्तेत्युच्यते । फलाश्रयन्तु कर्म भवति । येषां धातूनां फलं व्यापारश्च सहैव वर्तेते ते धातवोऽकर्मका भवन्ति । येषां धातूनां फलं व्यापारश्च पृथग् भवतः स धातुः सकर्मको भवति । अतोऽर्थदृष्ट्या धातवः द्विधा भवन्ति- सकर्मका अकर्मकाश्च । यत्र धातोः फलाश्रयरूपेण कर्मणोऽपेक्षा भवति स धातुः सकर्मक इत्युच्यते । यस्य च धातोः कर्म न सम्भवति सोऽकर्मको भवति । यथा- रामो ग्रामं गच्छति इत्यत्रोत्तरदेशसंयोगानुकूलो व्यापारो गमेरर्थः । उत्तरदेशसंयोगः ग्रामे तिष्ठतीति हेतोः ग्राम अत्र कर्म, कर्मणः सम्भवाच्च गम्धातुः सकर्मकः । भूधातोरात्मधारणानुकूलव्यापारोऽर्थः । तत्र आत्मधारणं तदनुकूलव्यापारश्च एकत्र तिष्ठत इत्यतः कर्मण असम्भवात् फलव्यापारयोः समानाधिकरणत्वाद् भूधातुरकर्मकः ।

तथैव धातवोऽजन्ता हलन्ताश्चेति द्विधा भवन्ति । भूकृप्रभृतयो धातवः अजन्ताः सन्ति । तथैव अत्प्रभृतयो हलन्ताः सन्ति ।

प्रथमः पाठः

# भूधातोर्लटि रूपसाधनम्

## लकारार्थनिर्धारकं सूत्रम्

**लः कर्मणि च भावे चाकर्मकेभ्यः ३।४।६९॥**

**लकाराः सकर्मकेभ्यः कर्मणि कर्तरि च स्युरकर्मकेभ्यो भावे कर्तरि च ॥**

(लः, कर्तरि, कर्मणि, च, भावे कर्तरि, च, अकर्मकेभ्यः, धातोः, परश्च)

**सरलार्थः–** लडादयो लकाराः सकर्मकेभ्यो धातुभ्यः कर्तर्यर्थे कर्मण्यर्थे च भवन्ति, अकर्मकेभ्यो धातुभ्यस्तु कर्तर्यर्थे भावेऽर्थे च भवन्ति । तत्र

लज्जासत्तास्थितिजागरणं वृद्धिक्षयभयजीवितमरणम् ।

नर्तन-निद्रा-रोदन-हासः स्पर्धा-कम्पन-मोदन-वासः ।

शयनक्रीडारुचिदीप्त्यर्थं धातुगणं तमकर्मकमाहुः ॥

प्रायेण एतदर्थका धातवः अकर्मकाः, अन्ये धातवः सकर्मका भवन्ति ।

**फलव्यधिकरणव्यापारवाचकत्वं सकर्मकत्वम्, फलसमानाधिकरणव्यापारवाचकत्वमकर्मकत्वम् ।** इति च सकर्मकत्वाकर्मकत्वयोर्लक्षणे । सर्वेषामपि धातोर्द्वावर्थौ भवतः- फलं व्यापारश्च । क्रियोद्देश्यं फलं, तत्पूर्तये ये के'पि यत्ना विधीयन्ते, यानि कान्यपि कार्याणि सम्पाद्यन्ते तानि व्यापारत्वेन व्यवह्रियन्ते । धातुवाच्यफलव्यापारयोराश्रयः (अधिकरणम्) यस्य धातोः पृथग्भवति स सकर्मकः, यस्य च एकत्र भवति सोऽकर्मकः । यथा- देवदत्त ओदनं पचतीति वाक्ये पचनक्रियाया विक्लितिरूपफलमोदने (कर्मणि) भवति तण्डुलप्रक्षालनादिकार्यव्यापाराश्च देवदत्तरूपकर्त्रा सम्पाद्यन्ते । अत एव फलव्यधिकरणव्यापारवाचकत्वात् पच्-धातुः सकर्मकः । देवदत्तः शेते इत्यत्र शयनक्रियायाः फलं (निद्रा) व्यापारश्च (नयननिमीलनादिः) देवदत्तरूपकर्तरि एव तिष्ठतीति फलसमानाधिकरणव्यापारवाचकत्वात् शीङ्-धातुरकर्मकः ।

## लट्लकारविधायकं विधिसूत्रम्

**वर्तमाने लट् ३।२।१२३॥**

**वर्तमानक्रियावृत्तेर्धातोर्लट् स्यात्। अटावितौ। उच्चारणसामर्थ्याल्लस्य नेत्वम्। भू सत्तायाम् ॥१॥ कर्तृविवक्षायां भू ल् इति स्थिते-**

(धातोः, वर्तमाने, लट्, प्रत्ययः, परश्च)

**सरलार्थः** - वर्तमानकालिकक्रियावाचकाद् धातोः लट्लकारो भवति। लट् इत्यत्र अकारस्य 'उपदेशेऽजनुनासिक इत्' इति सूत्रेण, टकारस्य 'हलन्त्यम्' इति सूत्रेण च इत्संज्ञा, 'तस्य लोपः' इति सूत्रेण उभयोर्लोपश्च भवति। लकारस्य तूच्चारणसामर्थ्यादित्संज्ञा न भवति।

**भूसत्तायाम् ॥१॥** (सत्तार्थको भूधातुः सेडकर्मकः, परस्मैपदी च वर्तते) तस्माद् वर्तमानेऽर्थे द्योत्येऽनेन सूत्रेण कर्तरि अर्थे लट्-लकारेऽनुबन्धलोपे '**भू+ल्**' इत्यवस्थायाम्-

## तिबाद्यष्टादशादेशविधायकं विधिसूत्रम्

**तिप्तस्झिसिप्थस्थमिप्वस्मस्तातांझथासाथांध्वमिड्वहिमहिङ् ३। ४। ७८ ॥**

**एते अष्टादश लादेशाः स्युः।**

(लस्य, तिप्तस्झिसिप्थस्थमिप्वस्मस्तातांझथासाथांध्वमिड्वहिमहिङ्, प्रत्ययः, परश्च)

**सरलार्थः**- तिप्,तस्, झि, सिप्, थस्, थ, मिप्, वस्, मस्, त, आताम्, झ, थास्, आथाम्, ध्वम्, इट्, वहि, महिङ् इत्येते अष्टादशप्रत्ययाः लकारस्य स्थाने भवन्ति। एते तिबादिमहिङन्ता अष्टादश प्रत्ययाः तिङ्शब्देन व्यवह्रियन्ते। तिङ् इति प्रत्याहारः। एतेषामन्तेभवाः पकारटकारङकारा इतः सन्ति। लस्य स्थाने आदिश्यमानत्वादेते लादेशा अपि कथ्यन्ते। एतेषां 'विभक्तिश्च इत्यनेन विभक्तिसंज्ञा भवति।

लः स्थाने अष्टादशसु तिबाद्यादेशेषु प्राप्तेषु-

## परस्मैपदसंज्ञाविधायकं संज्ञासूत्रम्

**लः परस्मैपदम् १।४।९९॥**

**लादेशाः परस्मैपदसंज्ञाः स्युः ॥**

(लः, परस्मैपदम्)

**सरलार्थः**- लकाराणां स्थाने विहिताः तिबादय आदेशाः परस्मैपदसंज्ञका भवन्ति।

अनेनाष्टादशानामेव तिङ्प्रत्ययानां परस्मैपदसंज्ञा विधीयते। परन्तु वक्ष्यमाणसूत्रेण तङ्प्रत्याहारे समागतानामन्त्यानां नवानामादेशानामात्मनेपदसंज्ञा विधीयते। अत आद्यानां तिबादिनवानामेव परस्मैपदसंज्ञा भवति।

### आत्मनेपदसंज्ञाविधायकं संज्ञासूत्रम्

**तङानावात्मनेपदम् १।४।१००॥**

**तङ्प्रत्याहारः शानच्कानचौ चैतत्संज्ञाः स्युः । पूर्वसंज्ञापवादः ॥**

(तङ्-आनौ, आत्मनेपदम्)

**सरलार्थः-** त, आताम्, झ, थास्, आथाम्, ध्वम्, इट्, वहि, महिङ् इत्येतेषां नवानां प्रत्ययानाम्, शानच् प्रत्ययस्य कानच्प्रत्ययस्य च आत्मनेपदसंज्ञा भवति । शानच्कानचावपि लस्य स्थान एव विधीयेते इत्यतः पूर्वसूत्रेण शानच्कानचोरपि परस्मैपदसंज्ञायां प्राप्तायामनेन आत्मनेपदसंज्ञा भवति । तङ् इति तप्रत्ययादारभ्य महिङो ङकारपर्यन्तानां नवानां प्रत्ययानां बोधकः प्रत्याहारः । पूर्वसूत्रेण प्राप्तां परस्मैपदसंज्ञां बाधित्वा तादिनवानां प्रत्ययानामनेन आत्मनेपदसंज्ञा विधीयते । आत्मनेपदिधातुभ्य एते नव प्रत्यया लस्य स्थाने विधीयन्ते ।

| संज्ञा | प्रथमपुरुषे | मध्यमपुरुषे | उत्तमपुरुषे |
|---|---|---|---|
| परस्मैपदम् | तिप् (ति), तस्, झि | सिप् (सि), थस्, थ | मिप् (मि), वस्, मस् |
| आत्मनेपदम् | त, आताम्, झ | थास्, आथाम्, ध्वम् | इट् (इ), वहि, महिङ् (महि) |

### आत्मनेपदप्रत्ययविधायकं विधिसूत्रम्

**अनुदात्तङित आत्मनेपदम् १।३।१२॥**

**अनुदात्तेतो ङितश्च धातोरात्मनेपदं स्यात् ॥**

(अनुदात्तेतो ङितश्च, धातोः, आत्मनेपदम् )

**सरलार्थः-** अनुदात्तेतो ङितश्च धातोः विहितस्य लस्य स्थाने आत्मनेपदसंज्ञका प्रत्यया भवन्ति । अनुदात्तेद् इत्यस्य उदाहरणानि एध वृद्धौ इत्यादयो धातवः, ङित उदाहरणं शीङ् स्वप्ने इत्यादयः ।

### आत्मनेपदप्रत्ययविधायकं विधिसूत्रम्

**स्वरितञितः कर्त्रभिप्राये क्रियाफले १।३।७२॥**

**स्वरितेतो ञितश्च धातोरात्मनेपदं स्यात्कर्तृगामिनि क्रियाफले ॥**

(स्वरितञितः, धातोः, कर्त्रभिप्राये क्रियाफले, आत्मनेपदम्)

**सरलार्थः-** यस्मिन् धातौ 'ञकारः, स्वरितस्वरो वा इत्संज्ञकः अस्ति तस्मात् परः क्रियाफले कर्तृगामिनि सति धातोः विहितस्य लस्य स्थाने आत्मनेपदसंज्ञकाः प्रत्ययाः भवन्ति, कर्त्रगामिनि क्रियाफले तु परस्मैपदसंज्ञका प्रत्ययाः भवन्ति । अत एव ञितः स्वरितेतश्च धातव उभयपदिनो वर्तन्ते । यथा- डुकृञ् करणे इति धातुर्ञित्वादुभयपदी । देवदत्तः कर्मकरैर्गृहं कुरुते, अत्र गृहनिर्माणक्रियायाः प्रधानफलं गृहोपभोगोऽस्ति तत्कर्तृरूपदेवदत्तं गच्छति । अत एवात्र कुरुते इति आत्मनेपदस्य प्रयोगोऽस्ति । कर्मकरा गृहं कुर्वन्ति इत्यत्र तु क्रियाफलं कर्तृभिन्नगृहस्वामिनं गच्छति न तु कर्तृरूपकर्मरान् । अतोऽत्र परस्मैपदस्य प्रयोगो भवति ।

### परस्मैपदप्रत्ययविधायकं विधिसूत्रम्

**शेषात्कर्तरि परस्मैपदम् १।३।७८॥**

**आत्मनेपदनिमित्तहीनाद्धातोः कर्तरि परस्मैपदं स्यात् ॥**

(शेषाद्, धातोः, कर्तरि, परस्मैपदम्)

**सरलार्थः-** उक्तादन्यः शेषः, आत्मनेपदनिमित्तं पूर्वसूत्राभ्यामुक्तम्, तदन्येभ्यो धातुभ्यः कर्तरि परस्मैपदसंज्ञकाः प्रत्ययाः भवन्ति । भावकर्मणोस्तु सर्वेभ्योऽपि धातुभ्य आत्मनेपदमेव भवति ।

भूधातोः आत्मनेपदनिमित्तहीनत्वात् तस्माद् विहितस्य लस्य स्थाने अनेन सूत्रेण कर्तृत्वविवक्षायां परस्मैपदसंज्ञकेषु तिबादिषु नवस्वादेशेषु प्राप्तेषु-

### प्रथममध्यमोत्तमपुरुषसंज्ञाविधायकं सूत्रम्

**तिङस्त्रीणि त्रीणि प्रथममध्यमोत्तमाः १।४।१०१॥**

**तिङ उभयोः पदयोस्त्रयस्त्रिकाः क्रमादेतत्संज्ञाः स्युः ॥**

(तिङः, त्रीणि, त्रीणि, प्रथममध्यमोत्तमाः)

**सरलार्थः-** तिङः परस्मैपदात्मनेपदयोरुभयोः प्रत्येकं त्रयस्त्रिकाः ये सन्ति, तेषां क्रमेण प्रथम-मध्यम-उत्तमपुरुषसंज्ञा भवन्ति । अनेन सूत्रेण तिप् तस् झि इत्येतेषां त आताम् झ इत्येतेषाञ्च प्रथमपुरुषसंज्ञा, सिप् थस् थ/थास् आथाम् ध्वम् इत्येतेषां मध्यमपुरुषसंज्ञा, मिप् वस् मस्/इट् वहि महिङ् इत्येतेषामुत्तमपुरुषसंज्ञा च सिद्धा ।

## एकवचनद्विवचनबहुवचनसंज्ञाविधायकं सूत्रम्

**तान्येकवचनद्विवचनबहुवचनान्येकशः १|४|१०२||**

**लब्धप्रथमादिसंज्ञानि तिङस्त्रीणि त्रीणि प्रत्येकमेकवचनादिसंज्ञानि स्युः ॥**

(तानि, एकशः, एकवचनद्विवचनबहुवचनानि)

**सरलार्थः-** तिङ उभयोः पदयोः प्राप्तप्रथममध्यमोत्तमानां त्रयाणां वचनानां प्रत्येकमेकवचन-द्विवचन-बहुवचनसंज्ञा भवति । एतेन तिप् सिप् मिप्/त थास् इट् इत्येतेषामेकवचनसंज्ञा, तस् थस् वस्/आताम् आथाम् वहि इत्येतेषां द्विवचनसंज्ञा, झि थ मस्/झ ध्वम् महिङ् इत्येतेषां बहुवचनसंज्ञा च सिद्धाः ।

## मध्यमपुरुषप्रत्ययविधायकं विधिसूत्रम्

**युष्मद्युपपदे समानाधिकरणे स्थानिन्यपि मध्यमः १|४|१०२||**

**तिङ्वाच्यकारकवाचिनि युष्मदि प्रयुज्यमानेऽप्रयुज्यमाने च मध्यमः ॥**

(समानाधिरणे, युष्मदि, उपपदे, स्थानिनि, अपि, मध्यमः)

**सरलार्थः-** युष्मच्छब्दस्य तिङः सामानाधिकरण्येन प्रयुज्यमाने, विवक्षायां सत्यां अप्रयुज्यमाने च मध्यमपुरुषो भवति । त्वं पाठं पठसि इत्यत्र युष्मद्-शब्दस्य पठनक्रियायाः सामानाधिकरण्येन प्रयोगो वर्तते । किं पठसि ? आयुष्मान् भव इत्यत्र तु युष्मद्-शब्देऽप्रयुक्तेऽपि तस्य विवक्षा वर्तते अतो मध्यमपुरुषः ।

## उत्तमपुरुषप्रत्ययविधायकं विधिसूत्रम्

**अस्मद्युत्तमः १|४|१०७||**

**तथाभूतेऽस्मद्युत्तमः ॥**

(तथा, अस्मदि, उत्तमः)

**सरलार्थः-** तिङः सामानाधिकरण्येन अस्मदि प्रयुज्यमाने, विवक्षायां सत्यां अप्रयुज्यमानेऽपि च उत्तमपुरुषो भवति ।। यथा- अहं पठामि । किं पठानि गुरवः ? इत्यादीनि ।

## प्रथमपुरुषप्रत्ययविधायकं विधिसूत्रम्

**शेषे प्रथमः १ । ४ । १०८ ॥**

**मध्यमोत्तमयोरविषये प्रथमः स्यात् । भू ति इति जाते ॥**

(शेषे, प्रथमः)

**सरलार्थः-** उक्तादन्यः शेषः । यत्र मध्यमपुरुषस्य उत्तमपुरुषस्य च विषयो नास्ति तत्र धातोः प्रथमपुरुषसंज्ञकाः प्रत्यया भवन्ति । यथा- स पठति । भवान् गच्छति । रामोऽकरोत् । बालकाः कन्दुकेन क्रीडन्ति ।

अनेन लस्य स्थाने परस्मैपदसंज्ञकेषु तिप्, तस्, झिः इति प्रथमपुरुषसंज्ञकेषु प्रत्ययेषु प्राप्तेषु एकत्वविवक्षायाम् 'द्व्येकयोर्द्विवचनैकवचने' इति सूत्रेण तिबादेशेऽनुबन्धलोपे '**भू+ति**' इत्यवस्थायाम्-

### सार्वधातुकसंज्ञाविधायकं सूत्रम् -

**तिङ्शित्सार्वधातुकम् ३।४।११३॥**

**तिङः शितश्च धात्वधिकारोक्ता एतत्संज्ञाः स्युः ॥**

(धातोः, तिङ्शित्, सार्वधातुकम्)

**सरलार्थः-** शकार इत् यस्य स शित् । "धातोः ३ । १ । ९१" इति सूत्रस्य तृतीयाध्यायसमाप्तिपर्यन्तमधिकारः, तत्र अधिकारे पठितैः सूत्रैः विधीयमानेषु प्रत्ययेषु अष्टादश तिङ्प्रत्ययाः, शित्प्रत्ययाश्च सार्वधातुकसंज्ञका भवन्ति ।

अनेन सूत्रेण 'ति' इत्यस्य सार्वधातुकसंज्ञायाम्-

### शब्विकरणप्रत्ययविधायकं विधिसूत्रम्

**कर्तरि शप् ३।१।६८॥**

**कर्त्रर्थे सार्वधातुके परे धातोः शप् ॥**

(कर्तरि, सार्वधातुके, धातोः, शप्)

**सरलार्थः-** कर्तरि अर्थे विहिते सार्वधातुकसंज्ञकप्रत्यये परे सति धातोः शप्प्रत्ययो भवति । शप् इत्यस्य शकारस्य "लशक्वतद्धिते" इति पकारस्य च "हलन्त्यम्" इति इत्संज्ञायां लोपे अ इत्येवावशिष्यते ।

अनेन शप्यनुबन्धलोपे '**भू+अ+ति**' इति जाते शित्वाद् 'अ' इत्यस्यापि सार्वधातुकसंज्ञायाम् भू इत्यस्य अङ्गसंज्ञायाञ्च-

### गुणादेशविधायकं विधिसूत्रम्

**सार्वधातुकार्धधातुकयोः ७।३।८४॥**

**अनयोः परयोरिगन्ताङ्गस्य गुणः । अवादेशः । भवति । भवतः ॥**

(सार्वधातुकार्धधातुकयोः, इकः, अङ्गस्य, गुणः)

**सरलार्थः-** इक् अन्ते यस्य स इगन्तः । इगन्तस्य अङ्गस्य अन्त्यस्य गुणो भवति सार्वधातुकसंज्ञकेषु आर्धधातुकसंज्ञकेषु च प्रत्ययेषु परेषु ।

अनेन सूत्रेण ऊकारस्य गुणे ओकारे '**भो+अ+ति**' इति जाते "एचोऽयवायावः" इत्यनेन अवादेशे वर्णसम्मेलने च '**भवति**' इति सिद्ध्यति ।

एवं प्रथमपुरुषस्य द्विवचने तसि, शपि, गुणे, अवादेशे, पदत्वे सकारस्य रुत्वे विसर्गे च '**भवतः**' इति रूपं सिद्ध्यति ।

बहुवचने 'झि'आदेशे पूर्ववद् '**भव झिः**' इत्यवस्थायाम्

### झस्य स्थाने अन्तादेशविधायकं विधिसूत्रम्

**झोऽन्तः ७।१।३॥**

**प्रत्ययावयवस्य झस्यान्तादेशः ॥ "अतो गुणे" । भवन्ति । भवसि । भवथः । भवथ ॥**

(प्रत्ययस्य, झस्य, अन्तः)

**सरलार्थः-** प्रत्ययावयवस्य झकारस्य स्थाने 'अन्त्' इत्यादेशो भवति ।

अनेन झकारस्य स्थाने 'अन्त्'आदेशे '**भव+अन्ति**' इत्यवस्थायां सवर्णदीर्घं बाधित्वा भव इत्यस्यापदान्तादत अकाररूपे गुणे परे "अतो गुणे" इत्यनेन पररूपे '**भवन्ति**' इति सिद्ध्यति ।

मध्यमपुरुषैकवचने सिपि शपि गुणेऽवादेशे '**भवसि**' इति रूपं जायते ।

मध्यमपुरुषस्य द्विवचने थसि शपि, गुणेऽवादेशे, पदत्वे सकारस्य रुत्वे विसर्गे च '**भवथः**' इति रूपं सिद्ध्यति ।

मध्यमपुरुषस्य बहुवचने थादेशे शपि, गुणेऽवादेशे, '**भवथ**' इति रूपं निष्पद्यते ।

उत्तमपुरुषस्यैकवचने मिपि शपि, गुणेऽवादेशे च '**भव मि**' इत्यवस्थायां 'प्रकृतिप्रत्ययोर्मध्ये यः पतितः स विकरणः, विकरणविशिष्टस्यापि अङ्गसंज्ञार्थम् अङ्गसंज्ञासूत्रे तदादिग्रहणम्' इति नियमेन शब्विशिष्टस्य भूधातोः 'भव' इत्यस्य अङ्गसंज्ञायाम्-

### दीर्घविधायकं विधिसूत्रम्

**अतो दीर्घो यञि ७।३।१०१॥**

**अतोऽङ्गस्य दीर्घो यञादौ सार्वधातुके । भवामि । भवावः । भवामः । स भवति । तौ भवतः । ते भवन्ति । त्वं भवसि । युवां भवथः । यूयं भवथ । अहं भवामि । आवां भवावः । वयं भवामः ॥**

(अतः, अङ्गस्य, यञि, सार्वधातुके, दीर्घः)

**सरलार्थः-** ह्रस्वाकारान्तस्य अङ्गस्य अन्त्यस्य दीर्घो भवति सार्वधातुकसंज्ञकेषु यञादिप्रत्ययेषु परेषु । यञ् इति प्रत्याहारः, यञ् आदौ यस्य स यञादिः, तस्मिन् यञादौ । अनेन अकारस्य दीर्घे आकारे '**भवामि**' इति रूपं सिद्ध्यति ।

उत्तमपुरुषस्य द्विवचने वसि शपि गुणेऽवादेशे च एवमेव 'भव' इत्यस्य अङ्गत्वाद् अकारस्य दीर्घे पदत्वे रुत्वे विसर्गे च 'भवावः' इति रूपं सिद्ध्यति ।

उत्तमपुरुषस्य बहुवचने मसि अपि अनयैव प्रक्रियया '**भवामः**' इति रूपं जायते ।

कर्तरि युष्मद्-शब्दस्य त्वम् युवाम् यूयम् इत्येतेषां रूपाणां प्रयोगस्यावस्थायाम्, विवक्षायां वा मध्यपुरुषस्य रूपाणि प्रयुज्यन्ते । यथा- त्वं भवसि । युवां भवथः । यूयं भवथः । तथैव कर्तरि अस्मद्-शब्दस्य प्रयोगावस्थायाम्, विवक्षायां वोत्तमपुरुषस्य रूपाणि प्रयोक्तव्यानि । यथा- अहं भवामि । आवां भवावः । वयं भवामः । शेषासु सर्वास्वप्यवस्थासु प्रथमपुरुषस्यैव प्रयोगः कार्यः । यथा- स भवति । तौ भवतः । ते भवन्ति । भवान् भवति । पितरौ भवतः । बालका बालिका मित्राणि अन्यानि च भवन्ति ।)

## भवन्ति

सत्तार्थकस्य भूशब्दस्य धातुसंज्ञायां लटि अनुबन्धलोपे भू ल् इति स्थिते परस्मैपदस्य प्रथमपुरुषस्य बहुवचने विवक्षिते 'शेषात् कर्तरि परस्मैपदम्' 'शेषे प्रथमः' 'बहुषु बहुवचनम्' इति सूत्रत्रयसहकृतेन 'तिप्तस्झिः' इत्यादिना सूत्रेण लस्य स्थाने झि इत्यादेशे भू झि इति जाते 'तिङ्शित्सार्वधातुकम्' इति सूत्रेण झि इत्यस्य सार्वधातुकसंज्ञायां 'कर्तरि शप्' इति सूत्रेण शप्प्रत्यये शकारपकारयोः अनुबन्धलोपे 'भू अ झि' इति स्थिते शित्वात् शपः अकारस्यापि सार्वधातुकसंज्ञायां भू इत्यस्य 'यस्मात्प्रत्ययविधिस्तदादि प्रत्ययेऽङ्गम्' इति अङ्गसंज्ञायां च जातायां 'सार्वधातुकार्धधातुकयोः' इति सूत्रेण भू इत्यस्य ऊकारस्य गुणे भो अ झि इति जाते 'एचोऽयवायावः' इति सूत्रेण अवादेशे भव् अ झि इति जाते 'झोऽन्तः' इति सूत्रेण झस्य स्थाने अन्तादेशे भव् अ अन्ति इत्यवस्थायां प्राप्तं सवर्णदीर्घं प्रबाध्य 'अतो गुणे' इति पररूपे वर्णसम्मेलने 'भवन्ति' इति रूपं सिद्धम् ।

**भवामि**

सत्तार्थकस्य भूशब्दस्य धातुसंज्ञायां लटि अनुबन्धलोपे 'भू ल्' इति स्थिते परस्मैपदस्य उत्तमपुरुषस्य एकवचने विवक्षिते 'शेषात्कर्तरि परस्मैपदम्' 'अस्मद्युत्तमः' 'द्व्येकयोर्द्विवचनैकवचने' इति सूत्रत्रयसहकृतेन 'तिप्तस्झि' इत्यादिना सूत्रेण लस्य स्थाने मिप् इत्यादेशे पकारस्यानुबन्धलोपे भू मि इति जाते मि इत्यस्य 'तिङ्शित्सार्वधातुकम्' इति सूत्रेण सार्वधातुकसंज्ञायां 'कर्तरि शप्' इति सूत्रेण शपि अनुबन्धलोपे शित्त्वेन तस्यापि सार्वधातुकसंज्ञायां 'सार्वधातुकार्धधातुकयोः' इति सूत्रेण गुणे अवादेशे 'भव मि' इति जाते भव इत्यस्य अङ्गसंज्ञायाम् 'अतो दीर्घो यञि' इति सूत्रेण अकारान्ताङ्गस्य दीर्घे कृते 'भवामि' इति रूपं सिद्ध्यति ।

**भूधातोः कर्तरि लटि रूपाणि**

| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमपुरुषः | भवति | भवतः | भवन्ति |
| **मध्यमपुरुषः** | भवसि | भवथः | भवथ |
| **उत्तमपुरुषः** | भवामि | भवावः | भवामः |

## वाक्येषु प्रयोगानुशीलनम्

१. हरिः शिक्षको भवति ।

२. रामश्यामौ मम सखायौ भवतः ।

३. परिश्रमशीलाः छात्राः सफला भवन्ति ।

४. त्वं कक्षायां सर्वोत्कृष्टो विद्यार्थी भवसि ।

५. युवां गणितज्ञौ भवथः ।

६. यूयं कलाकारा भवथ ।

७. अहं प्राध्यापको भवामि ।

८. आवाम् आज्ञाकारिणौ भवावः ।

९. वयं प्रथमश्रेण्याम् उत्तीर्णा भवामः ।

## अभ्यासः

१. **शुद्धमुच्चारणं कुरुत**

(क) युष्मद्युपपदे समानाधिकरणे स्थानिन्यपि मध्यमः ।

(ख) लः कर्मणि च भावे चाकर्मकेभ्यः ।

(ग) तिप्तस्झिसिप्थस्थमिप्वस्मस्तातांझथासाथांध्वमिड्वहिमहिङ् ।

(घ) तान्येकवचनद्विवचनबहुवचनान्येकशः ।

(ङ) फलव्यधिकरणव्यापारवाचकत्वं सकर्मकत्वम् ।

२. **यथौचित्यं परस्परं मेलयत**

| | |
|---|---|
| (क) प्रथमपुरुषविधायकं सूत्रम् | कर्तरि शप् |
| (ख) उत्तमपुरुषविधायकं सूत्रम् | शेषे प्रथमः |
| (ग) शप्प्रत्ययविधायकं सूत्रम् | अस्मद्युत्तमः |
| (घ) परस्मैपदविधायकं सूत्रम् | भूवादयो धातवः |
| (ङ) धातुसंज्ञाविधायकं सूत्रम् | शेषात्कर्तरि परस्मैपदम् |
| (च) आत्मनेपदसंज्ञाविधायकं सूत्रम् | अतो गुणे |
| (छ) भव अन्ति इत्यत्र पररूपविधायकं सूत्रम् | तङानावात्मनेपदम् |

३. **अधोऽङ्कितानां प्रश्नानामुत्तराणि लिखत**

(क) भूधातोरर्थं लिखत ।

(ख) लकाराः कति ? के च ते ?

(ग) के टिल्लकाराः ?

(घ) लकाराः कस्माद्विधीयन्ते ?

(ङ) कस्मिन्नर्थे लट्-लकारस्य प्रयोगो भवति ?

(च) लट्-लकारविधायकं सूत्रं किम् ?

(छ) कालः कतिविधः ? के च ते ?

(ज) भूधातोर्लटि मध्यमपुरुषे कानि रूपाणि जायन्ते ?

(झ) 'भवामि' इत्यत्र को लकारः का च विभक्तिः ?

(ञ) परस्मैपदितिङ्विभक्तयः काः ?

(ट) परस्मैपदसंज्ञा केन सूत्रेण क्रियते ?

(ठ) सार्वधातुकसंज्ञा कस्य केन सूत्रेण भवति ?

(ड) अस्मद्युत्तमः इति सूत्रं किं करोति ?

(ढ) आत्मनेपदे प्रथमपुरुषसंज्ञकाः प्रत्ययाः के ?

(ण) लादेशाः के सन्ति ?

(त) 'भवामः' इत्यत्र दीर्घविधायकं सूत्रं किम् ?

(थ) भूतसामान्ये कस्य लकारस्य प्रयोगः कर्तव्यः ?

(द) अकर्मकधातोर्लक्षणं किम् ?

(ध) भ्वादिगणस्य विकरणप्रत्ययः कः ?

(न) अकर्मकेभ्यो धातुभ्यः कयोरर्थयोर्लकारा भवन्ति ?

**४. सोदाहरणं सूत्राणामर्थं लिखत**

(क) लः कर्मणि च भावे चाकर्मकेभ्यः ।

(ख) तङानावात्मनेपदम् ।

(ग) अनुदात्तङित आत्मनेपदम् ।

(घ) स्वरितञितः कर्त्रभिप्राये क्रियाफले ।

(ङ) तिङस्त्रीणि त्रीणि प्रथममध्यमोत्तमाः ।

**५. भूधातोः कर्तरि लटि रूपाणि लिखत ।**

**६. प्रमुखसूत्रनिदर्शनपूर्वकं रूपसिद्धिप्रकारं दर्शयत**

(क) भवति (ख) भवन्ति (ग) भवथः (घ) भवामि (ङ) भवामः

**७. धातूनां सकर्मकत्वाकर्मकत्वनिर्धारणविधिं लिखत ।**

**८. धातूनां परस्मैपदादिव्यवस्थायाः ससूत्रं परिचयमुपस्थापयत ।**

**९. पदानां वाक्येषु प्रयोगं निदर्शयत**

(क) भवथ (ख) भवामः (ग) भवन्ति (घ) भवावः (ङ) भवसि

द्वितीयः पाठः

# भूधातोर्लिटि लुटि लृटि च रूपसाधनम्

## लिट्लकारविधायकं विधिसूत्रम् –

**परोक्षे लिट् ३।२।११५॥**

**भूता'नद्यतनपरोक्षार्थवृत्तेर्धातोर्लिट् स्यात् । लस्य तिबादयः ।**

(परोक्षे, अनद्यतने, भूते, धातोः, परः, लिट्)

**सरलार्थः–** अनद्यतनभूतकालिकपरोक्षात्मिकायां क्रियायां विवक्षितायां सत्यां धातोः परः लिट्लकारो भवति ।**व्यतीतायाः रात्रेः द्वादशवादनतः आरभ्य आगामिन्या रात्रेः द्वादशवादनपर्यन्तः कालः अद्यतनः**, तद्भिन्नः अनद्यतन कथ्यते । **परोक्षं नाम स्वप्रत्यक्षव्यतिरिक्तम्** । उत्तमपुरुषे चित्तविक्षेपाद्यवस्थायां सुषुप्तौ वा परोक्षत्वं सम्भवति । यथा '**सुप्तोऽहं किल विललाप**' इति । यथा '**नाहं कलिङ्गान् जगाम**' इत्यादि ।

इति सूत्रेण भूतानद्यतनपरोक्षार्थवृत्तेः धातोः लिट्लकारे '**भू ल्**' इति जाते लकारस्य स्थाने परस्मैपदस्य प्रथमपुरुषस्यैकवचने तिबादेशेऽनुबन्धलोपे '**भू ति**' इति जाते-

## णलाद्यादेशविधायकं विधिसूत्रम्

**परस्मैपदानां णलतुसुस्थलथुसणल्वमाः ३।४।८२॥**

**लिटस्तिबादीनां णलादयः स्युः । भू अ इति स्थिते–**

(लिटः, लस्य, परस्मैपदानाम्, णलतुसुस्थलथुसणल्वमाः)

**सरलार्थः–** लिट्लकारसम्बद्धानां तिबादीनां नवानां स्थाने क्रमेण णल्, अतुस्, उस्, थल्, अथुस्, अ, णल्, व, म इत्येते नव आदेशा भवन्ति ।

| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| **प्रथमपुरुषः** | तिप् – णल् (अ) | तस् – अतुस् | झि – उस् |
| **मध्यमपुरुषः** | सिप् – थल् | थस् – अथुस् | थ – अ |
| **उत्तमपुरुषः** | मिप् – णल् (अ) | वस् – व | मस् – म |

एतेन 'तिप्' इत्यस्य स्थाने 'णल्' आदेशेऽनुबन्धलोपे '**भू अ**' इति स्थिते

### वुगागमविधायकं विधिसूत्रम्

**भुवो वुग्लुङ्लिटोः ६।४।८८॥**

**भुवो वुगागमः स्यात् लुङ्लिटोरचि ।**

(भुवोः, वुग्, लुङ्लिटोः, अचि)

**सरलार्थः-** भूधातोः 'वुक्' इत्यागमो भवति, लुङ्लिट्सम्बद्धे अचि परे। वुक् इत्यत्र उकारककारयोरित्संज्ञायां वकार एव शिष्यते । कित्त्वाद् धातोरन्त्यावयवो वुक् ।

इति सूत्रेण वुगागमेऽनुबन्धलोपे '**भूव् अ**' इति जाते-

### द्वित्वविधायकं विधिसूत्रम्

**लिटि धातोरनभ्यासस्य ६।१।८॥**

**लिटि परेऽनभ्यासधात्ववयवस्यैकाचः प्रथमस्य द्वे स्तः, आदिभूतादचः परस्य तु द्वितीयस्य । 'भूव् भूव् अ' इति स्थिते ।**

(लिटि, धातोः, अनभ्यासस्य, एकाचः, प्रथमस्य, अजादेः, द्वितीयस्य, द्वे)

**सरलार्थः-** लिटि परे अभ्यासभिन्नस्य धातोरवयवस्य प्रथमस्य एकाचो द्वित्वं भवति, अजादेः धातोस्तु अचः परस्य द्वितीयस्य एकाचो द्वित्वं भवति । द्वित्वे कर्तव्ये वृक्षप्रचलने शाखा अपि प्रचलन्तीति न्यायेन अजाश्रितानां हलामपि द्वित्वं भवति ।

इति 'भूव्' इत्यस्य द्वित्वे '**भूव् भूव् अ**' इति जाते-

### अभ्याससंज्ञाविधायकं सूत्रम्

**पूर्वोऽभ्यासः ६।१।४॥**

**अत्र ये द्वे विहिते तयोः पूर्वोऽभ्याससंज्ञः स्यात् ।**

(पूर्वः, अभ्यासः, एकाचः, द्वे, प्रथमस्य, अजादेः द्वितीयस्य)

**सरलार्थः-** षष्ठाध्यायस्य द्वित्वप्रकरणे ये द्वे विधीयेते, तयोः पूर्वस्थितमभ्याससंज्ञकं भवति ।

अनेन पूर्वस्थितस्य 'भूव्' इत्यस्य अभ्याससंज्ञायाम्-

### हलो लोपविधायकं विधिसूत्रम्

**हलादिः शेषः ७।४।६०॥**

**अभ्यासस्याऽऽदिर्हल् शिष्यतेऽन्ये हलो लुप्यन्ते । इति वुलोपः ॥**

(अभ्यासस्य, आदिः, हल्, शेषः)

**सरलार्थः-** अभ्यासस्य आदौ वर्तमानो हल् एव शिष्यते, अन्ये हलो लुप्यन्ते । यदि अभ्यासे आदौ हल् वर्तते तर्हि तं विहाय अन्ये हलो लुप्ता भवन्तीत्याशयः ।

अनेन अभ्यासस्य वकारस्य लोपे '**भू भूव् अ**' इति जाते-

### ह्रस्वविधायकं विधिसूत्रम्

**ह्रस्वः ७।४।५९॥**

**अभ्यासस्याऽचो ह्रस्वः स्यात् ।**

(अभ्यासस्य, अचः, ह्रस्वः)

**सरलार्थः-** अभ्यासस्य अचः स्थाने ह्रस्वादेशः स्यात् ।

अनेन ऊकारस्य ह्रस्वे '**भु भूव् अ**' इति जाते-

### अकारादेशविधायकं विधिसूत्रम्-

**भवतेरः ७।४।७३॥**

**भवतेरभ्यासोकारस्य अः स्याल्लिटि ।**

(भवतेः, अभ्यासस्य, अः, लिटि)

**सरलार्थः-** लिटि परे भूधातोः अभ्यासस्य अन्त्यस्य उकारस्य स्थाने अकारादेशो भवति ।

अनेन अभ्यासोकारस्य अकारादेशे '**भ भूव् अ**' इत्यवस्थायाम्-

### जश्चरादेशविधायकं विधिसूत्रम्

**अभ्यासे चर्च ८।४।५४॥**

**अभ्यासे झलां चरः स्युर्जशश्च । 'झशां जशः, खयां चरः' इति विवेकः । बभूव । बभूवतुः । बभूवुः ।**

(अभ्यासे, झलाम्, जश्, चर्च)

**सरलार्थः-** अभ्यासादौ स्थितानां झश्प्रत्याहारस्थवर्णानां स्थाने जश्प्रत्याहारस्था वर्णा भवन्ति, खय्प्रत्याहारस्थवर्णानां स्थाने च चर्प्रत्याहारस्था वर्णा भवन्ति । अनेन अभ्यासादौ स्थिता वर्गद्वितीयाः वर्गप्रथमा जायन्ते, वर्गचतुर्थास्तु वर्गतृतीया भवन्ति ।

अनेन अभ्यासस्थस्य भकारस्य जश्त्वेन बकारादेशे वर्णयोगे '**बभूव**' इति रूपं सिद्ध्यति ।

प्रथमपुरुषस्य द्विवचने तसि अतुसादेशे, वुगागमे, द्वित्वेऽभ्यासत्वे, हलादिशेषे, ह्रस्वे, अत्वे, जश्त्वे, पदत्वे, रुत्वे, विसर्गे च '**बभूवतुः**' इति रूपं सिद्ध्यति ।

एवमेव प्रथमपुरुषस्य बहुवचने झौ उसादेशे '**बभूवुः**' इति रूपं सिद्धम् ।

मध्यमपुरुषस्य द्विवचने सिपि थलादेशे '**भू थ**' इति जाते स्थानिवद्भावेन थस्य तिङ्त्वाद्-

## आर्धधातुकसंज्ञाविधायकं सूत्रम्

**लिट् च ३।४।११५॥**

**लिडादेशस्तिङ्ङार्धधातुकसंज्ञः स्यात् ।**

(लिट्, च, तिङ्, आर्धधातुकम्)

**सरलार्थः-** लिटः स्थाने विहिताः तिबादय आर्धधातुकसंज्ञका भवन्ति ।

इति 'थ' इत्यस्य आर्धधातुकसंज्ञायाम्-

## इडागमविधायकं विधिसूत्रम्

**आर्धधातुकस्येड्वलादेः ७।२।३५॥**

**वलादेरार्धधातुकस्येडागमः स्यात् । बभूविथ । बभूवथुः । बभूव । बभूव । बभूविव । बभूविम ॥**

(वलादेः, आर्धधातुकस्य, इट्)

**सरलार्थः-** आर्धधातुकसंज्ञकस्य प्रत्ययस्य आदौ वल्प्रत्याहारस्था वर्णा सन्ति चेत् तस्य 'इट्' इत्यागमो भवति । टकारस्य इत्संज्ञालोपौ । टित्त्वादाद्यवयवत्वम् ।

अनेन इडागमेऽनुबन्धलोपे '**भू इ थ**' इत्यवस्थायां वुगागमे, द्वित्वेऽभ्यासत्वे, हलादिशेषे, ह्रस्वे, अत्वे, जश्त्वे वर्णसम्मेलने च '**बभूविथ**' इति रूपं ज्ञेयम् ।

थस अथुसि पूर्ववद् '**बभूवथुः**' इति रूपं बोध्यम् ।

थस्य 'अ' इत्यादेशे च पूर्ववद् '**बभूव**' इति रूपं निष्पद्यते ।

मिपो णलादेशे च पूर्ववद् '**बभूव**' इति रूपं निष्पद्यते ।

वसः 'व' इत्यादेशे इडागमे च पूर्ववद् '**बभूविव**' इति रूपं सम्पद्यते ।

एवं मसः 'म' इत्यादेशे इडागमे च पूर्ववद् '**बभूविम**' इति रूपञ्च सिद्ध्यति ।

भूधातोः कर्तरि लिटि रूपाणि

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| **प्रथमपुरुषः** | बभूव | बभूवतुः | बभूवुः |
| **मध्यमपुरुषः** | बभूविथ | बभूवथुः | बभूव |
| **उत्तमपुरुषः** | बभूव | बभूविव | बभूविम |

### लुट्लकारविधायकं विधिसूत्रम्

**अनद्यतने लुट् ३।३।१५॥**

**भविष्यत्यनद्यतनेऽर्थे धातोर्लुट् ।**

(भविष्यति, अनद्यतने, धातोः, परः, लुट्, प्रत्ययः)

**सरलार्थः-** अनद्यतनभविष्यदर्थे विवक्षिते धातोर्लुट्लकारो भवति। वर्तमानात् समयात् आगामिन्या रात्रेः पूर्वार्धकालिकः समयोऽद्यतनभविष्यत्कालो वर्तते। तदूर्ध्वं यः कालः सोऽनद्यतनभविष्यत्कालोऽस्ति। अनद्यतनभविष्यत्कालबोधकानि पदानि वाक्ये प्रयुज्यन्ते, तर्हि लुट्लकारस्य क्रियापदस्य प्रयोगो भवति। यथा- **श्वः अहम् आपणं गन्तास्मि। परश्वः माता मातुलगृहं गन्ता। आगामिनि सप्ताहे युष्माकं परीक्षा भविता। आगामिनि वर्षे मम भ्रातरौ प्रवेशिकाम् उत्तरितारौ।** लुट्लकारे उकारटकारयोः इत्संज्ञा भवति।

इति सूत्रेण भूधातोः अनद्यतनभविष्यत्यर्थे लुट्लकारेऽनुबन्धलोपे '**भू ल्**' इति स्थिते लकारस्य स्थाने तिबादेशे सार्वधातुकसंज्ञायां शपि प्राप्ते-

### स्यतासीप्रत्ययविधायकं विधिसूत्रम् -

**स्यतासी लृलुटोः ३।१।३३॥**

**धातोरेतौ स्तो लृलुटोः परतः। शबाद्यपवादः। 'लृ' इति लृङ्लृटोर्ग्रहणम्।**

(धातोः, स्यतासी, लृलुटोः)

**सरलार्थः-** 'लृ' इत्यनेन लृङ्लकारलृट्लकारयोर्बोधो भवति। लृट्लृङ्लकारयोः परयोः धातोः स्यप्रत्ययः, लुट्लकारे परे धातोः तासिप्रत्ययश्च भवतः। स्यतासिप्रत्ययौ शबाद्यपवादत्वेन भवतः। तासेः इकारस्य इत्संज्ञा भवति।

अनेन भूधातोः लुटि परे शपं प्रबाध्य तासिप्रत्ययेऽनुबन्धलोपे '**भू तास् ति**' इति जाते-

## आर्धधातुकसंज्ञाविधायकं सूत्रम्

**आर्धधातुकं शेषः ३।४।११४॥**

**तिङ्शिद्भ्योऽन्यो धातोरिति विहितः प्रत्यय एतत्संज्ञः स्यात् । इट् ।**

(धातोः, शेषः, प्रत्ययः, आर्धधातुकम्)

**सरलार्थः-** 'धातोः' इति सूत्रस्य अधिकारे विहितेषु प्रत्ययेषु तिङ्शिद्भिन्नाः प्रत्यया आर्धधातुकसंज्ञका भवन्ति । उक्ताद् अन्यः शेषः । तिङ्शितौ सार्वधातुकसंज्ञकौ पूर्वमुक्तौ ।

इति सूत्रेण 'तास्' इत्यस्य आर्धधातुकसंज्ञायां वलादित्वाद् इडागमे ऊकारस्य गुणे अवादेशे च '**भवितास् ति**' इति जाते-

## डारौरसादेशविधायकं विधिसूत्रम्

**लुटः प्रथमस्य डारौरसः २।४।८५॥**

**एते क्रमादादेशाः स्युः । डित्त्वसामर्थ्यादभस्यापि टेर्लोपः । भविता ।**

(लुटः, प्रथमस्य, डारौरसः)

**सरलार्थः-** लुटः स्थाने विहितानां प्रथमपुरुषसंज्ञकानां तिङां स्थाने क्रमेण **डा, रौ, रस्** एते आदेशा भवन्ति । एतेन 'ति' इत्यस्य स्थाने 'डा' आदेशो भवति । डकारस्य 'चुटू' इत्यनेन इत्संज्ञा भवति । 'भवितास्' इत्यस्य आस्भागस्य टिसंज्ञायां भसंज्ञाया अभावेन 'टेः' इत्यस्य अप्रवृत्तौ अपि 'डा' इत्यत्र डित्त्वविधानस्य सामर्थ्याद् अभस्यापि टेर्लोपो भवति ।

अनेन 'ति' इत्यस्य स्थाने 'डा'आदेशेऽनुबन्धलोपे '**भवितास् आ**' इति जाते 'आस्' इत्यस्य टिसंज्ञायां डित्त्वसामर्थ्यादभस्यापि टेर्लोपे वर्णसम्मेलने '**भविता**' इति रूपं सिद्ध्यति ।

तसि तासिप्रत्यये आर्धधातुकसंज्ञायामिडागमे गुणेऽवादेशे तसो 'रौ' आदेशे च '**भवितास् रौ**' इति जाते

## सकारलोपविधायकं विधिसूत्रम्

**तासस्त्योर्लोपः ७।४।५०॥**

**सादौ प्रत्यये परे ॥**

(तासस्त्योः, सः, सि, लोपः)

**सरलार्थः-** सकारादौ प्रत्यये परे 'तास्' इत्यस्य सकारस्य 'अस्'धातोः सकारस्य च लोपो भवति ।

### सकारलोपविधायकं विधिसूत्रम्

**रि च ७।४।५१॥**

**रादौ प्रत्यये तथा। भवितारौ। भवितारः। भवितासि। भवितास्थः। भवितास्थ। भवितास्मि। भवितास्वः। भवितास्मः।**

(तासस्त्योः, सः, रि, च, लोपः)

**सरलार्थः-** रेफादौ प्रत्यये परे 'तास्' इत्यस्य सकारस्य 'अस्'धातोः सकारस्य च लोपो भवति।

अनेन सकारस्य लोपे '**भवितारौ**' इति रूपं सिद्ध्यति।

बहुवचने झिप्रत्यये, तस्य रसादेशे अनेनैव सकारस्य लोपे '**भवितारः**' इति रूपं सिद्धम्।

सिपि पूर्ववद् '**भवितास् सि**' इत्यत्र 'तासस्त्योर्लोपः' इत्यनेन सकारस्य लोपे '**भवितासि**' इति रूपम्।

थसि सलोपाभावे '**भवितास्थः**' इति रूपं जायते।

एवमेव '**भवितास्थ**' '**भवितास्मि**' '**भवितास्वः**' '**भवितास्मः**' इति रूपाणि सिद्ध्यन्ति।

भूधातोः कर्तरि लुटि रूपाणि

| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| **प्रथमपुरुषः** | भविता | भवितारौ | भवितारः |
| **मध्यमपुरुषः** | भवितासि | भवितास्थः | भवितास्थ |
| **उत्तमपुरुषः** | भवितास्मि | भवितास्वः | भवितास्मः |

### लृट्लकारविधायकं विधिसूत्रम्

**लृट् शेषे च ३।३।१३॥**

**भविष्यदर्थाद्धातोर्लृट् क्रियार्थायां क्रियायामसत्यां सत्यां च। स्यः। इट्। भविष्यति। भविष्यतः। भविष्यन्ति। भविष्यसि। भविष्यथः। भविष्यथ। भविष्यामि। भविष्यावः। भविष्यामः।**

(भविष्यति, क्रियायाम्, क्रियार्थायाम्, धातोः, शेषे, च, लृट्)

**सरलार्थः-** क्रियानिमित्तिकायां क्रियायां सत्यामसत्यां च भविष्यति अर्थे धातोः लृट्लकारो भवति।

भूधातोर्लृटि तिपि शपं प्रबाध्य स्यप्रत्यये '**भू स्य ति**' इति जाते 'स्य' इत्यस्य आर्धधातुकसंज्ञायाम्, इडागमे '**भू इ स्य ति**' इति जाते धातोः अङ्गसंज्ञायाम् ऊकारस्य गुणेऽवादेशे सस्य षत्वे च '**भविष्यति**' इति रूपं सिद्ध्यति । तसादौ एवमेव कार्येषु विहितेषु लटि इव '**भविष्यतः**' इत्यादीनि रूपाणि निष्पद्यन्ते ।

भूधातोः कर्तरि लृटि रूपाणि

| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| **प्रथमपुरुषः** | भविष्यति | भविष्यतः | भविष्यन्ति |
| **मध्यमपुरुषः** | भविष्यसि | भविष्यथः | भविष्यथ |
| **उत्तमपुरुषः** | भविष्यामि | भविष्यावः | भविष्यामः |

**बभूव**

भूधातोः 'परोक्षे लिट्' इति सूत्रेण लिटि अनुबन्धलोपे लस्य स्थाने तिपि अनुबन्धलोपे 'भू ति' इति जाते 'परस्मैपदानां णलतुसुस्थलथुसणल्वमाः' इति सूत्रेण 'ति' इत्यस्य स्थाने णलादेशेऽनुबन्धलोपे 'भू अ' इति जाते 'भुवो वुग् लुङ्लिटोः' इति सूत्रेण वुगागमेऽनुबन्धलोपे 'भूव् अ' इति जाते 'लिटि धातोरनभ्यासस्य' इति सूत्रेण भूव् इत्यस्य द्वित्वे 'भूव् भूव् अ' इति जाते 'पूर्वोऽभ्यासः' इति सूत्रेण पूर्वस्य 'भूव्' इत्यस्य अभ्याससंज्ञायाम् 'हलादिः शेषः' इति सूत्रेण आदेः हलः शेषे 'भूभूव् अ' इति स्थिते 'ह्रस्वः' इति सूत्रेण अभ्यासस्य ह्रस्वे 'भुभूव् अ' इति जाते 'भवतेरः' इति सूत्रेण अभ्यासस्य 'भु' इत्यस्य उकारस्य स्थाने अकारादेशे 'भभूव् अ' इति जाते 'अभ्यासे चर्च' इति अभ्यास्य भस्य जश्त्वेन बकारादेशे वर्णसम्मेलने 'बभूव' इति रूपं सिद्धं भवति ।

### भविता

भूधातोः 'अनद्यतने लुट्' इति सूत्रेण लुटि अनुबन्धलोपे लस्य स्थाने तिबादेशेऽनुबन्धलोपे तिपः सार्वधातुकसंज्ञायां शपि प्राप्ते तं प्रबाध्य 'स्यतासी लृलुटोः' इति सूत्रेण तासिप्रत्ययेऽनुबन्धलोपे भू तास् ति इति जाते तासः 'आर्धधातुकं शेषः' इति सूत्रेण आर्धधातुकसंज्ञायाम् 'आर्धधातुकस्येड्वलादेः' इति सूत्रेण इडागमेऽनुबन्धलोपे 'सार्वधातुकार्धधातुकयोः' इति सूत्रेण गुणे अवादेशे 'भ् अव् इ तास् ति' इति जाते 'लुटः प्रथमस्य डारौरसः' इति सूत्रेण ति इत्यस्य स्थाने डादेशेऽनुबन्धलोपे डित्त्वसामर्थ्यादभस्यापि टेः तास् इत्यस्य आस्भागस्य लोपे वर्णसम्मेलने भविता इति रूपं सिद्ध्यति ।

### भविष्यति

भूधातोः 'लृट् शेषे च' इति सूत्रेण लृटि अनुबन्धलोपे लस्य स्थाने तिबादेशेऽनुबन्धलोपे तिपः सार्वधातुकत्वेन प्राप्तं शपं प्रबाध्य 'स्यतासी लृलुटोः' इति सूत्रेण स्यप्रत्यये तस्य 'आर्धाधातुकं शेषः' इति सूत्रेण आर्धधातुकसंज्ञायाम् 'आर्धधातुकस्येड् वलादेः' इति सूत्रेण इडागमेऽनुबन्धलोपे 'भू इ स्य ति' इति जाते गुणे अवादेशे वर्णयोगे 'आदेशप्रत्यययोः' इति सूत्रेण षत्वे 'भविष्यति' इति रूपं सिद्धम् ।

## वाक्येषु प्रयोगनिदर्शनानि

१. जनको ज्ञानवान् राजा बभूव ।

२. श्रीकृष्णबलरामौ भ्रातरौ बभूवतुः ।

३. पाण्डवा वनवासिनो बभूवुः ।

४. श्रीकृष्ण ! त्वं पूर्वजन्मनि दशरथपुत्रो बभूविथ ।

५. कृष्णबलरामौ ! युवां त्रेतायुगे रामलक्ष्मणौ बभूवथुः ।

६. यूयं क्रीडनार्थं याता बभूव ।

७. अहं स्वप्ने राजा बभूव ।

८. आवां मूर्च्छया भूम्यां शयानौ बभूविव ।

९. मत्ता वयं विलपन्तो बभूविम ।

१०. श्वो विद्यालये अवकाशो भविता ।

११. यूयं परश्वो कक्षायां भवितास्थ ।

१२. अहं श्वो गृहकर्मणि संलग्नो भवितास्मि ।

१३. परिश्रमी छात्रः परीक्षायां सर्वोत्कृष्टो भविष्यति ।

१४. त्वं विद्याभ्यासेन ज्ञानवान् भविष्यसि ।

१५. वयं स्वकर्तव्ये प्रमादिनो न भविष्यामः ।

## अभ्यासः

१. **शुद्धमुच्चारणं कुरुत**

(क) परस्मैपदानां णलतुसुस्थलथुसणल्वमाः

(ख) लिटि धातोरनभ्यासस्य

(ग) आर्धधातुकस्येड्वलादेः

(घ) लुटः प्रथमस्य डारौरसः

(ङ) डित्त्वसामर्थ्यादभस्यापि टेर्लोपः

२. **रिक्तस्थानानि पूरयत**

(क) भुवो वुगागमविधायकम् .................. सूत्रमस्ति ।

(ख) तास्-स्य-प्रत्ययौ .................. प्रत्ययस्य बाधकौ स्तः ।

(ग) भविष्यति इत्यत्र सकारस्य षत्वम् .................. सूत्रं करोति ।

(घ) लिटस्तिङाम् आर्धधातुकसंज्ञा .................. सूत्रेण भवति ।

(ङ) सामान्यभविष्यत्काले .................. लकारस्य प्रयोगो भवति ।

(च) लुट्लकारस्य क्रियापदानि .................. कालार्थे प्रयुज्यन्ते ।

३. **(क) यथौचित्यं परस्परं मेलयत**

| | |
|---|---|
| तिप् | अतुस् |
| तस् | णल् |
| झि | थल् |
| सिप् | उस् |
| थस् | अ |
| थ | अथुस् |
| मिप् | म |
| वस् | णल् |
| मस् | व |

(ख) **यथौचित्यं परस्परं मेलयत**

| | |
|---|---|
| भवितारः | भवितास्मः |
| लृटो मध्यमस्य एकवचनम् | लुटः प्रथमस्य बहुवचनम् |
| भवितास्थः | भविष्यसि |
| लुट उत्तमस्य बहुवचनम् | लुटो मध्यमस्य द्विवचनम् |
| भवितासि | भविष्यन्ति |
| लृटः प्रथमस्य द्विवचनम् | लुटो मध्यमस्य एकवचनम् |
| भवितास्वः | भविष्यतः |
| लृटः प्रथमस्य बहुवचनम् | लुट उत्तमस्य द्विवचनम् |
| भवितास्मि | भविष्यामः |
| लृट उत्तमस्य बहुवचनम् | लुट उत्तमस्य एकवचनम् |

४. **अधोऽङ्कितानां प्रश्नानामुत्तराणि लिखत**

(क) लिट्लकारः कस्मिन्नर्थे विधीयते ?

(ख) कस्याभ्याससंज्ञा भवति ?

(ग) 'झशां जशः, खयां चरः' इति विवेकस्य कोऽभिप्रायः ?

(घ) अद्यतनभविष्यत्कालः कः ?

(ङ) 'आर्धधातुकं शेषः' इत्यत्र कः शेषः ?

(च) लृट्-लकारः कस्मिन्नर्थे विधीयते ?

(छ) 'भविष्यति' इत्यत्र केन इडागमः ?

(ज) कौ लृलकारौ ?

५. **सोदाहरणं सूत्राणामर्थं लिखत**

(क) लिटि धातोरनभ्यासस्य

(ख) अभ्यासे चर्च

(ग) तासस्त्योर्लोपः

(घ) लृट् शेषे च

६. **भूधातोः कर्तरि लुटि रूपाणि लिखत ।**

७. **प्रमुखसूत्रनिदर्शनपूर्वकं रूपसिद्धिप्रकारं प्रदर्शयत**

(क) बभूव (ख) बभूविथ

(ग) भविता (घ) भवितासि

(ङ) भविष्यति

८. **अधस्तनपदानां लकारपुरुषवचनानि निर्दिशत**

(क) बभूवतुः (ख) बभूविम

(ग) भवितारः (घ) भवितास्वः

(ङ) भविष्यामि

९. **सिद्धपदानि दर्शयत**

(क) भू + लिट् (झि) (ख) भू + लुट् (थस्)

(ग) भू + लिट् (थ) (घ) भू + लृट् (मस्)

१०. **अद्यतनानद्यतनयोः पार्थक्यं सोदाहरणं प्रदर्शयत ।**

११. **पदानां वाक्ये प्रयोगं निदर्शयत**

(क) बभूविथ (ख) बभूविम

(ग) भवितास्मि (घ) भवितारः

(ङ) भविष्यन्ति (च) भविष्यामः

तृतीयः पाठः

# भूधातोर्लोटि लङि विधिलिङि च रूपसाधनम्

## लोट्लकारविधायकं विधिसूत्रम्

**लोट् च ३।३।१६२।**

**विध्यादिष्वर्थेषु धातोर्लोट् ।**

(विधिनिमन्त्रणामन्त्रणाधीष्टसंप्रश्नप्रार्थनेषु, धातोः, लोट्, च)

**सरलार्थः-** विध्यादिष्वर्थेषु धातोर्लोट्लकारो भवति । विध्याद्यर्थाः 'विधिनिमन्त्रणा...' इति सूत्रप्रसङ्गे व्याख्यास्यन्ते ।

## लिङ्-लोट्-लकारद्वयविधायकं सूत्रम्

**आशिषि लिङ्लोटौ ३।३।१७३।।**

(धातोः,परः, लिङलोटौ, आशिषि)

**सरलार्थः-** आशीर्वादेऽर्थे धातोः परः लिङ्लकार-लोट्लकारौ भवतः ।

भूधातोः विध्यादिष्वर्थेषु आशीर्वादेऽर्थे वा लोट्लकारे विहिते '**भू ल्**' इति जाते तिपि शपि गुणेऽवादेशे च '**भवति**' इति जाते-

## इकारस्य उकारादेशविधायकं विधिसूत्रम्

**एरुः ३।४।८६।**

**लोट इकारस्य उः । भवतु ।**

(लोटः, एः, उः)

**सरलार्थः-** लोट्लकारस्य विषये इकारस्य स्थाने उकारादेशो भवति ।

अनेन सूत्रेण इकारस्य उत्वे '**भवतु**' इति जाते-

## तातङादेशविधायकं विधिसूत्रम्

**तुह्योस्तातङ्ङाशिष्यन्यतरस्याम् ।७।१।३५।।**

**आशिषि तुह्योस्तातङ् वा । परत्वात्सर्वादेशः । भवतात् ।।**

**सरलार्थः**- आशीर्वादार्थकस्य लोट्लकारस्य 'तु' 'हि' इत्यनयोः स्थाने विकल्पेन 'तातङ्' आदेशो भवति । ङित्त्वाद् 'ङिच्च' इत्यनेन 'तातङ्'आदेशः अन्त्यस्य स्थाने एव प्राप्तो भवति, परं परत्वात् 'अनेकाल्शित्सर्वस्य' इत्यनेन सम्पूर्णस्य स्थाने भवति । 'ङिच्च' इति सूत्रस्य प्रवृत्तिस्तु ङित्त्वस्य अन्यप्रयोजनहीनेषु 'अनङ्' 'अवङ्' इत्याद्यादेशस्थलेषु एव भवति ।

अनेन सूत्रेण 'तु' इत्यस्य स्थाने विकल्पेन 'तातङ्' इत्यादेशेऽनुबन्धलोपे '**भवतात्**' इति रूपं सिद्धयति । 'तातङ्' आदेशाभावे तु '**भवतु**' इत्येव रूपं भवति ।

### अतिदेशसूत्रम्

**लोटो लङ्वत् ३।४।८५॥**

**लोटस्तामादयः, सलोपश्च ।**

(लोटः, लङ्वत्)

**सरलार्थः**- लोट्लकारस्य प्रत्यया लङ्लकारस्य इव सन्ति । 'तस्थस्थमिपां तान्तन्तामः' इति सूत्रेण तामादिविधाने 'नित्यं ङितः' इत्यनेन सलोपविधाने च लोट्लकारो लङ्लकारवद् भवतीत्यर्थः । एतेन लोटो ङिद्वद्भावे-

### तामाद्यादेशविधायकं विधिसूत्रम्

**तस्थस्थमिपां तान्तन्तामः ३।४।१०१॥**

**ङितश्चतुर्णां तसादीनां तामादयः स्युः । भवताम् । भवन्तु ।**

(धातोः, परः, ङितः, लस्य, तस्थस्थमिपाम्, तान्तन्तामः)

**सरलार्थः**- ङिल्लकारसम्बद्धानां तस्, थस्, थ, मिप् एतेषां स्थाने क्रमेण ताम्, तम्, त, अम् एते आदेशा भवन्ति ।

लोटि तसि 'भवतस्' इति जाते 'लोटो लङ्वत्' इत्यनेन लङ्वद्भावेन लोटो ङित्त्वात् 'तस्थस्थमिपां तान्तन्तामः' इत्यनेन 'तस्' इत्यस्य स्थाने 'ताम्' इत्यादेशे '**भवताम्**' इति रूपं सिद्धयति ।

### हि इत्यादेशविधायकं विधिसूत्रम्

**सेर्ह्यपिच्च ।३।४।८७॥**

**लोटः सेर्हिः, सोऽपिच्च ।**

(लोटः, सेः, हिः, अपित्, च)

**सरलार्थः-** लोट्लकारस्य 'सि' इत्यस्य स्थाने 'हि' इत्यादेशो भवति, स हिः अपित् च भवति ।

लोटि मध्यमपुरुषस्यैकवचने सिपि शपि गुणेऽवादेशे च '**भवसि**' इत्यत्र अनेन सूत्रेण 'सि' इत्यस्य स्थाने 'हि' आदेशे '**भवहि**' इत्यत्र विकल्पेन 'तातङ्' आदेशे (**तुह्योस्तातङ्ङाशिष्यन्यतरस्याम्**) '**भवतात्**' इति रूपं जायते । तदभावे तु 'भवहि' इति स्थिते-

## हेर्लुग्विधायकं सूत्रम्

**अतो हेः ६।४।८९॥**

**अतः परस्य हेर्लुक् । भव, भवतात् । भवतम् । भवत ।**

(अतः, हेः, लुक्)

**सरलार्थः-** ह्रस्वाकारात् परस्य 'हि' इत्यस्य लुग्भवति ।

अनेन सूत्रेण 'हि' इत्यस्य लुकि 'भव' इति रूपं सिद्ध्यति ।

मध्यमपुरुषस्य द्विवचने थसि लङ्वद्भावेन थसस्तमादेशे 'भवतम्' इति रूपम् ।

मध्यमपुरुषस्य बहुवचने लङ्वद्भावेन 'थ' इत्यस्य 'त' आदेशे 'भवत' इति रूपं सिद्धम् ।

उत्तमपुरुषस्यैकवचने मिपि शबादिषु कृतेषु 'भव मि' इति जाते-

## नि इत्यादेशविधायकं विधिसूत्रम्

**मेर्निः ३।४।८९॥**

**लोटो मेर्निः स्यात् ।**

(लोटः, मेः, निः)

**सरलार्थः-** लोट्लकारस्य 'मि' इत्यस्य स्थाने 'नि' इत्यादेशो भवति ।)

अनेन 'मि' इत्यस्य स्थाने 'नि' आदेशे '**भव नि**' इति जाते-

## आडागमविधायकं सूत्रम्

**आडुत्तमस्य पिच्च ।३।४।९२॥**

**लोडुत्तमस्याऽऽट् स पिच्च । हिन्योरुत्वं न, इकारोच्चारणसामर्थ्यात् ।** भवानि ।

(लोटः, उत्तमस्य, आट्, पिच्च)

**सरलार्थः-** लोट्लकारसम्बद्धस्य उत्तमपुरुषस्य आडागमो भवति, स आडागमः पित् च भवति । आदेशसूत्रयोः 'हि' 'नि' एतयोः इकारस्य उत्वं न भवति ।)

स्थानिवद्भावेन 'नि' इत्यस्यापि उत्तमपुरुषत्वाद् अनेन सूत्रेण आडागमेऽनुबन्धलोपे टित्त्वादाद्यवयवे च 'भव आ नि' इति जाते सवर्णदीर्घे '**भवानि**' इति रूपं जायते ।

अत्र 'मेर्निः' इति सूत्रे 'नु' इति कथनीये 'नि' इत्यत्रेकारोच्चारणसामर्थ्याद् 'एरुः' इत्यनेन इकारस्य उत्वं न भवति ।

### गत्युपसर्गयोः प्रयोगनियामकं नियमसूत्रम्

**ते प्राग्धातोः १।४।८०॥**

**ते गत्युपसर्गसंज्ञका धातोः प्रागेव प्रयोक्तव्याः ।**

(धातोः, प्राक्, ते)

**सरलार्थः–** गतिसंज्ञका उपसर्गसंज्ञकाश्च शब्दाः धातोः पूर्वमेव प्रयुज्यन्ते ।

'प्र' इत्युपसर्गपूर्वकाद् 'भू'धातोर्लोटि मिपि शबादिषु न्यादेशे आडागमे सवर्णदीर्घे '**प्र भवानि**' इति जाते

### णत्वविधायकं विधिसूत्रम्

**आनि लोट् ८।४।१६॥**

**उपसर्गस्थान्निमित्तात्परस्य लोडादेशस्याऽऽनीत्यस्य नस्य णः स्यात् । प्रभवाणि ।**

(उपसर्गात्, रषाभ्याम्, लोट्, आनि, नः, णः, अट्कुप्वाङ्नुम्व्यवायेऽपि)

**सरलार्थः-** उपसर्गस्थाभ्यां रेफषकाराभ्यां परस्य लोट्लकारस्य स्थाने आदिष्टस्य 'आनि' इत्यस्य नकारस्य णत्वं भवति अट्कुप्वाङ्नुम्व्यवायेऽपि ।

अनेन सूत्रेण उपसर्गस्थाद् रेफात् परस्य 'आनि' इत्यस्य नकारस्य स्थाने णत्वे 'प्रभवाणि' इति रूपं निष्पद्यते ।

(वा.- दुरःषत्वणत्वयोरूपसर्गत्वप्रतिषेधो वक्तव्यः) । दुःस्थितिः । दुर्भवानि ।

**सरलार्थः–** षत्वविधौ णत्वविधौ च 'दुर्' इत्यस्य उपसर्गसंज्ञा न भवति ।

'दुर्' इति उपसर्गपूर्वकाद् भूधातोर्लोटि मिपि पूर्ववत् शबादिषु 'दुर् भवानि' इति जाते अनेन वार्तिकेन दुर उपसर्गत्वनिषेधेन 'आनि लोट्' इत्यस्य अप्रवृत्तौ णत्वाभावे 'दुर्भवानि' इत्येव

रूपं भवति ।

(वा.- अन्तःशब्दस्याऽङ्किविधिणत्वेषूपसर्गत्वं वाच्यम्) । अन्तर्भवाणि ।

**सरलार्थः –** अङ्विधौ, किविधौ, णत्वविधौ च 'अन्तर्' शब्द उपसर्गो मन्तव्यः ।

'अन्तर्' उपपदपूर्वकाद् भूधातोर्लोटि मिपि पूर्ववत् शबादिषु 'अन्तर् भवानि' इति जाते अनेन वार्तिकेन णत्वविधौ 'अन्तर्' इत्यस्य उपसर्गत्वाद् 'आनि लोट्' इत्यनेन 'आनि' इत्यस्य नकारस्य णत्वे 'अन्तर्भवाणि' इति रूपं सिद्धं भवति ।

## सकारस्य लोपविधायकं विधिसूत्रम्

**नित्यं ङितः ३।४।९९॥**

**सकारान्तस्य ङिदुत्तमस्य नित्यं लोपः स्यात् । अलोऽन्त्यस्येति सलोपः । भवाव । भवाम ।**

(ङितः, लस्य, उत्तमस्य, सः, नित्यम्, लोपः)

**सरलार्थः –** ङिल्लकारस्य सकारान्तस्य उत्तमपुरुषस्य अन्त्यस्य सस्य नित्यं लोपो भवति ।

भूधातोर्लोटि वसि शबादिषु आडागमे च 'भव आ वस्' इति जाते सवर्णदीर्घे 'भवावस्' इति जाते अनेन सूत्रेण सकारस्य लोपे 'भवाव' इति रूपं सिद्ध्यति । एवं बहुवचने च 'भवाम' इति रूपं निष्पद्यते ।

**भूधातोः कर्तरि लोटि रूपाणि**

| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| **प्रथमपुरुषः** | भवतु/भवतात् | भवताम् | भवन्तु |
| **मध्यमपुरुषः** | भव/भवतात् | भवतम् | भवत |
| **उत्तमपुरुषः** | भवानि | भवाव | भवाम |

## लङ्लकारविधायकं विधिसूत्रम्

**अनद्यतने लङ् ३।२।१११॥**

**अनद्यतनभूतार्थवृत्तेर्धातोर्लङ् ।**

(अनद्यतने, भूते, धातोः, लङ्)

**सरलार्थः-** वर्तमानकालाद् गतरात्रेः द्वादशवादनपार्यन्तिको कालः अद्यतनभूतकालः ततः पूर्ववर्ती कालः अनद्यतनभूतकालः तत्र द्योत्ये धातोः लङ्लकारो भवति ।

अनेन अनद्यतनभूतेऽर्थे लङ्लकारेऽनुबन्धलोपे 'भू ल्' इति जाते अङ्गसंज्ञायाम्-

### अडागमविधायकं विधिसूत्रम्

**लुङ्लङ्लृङ्क्ष्वडुदात्तः ६।४।७१॥**

**एष्वङ्गस्याऽट् ।**

(लुङ्लङ्लृङ्क्षु, धातोः, अङ्गस्य, अट्, उदात्तः)

**सरलार्थः-** लुङ्-लङ्-लृङ्लकारेषु परेषु अङ्गसंज्ञकस्य धातोः अडागमो भवति ।

अनेन अडागमेऽनुबन्धलोपे टित्वादाद्यवयवे च 'अ भू ल्' इति जाते तिपि शपि गुणेऽवादेशे च 'अभवति' इति जाते-

### इकारलोपविधायकं विधिसूत्रम्

**इतश्च ३।४।१००॥**

**ङितो लस्य परस्मैपदमिकारान्तं यत्तस्य लोपः । अभवत् । अभवताम् । अभवन् । अभवः । अभवतम् । अभवत । अभवम् । अभवाव । अभवाम ॥**

(ङितः, लस्य, परस्मैपदेषु, इतः, च, लोपः)

**सरलार्थः-** ङिल्लकारसम्बद्धस्य इकारान्तस्य परस्मैपदस्य लोपो भवति । 'अलोऽन्त्यस्य' इति सूत्रसहकारेणात्र ङिल्लकारसम्बद्धस्य परस्मैपदावयवस्यान्त्यस्य इकारस्य लोपो भवति ।

अनेनात्र इकारस्य लोपे 'अभवत्' इति रूपं सिद्ध्यति ।

प्रथमपुरुषस्य द्विवचने तसि 'अभवतस्' इत्यत्र 'तस्थस्थमिपां तान्तन्तामः' इत्यनेन तसस्तामादेशे 'अभवताम्' इति रूपं जायते ।

प्रथमपुरुषस्य बहुवचने झौ 'अभव झिः' इत्यत्र झकारस्यान्तादेशे पररूपे च 'अभवन्ति' इति जाते 'इतश्च' इति इकारस्य लोपे 'अभवन्त्' इति स्थिते नकारतकारयोः संयोगसंज्ञायां संयोगान्तस्य तकारस्य लोपे च 'अभवन्' इति रूपं सिद्ध्यति ।

मध्यमपुरुषस्यैकवचने सिपि 'अभवसि' इत्यत्र अन्त्यस्य इकारस्य लोपे पदत्वे रुत्वे विसर्गे च 'अभवः' इति रूपं भवति ।

मध्यमपुरुषस्य द्विवचने थसि ‘अभवथस्’ इत्यत्र ‘तस्थस्थमिपां तान्तन्तामः’ इत्यनेन थसस्तमादेशे ‘अभवतम्’ इति रूपं जायते ।

मध्यमपुरुषस्य बहुवचने थादेशे ‘अभवथ’ इत्यत्र ‘तस्थस्थमिपां तान्तन्तामः’ इत्यनेन थस्य तादेशे ‘अभवत’ इति रूपं सिद्ध्यति ।

उत्तमपुरुषस्यैकवचने मिपि ‘अभव मि’ इत्यत्र ‘तस्थस्थमिपां तान्तन्तामः’ इत्यनेन मिपः अमादेशे ‘अभव अम्’ इति जाते ‘अमि पूर्वः’ इत्यनेन पूर्वरूपे ‘अभवम्’ इति रूपं निष्पद्यते ।

उत्तमपुरुषस्य द्विवचने वसि ‘अभव वस्’ इत्यत्र ‘अतो दीर्घो यञि’ इति अतोऽङ्गस्य दीर्घे ‘अभवा वस्’ इति जाते ‘नित्यं ङितः’ इत्यनेन सकारस्य लोपे ‘अभवाव’ इति रूपं जायते ।

उत्तमपुरुषस्य बहुवचने मसि ‘अभव मस्’ इत्यत्र ‘अतो दीर्घो यञि’ इति अतोऽङ्गस्य दीर्घे ‘अभवा मस्’ इति जाते ‘नित्यं ङितः’ इत्यनेन सकारस्य लोपे ‘अभवाम’ इति रूपं निष्पद्यते ।

**भूधातोः कर्तरि लङि रूपाणि**

| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| **प्रथमपुरुषः** | अभवत् | अभवताम् | अभवन् |
| **मध्यमपुरुषः** | अभवः | अभवतम् | अभवत |
| **उत्तमपुरुषः** | अभवम् | अभवाव | अभवाम |

## लिङ्लकारविधायकं विधिसूत्रम्

**विधिनिमन्त्रणाऽऽमन्त्रणाऽधीष्टसंप्रश्नप्रार्थनेषु लिङ् ३।३।१६१॥**

**एष्वर्थेषु धातोर्लिङ् ।**

(धातोः, परः, विधिनिमन्त्रणाऽऽमन्त्रणाऽधीष्टसंप्रश्नप्रार्थनेषु, लिङ्)

**सरलार्थः-** विध्यर्थे, निमन्त्रणार्थे, आमन्त्रणार्थे, अधीष्टार्थे, सम्प्रश्नार्थे, प्रार्थनार्थे च धातोः अव्यवहितः परः लिङ्लकारो भवति ।

- विधिः प्रेरणम् - स्वापकृष्टानामाज्ञापनमित्यर्थः । यथा- सेवकादीनामाज्ञापने ‘भवान् भारं वहेत्’ ।

- निमन्त्रणं नियोगकरणम् । आवश्यककार्ये प्रेरणं निमन्त्रणमस्ति, यस्याकरणे हानिः जायते । यथा- 'श्राद्धं भवान् कुर्वीत' ।
- आमन्त्रणं कामचारानुज्ञा । यदिच्छया प्रवृत्तिनिमित्ते कार्ये प्रेरणमामन्त्रणं विद्यते, यस्य करणे पुण्यस्य, अकरणे च पापस्य सम्भावना न भवति । यथा- 'भवान् अत्र आसीत्' ।
- अधीष्टं सत्कारपूर्वको व्यापारः । सत्कारपूर्वकं सम्मान्यानां पुरतोऽनुरोधः अधीष्टमस्ति । यथा- 'मत्पुत्रं भवान् शिक्षयेत्' ।
- सम्प्रश्नः सम्प्रधारणम् । कस्यचित् सन्दिग्धस्य विषयस्य निश्चयार्थं विज्ञेषु विहितः प्रश्नः सम्प्रश्नोऽस्ति । यथा- वाराणसीं गच्छेयम् उत हरिद्वारम् ?
- प्रार्थनं याच्ञा । याचनमेव प्रार्थनं कथ्यते । यथा- प्रभो ! भोजनं लभेय ?

अनेन विध्यादिष्वर्थेषु लिङ्लकारे विहिते तिपि शपि गुणेऽवादेशे च 'भव + ति' इति जाते-

### यासुडागविधायकं विधिसूत्रम्

**यासुट् परस्मैपदेषूदात्तो ङिच्च ३।४।१०३॥**

**लिङः परस्मैपदानां यासुडागमो, ङिच्च ।**

(लिङः, परस्मैपदेषु, यासुडागमः, ङित्, च)

**सरलार्थः-** लिङ्सम्बद्धानां परस्मैपदानां यासुडागमो भवति, स यासुट् ङिच्च भवति ।

अनेनात्र 'ति' इत्यस्य यासुडागमेऽनुबन्धलोपे टित्त्वादाद्यवयवे च 'भव यास् ति' इति जाते-

### सस्य लोपविधायकं विधिसूत्रम्

**लिङः सलोपोऽनन्त्यस्य ७।२।७९॥**

**सार्वधातुकलिङोऽनन्त्यस्य सस्य लोपः । इति प्राप्ते ।**

(सार्वधातुके, लिङः, अङ्गस्य, अनन्त्यस्य, सलोपः)

**सरलार्थः-** सार्वधातुकलिङ्लकारस्य अनन्त्ये विद्यमानस्य सकारस्य लोपो भवति ।

अनेन सकारस्य लोपे प्राप्ते-

### इयादेशविधायकं विधिसूत्रम्

**अतो येयः ७।२।८०॥**

**अतः परस्य सार्वधातुकावयवस्य 'यास्' इत्यस्य इय् । गुणः ।**

(अतः, सार्वधातुके, येयः)

**सरलार्थः-** ह्रस्वाकारात् परस्य सार्वधातुकस्य अवयवस्य यास् इत्यस्य स्थाने इयादेशो भवति ।

अनेन सूत्रेण यास् इत्यस्य स्थाने इयादेशे, 'आद् गुणः' इति गुणे 'भवेय् ति' इति जाते-

## व्योर्लोपविधायकं विधिसूत्रम्

**लोपो व्योर्वलि ६।१।६६॥**

**भवेत् । भवेताम् ।**

(व्योः, लोपः, वलि)

**सरलार्थः-** वकारयकारयोः लोपादेशः स्यात् वलि परे ।

अनेन यकारस्य लोपे 'भवेति' इति जाते 'इतश्च' इति इकारस्य लोपे 'भवेत्' इति रूपं सिद्धम् ।

प्रथमपुरुषस्य द्विवचने तसि शपि गुणेऽवादेशे यासुडागमे इयादेशे गुणे च 'भवेय् तस्' इति जाते तसस्तामादेशे यकारस्य लोपे च 'भवेताम्' इति रूपं सिद्ध्यति ।

प्रथमपुरुषस्य बहुवचने झिप्रत्यये शपि गुणेऽवादेशे यासुडागमे इयादेशे गुणे च 'भवेय् झिः' इति जाते

## जुसादेशविधायकं विधिसूत्रम्

**झेर्जुस् ३।४।१०८॥**

**लिङो झेर्जुस् स्यात् । भवेयुः । भवेः । भवेतम् । भवेत । भवेयम् । भवेव । भवेम ।**

**सरलार्थः-** लिङ्लकारस्य स्थाने विहितस्य झि इत्यस्य स्थाने जुसादेशो भवति । जकारस्य 'चुटू' इत्यनेन इत्संज्ञायाम् 'उस्' इत्येवावशिष्यते । अनेन 'झिः' इत्यस्य स्थाने जुसादेशेऽनुबन्धलोपे च 'भवेय् उस्' इति जाते वर्णसम्मेलने पदत्वे रुत्वे विसर्गे च 'भवेयुः' इति रूपं सिद्धम् ।

मध्यमपुरुषस्यैकवचने सिपि शपि गुणेऽवादेशे यासुटि इयादेशे गुणे यलोपे च 'भवेसि' इत्यत्र इकारस्य लोपानन्तरं पदत्वे रुत्वे विसर्गे च 'भवेः' इति । मध्यमपुरुषस्य द्विवचने थसि शपि

गुणेऽवादेशे यासुटि इयादेशे गुणे यलोपे च 'भवेथस्' इत्यत्र थसस्तमादेशे 'भवेतम्' इति । मध्यमपुरुषस्य बहुवचने थादेशे शपि गुणेऽवादेशे यासुटि इयादेशे गुणे यलोपे च 'भवेथ' इत्यत्र 'थ' इत्यस्य स्थाने तादेशे 'भवेत' इति । उत्तमपुरुषस्यैकवचने मिपि शपि गुणेऽवादेशे यासुटि इयादेशे गुणे च 'भवे मि' इत्यत्र मिपः अमादेशे वर्णसम्मेलने च 'भवेयम्' इति रूपं सिद्धम् । उत्तमपुरुषस्य द्विवचने वसि शपि गुणेऽवादेशे यासुटि इयादेशे गुणे यलोपे च 'भवेवस्' इत्यत्र 'नित्यं ङितः' इति सकारस्य लोपे 'भवेव' इति रूपं सिद्ध्यति ।

एवमेव 'भवेम' इत्यपि बोध्यम् ।

**भूधातोः कर्तरि विधिलिङि रूपाणि**

| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| **प्रथमपुरुषः** | भवेत् | भवेताम् | भवेयुः |
| **मध्यमपुरुषः** | भवेः | भवेतम् | भवेत |
| **उत्तमपुरुषः** | भवेयम् | भवेव | भवेम |

**भवतु**

भूधातोः 'लोट् च' इति सूत्रेण लोटि अनुबन्धलोपे लस्य स्थाने तिबादेशेऽनुबन्धलोपे तिपः 'तिङ्शित्सार्वधातुकम्' इति सूत्रेण सार्वधातुकसंज्ञायां 'कर्तरि शप्' इति सूत्रेण शपि अनुबन्धलोपे भू अ ति इति जाते शित्त्वाद् शपोऽपि सार्वधातुकसंज्ञायाम् 'सार्वधातुकार्धधातुकयोः' इति गुणे अवादेशे वर्णसम्मेलने 'भवति' इति जाते 'एरुः' इति सूत्रेण उत्वे 'भवतु' इति । 'आशिषि लिङ्लोटौ' इति आशीर्वादार्थे लोटि विहिते तु भवतु इत्यस्य 'तु' इत्यस्य स्थाने विकल्पेन 'तुह्योस्तातङ्ङाशिष्यन्यतरस्याम्' इति सूत्रेण तातङादेशेऽनुबन्धलोपे भवतात् तातङोऽभावे 'भवतु' इत्येवं रूपं सिद्ध्यति ।

**अभवत्**

भूधातोः 'अनद्यतने लङ्' इति सूत्रेण लङि अनुबन्धलोपे भू ल् इति जाते 'लुङ्लङ्लृङ्क्ष्वडुदात्तः' इति अडागमेऽनुबन्धलोपे लस्य स्थाने तिपि तिपः सार्वधातुकससंज्ञायां शपि अनुबन्धलोपे 'अभू अ ति' इति जाते शपोऽपि सार्वधातुकतया 'सार्वधातुकार्धधातुकयोः' इति गुणे अवादेशे 'इतश्च' इति सूत्रेण 'ति' इत्यस्य इकारस्य लोपे वर्णसम्मेलने 'अभवत्' इति रूपं सिद्धम् ।

**भवेत्**

भूधातोः 'विधिनिमन्त्रणामन्त्रणाधीष्टसंप्रश्नप्रार्थनेषु लिङ्' इति सूत्रेण लिङि अनुबन्धलोपे लस्य स्थाने तिबादेशेऽनुबन्धलोपे तिपः सार्वधातुकसंज्ञायां शपि अनुबन्धलोपे भू अ ति इति जाते पुनः शपोऽपि शित्त्वाद् 'तिङ्शित्सार्वधातुकम्' इति सार्वधातुकसंज्ञायां 'सार्वधातुकार्धधातुकयोः' इति गुणे अवादेशे कृते भव ति इति जाते 'यासुट् परस्मैपदेषूदात्तो ङिच्च' इति सूत्रेण यासुडागमेऽनुबन्धलोपे 'भव यास् ति' इति जाते 'अतो येयः' इति सूत्रेण यासः स्थाने इयादेशे भव इय् ति इत्यत्र 'आद् गुणः' इति सूत्रेण गुणे 'लोपो व्योर्वलि' इति सूत्रेण यकारस्य लोपे 'इतश्च' इति सूत्रेण इकारस्य लोपे 'भवेत्' इति रूपं सिद्धं भवति ।

## वाक्येषु प्रयोगनिदर्शनानि

१. छात्रः सुशीलो भवतु ।

२. शिष्याः पठनशीला भवेयुः ।

३. त्वं ज्ञानी भव ।

४. यूयं सदाचारिणो भवेत ।

५. अहं परीक्षायां सफलो भवानि ।

६. वयं सुखिनो भवेम ।

७. ह्यो विद्यालये वार्षिकोत्सवः अभवत् ।

८. वार्षिकोत्सवे सर्वोत्कृष्टाः छात्राः पुरस्कृता अभवन् ।

९. त्वं ह्यस्तने समारोहे उपस्थितः अभवः ?

१०. यूयं ह्यः कुत्र अभवत ?

११. अहं षष्ठकक्षायां सर्वप्रथमः अभवम् ।

१२. वयं परह्यः सामाजिककार्ये सहभागिनः अभवाम ।

## अभ्यासः

### १. शुद्धमुच्चारणं कुरुत

(क) तुह्योस्तातङ्ङाशिष्यन्यतरस्याम्

(ख) सेर्ह्यपिच्च

(ग) हिन्योरुत्वं न, इकारोच्चारणसामर्थ्यात् ।

(घ) ते गत्युपसर्गसंज्ञका धातोः प्रागेव प्रयोक्तव्याः ।

(ङ) अन्तःशब्दस्याऽङ्किविधिणत्वेषूपसर्गत्वं वाच्यम् ।

(च) लुङ्लङ्लृङ्क्ष्वडुदात्तः

(छ) यासुट् परस्मैपदेषूदात्तो ङिच्च

### २. अधस्तनवाक्यानि संशोधयत

(क) छात्रा अध्ययनशीला भवताम् ।

(ख) अहं ह्यो विद्यालये अनुपस्थितः अभवामः ।

(ग) मानवा दयालवो भवतम् ।

(घ) त्वं गतदिने पाशुपतक्षेत्रे अभवत ।

(ङ) आवामद्य अस्वस्थौ अभवावः ।

(च) यूयं ह्यः कुत्र अभवः ?

(छ) भवन्तः सुखिनो भवत ।

(ज) वयं ह्यो गृहकर्मणि संलग्ना भवाम ।

### ३. यथौचित्यं परस्परं मेलयित्वा दर्शयत

| | |
|---|---|
| लोट इकारस्य उत्वविधायकम् | सेर्हिविधायकम् |
| सेर्ह्यपिच्च | अतो हेः |
| हेर्लुग्विधायकम् | लोटो लङ्वत् |
| ङित्वविधायकम् | एरुः |
| नित्यं ङितः | इकारलोपकम् |
| आडागमविधायकम् | लुङ्लङ्लृङ्क्ष्वडुदात्तः |
| अङ्गस्याड्-विधायकम् | आडुत्तमस्य पिच्च |
| इतश्च | वस्मसोः सलोपविधायकम् |

४. लोट्लकारः केष्वर्थेषु भवति ?

५. लोट्लकारस्य लङ्वद्भावकरणस्य फलानि कानि ?

६. तातङ्ङादेशः केन सूत्रेण कस्मिन् अर्थे भवति ?

७. आशिष्यर्थे केन सूत्रेण कौ लकारौ भवतः ?

८. कस्मिन्नर्थे लङ्लकारो भवति ?

९. इतश्च इति सूत्रस्यार्थं लिखत ।

१०. केन 'भवेय् ति' इत्यत्र यलोपो भवति ?

११. भवत, अभवः, भवेयुः, भवानि, अभवताम्, भवेतम्, अभवाम एषां लकारपुरुषवचनानि निर्धारयत ।

१२. भवन्तु, भवेः, भवानि, अभवन्, भवेम, इति पदानि योजयित्वा एकैकं वाक्यं निर्मात ।

१३. अधोलिखितानां प्रयोगाणां रूपसिद्धिप्रकारं दर्शयत

| | | |
|---|---|---|
| (क) भवतु/भवतात् | (ख) भवताम् | (ग) भव |
| (घ) भवानि | (ङ) भवाव | (च) अभवत् |
| (छ) अभवन् | (ज) भवेत् | (झ) भवेयुः |

१४. अधःप्रदत्तानां सूत्राणामर्थं लिखत

(क) तस्थस्थमिपां तान्तन्तामः

(ख) सेर्ह्यपिच्च

(ग) अतो हेः

(घ) लुङ्लङ्लृङ्क्ष्वडुदात्तः

(ङ) यासुट् परस्मैपदेषूदात्तो ङिच्च

(च) लिङः सलोपोऽनन्त्यस्य

(छ) झेर्जुस्

१५. 'तस्थस्थमिपां तान्तन्तामः' इत्यस्य स्थान्यादेशाः परस्परमेलनेन दर्शनीयाः ।

१६. के विध्यादय सोदाहरणमर्थापयत ।

१७. 'प्रभवाणि' इत्यत्र कथं णत्वं जायते ?

१८. सिद्धपदानि दर्शयत

(क) भू + लोट् (झि)

(ख) भू + लोट् (थस्)

(ग) भू + लङ् (सिप्)

(घ) भू + लङ् (वस्)

(ङ) भू + विधिलिङ् (तस्)

(च) भू + विधिलिङ् (मिप्)

१९. पदानां वाक्ये प्रयोगं निदर्शयत

(क) भवन्तु (ख) भव (ग) अभवः

(घ) अभवाव (ङ) भवेताम् (च) भवेम

चतुर्थः पाठः

# भूधातोः आशीर्लिङि लुङि लृङि च रूपसाधनम्

भूधातोः 'आशिषि लिङ्लोटौ' इत्यनेन आशीर्वादेऽर्थे लिङ्लकारे विहिते 'भू ल्' इति जाते लस्य स्थाने तिपि 'भू ति' इति जाते-

### आर्धधातुकसंज्ञाविधायकं सूत्रम्

**लिङाशिषि ३।४।११६॥**

**आशिषि लिङस्तिङार्धधातुकसंज्ञः स्यात् ।**

(आशिषि, लिङ्, आर्धधातुकम्)

**सरलार्थः-** आशीर्वादार्थे विहितस्य लिङः स्थाने आदिष्टस्तिङ् आर्धधातुकसंज्ञको भवति ।

इति 'ति' इत्यस्य आर्धधातुकसंज्ञायां यासुडागमेऽनुबन्धलोपे टित्त्वादाद्यवयवे च 'भू यास् ति' इति जाते-

### किदतिदेशविधायकं सूत्रम्

**किदाशिषि ३।४।१०४॥**

**आशिषि लिङो यासुट् कित्स्यात् । 'स्को'रिति सलोपः ।**

(आशिषि, लिङः, परस्मैपदेषु, यासुट्, कित्)

**सरलार्थः-** आशीर्वादार्थे विहितस्य लिङा सम्बद्धस्य यासुटः कित्त्वं भवति ।

इति यासुटः कित्त्वे ऊकारस्य गुणे प्राप्ते-

### गुणवृद्धिनिषेधकं सूत्रम्

**क्क्ङिति च १।१।५॥**

**गित्किन्ङिन्निमित्ते इग्लक्षणे गुणवृद्धी न स्तः । भूयात् । भूयास्ताम् । भूयासुः । भूयाः । भूयास्तम् । भूयास्त । भूयासम् । भूयास्व । भूयास्म ।**

(क्क्ङिति, इकः, गुणवृद्धी, न)

**सरलार्थः-** गित्प्रत्ययं कित्प्रत्ययं ङित्प्रत्ययञ्च निमित्तीकृत्य इग्लक्षणे गुणवृद्धी न भवतः । अनेन गुणनिषेधे 'भूयास् ति' इति जाते 'इतश्च' इति सूत्रेण इकारस्य लोपे सकारतकारयोः संयोगसंज्ञायां 'स्कोः संयोगाद्योरन्ते च' इत्यनेन संयोगादेः सकारस्य लोपे 'भूयात्' इति रूपं निष्पन्नम् ।

प्रथमपुरुषस्य द्विवचने तसि पूर्ववत्कार्ये 'भूयास् तस्' इति जाते तसस्तामादेशे 'भूयास्ताम्' इति रूपं सिद्धम् ।

प्रथमपुरुषस्य बहुवचने झिप्रत्यये यासुटि च 'भूयास् झिः' इति जाते झेर्जुसादेशे पदत्वे रुत्वे विसर्गे च 'भूयासुः' इति रूपं सम्पद्यते ।

मध्यमपुरुषस्यैकवचने सिपि आर्धधातुकत्वे यासुटि कित्त्वे प्राप्तस्य गुणस्य निषेधे च 'भूयास् सि' इति जाते इकारस्य लोपे सकारयोः संयोगसंज्ञायां संयोगादेः सकारस्य लोपे पदत्वे रुत्वे विसर्गे च 'भूयाः' इति रूपं सम्पद्यते ।

मध्यमपुरुषस्य द्विवचने थसि आर्धधातुकत्वे यासुटि कित्त्वे प्राप्तस्य गुणस्य निषेधे च 'भूयास् थस्' इति जाते थसस्तमादेशे च 'भूयास्तम्' इति रूपं जायते ।

मध्यमपुरुषस्य बहुवचने थादेशे आर्धधातुकत्वे यासुटि कित्त्वे प्राप्तस्य गुणस्य निषेधे च 'भूयास् थ' इति जाते 'थ' इत्यस्य तादेशे च 'भूयास्त' इति रूपं निष्पद्यते ।

उत्तमपुरुषस्य एकवचने मिपि आर्धधातुकत्वे यासुटि कित्त्वे प्राप्तस्य गुणस्य निषेधे च 'भूयास् मि' इति जाते मिपः अमादेशे वर्णसम्मेलने च 'भूयासम्' इति रूपं जायते ।

उत्तमपुरुषस्य द्विवचने वसि आर्धधातुकत्वे यासुटि कित्त्वे प्राप्तस्य गुणस्य निषेधे च 'भूयास् वस्' इति जाते 'नित्यं ङितः' इति सूत्रेण सकारस्य लोपे 'भूयास्व' इति रूपं जायते ।

एवमेव मसि 'भूयास्म' इति रूपं भवति ।

### लुङ्लकारविधायकं विधिसूत्रम्

**लुङ् ३।२।११०॥**

**भूतार्थे धातोर्लुङ् स्यात् ।**

(धातोः, परः, भूते, लुङ्)

**सरलार्थः-** भूतसामान्यार्थे धातोर्लुङ्लकारो भवति ।

### लुङ्लकारविधायकं विधिसूत्रम्

**माङि लुङ् ३।३।१७५॥**

**माङ्युपपदे धातोर्लुङ् स्यात् । सर्वलकाराऽपवादः ।**

(माङि, धातोः, परः, लुङ्)

**सरलार्थः-** माङि उपपदे सति धातोः सर्वान् लकारान् प्रबाध्य लुङ्लकारो भवति । यथा- 'मा भूत्' इति ।

### लङ्-लुङ्-लकारद्वयविधायकं विधिसूत्रम्

**स्मोत्तरे लङ् च ३।३।१७६॥**

**स्मोत्तरे माङि लङ् स्याच्चाल्लुङ् ।**

(स्मोत्तरे माङि, धातोः, परः, लुङ्, लङ् च)

**सरलार्थः-** स्म-पदोत्तरपदके माङि उपपदे धातोर्लङ्लकारो भवति । चकाराद् लुङ्लकारोऽपि भवति । यथा- **मा स्म भवत्, मा स्म भूत्** इति ।

भूधातोः सामान्यभूतेऽर्थे लुङि अडागमे तिपि सार्वधातुकत्वे च शपि प्राप्ते-

### च्लिप्रत्ययविधायकं विधिसूत्रम्

**च्लि लुङि ३।१।४३॥**

शबाद्यपवादः ।

(धातोः, लुङि, च्लि)

**सरलार्थः-** शप्-श्यन्नादिविकरणप्रत्ययान् बाधित्वा लुङि परे धातोश्च्लिप्रत्ययो भवति ।

इति सूत्रेण च्लिप्रत्यये 'अ भू च्लि ति' इति जाते-

### सिजादेशविधायकं विधिसूत्रम्

**च्लेः सिच् ३।१।४४॥**

**इचावितौ ।**

(च्लेः, सिच्)

**सरलार्थः-**च्लेः स्थाने 'सिच्' आदेशो भवति । सिचः चकारस्य इकारस्य च इत्संज्ञायाम् 'स्' इत्येव शिष्यते ।

अनेन च्लेः स्थाने 'सिच्' इत्यादेशेऽनुबन्धलोपे '**अभूस् ति**' इति जाते-

### सिज्लुगादेशविधायकं सूत्रम्

**गातिस्थाघुपाभूभ्यः सिचः परस्मैपदेषु २।४।७७॥**

**एभ्यः परस्य सिचो लुक् स्यात् परस्मैपदेषु । गापाविहेणादेशपिबती गृह्येते ।**

(गातिस्थाघुपाभूभ्यः, सिचः, लुक्, परस्मैपदेषु)

**सरलार्थः-** इणः स्थाने आदिश्यमानाद् गाधातोः, स्थाधातोः, घुसंज्ञकधातोः, पानार्थकात् पाधातोः, भूधातोश्च परस्य सिचो लुग् भवति परस्मैपदसंज्ञकेषु प्रत्ययेषु परेषु ।

अत्र 'गा' इत्यनेन 'इण्'धातोः स्थाने आदिष्टो 'गा' इत्यादेशो गृह्यते । तथैव 'पा' इत्यनेन पानार्थकः पाधातुरेव गृह्यते । घुसंज्ञकाः 'दाप्' इति, 'दैप्' इति च विहाय दारूपा धारूपाश्च धातवः सन्ति ।

अनेन भूधातोः परस्य सिचः सकारस्य लोपे 'अभूति' इति जाते ऊकारस्य गुणे प्राप्ते-

### गुणनिषेधकं सूत्रम्

**भूसुवोस्तिङि ७।३।८८॥**

**'भू' 'सू' एतयोः सार्वधातुके तिङि परे गुणो न । अभूत् । अभूताम् । अभूवन् । अभूः । अभूतम् । अभूत । अभूवम् । अभूव । अभूम ।**

(भूसुवोः, सार्वधातुके, तिङि, गुणः, न)

**सरलार्थः-** सार्वधातुके तिङि परे 'भू' इत्यस्य, 'सू' इत्यस्य च ऊकारस्य गुणो न भवति ।

अनेन तिङि परे 'भू' इत्यस्य ऊकारस्य गुणनिषेधे अन्त्यस्य इकारस्य लोपे च 'अभूत्' इति रूपं सिद्ध्यति ।

प्रथमपुरुषस्य द्विवचने तसि च्लौ सिचि सिचो लुकि प्राप्तस्य गुणस्य निषेधे तसस्तामादेशे च 'अभूताम्' इति रूपं जायते ।

प्रथमपुरुषस्य बहुवचने झिप्रत्यये, च्लौ, सिचि, सिचो लुकि, प्राप्तस्य गुणस्य निषेधे, झोऽन्तादेशे 'अभू अन्ति' इति जाते वुगागमेऽनुबन्धलोपे कित्त्वादन्तावयवे 'अभूवन्ति' इति जाते अन्त्यस्य इकारस्य लोपे नकारतकारयोः संयोगसंज्ञायां संयोगान्तस्य तकारस्य लोपे च 'अभूवन्' इति रूपं निष्पद्यते ।

मध्यमपुरुषस्यैकवचने सिपि च्लौ सिचि सिचो लुकि प्राप्तस्य गुणस्य निषेधे अन्त्यस्य इकारस्य लोपे पदत्वे रुत्वे विसर्गे च 'अभूः' इति रूपं सिद्धयति । मध्यमपुरुषस्य द्विवचने थसि च्लौ सिचि सिचो लुकि प्राप्तस्य गुणस्य निषेधे थसस्तमादेशे च 'अभूतम्' इति रूपं निष्पन्नम् । मध्यमपुरुषस्य बहुवचने थे च्लौ सिचि सिचो लुकि प्राप्तस्य गुणस्य निषेधे थस्य तादेशे च 'अभूत' । उत्तमपुरुषस्यैकवचने मिपि च्लौ सिचि सिचो लुकि प्राप्तस्य गुणस्य निषेधे मिपः अमादेशे वुगागमे च 'अभूवम्' इति रूपं भवति । उत्तमपुरुषस्य द्विवचने वसि च्लौ सिचि सिचो लुकि प्राप्तस्य गुणस्य निषेधे अन्त्यस्य सकारस्य लोपे च 'अभूव' इति रूपम् । एवं मसि 'अभूम' इति रूपं बोध्यम् ।

### अडाटोः निषेधकं सूत्रम्

**न माङ्योगे ६।४।७४॥**

**माङ्योगे अडाटौ न स्तः । मा भवान् भूत् । मा स्म भवत् । मा स्म भूत् ।**

(माङ्योगे, धातोः, अट्, आट्, न)

**सरलार्थः– माङि उपपदे** धातोः अडागम-आडागमौ न भवतः ।

'माङ्' इत्युपपदपूर्वकाद् भूधातोः लुङ्लकारे, अनुबन्धलोपे, अडागमे प्राप्ते 'न माङ्योगे' इति सूत्रेण निषेधे 'मा भू ल्' इति जाते तिपि, च्लिप्रत्यये, सिजादेशे, सिचो लुकि च 'मा भू ति' इति जाते प्राप्तस्य गुणस्य 'भूसुवोस्तिङि' इति निषेधे, इकारस्य लोपे च 'मा भूत्' इति रूपं सिद्धयति । 'मा अभूत्' इत्यत्र सवर्णदीर्घे विहितेऽपि 'मा भूत्' इति भवति । अतोऽत्र अडागमाभावं निश्चेतुं सवर्णदीर्घाभावप्रदर्शनाय मध्ये भवच्छब्दस्य प्रयोगं कृत्वा 'मा भवान् भूत्' इत्युदाहृतमस्ति ।

स्मोत्तरे माङि उपपदे भूधातोः 'स्मोत्तरे लङ् च' इत्यनेन लङ्लकारे प्राप्तस्य अडागमस्य 'न माङ्योगे' इति निषेधे तिपि शपि गुणेऽवादेशे इकारस्य लोपे च 'मा स्म भवत्' इति रूपं भवति । सूत्रे चकारपाठाद् लुङ्लकारे पूर्ववद् 'मा स्म भूत्' इति रूपं जायते ।

**भूधातोः कर्तरि लुङि रूपाणि–**

| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| **प्रथमपुरुषः** | अभूत् | अभूताम् | अभूवन् |
| **मध्यमपुरुषः** | अभूः | अभूतम् | अभूत |
| **उत्तमपुरुषः** | अभूवम् | अभूव | अभूम |

## लृङ्लकारविधायकं विधिसूत्रम्

**लिङ्निमित्ते लृङ् क्रियातिपत्तौ ३।३।१३९॥**

**हेतुहेतुमद्भावादि लिङ्निमित्तं तत्र भविष्यदर्थाद्धातोर्लृङ् क्रियाया अनिष्पत्तौ गम्यमानायाम् । अभविष्यत् । अभविष्यताम् । अभविष्यन् । अभविष्यः । अभविष्यतम् । अभविष्यत । अभविष्यम् । अभविष्याव । अभविष्याम । 'सुवृष्टिश्चेदभविष्यत्तदा सुभिक्षमभविष्यत्' इत्यादि ज्ञेयम् ।**

(लिङ्निमित्ते, धातोः, लृङ्, क्रियातिपत्तौ)

**सरलार्थः-** हेतुः कारणमस्ति । हेतुमत् कार्यमस्ति । हेतुहेतुमद्भावः कार्यकारणभावः । लिङ्लकारविधायकैर्विविधसूत्रैः निर्दिष्टं कार्यकारणभावादिकमेव लिङ्निमित्तमस्ति । क्रियातिपत्तिर्नाम क्रियाया असिद्धिः । क्रियाया असिद्धिर्वर्तते चेत् तादृशे लिङ्निमित्ते यत्र भविष्यत्कालस्य विवक्षा भवति तत्र धातोः लृङ्लकारो भवति । यथा- 'यदि सुवृष्टिः अभविष्यत्, तर्हि सुभिक्षम् अभविष्यत्' इत्यादि ।

भू-धातोः हेतुहेतुमद्भावादौ भविष्यत्यर्थे लृङि, अडागमे, तिपि, स्यप्रत्यये, आर्धधातुकत्वे, इडागमे ऊकारस्य गुणे, अवादेशे, सकारस्य षत्वे, इकारस्य लोपे च 'अभविष्यत्' इति रूपं सिद्ध्यति । तसादौ लङ्लकारवत् तामादिविधानेन 'अभविष्यताम्' इत्यादीनि रूपाणि सिद्ध्यन्ति ।

**भूधातोः कर्तरि लृङ्लकारे रूपाणि**

| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| **प्रथमपुरुषः** | अभविष्यत् | अभविष्यताम् | अभविष्यन् |
| **मध्यमपुरुषः** | अभविष्यः | अभविष्यतम् | अभविष्यत |
| **उत्तमपुरुषः** | अभविष्यम् | अभविष्याव | अभविष्याम |

### भूयात्

भूधातोः 'आशिषि लिङ्लोटौ' इति सूत्रेण लिङि अनुबन्धलोपे लस्य स्थाने तिबादेशेऽनुबन्धलोपे तिपः प्राप्तां सार्वधातुकसंज्ञां बाधित्वा 'लिङाशिषि' इति सूत्रेण आर्धधातुकसंज्ञायाम् 'यासुट् परस्मैपदेषूदात्तो ङिच्च' इति सूत्रेण यासुडागमेऽनुबन्धलोपे यासुटि ङित्वे च जाते 'भू यास् ति' इत्यत्र 'सार्वधातुकार्धधातुकयोः' इति प्राप्तस्य गुणस्य 'क्क्ङिति च' इति सूत्रेण निषेधे 'इतश्च' इति सूत्रेण इकारस्य लोपे सकारस्य 'स्कोः संयोगाद्योरन्ते च' इति सूत्रेण लोपे 'भूयात्' इति रूपं सिद्ध्यति ।

### अभूत्

भूधातोः 'लुङ्' इति सूत्रेण लुङि अनुबन्धलोपे 'भू ल्' इति जाते 'लुङ्लङ्लृङ्क्ष्वडुदात्तः' इति सूत्रेण अडागमेऽनुबन्धलोपे लस्य स्थाने तिपि अनुबन्धलोपे तिपः सार्वधातुकसंज्ञायां शपि प्राप्ते तं प्रबाध्य 'च्लि लुङि' इति च्लिप्रत्यये च्लेः स्थाने 'च्लेः सिच्' इति सूत्रेण सिजादेशेऽनुबन्धलोपे अभू स् ति इति जाते 'गातिस्थाघुपाभूभ्यः सिचः परस्मैपदेषु' इति सूत्रेण सिचो लुकि 'सार्वधातुकार्धधातुकयोः' इति सूत्रेण गुणे प्राप्ते 'भूसुवोस्तिङि' इति सूत्रेण तन्निषेधे 'इतश्च' इति सूत्रेण ति इत्यस्य इकारस्य लोपे अभूत् इति रूपं सिद्धम् ।

### अभविष्यत्

भूधातोः 'लिङ्निमित्ते लृङ् क्रियातिपत्तौ' इति सूत्रेण लृङि अनुबन्धलोपे 'भू ल्' इति जाते 'लुङ्लङ्लृङ्क्ष्वडुदात्तः' इति सूत्रेण अडागमेऽनुबन्धलोपे लस्य स्थाने तिबादेशेऽनुबन्धलोपे तिपः सार्वधातुकत्वेन प्राप्तं शपं बाधित्वा 'स्यतासी लृलुटोः' इति सूत्रेण स्यप्रत्यये तस्य 'आर्धधातुकं शेषः' इति सूत्रेण आर्धधातुकसंज्ञायाम् 'आर्धधातुकस्येड्वलादेः' इति सूत्रेण इडागमेऽनुबन्धलोपे 'अभू इ स्य ति' इति जाते 'सार्वधातुकार्धधातुकयोः' इति सूत्रेण गुणे अवादेशे वर्णसम्मेलने 'अभविस्यति' इति जाते 'इतश्च' इति सूत्रेण 'ति' इत्यस्य इकारस्य लोपे 'आदेशप्रत्यययोः' इति षत्वे 'अभविष्यत्' इति रूपं सिद्धम् ।

## वाक्येषु प्रयोगनिदर्शनम्

१. अद्य विद्यालये कस्य पठनम् अभूत् ?

२. अद्य सर्वे विद्यार्थिनो विद्यालये उपस्थिता अभूवन् ।

३. त्वमद्य प्रातःकाले कुत्र अभूः ?

४. यूयम् अद्य पठनसमये कुत्र अभूत ?

५. अहम् अद्य कक्षायाम् अनुपस्थितः अभूवम् ।

६. वयं सफला अभूम ।

७. यदि सुवृष्टिः अभविष्यत् तर्हि सुभिक्षमभविष्यत् ।

८. यदि अभिभावकाः सुशिक्षिता अभविष्यन् तर्हि सन्ततयः सुशीला अभविष्यन् ।

९. त्वं यदि परिश्रमी अभविष्यः तर्हि सफलः अभविष्यः ।

१०. यूयं यदि धनवन्तः अभविष्यत तर्हि दानवन्तः अभविष्यत ।

११. अहं यदि प्रथमः अभविष्यं तर्हि पुरस्कृतः अभविष्यम् ।

१२. यदि वयं ज्ञानिनः अभविष्याम तर्हि सुखिनः अभविष्याम ।

१३. रमेशः चिरञ्जीवी भूयात् ।

१४. प्राणिनः सुखिनो भूयासुः

१५. अहं व्याकरणशास्त्रे निष्णातो भूयासम् ।

## अभ्यासः

१. **शुद्धमुच्चारणं कुरुत**

(क) क्क्ङति च

(ख) स्मोत्तरे लङ् च

(ग) गातिस्थाघुपाभूभ्यः सिचः परस्मैपदेषु ।

(घ) लिङ्निमित्ते लृङ् क्रियातिपत्तौ ।

२. **लुङ्लकारः कस्मिन् काले प्रयुज्यते ?**

३. **लुङि वुगागमः कस्मिन् कस्मिन् प्रयोगे भवति ?**

४. **च्लिप्रत्ययः कस्य बाधको वर्तते ?**

५. **'गातिस्थाघुपाभूभ्यः सिचः परस्मैपदेषु इति सूत्रस्यार्थं लिखत ।**

६. **लुङि गुणस्याभावे कारणं लिखत ।**

७. **हेतुहेतुमद्भावः कस्य लकारस्य निमित्तमस्ति ?**

८. **'क्रियाया अनिष्पत्तौ गम्यमानायाम्' इत्यस्य तात्पर्यं स्पष्टयत ।**

९. **लृङ्लकारे स्यप्रत्ययः केन सूत्रेण भवति ?**

१०. **लुङि अडागमः केन सूत्रेण विधीयते ?**

११. **भूयात्, अभूम, अभूवम्, अभविष्यत्, अभविष्यः इति पदानि प्रयुज्य एकैकं वाक्यं निर्मात ।**

१२. **अधोनिर्दिष्टानां प्रयोगाणां सिद्धिप्रक्रियां लिखत**

भूयासुः, भूयासम्, अभूत्, अभूवन्, अभूः, अभूवम्, अभविष्यन्, अभविष्यम्, अभविष्याम ।

१३. **परस्परं मेलयत**

| | |
|---|---|
| (क) भविष्यत्कालबोधकः | लङ्लकारः |
| (ख) लुट्लकारः | भूतकालबोधकः |
| (ग) अनद्यतनभूतकालबोधकः | लट्लकारः |
| (घ) लोट्लकारः | लिङ्लकारः |
| (ङ) वर्तमानकालबोधकः | विध्याद्यर्थबोधकः |
| (च) लुङ्लकारः | अनद्यतनभविष्यत्कालबोधकः |
| (छ) अनद्यतनपरोक्षभूतकालबोधकः | लृट्लकारः |
| (ज) आशिषि अर्थे लकारः | लिट्लकारः |

१४. **रिक्तस्थानानि यथौचित्यं पूरयत**

(क) संयोगादिलोपः ………… इति सूत्रेण भवति ।

(ख) सिचः लुक् ………… इति सूत्रेण भवति ।

(ग) लुङो मध्यमपुरुषस्य एकवचने ………… इति रूपं सिद्ध्यति ।

(घ) च्लेः स्थाने ………… आदेशो भवति ।

(ङ) लृङः प्रथमपुरुषस्य द्विवचने ………… इति रूपं भवति ।

(च)भूधातोः लुङ्लकारे गुणनिषेधकम् ………… इति सूत्रमस्ति ।

(छ) लृङि षत्वविधायकम् ………… सूत्रम् अस्ति ।

१५. **सोदाहरणं सूत्राणामर्थं लिखत**

(क) क्ङिति च

(ख) माङि लुङ्

(ग) भूसुवोस्तिङि

(घ) लिङ्निमित्ते लृङ् क्रियातिपत्तौ

१६. **सत्तार्थकभूधातोः कर्तरि लुङि रूपाणि लिखत ।**

१७. **अधस्तनपदानां लकारपुरुषवचनानि निदर्शयत**

(क) भूयासुः (ख) भूयास्त

(ग) अभूताम् (घ) अभूत

(ङ) अभविष्यः (च) अभविष्याव

१८. **पदानां वाक्ये प्रयोगं दर्शयत**

(क) भूयाः (ख) भूयासम्

(ग) अभूवन् (घ) अभूतम्

(ङ) अभविष्यन् (च) अभविष्यम्

पञ्चमः पाठः

# अतप्रभृतीनां परस्मैपदिधातूनां प्रयोगसिद्धिनिदर्शनम्

**अत सातत्यगमने ॥२॥ अतति ।**

सातत्यगमनं नाम नदीनामिव नैरन्तर्येण चलनम् । अतधातुरयं, सेट्, सकर्मकः, परस्मैपदी च वर्तते । अकारः उदात्तः इत्संज्ञकः । 'अत्' इति शब्दस्य 'भूवादयो धातवः' इति सूत्रेण धातुसंज्ञायां तस्माद् लटि तिपि शपि च 'अतति' इति रूपं सिद्ध्यति । तसादौ भूधातोर्लट् लकारस्येव सर्वाणि रूपाणि भवन्ति । अततः । अतन्ति । अतसि । अतथः । अतथ । अतामि । अतावः । अतामः ।

'अत्' धातोर्लिटि तिपि तिपो णलादेशे च 'अत् अ' इत्यत्र द्वित्वेऽभ्यासत्वे हलादिशेषे च 'अ अत् अ' इति जाते-

## दीर्घविधायकं विधिसूत्रम्

**अत आदेः ७।४।७०॥**

**अभ्यासस्याऽऽदेरतो दीर्घः स्यात् । पररूपाऽपवादः । आत । आततुः । आतुः । आतिथ । आतथुः । आत । आत । आतिव । आतिम । अतिता । अतिष्यति । अततु ।**

(अभ्यासस्य, आदेः, अतः, दीर्घः)

**सरलार्थः-** अभ्यासस्य आदौ वर्तमानस्य अकारस्य दीर्घो भवति । 'अतो गुणे' इति सूत्रेण प्राप्तं पररूपमनेन सूत्रेण बाध्यते ।

अनेन सूत्रेण अभ्यासादेः अकारस्य दीर्घे 'आ अत् अ' इति जाते सवर्णदीर्घे वर्णसम्मेलने च 'आतु इति रूपं सिद्ध्यति । एवं लिट्लकारस्य सर्वाणि रूपाणि जायन्ते । 'लिट् च' इति आर्धधातुकसंज्ञायां सिपि वसि मसि च इडागमो विधेयः ।

लुटि तिपि तासिप्रत्यये इडागमे च 'अतितास् ति' इति जाते तिपो 'डा' आदेशे टिसंज्ञायां डित्त्वसामर्थ्यादभस्यापि टेर्लोपे 'अतिता' इति रूपं जायते । एवं भूधातोर्लुटि इव अस्यापि अतितारौ, अतितारः, अतितासि, अतितास्थः, अतितास्थ, अतितास्मि, अतितास्वः, अतितास्मः इति रूपाणि जायन्ते ।

लृटि तिपि स्यप्रत्यये इडागमे षत्वे च 'अतिष्यति' इति रूपं जायते । एवमेव अतिष्यतः, अतिष्यन्ति, अतिष्यसि, अतिष्यथः, अतिष्यथ, अतिष्यामि, अतिष्यावः, अतिष्यामः ।

लोटि तिपि शपि इकारस्य उत्वे च 'अततु' इति जाते विकल्पेन 'तातङ्' आदेशे 'अततात्' इति रूपं जायते । 'तातङ्'-आदेशाभावपक्षे तु 'अततु' इति रूपं भवति । अतताम्, अतन्तु, अत/अततात्, अततम्, अतत, अतानि, अताव, अताम इति भूधातवद् रूपाणि बोध्यानि ।

लङि 'अत् ल्' इति जाते-

## आडागमविधायकं विधिसूत्रम्

**आडजादीनाम् ६।४।७२॥**

**अजादेरङ्गस्याऽऽड् लुङ्-लङ्-लृङ्क्षु । आतत् । अतेत् । अत्यात् । अत्यास्ताम् । लुङि सिचि इडागमे कृते ।**

(अजादीनाम्, अङ्गस्य, आट्, लुङ्लङ्लृङ्क्षु)

**सरलार्थः–** लुङ्-लङ्-लृङ्लकारेषु परेषु अजादेः अङ्गस्य (धातोः) 'आड्' आगमो भवति । 'लुङ्लङ्लृङ्क्ष्वडुदात्तः' इत्यनेन लुङ्-लङ्-लृङ्लकारेषु परेषु सर्वेषां धातूनाम् अडागमः प्राप्तः, तं प्रबाध्य अनेन सूत्रेण लुङ्-लङ्-लृङ्लकारेषु परेषु अजादीनां धातूनाम् 'आट्' आगमो भवति ।

अनेनैव 'आट्' आगमेऽनुबन्धलोपे टित्त्वादाद्यवयवे 'आ अत् ल्' इति जाते 'आटश्च' इति सूत्रेण वृद्धौ 'आत् ल्' इति जाते तिपि शपि अन्त्यस्य इकारस्य च लोपे (इतश्च) 'आतत्' इति रूपं सिद्धम् । तसादिषु परेषु भूधातोर्लङि इव सर्वाणि रूपाणि ज्ञेयानि । आडागमः आतताम्, आतन्, आतः, आततम्, आतत, आतम्, आताव, आताम सर्वत्र विधेयः ।

विध्याद्यर्थेषु लिङि तिपि शपि 'अतति' इत्यत्र यासुडागमे सलोपं प्रबाध्य इयादेशे यकारस्य लोपे अन्त्यस्य इकारस्य च लोपे 'अतेत्' इति रूपं जायते । एवं भूधातोरिव अस्यापि विध्याद्यर्थके लिङि सर्वाणि रूपाणि सिद्ध्यन्ति । अतेत्, अतेताम्, अतेयुः, अतेः, अतेतम्, अतेत, अतेयम्, अतेव, अतेम ।

आशीर्वादेऽर्थे लिङि तिपि आर्धधातुकत्वे यासुडागमे 'अत्यास् ति' इति जाते अन्त्यस्य इकारस्य लोपे सकारतकारयोः संयोगसंज्ञायां संयोगादेः सकारस्य 'स्कोः संयोगाद्योरन्ते च' इति सूत्रेण लोपे 'अत्यात्' इति रूपं सिद्ध्यति । एवं भूधातोरिव अस्यापि आशीर्वादार्थके लिङि सर्वाणि रूपाणि जायन्ते । अत्यास्ताम्, अत्यासुः, अत्याः, अत्यास्तम्, अत्यास्त, अत्यासम्, अत्यास्व, अत्यास्म ।

भूतसामान्येऽर्थे लुङि आडागमे वृद्धौ च 'आत् ल्' इति जाते तिपि च्लिप्रत्यये सिचि आर्धधातुकत्वेन इडागमे अन्त्यस्य इकारस्य लोपे च 'आतिस् त्' इति जाते तकारस्य अपृक्तसंज्ञायाम् (अपृक्त एकाल् प्रत्ययः)-

### ईडागमविधायकं विधिसूत्रम्

**अस्तिसिचोऽपृक्ते ७।३।९६॥**

**विद्यमानात्सिचोऽस्तेश्च परस्याऽपृक्तस्य हल ईडागमः ।**

(अस्तिसिचः, अङ्गाद्, अपृक्ते, सार्वधातुके, हलि, ईट्)

**सरलार्थः-** विद्यमानात् सिचः सकारात् 'अस्'धातोश्च परस्य अपृक्तस्य हलः 'ईट्'आगमो भवति ।

अनेन अपृक्तस्य तकारस्य 'ईट्' इत्यागमेऽनुबन्धलोपे टित्त्वादाद्यवयवे च 'आतिस् ईत्' इति जाते-

### सकारलोपविधायकं विधिसूत्रम्

**इट ईटि ८।२।२८॥**

**इटः परस्य सस्य लोपः स्यादीटि परे ।**

(इटः, सस्य, लोपः, ईटि)

**सरलार्थः-** इडागमस्य इकारात् परस्य सकारस्य लोपो भवति ईडागमस्य ईकारे परे ।

इति सूत्रेण इटः परस्य सकारस्य लोपे 'आति ईत्' इति जाते सवर्णदीर्घे कर्तव्ये 'पूर्वत्रासिद्धम्' इति सूत्रसहकारेण 'अकः सवर्णे दीर्घः' इति सपादसप्ताध्यायीसूत्रस्य दृष्टौ 'इट ईटि' त्रिपादीसूत्रस्य असिद्धत्वे प्राप्ते-

**(सिज्लोप एकादेशे सिद्धो वाच्यः) । आतीत् । आतिष्टाम् ।**

**सरलार्थः-** पूर्वपरयोः स्थाने एकादेशे कर्तव्ये त्रिपाद्यां वर्तमानेन सूत्रेण विहितोऽपि सिज्लोपः सिद्धो भवति ।

अनेन वार्तिकेन पूर्वपरयोः स्थाने सवर्णदीर्घे एकादेशे कर्तव्ये सिज्लोपस्य सिद्धत्वाद् 'अकः सवर्णे दीर्घः' इति सूत्रेण सवर्णदीर्घे '**आतीत्**' इति रूपं निष्पद्यते ।

द्विवचने आटि तसि च्लिप्रत्यये सिचि इडागमे तसस्तामादेशे सकारस्य षत्वे च 'आतिष् ताम्' इति जाते तकारस्य ष्टुत्वे '**आतिष्टाम्**' इति रूपं सिद्ध्यति ।

बहुवचने आटि झिप्रत्यये च्लिप्रत्यये सिचि इडागमे च 'आतिस् झिः' इति जाते-

### जुसादेशविधायकं विधिसूत्रम्

**सिजभ्यस्तविदिभ्यश्च ३।४।१०९॥**

**सिचोऽभ्यस्ताद्विदेश्च परस्य ङित्सम्बन्धिनो झेर्जुस् । आतिषुः । आतीः । आतिष्टम् । आतिष्ट । आतिषम् । आतिष्व । आतिष्म । आतिष्यत् । षिध गत्याम् ॥३॥**

(सिजभ्यस्तविदिभ्यः, च, ङितः, झेः, जुस्)

**सरलार्थः-** सिचः, अभ्यस्तसंज्ञकाद् धातोः, विद्धातोश्च परस्य ङिल्लकारसम्बन्धिनो झेः स्थाने 'जुस्' आदेशो भवति । स्थानिवत्त्वेन प्रत्ययत्वात् 'चुटू' इति सूत्रेण जकारस्य इत्संज्ञा भवति । तेन 'जुस्' इत्यस्य 'उस्' इत्येव अवशिष्यते ।

अत्र सिचः परस्य 'झिः' इत्यस्य स्थाने जुसादेशेऽनुबन्धलोपे 'आतिस् उस्' इति जाते सकारस्य षत्वे वर्णसम्मेलने पदत्वे रुत्वे विसर्गे च '**आतिषुः**' इति रूपं सिद्धम् ।

सिपि तिपि इव कार्येषु सत्सु 'आतीस्' इति जाते रुत्वे विसर्गे च आतीः इति रूपं सिद्ध्यति । शेषं पूर्ववत् ।

लृङ्लकारे आडागमे वृद्धौ तिपि स्यप्रत्यये इडागमे सकारस्य षत्वे अन्त्यस्य इकारस्य लोपे च 'आतिष्यत्' इति रूपं सिद्ध्यति । एवं भूधातोरिव लृङ्लकारस्य सर्वाणि रूपाणि जायन्ते । आतिष्यताम्, आतिष्यन्, आतिष्यः, आतिष्यतम्, आतिष्यत, आतिष्यम्, आतिष्याव, आतिष्याम ।

**षिध गत्याम् ॥३॥** (षिध्, सेट्, सकर्मकः, परस्मैपदी)

षिध गत्यामिति धातौ अकार उदात्त इत्संज्ञकः । षिध् इत्यस्य धातुसंज्ञायाम् 'धात्वादेः षः सः' इति सूत्रेण षस्य सत्वे सिध् इत्यस्माद् धातोः लटि, तिपि, शपि च 'सिध् अति' इति जाते शपः सार्वधातुकसंज्ञायाम् आह-

### लघुसंज्ञाविधायकं सूत्रम्

**ह्रस्वं लघु १।४।१०॥**

**(ह्रस्वं, लघु)**

**सरलार्थः-** ह्रस्ववर्णः लघुसंज्ञको भवति ।

अनेन सिध् इत्यत्र इकारस्य लघुसंज्ञायाम्-

### गुरुसंज्ञाविधायकं सूत्रम्

**संयोगे गुरु १।४।११॥**

**संयोगे परे ह्रस्वं गुरु स्यात् ।**

(संयोगे, ह्रस्वम्, गुरु)

**सरलार्थः-** संयोगे वर्णे परे ह्रस्ववर्णः गुरुसंज्ञको भवति ।

### गुरुसंज्ञाविधायकं सूत्रम्

**दीर्घं च १।४।१२॥**

**गुरु स्यात् ॥**

(दीर्घम्, च, गुरु)

**सरलार्थः-** दीर्घवर्णश्च गुरुसंज्ञको भवति ।

### गुणादेशविधायकं विधिसूत्रम्

**पुगन्तलघूपधस्य च ।७।३।८६॥**

**पुगन्तस्य लघूपधस्य चाङ्गस्येको गुणः सार्वधातुकार्धधातुकयोः । धात्वादेरिति सः । सेधति । षत्वम् । सिषेध ॥**

(पुगन्तस्य लघूपधस्य, च, अङ्गस्य, इकः, गुणः, सार्वधातुकार्धधातुकयोः)

**सरलार्थः-** पुगन्तस्य लघूपधस्य च अङ्गस्य अवयवस्य इकः स्थाने गुणो भवति सार्वधातुकार्धधातुकयोः प्रत्यययोः परयोः सतोः ।

अनेन सूत्रेण लघुसंज्ञकस्योपधाभूतस्येकारस्य गुणे वर्णसम्मेलने **सेधति** इति रूपं सिद्धचति । एवं सेधतः, सेधन्ति, सेधसि, सेधथः, सेधथ, सेधामि, सेधावः सेधामः इत्येते प्रयोगाः बोध्याः ।

षिध्-धातोः सत्वे तस्माद् लिट्लकारे, तिपि, णलि, धातोर्द्वित्वे, हलादिशेषे च 'सिसिध् अ' इत्यवस्थायां द्वितीयसकारस्यादेशरूपत्वाद् 'आदेशप्रत्यययोः' इति षत्वे अनेन सूत्रेण गुणे च 'सिषेध' इति रूपं सिद्धम् ।

तसि, अतुसादेशे 'सिषिध् अतुस्' इति जाते 'अतुस्' इत्यस्य 'लिट् च' इत्यनेन आर्धधातुकसंज्ञायां तस्मिन् परे 'पुगन्तलघूपधस्य च' इति सूत्रेण गुणे प्राप्ते आह-

### किदतिदेशविधायकं सूत्रम्

**असंयोगाल्लिट् कित् १।२।५॥**

असंयोगात्परोऽपिल्लिट् कित् स्यात् । सिषिधतुः । सिषिधुः । सिषेधिथ । सिषिधथुः । सिषिध । सिषेध । सिषिधिव । सिषिधिम । सेधिता । सेधिष्यति । सेधतु । असेधत् । सेधेत् । सिद्ध्यात् । असेधीत् । असेधिष्यत् ।

(असंयोगात्, अपित् लिट्, कित्)

**सरलार्थः-** असंयोगात् परस्थितः पिद्भिन्नः लिट् कित् इव भवति ।

अनेन अतुसः कित्वाद् 'पुगन्तलघूपधस्य च' इति सूत्रेण न गुणः । 'सिषिध् अतुस्' इत्यवस्थायां वर्णसम्मेलने, रुत्वे, विसर्गे च सिषिधतुः इति रूपं सिद्धम् । सिषिधुः, सिषेधिथ, सिषिधथुः, सिषिध, सिषेध, सिषिधिव, सिषिधिम । शेषलकारेषु सिध्धातुः अत्धातुवत्, लघूपधगुणोऽत्र विशेषः । सेधिता, सेधिष्यति, सेधतु, असेधत्, सेधेत्, सिद्ध्यात्, असेधीत्, असेधिष्यत् ।

**चिती संज्ञाने ॥४॥** शिच्- सेट्, अकर्मकः, परस्मैपदी । चित्धातुः सिध्धातुवत् । चेतति, चिचेत, चेतिता, चेतिष्यति, चेततु, अचेतत्, चेतेत्, चित्यात्, अचेतीत्, अचेतिष्यत् ।

**शुच शोके ॥५॥** (शत्- सेट्, अकर्मकः परस्मैपदी)

शुच्धातोरपि सिध्धातुवद् रूपाणि चलन्ति । शोचति, शुशोच, शोचिता, शोचिष्यति, शोचतु, अशोचत्, शोचेत्, शुच्यात्, अशोचीत्, अशोचिष्यत् ।

**गद व्यक्तायां वाचि ॥६॥** (गद्- धातुः सेट्, परस्मैपदी, सकर्मकः)

गद इत्यस्य अकारः उदात्तः इत्संज्ञकः । गद्-इत्यस्य धातुसंज्ञायां ततो लटि तिपि शपि च 'गदति' इति रूपं सिद्ध्यति । गदतः, गदन्ति, गदसि, गदथः, गदथ, गदामि गदावः, गदामः ।

'प्र नि' इत्युपसर्गपूर्वकाद् गद्धातोर्लटि तिपि शपि 'प्रनिगदति' इति जाते-

### णत्वदेशविधायकं विधिसूत्रम्

**नेर्गद-नद-पत-पद-घु-मा-स्यति-हन्ति-याति-वाति-द्राति-प्साति-वपति-वहति-शाम्यति-चिनोति-देग्धिष' च ८।४।१७॥**

**उपसर्गस्थान्निमित्तात्परस्य नस्यणो गदादिषु परेषु । प्रणिगदति ।**

(रषाभ्याम्, उपसर्गात्, **गद**-नद-पत-पद-घु-मा-स्यति-हन्ति-याति-वाति-द्राति-प्साति-वपति-वहति-शाम्यति-चिनोति-देग्धिषु, नेः, नः, च, णः)

**सरलार्थः-** उपसर्गस्थाद् णत्वनिमित्ताद् रेफात् षकाराद् वा परस्य 'नि' इत्युपसर्गस्य नकारस्य स्थाने णकारादेशो भवति गदादिषु धातुषु परेषु सत्सु ।

अनेन सूत्रेण प्र इत्युपसर्गस्थरेफात् परस्य 'नि' इत्यस्य नकारस्य स्थाने णकारादेशे 'प्रणिगदति' इति रूपं सिद्ध्यति ।

परोक्षानद्यतनभूतार्थे गद्धातोर्लिटि तिपि तिपो णलादेशे च 'गद् अ' इति जाते द्वित्वेऽभ्यासत्वे हलादिशेषे 'ग गद् अ' इति जाते-

## चवर्गादेशविधायकं विधिसूत्रम्

**कुहोश्चुः ७।४।६२॥**

**अभ्यासकवर्गहकारयोश्चवर्गादेशः ।**

(अभ्यासस्य, कुहोः, चुः)

**सरलार्थः- अभ्यास**स्थयोः कवर्गहकारयोः स्थाने चवर्गादेशो भवति ।

एतेन अभ्यासे स्थितानां क-ख-ग-घ-ङवर्णानां स्थाने क्रमेण च-छ-ज-झ-ञवर्णा आदिश्यन्ते, हकारस्य स्थाने बाह्यप्रयत्नसाम्याद् झकारादेशश्च भवति ।

अनेन अभ्यासस्थस्य गकारस्य स्थाने जकारादेशे 'ज गद् अ' इति जाते दकारात्पूर्ववर्तिनः अकारस्य उपधासंज्ञायाम्-

## वृद्धिविधायकं विधिसूत्रम्

**अत उपधायाः ७।२।११६॥**

**उपधाया अतो वृद्धिः स्याद् ञिति, णिति च प्रत्यये । जगाद । जगदतुः । जगदुः । जगदिथ । जगदथुः । जगद ।**

(उपधायाः, अतः, वृद्धिः, ञ्णिति, प्रत्यये)

**सरलार्थः-** ञकारस्य णकारस्य वा इत्संज्ञा भवति यस्मिन् प्रत्यये, तस्मिन् परे उपधाया अकारस्य वृद्धिर्भवति ।

अनेन उपधाया अकारस्य वृद्धौ आकारादेशे वर्णसम्मेलने '**जगाद**' इति रूपं सिद्ध्यति ।

तसादौ णित्प्रत्ययाभावाद् वृद्धिर्न भवति । सिपि तु इडागमो भवति, रूपाणि मूले द्रष्टव्यानि ।

उत्तमपुरुषस्यैकवचने मिपि, मिपो णलादेशे, द्वित्वेऽभ्यासत्वे, हलादिशेषे, चुत्वे च 'जगद् अ' इति जाते-

### णिद्वद्भावविधायकमतिदेशसूत्रम्

**णलुत्तमो वा ७।१।९१॥**

**उत्तमो णल् वा णित्स्यात् । जगाद, जगद । गदिता । गदिष्यति । गदतु । अगदत् । गदेत् । गद्यात् ।**

(उत्तमः, णल्, णित्, वा)

**सरलार्थः-** उत्तमपुरुषस्य णल् विकल्पेन णिद् भवति । तेन एकस्मिन् पक्षे णल् णिद्भिन्नो भवति ।

अनेन णलः अकारस्य विकल्पेन णित्त्वे, उपधासंज्ञायाम् 'अत उपधायाः' इति सूत्रेण उपधाया अकारस्य वृद्धौ वर्णसम्मेलने '**जगाद**' इति रूपं सिद्धयति । णित्त्वाभावपक्षे 'जगद् अ' इति स्थिते वर्णसम्मेलने 'जगद' इति रूपं जायते । वसि मसि च इडागमो भवति । जगदिव, जगदिम ।

लुटि, लृटि, लोटि, लङि, लिङि च 'अत्' धातोरिव सर्वाणि रूपाणि सिद्धयन्ति । लङि अडागमो विधेयः ।

लुङि अडागमे तिपि च्लिप्रत्यये च्लेः सिचि सिच आर्धधातुकत्वे इडागमे च 'अ गद् इस् ति' इति जाते-

### विभाषया वृद्धिविधायकं विधिसूत्रम्

**अतो हलादेर्लघोः ७।२।७॥**

**हलादेर्लघोरतो वृद्धिर्वेडादौ परस्मैपदे सिचि । अगादीत्, अगदीत् । अगदिष्यत् ।**

(हलादेः, लघोः, अतः, इटि, सिचि, परस्मैपदेषु, विभाषा)

**सरलार्थः-** हलादेः धातोः अवयवस्य लघुसंज्ञकस्य ह्रस्वाकारस्य स्थाने विभाषया वृद्धिरादेशो भवति परस्मैपदपरके इडादौ सिचि परे ।

अनेन सूत्रेण 'गद्' इत्यस्य अकारस्य विकल्पेन वृद्धौ आकारादेशे वर्णसम्मेलने 'अगादिस् ति' इति जाते अन्त्यस्य इकारस्य लोपे तकारस्य अपृक्तसंज्ञायाम् अपृक्तस्य तकारस्य ईडागमे 'इट ईटि' इति सकारस्य लोपे एकादेशे कर्तव्ये सिज्लोपस्य सिद्धत्वात् सवर्णदीर्घे '**अगादीत्**' इति रूपं जायते । वृद्धयभावपक्षे तु 'अगद् इस् ति' इति जाते वर्णसम्मेलने पूर्ववद् इकारलोपादिना 'अगदीत्' इति रूपम् ।

एवमेव तसादौ अपि प्रत्येकं रूपद्वयं भवति । शेषरूपाणि 'अत्' धातोर्लुङि इव बोध्यानि ।

लृङि अडागमे 'अत्' धातोरिव 'अगदिष्यत्' इत्यादीनि रूपाणि भवन्ति ।

**णद अव्यक्ते शब्दे ॥७॥** (णद्, सेट्, अकर्मकः परस्मैपदी) ।

यत्र वर्णादयः स्फुटा न भवन्ति सः ध्वनि अव्यक्तो ध्वनिः । वाद्यादीनाम् अव्यक्तशब्दरूपक्रियार्थे 'णद' शब्दो वर्तते, अकारः इत्संज्ञकः, णद् इत्यस्य धातुसंज्ञायाम्-

### णस्य नकारादेशविधायकं विधिसूत्रम्

**णो नः ६।१।६५॥**

**धात्वादेर्णस्य नः स्यात् । णोपदेशास्त्वनर्द-नाटि-नाथ-नाध्-नन्द्-नक्क-नृ-नृतः ॥**

(धातोः, णः, नः)

**सरलार्थः-** धातोरादौ वर्तमानस्य णकारस्य स्थाने नकारादेशो भवति । नकारादयो धातवो द्विधा णोपदेशाः, नोपदेशाश्च । धातुपाठे एव नकारादित्वेन निर्दिष्टा नर्द्-नाटि-नाथ्-नाध्-नन्द्-नक्क्-नृ-नृत्-धातवः नोपदेशा वर्तन्ते चेत् तद्भिन्ना नकारादयो धातवो णोपदेशाः सन्तीति बोध्यम् ।

इति धात्वादेर्णकारस्य स्थाने नकारादेशे लटि तिपि शपि 'गद्'धातोरिव '**नदति**' इति रूपं जायते । एवं तसादिष्वपि रूपाणि जायन्ते ।

'प्र' इत्युपसर्गपूर्वकाद् 'नद्'धातोर्लटि तिपि शपि 'प्रनदति' इति जाते-

### णत्वविधायकं विधिसूत्रम्

**उपसर्गादसमासेऽपि णोपदेशस्य ८।४।१४॥**

**उपसर्गस्थान्निमित्तात्परस्य णोपदेशस्य धातोर्नस्य णः स्यात् । प्रणदति । प्रणिनदति । नदति । ननाद ।**

(उपसर्गात्, रषाभ्याम्, णोपदेशस्य, धातोः, नः, णः, असमासे, अपि)

**सरलार्थः-** उपसर्गस्थाभ्यां रेफषकाराभ्यां परस्य णोपदेशस्य नकारादेर्धातोर्नकारस्य स्थाने णकारादेशो भवति, समासे असमासे च ।

अनेन सूत्रेण उपसर्गस्थाद् रेफात् परस्य 'नद'धातोर्नकारस्य णत्वे 'प्रणदति' इति रूपं जायते ।

'प्र नि' इत्युपसर्गपूर्वकाद् नद्धातोर्लटि तिपि शपि 'प्रनिनदति' इति जाते 'नेर्गद-नद-...' इत्यादिसूत्रेण उपसर्गस्थाद् रेफात् परस्य 'नि' इत्यस्य नकारस्य स्थाने णकारादेशे 'प्रणिनदति' इति रूपं सिद्ध्यति ।

नद्धातोर्लिटि, तिपि, तिपो णलादेशे द्वित्वेऽभ्यासत्वे हलादिशेषे उपधात्वे उपधाया अकारस्य वृद्धौ च 'ननाद' इति रूपं जायते ।

द्विवचने तसि तसः स्थाने अतुसादेशे द्वित्वे 'नद् नद् अतुस्' इति जाते अभ्यासत्वे

'असंयोगाल्लिट्' कित् इति 'अतुस्' इत्यस्य कित्त्वे-

### एत्वाभ्यासलोपविधायकं विधिसूत्रम्

**अत एकहल्मध्येऽनादेशादेर्लिटि ६।४।१२०॥**

**लिण्निमित्तादेशादिकं न भवति यदङ्गं, तदवयवस्याऽसंयुक्तहल्मध्यस्थस्याऽत एत्वमभ्यासलोपश्च किति लिटि । नेदतुः । नेदुः ।**

(एकहल्मध्ये, अनादेशादेः, अङ्गस्य, अतः, एत्, किति, लिटि, अभ्यासलोपः, च)

**सरलार्थः-** लिटो निमित्तेन यत्र कोऽपि आदेशो विहितो नास्ति, तस्य अङ्गसंज्ञकस्य धातोः अवयवस्य असंयुक्तहलोर्मध्ये वर्तमानस्य अकारस्य स्थाने एकारादेशः अभ्यासस्य लोपश्च भवतः, कित्सु लिडादेशेषु परेषु सत्सु ।

इति सूत्रेण अनभ्यासस्य 'नद्' इत्यस्य अकारस्य स्थाने एकारादेशे, अभ्यासस्य 'नद्' इत्यस्य च लोपे 'नेद् अतुस्' इति जाते वर्णसम्मेलने **'नेदतुः'** इति रूपं सिद्ध्यति । एवमेव झिप्रत्यये उसादेशे पूर्ववद् **'नेदुः'** इति रूपं जायते ।

लिटि सिपि थलि आर्धधातुकत्वेन इडागमे द्वित्वे 'नद् नद् इ थ' इति जाते अभ्याससंज्ञायाम्-

### एत्वाभ्यासलोपविधायकं विधिसूत्रम्

**थलि च सेटि ६।४।१२१॥**

**प्रागुक्तं स्यात् । नेदिथ । नेदथुः । नेद । ननाद, ननद । नेदिव । नेदिम । नदिता । नदिष्यति । नदतु । अनदत् । नदेत् । नद्यात् । अनादीत्, अनदीत् । अनदिष्यत् ।**

**सरलार्थः-** लिटो निमित्तेन यत्र कोऽपि आदेशो विहितो नास्ति, तस्य अङ्गसंज्ञकस्य धातोः अवयवस्य असंयुक्तहलोर्मध्ये वर्तमानस्य अकारस्य स्थाने एकारादेशः अभ्यासस्य लोपश्च भवतः इड्वति थलि च परे ।

अनेन सूत्रेण सेटि थलि परे अनभ्यासस्य 'नद्' इत्यस्य अकारस्य स्थाने एकारादेशे, अभ्यासस्य 'नद्' इत्यस्य च लोपे 'नेद् इ थ' इति जाते वर्णसम्मेलने **'नेदिथ'** इति रूपं जायते ।

मध्यमपुरुषस्य द्विवचने बहुवचने च प्रथमपुरुषस्य द्विवचने इव **'नेदथुः'** **'नेद'** इति रूपद्वयं जायते । उत्तमपुरुषस्यैकवचने मिपि तु 'गद्' धातोरिव **'ननाद/ननद'** इति रूपद्वयं जायते । उत्तमपुरुषस्य द्विवचने वसि तस्य वादेशे आर्धधातुकसंज्ञायाम्, इडागमे ततः तसि इव द्वित्वादिकार्येषु **'नेदिव'** इति रूपं निष्पद्यते । एवमेव बहुवचने **'नेदिम'** इति रूपं बोध्यम् ।

नद्धातोर्लुटि, लृटि, लोटि, लङि, विध्याद्यर्थके लिङि, आशीर्वादार्थके लिङि, लुङि, लृङि च गद्धातोरिव रूपाणि सिद्ध्यन्ति ।

**टुनदि समृद्धौ ॥८॥** (नद्- सेट्, अकर्मकः परस्मैपदी)

समृद्ध्यर्थे वर्तमानस्य 'टुनदि' शब्दस्य धातुसंज्ञायाम् इकारस्य 'उपदेशेऽजनुनासिक इत्' इति सूत्रेण इत्संज्ञायां लोपे च-

### ञिटुडूनामित्संज्ञाविधायकं सूत्रम्

**आदिर्ञिटुडवः १।३।५॥**

**उपदेशे धातोराद्या एते इतः स्युः ।**

(उपदेशे, धातवः, आदिः, ञिटुडवः, इत्)

**सरलार्थः-** उपदेशे धातोः आदौ वर्तमाना 'ञि' 'टु' 'डु' एते इत्संज्ञका भवन्ति ।

अनेन 'टु' इत्यस्य इत्संज्ञायां तस्य लोपे च 'नद्' इति जाते-

### नुमागमविधायकं विधिसूत्रम्

**इदितो नुम् धातोः ७।१।५८॥**

**नन्दति । ननन्द । नन्दिता । नन्दिष्यति । नन्दतु । अनन्दत् । नन्देत् । इदित्त्वान्नलोपो न । नन्द्यात् । अनन्दीत् । अनन्दिष्यत् ।**

(इदितः, धातोः, नुम्)

**सरलार्थः-** यस्मिन् धातौ ह्रस्वस्य इकारस्य इत्संज्ञा भवति, स धातुः इदित् कथ्यते । तस्य धातोर्नुमागमो भवति । 'नुम्' इत्यत्र उकारमकारावित्संज्ञकौ, तेन नुमागमे नकार एवावशिष्यते । मकारेत्त्वाद् अयं मिदागमः । मिदागमो 'मिदचोऽन्त्यात् परः' इति सूत्रनियमेन अन्त्यादचः परो भवति ।

इति सूत्रेण नुमागमेऽनुबन्धलोपे मित्त्वादन्त्यादचः परे 'नन्द्' इति जाते ततो लटि तिपि शपि '**नन्दति**' इति रूपं सिद्धम् ।

लिडादौ तु सर्वाणि रूपाणि पूर्ववदेव सिद्धचन्ति । ननन्द । नन्दिता । नन्दिष्यति । नन्दतु । अनन्दत् । नन्देत् । आशीर्लिङि धातोः इदित्त्वेन नुमागमस्य नकारस्य 'अनिदितां हल उपधायाः क्ङिति' इति सूत्रेण लोपो न भवति । नन्द्यात् । अनन्दीत् । अनन्दिष्यत् ।

**अर्च पूजायाम् । अर्चति ॥९॥** (अर्च्- सेट्, सकर्मकः परस्मैपदी)

'अर्च' इत्यत्र अकार उदात्त इत्संज्ञकः । 'अर्च्' इत्यस्य धातुसंज्ञायां तस्माद् लटि तिपि शपि च 'अर्चति' इति रूपं सिद्धचति ।

लिटि तिपि तिपो णलादेशे द्वित्वेऽभ्यासत्वे हलादिशेषे अभ्यासादेः अकारस्य दीर्घे च 'आ अर्च् अ' इति जाते-

## नुडागमविधायकं विधिसूत्रम्

**तस्मान्नुड् द्विहलः ७।४।७१॥**

**द्विहलो धातोर्दीर्घीभूतादकारात् परस्य नुट् । आनर्च । आनर्चतुः । आनर्चुः । अर्चिता । अर्चिष्यति । अर्चतु । आर्चत् । अर्चेत् । अर्च्यात् । आर्चीत् । आर्चिष्यत् ।**
(द्विहलः, धातोः, तस्माद्, नुट्)

**सरलार्थः-** यस्मिन् अकारादौ धातौ संयुक्तरूपेण द्वौ हल्वर्णौ आगच्छतः तादृशधातोः दीर्घीभूताद् अकारात् परस्य 'नुट्' आगमो भवति ।

अनेन सूत्रेण आकारात् परस्य 'अर्च्' इत्यस्य 'नुट्' आगमेऽनुबन्धलोपे टित्त्वादाद्यवयवे वर्णयोगे च '**आनर्च** इति रूपं जायते । एवमन्यत्र तसादावपि नुड्विधेयः । आनर्चतुः, आनर्चुः, आनर्चिथ, आनर्चथुः, आनर्च, आनर्च, आनर्चिव, आनर्चिम ।

लुडादौ तु 'अत्' धातोरिव रूपाणि सम्पद्यन्ते । रूपाणि मूले द्रष्टव्यानि ।

**व्रज गतौ ॥१०॥** (व्रज्- सेट्, सकर्मकः परस्मैपदी)

**व्रजति । वव्राज । व्रजिता । व्रजिष्यति । व्रजतु । अव्रजत् । व्रजेत् । व्रज्यात् ।**

'व्रज' इत्यत्र अकार उदात्त इत्संज्ञकः । व्रज् इत्यस्य धातुसंज्ञायां ततो लटि तिपि शपि च 'व्रजति' इति रूपं निष्पन्नं भवति ।

लिडादिषु वव्राज । व्रजिता । व्रजिष्यति । व्रजतु । अव्रजत् । व्रजेत् । व्रज्यात् इत्यादीनि

रूपाणि पूर्ववत् । लुङि अडागमे तिपि च्लिप्रत्यये च्लेः सिचि आर्धधातुकत्वेन इडागमे च 'अ व्रज् इस् ति' इति जाते-

### वृद्ध्यादेशविधायकं विधिसूत्रम्

**वदव्रजहलन्तस्याचः ७।२।३॥**

**एषामचो वृद्धिः स्यात् परस्मैपदे सिचि । अव्राजीत् । अव्रजिष्यत् ।**

(वदव्रजहलन्तस्य, अचः, वृद्धिः, परस्मैपदे, सिचि)

**सरलार्थः-** परस्मैपदपरके सिचि परे 'वद्'धातोः, 'व्रज्'धातोः, हलन्तधातूनाञ्च अचो वृद्धिर्भवति ।

अनेन सूत्रेण व्रज् धातोः अकारस्य वृद्धौ आकारादेशे 'अव्राज् इस् ति' इति जाते वर्णसम्मेलने अन्त्यस्य इकारस्य लोपे तकारस्य अपृक्तसंज्ञायामीडागमे, ईटि परे इटः परस्य सकारस्य लोपे एकादेशविधाने सिज्लोपस्य सिद्धत्वात् सवर्णदीर्घे '**अव्राजीत्**' इति रूपं सिद्ध्यति । एवं लुङि सर्वत्र वृद्धौ कृतायां पूर्ववत् सर्वाणि रूपाणि सिद्ध्यन्ति । अव्राजिष्टाम्, अव्राजिषुः, अव्राजीः, अव्राजिष्टम्, अव्राजिष्ट, अव्राजिषम्, अव्राजिष्व, अव्राजिष्म । लृङि अव्रजिष्यत् ।

**कटे वर्षावरणयो ॥११॥** (व्रज्-सेट्, सकर्मकः, परस्मैपदी)

**कटति । चकाट । चकटतुः । कटिता । कटिष्यति । कटतु । अकटत् । कटेत् । कट्यात् ॥**

कटे इत्यत्र एकारोऽनुबन्ध इत्संज्ञकः । कट् इत्यस्य धातुसंज्ञायां तस्माद् लटि, तिपि, शपि च 'कटति' इति रूपम् ।

लुङि 'अकट् इ स् ईत्' इत्यत्र 'वदव्रजहलन्तस्याचः' इति सूत्रेण नित्यतया प्राप्तां वृद्धिं बाधित्वा 'अतो हलादेर्लघोः' इति विभाषया वृद्धौ प्राप्तायाम् आह-

### वृद्ध्यादेशनिषेधकं सूत्रम्

**ह्मयन्तक्षणश्वसजागृणिश्व्येदिताम् ७।२।१५॥**

**हमयान्तस्य क्षणादेर्ण्यन्तस्य श्वयतेरेदितश्च वृद्धिर्नेडादौ सिचि । अकटीत् । अकटिष्यत् ॥**

(ह्मयन्तक्षणश्वसजागृणिश्व्येदिताम्, इटि, परस्मैपदेषु, सिचि, वृद्धिः, न)

**सरलार्थः-** हकारान्तानाम्, मकारान्तानाम्, यकारान्तानाम्, क्षणादिण्यन्तानाम्, श्वयतेः, एदितश्च धातूनां वृद्धिर्न भवति इडादौ परस्मैपदपरके सिचि प्रत्यये परे ।

अनेन वृद्धेर्निषेधे सकारलोपे (इट ईटि) सवर्णदीर्घे वर्णसम्मेलने च '**अकटीत्**' इति रूपं सिद्ध्यति । अकटिष्टाम्, अकटिषुः । शेषं व्रज्धातुवत् ।

| |
|---|
| **नेदतुः**<br>अव्यक्तशब्दार्थकात् णद्धातोः णस्य 'णो नः' इति नत्वे कृते 'परोक्षे लिट्' इति लिटि अनुबन्धलोपे लस्य स्थाने प्रथमपुरुषस्य द्विवचने तसादेशे तसः स्थाने 'परस्मैपदानां णलतुसुस्थलथुसणल्वमाः' इति सूत्रेण अतुसादेशे नद् अतुस् इति जाते 'लिटि धातोरनभ्यासस्य' इति सूत्रेण द्वित्वे 'नद् नद् अतुस्' इति जाते 'पूर्वोऽभ्यासः' इति पूर्वस्य अभ्याससंज्ञायां 'हलादिः शेषः' इति सूत्रेण हलादिशेषे 'न नद् अतुस्' इत्यत्र 'असंयोगाल्लिट् कित्' इति सूत्रेण अतुसः कित्त्वेन 'अत एकहल्मध्येऽनादेशादेर्लिटि' इति सूत्रेण एत्वे अभ्यासस्य लोपे च कृते नेद् अतुस् इति वर्णयोगे सस्य रुत्वे विसर्गे च कृते 'नेदतुः' इति रूपं सिद्धम् । |
| **अव्राजीत्**<br>गत्यर्थकव्रज्धातोः 'लुङ्' इति सूत्रेण लुङि अनुबन्धलोपे अडागमेऽनुबन्धलोपे लस्य स्थाने तिबादेशेऽनुबन्धलोपे प्राप्तं शपं प्रबाध्य 'च्लि लुङि' इति सूत्रेण च्लिप्रत्यये 'च्लेः सिच्' इति सूत्रेण च्लेः स्थाने सिजादेशेऽनुबन्धलोपे 'अव्रज् स् ति' इति जाते सिचः 'आर्धधातुकं शेषः' इति सूत्रेण आर्धधातुकसंज्ञायाम् 'आर्धधातुकस्येड्वलादेः' इति इडागमेऽनुबन्धलोपे 'अतो हलादेर्लघोः' इति विकल्पेन वृद्धौ प्राप्तायां 'वदव्रजहलन्तास्याचः' इति सूत्रेण नित्यतया वृद्धौ अव्राज् स् ति इति जाते 'इतश्च' इति सूत्रेण इकारलोपे 'अस्ति सिचोऽपृक्ते' इति सूत्रेण अपृक्तस्य ईडागमे 'अव्राज् इ स् ईत्' इति जाते 'इट ईटि' इति सूत्रेण सस्य लोपे सवर्णदीर्घे वर्णयोगे च 'अव्राजीत्' इति रूपं निष्पन्नम् । |

## वाक्येषु प्रयोगनिदर्शनम्

१. नदी अतति ।

२. महादेवः पार्वतीं प्रति रामकथां जगाद ।

३. श्यामः श्वः शिक्षाया महत्त्वं गदिता ।

४. हरिः अद्य ह्यः पठितं पाठं गदिष्यति ।

५. छात्राः स्वपाठं गदन्तु ।

६. रामः परह्यः पठितं पाठं ह्यः अगदत् ।

७. ते विद्यालयस्य क्रियाकलापान् गदेयुः ।

८. गुरुः अद्य कथाम् अगादीत् ।

९. यदि अभिभावकाः सम्यग् अगदिष्यन् तर्हि पुत्राः सुष्ठु अगदिष्यन् ।

१०. सन्यासी वनं व्रजति ।

११. ननाद ढक्कां नवपञ्चवारम् ।

## अभ्यासः

१. **शुद्धमुच्चारणं कुरुत**

(क) अस्तिसिचोऽपृक्ते

(ख) अतो हलादेर्लघोः

(ग) उपसर्गादसमासेऽपि णोपदेशस्य

(घ) तस्मान्नुड् द्विहलः

(ङ) असंयोगाल्लिट् कित्

(च) सिजभ्यस्तविदिभ्यश्च

(छ) अत एकहल्मध्येऽनादेशादेर्लिटि

(ज) वदव्रजहलन्तस्याचः

(झ) ह्मयन्तक्षणश्वसजागृणिश्व्येदिताम्

२. **अधस्तनप्रश्नानामुत्तराणि लिखत**

(क) अतधातोः कोऽर्थः ?

(ख) लुङ्लङ्लृङ्क्षु अजादेरङ्गस्य क आगमो भवति ?

(ग) उपसर्गस्थान्निमित्तात् परस्य केषां धातोः सकारस्य षत्वं भवति ?

(घ) कुत्र उपधाया अकारस्य वृद्धिर्भवति ?

(ङ) धात्वादेर्नकारस्य स्थाने क आदेशो भवति ?

(च) 'प्रणदति' इत्यत्र णत्वं केन सूत्रेण भवति ?

(छ) कीदृशो लिडादेशः किद् भवति ?

(ज) 'टुनदि'धातोः 'टु' इत्यस्य इत्संज्ञा केन सूत्रेण भवति ?

(झ) कीदृशस्य धातोर्नुडागमो भवति ?

(ट) व्रज्धातोर्लुङि केन सूत्रेण वृद्धिर्भवति ?

(ठ) 'अकटीत्' इत्यत्र 'अतो हलादेर्लघोः' इति वृद्धिः कुतो न भवति ?

३. **सोदाहरणं सूत्राणामर्थं लिखत**

(क) इट ईटि

(ख) कुहोश्चुः

(ग) उपसर्गादसमासेऽपि णोपदेशस्य

(घ) थलि च सेटि

(ङ) पुगन्तलघूपधस्य च

(च) वदव्रजहलन्तस्याचः

(छ) तस्मान्नुड् द्विहलः

(ज) ह्मयन्तक्षणश्वसजागृणिश्व्येदिताम्

४. **अधस्तनानां धातूनां निर्दिष्टलकारेषु रूपाणि विलिखत**

(क) अत्धातोर्लुङि (ख) गद्धातोर्लङि (ग) नद्धातोर्लिटि

(घ) नद्धातोर्विधिलिङि (ङ) अर्च्धातोर्लिटि (च) व्रज्धातोराशीर्लिङि

(छ) कट्धातोर्लिटि लुङि च

५. **'नेर्गदनद...' इति सूत्रं प्रपूर्य सोदाहरणं तदर्थं प्रकाशयत ।**

## ६. प्रमुखसूत्रनिदर्शनपूर्वकं रूपसिद्धिप्रकारं प्रदर्शयत

(क) आत | (ख) आतीत्
(ग) आतिषुः | (घ) जगाद/जगद
(ङ) अगादीत्/अगदीत् | (च) नेदतुः
(छ) नेदिथ | (ज) नन्दति
(ञ) आनर्च | (ट) अव्राजीत्
(ठ) चकाट | (ड) अकटीत्

## ७. अधस्तनपदानां धातुलकारपुरुषवचनानि निर्दिशत

(क) आतिष्टाम् | (ख) गद्यास्तम्
(ग) अनदिष्यन् | (घ) आनर्चिथ
(च) अव्रजम् | (छ) कट्यात्

## ८. सिद्धपदानि दर्शयत

(क) गद् + लङ् (झि) | (ख) अर्च् + लोट् (वस्)
(ग) नद् + आशीर्लिङ् (सिप्) | (घ) व्रज् + लुट् (थ)
(ङ) कट+लुङ् (झि)

## ९. पदानां वाक्ये प्रयोगं निदर्शयत

(क) अत्याः | (ख) नेद
(ग) गदानि | (घ) आनर्चुः
(ङ) अव्राजीत् | (च) कटति

षष्ठः पाठः

# गुप्क्षिधातुप्रयोगसिद्धिः धातूनां सेडनिड्व्यवस्था च

**गुपू रक्षणे ॥१२॥** (गुप्- वेट्, सकर्मकः परस्मैपदी)

'गुपू' इत्यत्र ऊकारानुबन्धः । गुप् इत्यस्य धातुसंज्ञायामाह-

### आयप्रत्ययविधायकं विधिसूत्रम्

**गुपूधूपविच्छिपणिपनिभ्य आयः ३।१।२८॥**

**एभ्य आयः प्रत्ययः स्यात् स्वार्थे ।**

(गुपूधूपविच्छिपणिपनिभ्यः, आयः)

**सरलार्थः-** गुपू रक्षणे, धूप सन्तापे, विच्छ गतौ, पण व्यवहारे स्तुतौ च, पन स्तुतौ एभ्यः पञ्चभ्यो धातुभ्यः स्वार्थे 'आय' प्रत्ययो भवति । 'अनिर्दिष्टार्थाः प्रत्ययाः स्वार्थे भवन्ति' इति न्यायाद् आयप्रत्ययः स्वार्थे भवति ।

अनेन स्वार्थे आयप्रत्यये 'गुप् आय' इति जाते 'आय' इत्यस्य आर्धधातुकसंज्ञायाम् (आर्धधातुकं शेषः) धातोः अङ्गसंज्ञायाम्, उकारस्य लघुसंज्ञायाम् (ह्रस्वं लघुः) उपधासंज्ञायां च, (अलोऽन्त्यात्पूर्व उपधा) लघूपधगुणे, वर्णसम्मेलने 'गोपाय' इति जाते-

### धातुसंज्ञाविधायकं सूत्रम्

**सनाद्यन्ता धातवः ३।१।३२॥**

**सनादयः कमेर्णिङन्ताः प्रत्यया अन्ते येषां ते धातुसंज्ञकाः । धातुत्वाल्लडादयः । गोपायति ।**

(सनाद्यन्ताः, धातवः)

**सरलार्थः-** सनादयः प्रत्ययाः अन्ते सन्ति येषां ते शब्दाः धातुसंज्ञका भवन्ति ।

**सन्-क्यच्-काम्यच्-क्यङ्-क्यषोऽथाऽऽचारक्विब् णिज्यङौ तथा ।**
**यगाय-ईयङ्-णिङ् चेति द्वादशामी सनादयः ॥**

सन्-क्यच्...' इति कारिकायां निर्दिष्टाः सन्, क्यच्, काम्यच्, क्यङ्, क्यष्, आचारार्थे विहितः क्विप्, णिच्, यङ्, यक्, आय, ईयङ्, णिङ् एते द्वादश प्रत्ययाः सनादयः सन्ति । एते प्रत्यया

येषामन्ते भवन्ति, ते धातुसंज्ञका भवन्तीति भावः । सनादयः प्रत्ययाः तत्र तत्र प्रसङ्गेषु प्रतिपादयिष्यन्ते ।

अनेन सूत्रेण 'गोपाय' इत्यस्य धातुसंज्ञायां तस्माद् लटि, तिपि, शप्यनुबन्धलोपे पररूपे च '**गोपायति**' इति रूपं सिद्ध्यति । तसादौ अपि एवमेव पूर्ववत् सर्वाणि रूपाणि ज्ञेयानि ।

लिटि -

### आयप्रत्ययविधायकं विधिसूत्रम्

**आयादय आर्धधातुके वा ३।१।३१॥**

**आर्धधातुकविवक्षायामायादयो वा स्युः ।**

(धातोः, आयादयः, आर्धधातुके, वा)

**सरलार्थः-** आर्धधातुकस्य विवक्षायाम् आय, ईयङ्, णिङ् चेति प्रत्यया विकल्पेन विधीयन्ते । तेन आयादयः प्रत्ययाः सार्वधातुकलकारेषु (लट्-लोट्-लङ्-विधिलिङ्क्षु) नित्यं भवन्ति । आर्धधातुकलकारेषु (लिट्-लुट्-लृट्-आशीर्लिङ्-लुङ्-लृङ्क्षु) च विकल्पेन भवन्ति ।

अत्र आर्धधातुकलकारस्य लिटो विवक्षायां विकल्पेन आयप्रत्यये 'आय' इत्यस्य आर्धधातुकसंज्ञायाम्, धातोः अङ्गसंज्ञायाम्, उकारस्य लघुसंज्ञायाम्, उपधासंज्ञायाञ्च लघूपधस्य अङ्गस्य लघोः उकारस्य गुणे वर्णसम्मेलने च 'गोपाय' इति जाते सनाद्यन्तत्वाद् 'गोपाय' इत्यस्य धातुसंज्ञायां तस्माद् लिटि 'गोपाय ल्' इति जाते-

**(कास्यनेकाच आम्वक्तव्यः) लिटि आस्कासोराम्विधानान्मस्य नेत्त्वम् ।**

**सरलार्थः-** लिट्लकारे परे 'कास्'धातोः अनेकाच्धातोश्च पर आम्प्रत्ययो भवति ।

कास्धातोः अनेन वार्त्तिकेन आस्धातोः 'दयायासश्चे'ति परवर्तिसूत्रेण च आम्प्रत्ययो विहितो वर्तते, तत्र आमि मकारस्य इत्त्वे कृते 'मिदचोऽन्त्यात्परः' इति सूत्रस्य प्रवृत्त्या कासि आसि च धातौ आकारात् परत्र आम्प्रत्ययस्य स्थितेः 'का आ स्, आ आ स्' इत्यत्र दीर्घे कृते 'कास्, आस्' इति पूर्ववत् स्थितिर्भवति, तत्र आम्प्रत्ययविधानं व्यर्थम्, अतो व्यर्थं सद् आमो मस्य नेत्त्वं नेति ज्ञापितं भवति, तथा च मित्त्वाभावाद् मिदचोऽन्त्याद् इत्यप्राप्तौ प्रत्ययत्वेन धातोः परत्वे स्थिते 'कासाम्, आसाम्' इत्यत्र आम्विधानं सार्थकं भवतीति तात्पर्यम् ।

लिटि परे अनेनैव सूत्रेण 'आम्'प्रत्यये 'गोपाय आम् ल्' इति जाते 'आम्' इत्यस्य आर्धधातुकसंज्ञायाम्-

### अकारलोपविधायकं विधिसूत्रम्

**अतो लोपः ६।४।४८॥**

**आर्धधातुकोपदेशे यददन्तं तस्यातो लोप आर्द्धधातुके ।**

(आर्धधातुके, उपदेशे, अतः, अङ्गस्य, लोपः)

**सरलार्थः-** आर्धधातुकस्य उपदेशकाले ह्रस्वाकारान्तं यदङ्गम्, तस्य अन्त्यस्य ह्रस्वाकारस्य लोपो भवति, आर्धधातुके परे ।

अनेन सूत्रेण 'गोपाय' इत्यस्य अकारस्य लोपे वर्णसम्मेलने 'गोपायाम् ल्' इति जाते-

### आमः उत्तरस्य लोपविधायकं विधिसूत्रम्

**आमः २।४।८१॥**

**आमः परस्य लुक् ।**

(आमः, लुक्)

**सरलार्थः-** आमः परं यदस्ति तस्य लुग् भवति ।

इति सूत्रेण लकारस्य लुकि लुप्तस्य लस्य कृदन्तत्त्वात् प्रातिपदिकसंज्ञायाम् 'कृन्मेजन्तः' इति सूत्रेण मान्तत्वाद् 'गोपायाम्' इत्यस्य अव्ययसंज्ञायां समुदायात् सुप्रत्यये 'अव्ययादाप्सुपः' इति सोर्लुकि सुबन्तत्वात् पदसंज्ञायाम्-

### लिट्परककृञनुप्रयोगविधायकं विधिसूत्रम्

**कृञ्चानुप्रयुज्यते लिटि ३।१।४०॥**

**आमन्ताल्लिट्पराः कृभ्वस्तयोऽनुप्रयुज्यन्ते । तेषां द्वित्वादि ।**

(आमः, लिटि, कृञ्, च, अनुप्रयुज्यते)

**सरलार्थः-** आमन्ताद् धातोः लिट्लकारपरकानां कृञ्-भू-अस्धातूनाम् अनुप्रयोगो भवति । अनुप्रयुक्तास्ते धातवो लिट्लकारं च सहैवानयन्ति इत्यर्थः ।

एतेन लिट्परकस्य कृञ्धातोरनुप्रयोगे 'गोपायाम् कृ ल्' इति जाते लकारस्य स्थाने तिपि तिपः स्थाने णलि च 'गोपायाम् कृ अ' इति जाते धातोर्द्वित्वे 'पूर्वोऽभ्यासः' इति अभ्याससंज्ञायाम्-

### ऋवर्णस्य अत्वविधायकं विधिसूत्रम्

**उरत् ७।४।६६॥**

**अभ्यासस्य ऋवर्णस्यात् स्यात् प्रत्यये। रपरः। हलादिः शेषः। वृद्धिः। गोपयाञ्चकार। द्वित्वात्परत्वाद्यणि प्राप्ते।**

(अभ्यासस्य, उः, अत्)

**सरलार्थः**– प्रत्यये परे अभ्यासे वर्तमानस्य ऋवर्णस्य स्थाने अकारादेशो भवति। ऋकारस्य स्थाने प्रयुज्यमानत्वाद् अकारस्यात्र रपरत्वं भवति। तेनात्र ऋवर्णस्य स्थाने 'अर्' इत्यादेशो भवतीति फलति।

अनेन अभ्यासे वर्तमानस्य ऋकारस्य अत्वे रपरत्वे च 'गोपायाम् कर् कृ अ' इति जाते हलादिशेषे ककारस्य चुत्वे च 'गोपायाम् च कृ अ' इति जाते 'अचो ञ्णिति' इति सूत्रेण 'कृ' इत्यस्य वृद्धौ रपरत्वे वर्णसम्मेलने च 'गोपायाम् चकार' इति जाते 'मोऽनुस्वारः' इत्यनेन मकारस्यानुस्वारे 'गोपायां चकार' इति जाते 'वा पदान्तस्य' इति अनुस्वारस्य विभाषया परसवर्णे '**गोपायाञ्चकार**' इति रूपं सिद्ध्यति। परसवर्णाभावे तु '**गोपायांचकार**' इति रूपं बोध्यम्।

प्रथमपुरुषस्य द्विवचने तसि पूर्ववद् 'गोपायाम् कृ अतुस्' इति जाते यणि प्राप्ते-

**द्विर्वचनेऽचि १।१।५९॥**

**द्वित्वनिमित्तेऽचि परे अच आदेशो न द्वित्वे कर्तव्ये। गोपायाञ्चक्रतुः।**

(द्विवचने, अचि, अचः, आदेशः, न)

**सरलार्थः**– यदि द्वित्वं कर्तव्यमस्ति, तर्हि द्वित्वनिमित्ते अचि परे अचः स्थाने कोऽपि अच्स्थानिक आदेशो न भवति। यस्य कारणेन द्वित्वं भवति, स द्वित्वनिमित्तः, लिटि लिट एव कारणेन धातोर्द्वित्वं भवति, तेन लिडेवात्र द्वित्वनिमित्तमस्ति। लिट् तु अत्र 'अतुस्' एव। अतो द्वित्वविधानात् पूर्वम् अतुसि ऋकारस्य स्थाने यणादेशो न भवति।

इति यणो निषेधे द्वित्वेऽभ्यासत्वे अत्वे रपरत्वे हलादिशेषे चुत्वे च 'गोपायाम् चकृ अतुस्' इति जाते गुणे प्राप्ते '**असंयोगाल्लिट् कित्**' इति 'अतुस्' इत्यस्य कित्त्वेन 'क्ङिति च' इति सूत्रेण गुणनिषेधे 'इको यणचि' इति यणि ऋकारस्य स्थाने रेफादेशे 'गोपायाम् चक्रतुस्' इति जाते अनुस्वारे परसवर्णे पदत्वे रुत्वे विसर्गे च 'गोपायाञ्चक्रतुः' इति रूपं निष्पन्नम्। परसवर्णाभावे तु '**गोपायांचक्रतुः**' इति रूपं बोध्यम्।

प्रथमपुरुषस्य बहुवचने झिप्रत्यये पूर्ववद् '**गोपायाञ्चक्रुः**' '**गोपायांचक्रुः**', इति रूपद्वयं सिद्ध्यति।

मध्यमपुरुषस्यैकवचने सिपि पूर्ववत् 'गोपायाम् कृ थ' इति जाते थल आर्धधातुकत्वेन 'आर्धधातुकस्येड्वलादेः' इति सूत्रेण इडागमे प्राप्ते-

### इण्निषेधकं सूत्रम्

**एकाच उपदेशेऽनुदात्तात् ७।२।१०।**

**उपदेशे यो धातुरेकाजनुदात्तश्च, ततः परस्य वलादेरार्धधातुकस्येण्न ।**

(उपदेशे, एकाचः, अनुदात्तश्च, धातोः, इट्, न)

**सरलार्थः-** उपदेशावस्थायां यो धातुः एकाच् अनुदात्तश्च वर्तते ततः परस्य वलादेः आर्धधातुकसंज्ञकप्रत्ययस्य इडागमो न भवति। अनेन सूत्रेण कृधातोः परस्य वलादेः आर्धधातुकस्य इडागमनिषेधः ।

### तथाहि एकाजजन्तेषु' धातुषु अनुदात्ता धातव आह-

**ऊदृदन्तैर्यौति-रु-क्ष्णु-शीङ्-स्नु-नु-क्षु-श्वि-डीङ्-श्रिभिः ।**

**वृङ्-वृञ्भ्यां च विनैकाचोऽजन्तेषु निहताः स्मृताः ॥१॥**

**सरलार्थः-** अजन्तेषु एकाज्धातुषु ऊकारान्तेभ्यो धातुभ्यः, ॠकारान्तेभ्यो धातुभ्यः, यु-रु-क्ष्णु-शीङ्-स्नु-नु-क्षु-श्वि-डीङ्-श्रि-वृङ्-वृञ्धातुभ्यश्च भिन्ना अजन्ता एकाज्धातवः अनिटो भवन्ति। अर्थात् कारिकायामुल्लिखितेभ्य एकाज्धातुभ्यः परस्य वलादेः आर्धधातुकस्य इडागमो भवति, तद्भिन्नेभ्य एकाज्धातुभ्यः परस्य वलादेः आर्धधातुकस्य इडागमनिषेधो भवति । अनेकाचो धातवः सर्वे सेड्धातवो भवन्ति ।

### एकाज्हलन्तेषु धातुषु अनुदात्ता धातव आह-

**कान्तेषु- शक्लेकः ।**

**चान्तेषु- पच्-मुच्-रिच्-वच्-सिचः षट् ।**

**छान्तेषु- प्रच्छ्येकः ।**

**जान्तेषु-त्यज्-निजिर्-भज्-भञ्ज्-भुज्-भ्रस्ज्-मस्ज्-यज-युज्-रुज्-रञ्ज्-विजिर्-स्वञ्ज्-सञ्ज्-सृजः पञ्चदश । दान्तेषु'- अद्-क्षुद्-खिद्-छिद्-तुद्-नुद्-पद्य-भिद्-विद्य-विनद्-विन्द्-शद्-सद-स्विद्य-स्कन्द-हदः षोडश । धान्तेषु- क्रुध्-क्षुध्-बुध्य-बन्ध्-युध्-रुध्-राध्-व्यध्-शुध्-साध्-सिद्ध्या एकादश ।**

**नान्तेषु- मन्य-हनौ द्वौ ।**

**पान्तेषु- आप्-क्षिप्-छुप्-तप्-तिप्-तृप्य-दृप्य-लिप्-लुप्-वप्-शप्-स्वप्-सृपस्त्रयोदश ।**

**भान्तेषु- यभ्-रभ्-लभस्त्रयः ।**

**मान्तेषु- गम्-नम्-रम्-यमश्चत्वारः ।**

**शान्तेषु- क्रुश्-दंश्-दिश्-दृश्-मृश्-रिश्-रुश्-लिश्-विश्-स्पृशो दश ।**

**षान्तेषु- कृष्-त्विष्-तुष्-द्विष्-दुष्-पुष्य-पिष्-विष्-शिष्-शुष्-श्लिष्या एकादश ।**

**सान्तेषु- घस्-वसती द्वौ ।**

**हान्तेषु- दह्-दुह्-दिह्-नह्-मिह्-रुह्-लिह्-वहोऽष्टौ ।**

**अनुदात्ता हलन्तेषु धातवस्त्र्यधिकं शतम् ॥**

**गोपायाञ्चकर्थ । गोपायाञ्चक्रथुः । गोपायाञ्चक्र । गोपायाञ्चकार, गोपायाञ्चकर । गोपायाञ्चकृव । गोपायाञ्चकृम । गोपायाम्बभूव । गोपायामास । जुगोप । जुगुपतुः । जुगुपुः ।**

उपर्युल्लिखिताः त्र्यधिकशतं धातवः अनुदात्ताः सन्ति । हलन्तेषु धातुषु एते अनुदात्ता धातवः अनिटो भवन्ति, अनुदात्तभिन्ना अन्ये एकाज्हलन्तधातवस्तु सेटो भवन्ति, एकाजनुदात्तेभ्यो धातुभ्यः परस्य वलादेः आर्धधातुकस्य इडागमनिषेधात् ।

'एकाच उपदेशेऽनुदात्तात्' इति प्राप्तस्य इडागमस्य निषेधे द्वित्वेऽभ्यासत्वे अत्वे रपरत्वे हलादिशेषे चुत्वे च 'गोपायाम् चकृ थ' इति जाते 'कृ' इत्यस्य अङ्गसंज्ञायां गुणे वर्णसम्मेलने अनुस्वारे परसवर्णे च '**गोपायाञ्चकर्थ**' इति रूपं सिद्ध्यति, पररूपाभावे '**गोपायांचकर्थ**' इति रूपं जायते । मध्यमपुरुषस्य द्विवचनबहुवचनयोस्तु पूर्ववदेव रूपाणि जायन्ते ।

उत्तमपुरुषस्यैकवचने पूर्ववद् 'गोपायाम् चकृ अ' इति जाते 'कृ' इत्यस्य अङ्गसंज्ञायाम् उत्तमपुरुषस्य णलो विकल्पेन णित्त्वे 'अचो ञ्णिति' इति सूत्रेण वृद्धौ 'गोपायाम् चकार' इति जाते अनुस्वारे परसवर्णे च '**गोपायाञ्चकार**' इति रूपं जायते, णित्त्वाभावे '**गोपायाञ्चकर**' इति रूपं जायते, परसवर्णाभावे '**गोपायाञ्चकार/गोपायांचकर**' इति रूपे सिद्ध्यतः ।

उत्तमपुरुषस्य द्विवनचने वसि 'गोपायाम् कृ वु इति जाते प्राप्तस्य इडागमस्य निषेधे द्वित्वेऽभ्यासत्वे अत्वे रपरत्वे हलादिशेषे धातोः अङ्गसंज्ञायाम् 'व' इत्यस्य कित्त्वे च, प्राप्तस्य गुणस्य निषेधे अनुस्वारे परसवर्णे च '**गोपायाञ्चकृव**' इति रूपं जायते, परसवर्णाभावे '**गोपायांचकृव**' इति रूपं भवति । मसि अपि एवमेव रूपद्वयं सिद्ध्यति ।

लिटा सहितस्य भूधातोः अनुप्रयोगे 'गोपायाम् भू ल्' इति जाते लः स्थाने तिपि णलि वुगागमे द्वित्वेऽभ्यासत्वे हलादिशेषे ह्रस्वे अत्वे जश्त्वे च 'गोपायाम् बभूवु इति जाते

अनुस्वारे परसवर्णे च '**गोपायाम्बभूव**' इति रूपं जायते, परसवर्णाभावे तु '**गोपायांबभूव**' इति रूपं भवति। एवमेव तसादौ अपि रूपाणि ज्ञेयानि।

लिटा सहितस्य 'अस्'धातोरनुप्रयोगे तु 'गोपायाम् अस् ल्' इत्यत्र तिपि णलि द्वित्वेऽभ्यासत्वे हलादिशेषे 'अत आदेः' इति अकारस्य दीर्घे 'गोपायाम् आ अस् अ' इति जाते सवर्णदीर्घे वर्णसम्मेलने च '**गोपायामास**' इति रूपं जायते। एवमेव तसादौ सर्वाणि रूपाणि सिद्ध्यन्ति।

आयप्रत्ययाभावे 'गुप्'धातोर्लिटि 'गुप् ल्' इति जाते तिपि णलि द्वित्वेऽभ्यासत्वे हलादिशेषे चुत्वे च 'ज' गुप् अ' इति जाते णल आर्धधातुकसंज्ञायां धातोः अङ्गत्वेन उकारस्य लघुत्वे उपधात्वे च लघूपधगुणे वर्णसम्मेलने '**जुगोप**' इति रूपं जायते। तसि झिप्रत्यये च कित्त्वेन गुणनिषेधात् '**जुगुपतुः**' '**जुगुपुः**' इति रूपद्वयं सिद्ध्यति।

सिपि थलि च 'गुप् थ' इति जाते आर्धधातुकत्वेन इडागमे प्राप्ते-

## विभाषया इडागमविधायकं विधिसूत्रम्

**स्वरतिसूतिसूयतिधूञूदितो वा ७।२।४४॥**

**स्वरत्यादेरूदितश्च परस्य वलादेरार्धधातुकस्येड् वा स्यात्। जुगोपिथ, जुगोप्थ। गोपायिता, गोपिता, गोप्ता। गोपायिष्यति, गोपिष्यति, गोप्स्यति। गोपायतु। अगोपायत्। गोपायेत्। गोपाय्यात्, गुप्यात्। अगोपायीत्।**

(स्वरतिसूतिसूयतिधूञूदितः, वलादेः, आर्धधातुकस्य, इट्, वा)

**सरलार्थः-** स्वृ शब्दोपतापयोः, षूङ् प्राणिगर्भविमोचने, षूङ् प्राणिप्रसवे, धूञ् कम्पने इत्येतेभ्यो धातुभ्यः, ऊकारेत्संज्ञकेभ्यो धातुभ्यश्च परस्य वलादेः आर्धधातुकस्य विभाषया इडागमो भवति।

अनेन सूत्रेण विकल्पेन इडागमेऽनुबन्धलोपे टित्त्वादाद्यवयवे 'गुप् इ थ' इति जाते द्वित्वेऽभ्यासत्वे हलादिशेषे चुत्वे लघूपधगुणे च '**जुगोपिथ**' इति रूपम्, इडागमाभावे द्वित्वादिना '**जुगोप्थ**' इति रूपञ्च सिद्ध्यतः। थसादिषु पूर्ववद्। जुगुपथुः, जुगुप, जुगोप, जुगुपिव, जुगुपिम।

लुटः विवक्षायामपि विकल्पेन आयप्रत्यये लघूपधगुणे च जातस्य 'गोपाय' इत्यस्य धातुसंज्ञायाम्, लुटि तिपि तासिप्रत्यये आर्धधातुकत्वे इडागमे च 'गोपाय इ तास् ति', 'अतो लोपः' इति सूत्रेण अकारस्य लोपे वर्णसम्मेलने च 'गोपायितास् ति' इति जाते तिपो डादेशे टित्वे डित्त्वसामर्थ्यादभस्यापि टेर्लोपे वर्णसम्मेलने च '**गोपायिता**' इति रूपं जायते। आयप्रत्ययाभावे 'गुप्'धातोः लुटि तिपि तासिप्रत्यये आर्धधातुकसंज्ञायां 'स्वरतिसूतिसूयतिधूञूदितो वा' इति

सूत्रेण विकल्पेन इडागमे लघूपधगुणे च '**गोपिता**' इति रूपं सिद्ध्यति। इडागमाभावे '**गोप्ता**' इति रूपं भवति। तसादौ अपि एवमेव पूर्ववद् रूपाणि जायन्ते।

लृटि तिपि अपि एवमेव '**गोपायिष्यति/गोपिष्यति/गोप्स्यति**' इति रूपत्रयं जायते।

लोटि लङि विधिलिङि च आयप्रत्ययं विधाय पूर्ववद् लघूपधगुणादिकं कृत्वा भूधातोरिव रूपाणि भवन्ति।

आशीर्लिङो विवक्षायामपि विकल्पेन आयप्रत्यये लघूपधगुणादिना निर्मिताद् 'गोपाय'धातोर्लिङि तिपि आर्धधातुकसंज्ञायां यासुडागमे आर्धधातुकोपदेशस्य अकारस्य लोपे च 'गोपाय्यास् ति' इति जाते इकारस्य लोपे, सकारतकारयोः संयोगसंज्ञायां संयोगादेः सकारस्य लोपे च '**गोपाट्यात्**' इति रूपं जायते। आयप्रत्ययाभावे तु आशीर्लिङि तिपि आर्धधातुकसंज्ञायां यासुडागमे यासुटः कित्त्वे च प्राप्तस्य लघूपधगुणस्य निषेधे 'गुप्यास् ति' इति जाते इकारस्य लोपे सकारतकारयोः संयोगत्वेन संयोगादेः सकारस्य लोपे च '**गुप्यात्**' इति रूपं सिद्ध्यति।

लुङो विवक्षायामपि विकल्पेन आयप्रत्यये लघूपधगुणादिना 'गोपाय' इति जाते धातुसंज्ञायां लुङि अडागमे तिपि च्लौ सिचि इडागमे अतो लोपे वर्णसम्मेलने 'अगोपायिस् ति' इति जाते इकारस्य लोपे अपृक्तत्वे ईडागमे सकारस्य लोपे सवर्णदीर्घे च '**अगोपायीत्**' इति रूपं सिद्ध्यति। तसादौ अपि पूर्ववद् रूपाणि जायन्ते।

आयप्रत्ययाभावे 'गुप्'धातोर्लुङि अडागमे तिपि च्लौ सिचि विकल्पेन इडागमे 'अ गुप् इस् ति' इति जाते हलन्तत्वाद् 'वदव्रजहलन्तस्याचः' इति सूत्रेण उकारस्य वृद्धौ प्राप्तायाम्-

## वृद्धिनिषेधकं सूत्रम्

**नेटि ७।२।४।।**

**इडादौ सिचि हलन्तलक्षणा वृद्धिर्न स्यात्। अगोपीत्, अगौप्सीत्।**

(वदव्रजहलन्तस्य, अचः, अङ्गस्य, परस्मैपदेषु, इटि, सिचि, वृद्धिः, न)

**सरलार्थः-** इडादौ परस्मैपदे सिचि 'वदव्रजहलन्तस्याचः' इति सूत्रेण वृद्धिर्न भवति।

इति सूत्रेण वृद्धिनिषेधे लघूपधगुणे वर्णसम्मेलने 'अगोपिस् ति' इति जाते इकारस्य लोपे अपृक्तसंज्ञायाम्, ईडागमे सकारस्य लोपे सवर्णदीर्घे च '**अगोपीत्**' इति रूपं सिद्धम्। तसादौ अगोपिष्टाम्। अगोपिषुः। अगोपीः, अगोपिष्टम्, अगोपिष्ट, अगोपिषम्, अगोपिष्व, अगोपिष्म इति रूपाणि।

इडागमाभावे 'अगुप् स् ति' इति जाते हलन्तलक्षणवृद्धौ 'अगौप् स् ति' इति जाते इकारस्य लोपे अपृक्तसंज्ञायाम्, ईडागमे वर्णसम्मेलने '**अगौप्सीत्**' इति रूपं निष्पन्नम् ।

तसि 'अ गौप् स् तस्' इत्यत्र तसस्तामादेशे च 'अ गौप् स् ताम्' इति जाते-

### सस्य लोपविधायकं विधिसूत्रम्

**झलो झलि ८।२।२६॥**

**झलः परस्य सस्य लोपः स्याज्झलि परे । अगौप्ताम् । अगौप्सुः । अगौप्सीः । अगौप्तम् । अगौप्त । अगौप्सम् । अगौप्स्व । अगौप्स्म । अगोपायिष्यत् । अगोपिष्यत् । अगोप्स्यत् ।**

(झलः, सः, झलि)

**सरलार्थः-** झलि परे झलः परस्य सकारस्य लोपो भवति ।

इति सकारस्य लोपे वर्णसम्मेलने 'अगौप्ताम्' इति रूपं सिद्ध्यति ।

झिप्रत्यये 'अ गौप् स् झि' इति जाते 'सिजभ्यस्तविदिभ्यश्च' इति सूत्रेण झेर्जुसादेशे 'अ गौप् स् उस्' एति जाते वर्णसम्मेलने पदत्वे रुत्वे विसर्गे च 'अगौप्सुः' इति रूपं सिद्ध्यति ।

सिपि तिपि परे इव, थसि थे च परयोः तसि इव रूपाणि । मिपि अमादेशे 'अगौप्सम्' । वसि मसि च 'नित्यं ङितः' इति सकारलोपे 'अगौप्स्व' 'अगौप्स्म' इति ।

लृङि अपि लृटि इव त्रिविधानि रूपाणि । अडागम-इकारलोपौ अत्र विशेषौ ।

**क्षि क्षये ॥१३॥ (क्षि- अनिट्, अकर्मकः, परस्मैपदी)**

**क्षयति । चिक्षाय । चिक्षियतुः । चिक्षियुः । 'एकाच' इति निषेधे प्राप्ते ।**

क्षयार्थकात् 'क्षि' धातोः लटि तिपि शपि गुणे'यादेशे च '**क्षयति**' इति रूपं जायते ।

लिटि तिपि णलि द्वित्वेऽभ्यासत्वे हलादिशेषे चुत्वे च 'चि क्षि अ' इति जाते धातोः अङ्गसंज्ञायाम् 'अचो ञ्णिति' इति इकारस्य वृद्धौ आयादेशे च '**चिक्षाय**' इति रूपं सिद्ध्यति ।

तसि अतुसादेशे द्वित्वादिके विहिते 'चि क्षि अतुस्' इति जाते अतुसः कित्त्वे गुणनिषेधे च 'अचि श्नुधातुभ्रुवां य्वोरियङुवङौ' इति सूत्रेण इकारस्य स्थाने इयङादेशेऽनुबन्धलोपे ङित्त्वादन्तादेशे वर्णसम्मेलने पदत्वे रुत्वे विसर्गे च '**चिक्षियतुः**' इति रूपं सिद्ध्यति । एवमेव झौ '**चिक्षियुः**' इति रूपं बोध्यम् । सिपि थलि 'क्षि थ' इति जाते थकारस्य आर्धधातुकसंज्ञायाम् 'आर्धधातुकस्येड्वलादेः' इति इडागमे प्राप्ते 'एकाच उपदेशेऽनुदात्तात्' इति सूत्रेण तस्य निषेधे-

### इणिनषेधकं सूत्रम्

**कृसृभृवृस्तुद्रुस्रुश्रुवो लिटि ७।२।१३॥**

**क्रादिभ्य एव लिट इण्न स्यात्, अन्यस्मादनिटोऽपि स्यात् ।**

(कृसृभृवृस्तुद्रुस्रुश्रुवः, लिटि, इट्, न)

**सरलार्थः-** कृ-सृ-भृ-वृ-स्तु-द्रु-स्रु-श्रुधातुभ्यः परस्य लिडादेशस्य इडागमो न भवति, तद्भिन्नाद् अनिटोऽपि धातोः परस्य वलादेर्लिडादेशस्य इडागमो भवति ।

इति सूत्रेण थलः पुनरिडागमे प्राप्ते-

### इणिनषेधकं सूत्रम्

**अचस्तास्वत्थल्यनिटो नित्यम् ७।२।६१॥**

**उपदेशेऽजन्तो यो धातुस्तासौ नित्यानिट् ततः परस्य थल इण् न ।**

(उपदेशे, अचः, तासि, नित्यम्, अनिटः, थलि, तास्वत्, इट्, न)

**सरलार्थः-** उपदेशे अजन्तधातुस्तासिप्रत्यये नित्यम् अनिड् वर्तते चेत् तादृशात् धातोः परस्य थल इडागमो न भवति ।

इति सूत्रेण थलः प्राप्तस्य इडागमस्य पुनर्निषेधे-

### इणिनषेधकं सूत्रम्

**उपदेशेऽत्वतः ७।२।६२॥**

**उपदेशेऽकारवतस्तासो नित्यानिटः परस्य थल इण्न स्यात् ।**

(उपदेशे, अत्वतः, तासि, नित्यम्, अनिटः, थलि, तास्वत्, इट्, न)

**सरलार्थः-** उपदेशे अकारवान् धातुः तासिप्रत्यये नित्यम् अनिड् वर्तते चेत् तस्मात् परस्य थल इडागमो न भवति ।

### इणिनषेधकं विधिसूत्रम्

**ऋतो भारद्वाजस्य ७।२।६३॥**

**तासौ नित्यानिट ऋदन्तादेव थलो नेट् भारद्वाजस्य मतेन । तेनान्यस्य स्यादेव ।**

(भारद्वाजस्य, ऋतः, तासि, नित्यम्, अनिटः, थलि, तास्वत्, इट्, न)

**सरलार्थः-** ऋकारान्तो धातुस्तासिप्रत्यये नित्यमनिड् वर्तते चेद् भारद्वाजस्य मते थलः इडागमो न भवति। तद्भिन्नधातुभ्यः परस्य थलस्तु इडागमो भवत्येव।

**अयमत्र सङ्ग्रहः-**

**अजन्तोऽकारवान् वा यस्तास्यनिट् थलि वेडयम्।**

**ऋदन्त ईदृङ् नित्यानिट् क्राद्यन्यो लिटि सेड् भवेत्॥**

**चिक्षयिथ, चिक्षेथ। चिक्षियथुः। चिक्षिय। चिक्षाय-चिक्षय। चिक्षियिव। चिक्षियिम। क्षेता। क्षेष्यति। क्षयतु। अक्षयत्। क्षयेत्॥**

**कारिकार्थः-** अयं भावः - यो धातुः अजन्तः, (क्षि जि इत्यादि) अकारवान् (गम् पच् इत्यादि) वा तासिप्रत्यये नित्यानिट् अस्ति तस्य थलि भारद्वाजमते न इडागमो भवति अन्यमते न भवति। यथा चिक्षयिथ/चिक्षेथ- जिगयिथ/जिगेथ। जगमिथ/जगन्थ। पेचिथ/पपक्थ। ह्रस्व-ऋकारान्तः (हृ धृ इत्यादि) यो धातुः तासिप्रत्यये अनिट् भवति तस्य थलि सर्वमते इड् न भवति। यथा- जहर्थ/दधर्थ। कृ- सृ-भृ-वृ-स्तु-द्रु-स्रु-श्रु धातुभ्यो भिन्नानां धातूनां लिटि वस्-मसौ इड् भवत्येव। यथा- चिक्षियिव/चिक्षियिम, जग्मिव/जग्मिम इत्यादि। क्रादीनाम् अष्टानां धातूनां तु लिटि क्वचिदपि इड् न भवति- चकर्थ। चकृव। चकृम। शुश्रोथ। शुश्रुव। शुश्रुम इत्यादि।

'ऋतो भारद्वाजस्य' इति सूत्रेण भारद्वाजस्य मते न थल इडागमे 'क्षि इ थ' इति जाते द्वित्वेऽभ्यासत्वे हलादिशेषे अङ्गत्वे गुणेऽयादेशे च '**चिक्षयिथ**' इति रूपं जायते। अन्येषां मते तु इडागमाभावे '**चिक्षेथ**' इति रूपं भवति।

लुटि तिपि तासिप्रत्यये प्राप्तस्य इडागमस्य निषेधे अङ्गत्वेन गुणे डादेशे टित्वे डित्त्वसामर्थ्यादभस्यापि टेर्लोपे 'क्षेता' इति रूपं जायते। एवमेव इडागमनिषेधे पूर्ववत् तसादौ रूपाणि सिद्ध्यन्ति।

आशीर्लिङि तिपि आर्धधातुकत्वे यासुडागमे यासुटः कित्त्वे धातोः अङ्गसंज्ञायां च प्राप्तस्य गुणस्य निषेधे 'क्षि यास् ति' इति जाते-

### दीर्घविधायकं सूत्रम्

**अकृत्सार्वधातुकयोर्दीर्घः ७।४।२५॥**

**अजन्ताङ्गस्य दीर्घः स्याद्यादौ प्रत्यये, न तु कृत्सार्वधातुकयोः। क्षीयात्।**

(अचः,अङ्गस्य, दीर्घः, यि, अकृत्सार्वधातुकार्धधातुकयोः)

**सरलार्थः-** कृद्भिन्ने सार्वधातुकभिन्ने च यकारादौ प्रत्यये परे अजन्तस्य अङ्गस्य दीर्घो भवति ।

अनेन सूत्रेण इकारस्य दीर्घे 'क्षीयास् ति' इति जाते इकारस्य लोपे सकारतकारयोः संयोगसंज्ञायां संयोगादेः सकारस्य लोपे च 'क्षीयात्' इति रूपं निष्पन्नम् । एवं तसादौ क्षीयास्ताम्/क्षीयासुः/क्षीयाः/ क्षीयास्तम्/ क्षीयास्त/ क्षीयासम्/ क्षीयास्व/ क्षीयास्म ।

लुङि तिपि च्लिप्रत्यये च्लेः सिचि सिचः प्राप्तस्य इडागमस्य निषेधे 'अ क्षि स् ति' इति जाते-

## वृद्धिरादेशविधायकं विधिसूत्रम्

**सिचि वृद्धिः परस्मैपदेषु ७।२।१॥**

**इगन्ताङ्गस्य वृद्धिः परस्मैपदे सिचि । अक्षैषीत् । अक्षेष्यत् ।**

(इकः, अङ्गस्य, वृद्धिः, परस्मैपदे, सिचि)

**सरलार्थः-** परस्मैपदपरके सिचि परे इगन्तस्य अङ्गस्य वृद्धिर्भवति ।

अनेन सूत्रेण वृद्धौ इकारस्य ऐकारे 'अक्षैस् ति' इति जाते इकारस्य लोपे अपृक्तसंज्ञायामीडागमे वर्णसम्मेलने षत्वे च 'अक्षैषीत्' इति रूपं सिद्ध्यति । तसि तामादेशे षत्वे ष्टुत्वे च 'अक्षैष्टाम्' इति रूपम् । झौ जुसादेशे वर्णसम्मेलने षत्वे पदत्वे रुत्वे विसर्गे च 'अक्षैषुः' इति रूपम्, सिबादिषु अक्षैषीः, अक्षैष्टम्, अक्षैष्ट, अक्षैषम्, अक्षैष्व, अक्षैष्म चेति रूपाणि ।

लृङि अडागमे लृटि परे इव स्यादिषु विहितेषु अन्त्येकारस्य लोपे 'अक्षेष्यत्' इति रूपं सिद्ध्यति ।

अक्षेष्यताम्, अक्षेष्यन्, अक्षेष्यः, अक्षेष्यतम्, अक्षेष्यत, अक्षेष्यम्, अक्षेष्याव, अक्षेष्याम ।

### गोपायति

गुप्धातोः 'गुपूधूपविच्छिपणिपनिभ्य आयः' इति सूत्रेण स्वार्थे आयप्रत्यये 'गुप् आय' इति जाते आयप्रत्ययस्य 'आर्धधातुकं शेषः' इति सूत्रेण आर्धधातुकसंज्ञायां 'पुगन्तलघूपधस्य च' इति सूत्रेण लघूपधगुणे 'गोपाय' इति जाते 'सनाद्यन्ता धातवः' इति सूत्रेण धातुसंज्ञायाम् 'वर्तमाने लट्' इति सूत्रेण लटि अनुबन्धलोपे लस्य स्थाने तिपि अनुबन्धलोपे तिपः 'तिङ्शित्सार्वधातुकम्' इति सूत्रेण सार्वधातुकसंज्ञायाम् 'कर्तरि शप्' इति सूत्रेण शपि अनुबन्धलोपे 'गोपाय अ ति' इति जाते 'अतो गुणे' इति सूत्रेण पररूपे 'गोपायति' इति रूपं सिद्ध्यति ।

**चिक्षयिथ**

क्षिधातोः 'परोक्षे लिट्' इति सूत्रेण लिटि अनुबन्धलोपे लस्य स्थाने मध्यमपुरुषैकवचनस्य विवक्षायां सिबादेशेऽनुबन्धलोपे 'परस्मैपदानां णलतुसुस्थलथुसणल्वमाः' इति सूत्रेण सिपः स्थाने थलादेशेऽनुबन्धलोपे 'क्षि थ' इति जाते 'लिटि धातोरनभ्यासस्य' इति द्वित्वे 'पूर्वोऽभ्यासः' इति सूत्रेण अभ्याससंज्ञायां 'हलादिः शेषः' इति सूत्रेण हलादिशेषे 'कि क्षि थ' इति जाते 'कुहोश्चुः' इति सूत्रेण 'चुत्वे चिक्षि अ' इति जाते लिट् च इति सूत्रेण आर्धधातुकसंज्ञायाम् 'आर्धधातुकस्येड् वलादेः' इति सूत्रेण इडागमे प्राप्ते 'एकाच उपदेशेऽनुदात्तात्' इति सूत्रेण तन्निषेधे 'कृसृभृवृस्तुद्रुस्रुश्रुवो लिटि' इति सूत्रनियमेन इडागमे प्राप्ते 'अचस्तास्वत्थल्यनिटो नित्यम्' इति सूत्रेण पुनः निषेधे जाते 'ऋतो भारद्वाजस्य' इति सूत्रेण भारद्वाजमते इडागमे जाते 'चिक्षि इथ' इति जाते 'सार्वधातुकार्धधातुकयोः' इति सूत्रेण गुणे अयादेशे वर्णयोगे 'चिक्षयिथ' इति रूपं सिद्धम् । पाणिनिमते इडागमाभावे 'चिक्षेथ' इत्यपि रूपं सिद्ध्यति ।

## वाक्येषु प्रयोगनिदर्शनम्

१. ईश्वरः अस्मान् गोपायति ।

२. श्रीकृष्णो महाभारतयुद्धे पाण्डवान् जुगोप ।

३. अद्य स्वकृतो धर्मः श्वः अस्मान् गोपायिता ।

४. त्वं दुःखिनं जनं गोपाय ।

५. विद्या मां गोपायिष्यति ।

६. कृष्णपक्षे चन्द्रमसः कलाः प्रतिदिनं क्षयति ।

७. आचारहीनस्य जनस्य आयुः क्षेष्यति ।

८. तव पापं क्षीयात् ।

## अभ्यासः

१. **शुद्धमुच्चारणं कुरुत**

(क) आयादय आर्धधातुके वा

(ख) कृञ्चानुप्रयुज्यते लिटि

(ग) स्वरतिसूतिसूयतिधूञूदितो वा

(घ) गुपूधूपविच्छिपणिपनिभ्य आयः

(ङ) कृसृभृवृस्तुद्रुस्रुश्रुवो लिटि

(च) अचस्तास्वत्थल्यनिटो नित्यम्

(छ) अकृत्सार्वधातुकयोर्दीर्घः

(ज) सनाद्यन्ता धातवः

(झ) द्विर्वचनेऽचि

(ञ) एकाच उपदेशेऽनुदात्तात्

२. **प्रश्नान् उत्तरयत**

(क) कुत्र आयादयो विकल्पेन विधीयन्ते ?

(ख) आमन्ताल्लिट्पराः केऽनुप्रयुज्यन्ते ?

(ग) अजन्तोऽकारवान् वा यः... इति कारिकार्थं प्रकाशयत ।

(घ) चान्तेषु के धातवोऽनुदात्ताः ?

(ङ) मान्तेषु के धातवोऽनुदात्ताः ?

(च) भारद्वाजमते कुत्र इट् कुत्र नेति निरूपयत ।

(छ) क्षिधातोः आशीर्लिङि कानि रूपाणि भवन्ति ?

३. **सोदाहरणं सूत्राणामर्थं लिखत**

(क) अतो लोपः

(ख) द्विर्वचनेऽचि

(ग) एकाच उपदेशेऽनुदात्तात्

(घ) झलो झलि

(ङ) कृञ्चानुप्रयुज्यते लिटि

(च) नेटि

(छ) कृसृभृवृस्तुद्रुस्रुश्रुवो लिटि

(ज) ऋतो भारद्वाजस्य

(झ) सिचि वृद्धिः परस्मैपदेषु

**४. अधस्तनानां धातूनां निर्दिष्टलकारेषु रूपाणि विलिखत**

(क) गुप् (लिट्) (ख) गुप् (लोट्) (ग) गुप् (लुङ्)

(घ) क्षि -लिट्) (ङ) क्षि (लोट्) (च) क्षि (विधिलिङ्)

(छ) गुप् (आ. लिङ्) (ज) क्षि -आ.लिङ्)

**५. अजन्तेषु हलन्तेषु च के धातवोऽनुदात्ताः ?**

**६. अजन्तेषु एकाज्धातूनां सेट्त्वानिट्त्वयोर्विनिश्चयं यथाप्रमाणं कुरुत ।**

**७. प्रमुखसूत्रनिदर्शनपूर्वकं रूपसिद्धिप्रकारं प्रदर्शयत**

(क) गोपायति (ख) गोपायांबभूव (ग) अगोपायीत्

(घ) गोपाय (ङ) गुप्यात् (च) क्षयति

(छ) चिक्षयिथ/चिक्षेथ (ज) क्षेष्यति (झ) क्षीयात्

(ञ) अक्षैषीत् (ट) गोपायिता/गोपिता/गोप्ता

**८. अधस्तनपदानां धातुलकारपुरुषवचनानि निर्दशत**

(क) जुगुपुः (ख) अगोपायास्ताम् (ग) क्षियासुः

(घ) क्षीयाः (ङ) गोपाय

**९. सिद्धपदानि दर्शयत**

(क) क्षि+लिट् (मस्) (ख) क्षि+ आ. लिङ् (झि)

(ग) क्षि+ लुङ् (सिप्) (घ) गुप् + विधिलिङ् (मस्)

(ङ) गुप् + लृङ् (मिप्)

**१०. पदानां वाक्ये प्रयोगं निदर्शयत**

(क) गोपायति (ख) जुगोप (ग) गोप्ता

(घ) अगोपीत् (ङ) क्षयेत् (च) क्षेष्यति

सप्तमः पाठः

# त्रप्-क्रमादिधातवः

**तप सन्तापे ॥१४॥** (तप्- अनिट्, अकर्मकः परस्मैपदी) ।

**तपति । तताप । तेपतुः । तेपुः । तेपिथ । ततप्थ, तप्ता । तप्स्यति । तपतु । अतपत् । तपेत् । तप्यात् । अताप्सीत् । अताप्ताम् । अतप्स्यत् ।**

'तप्'धातोः लटि तिपि शपि 'तपति' इति रूपं सिद्ध्यति ।

'तप्'धातोर्लिटि तिपि णलि द्वित्वेऽभ्याससंज्ञायां हलादिशेषे उपधावृद्धौ च 'तताप' इति रूपं निष्पद्यते । तसि तेपतुः (अत एकहल्मध्येऽनादेशादेर्लिटि) । झौ 'तेपुः' । सिपि तस्य थलि आर्धधातुकत्वेन प्राप्तस्य इडागमस्य अनुदात्तत्वाद् निषेधे पुनः क्रादिनियमेन प्राप्तस्य इडागमस्य अकारवत्त्वाद् निषेधे ततो भारद्वाजस्य मते इडागमे 'तप् इथ' इति जाते द्वित्वेऽभ्यासत्वे 'थलि च सेटि' इति सूत्रेण अभ्यासस्य लोपे अनभ्यासस्य अकारस्य एत्त्वे वर्णसम्मेलने च 'तेपिथ' इति रूपम्, भारद्वाजेतरमते तु इडागमाभावे द्वित्वेऽभ्याससंज्ञायां हलादिशेषे 'ततप्थ' इति रूपं भवति । थसादौ तेपथुः, तेप, तताप, ततप, तेपिव, तेपिम ।

लुटि, लृटि च अनुदात्तत्वाद् इडागमनिषेधो भवति । लोटि, लङि, विधिलिङि, आशीर्लिङि च 'गद्'धातोरिव रूपाणि जायन्ते ।

लुङि तिपि च्लौ सिचि अनुदात्तत्वाद् इडागमनिषेधे हलन्तलक्षणवृद्धौ च 'अ ताप् स् ति' इति जाते इकारस्य लोपे अपृक्तत्वे ईडागमे वर्णसम्मेलने च 'अताप्सीत्' इति रूपं भवति । तसि 'अताप् स् तस्' इत्यत्र तसस्तामादेशे 'झलो झलि' इति सकारस्य लोपे च 'अताप्ताम्' इति रूपं जायते । झौ सिचः परस्य झेर्जुसि वर्णसम्मेलने पदत्वे रुत्वे विसर्गे च 'अताप्सुः' इति रूपम् । सिपादिषु अताप्सीः, अताप्तम्, अताप्त, अताप्सम्, अताप्स्व, अताप्स्म इति च रूपाणि । लृङि अतप्स्यत् इति रूपम् ।

**क्रमु पादविक्षेपे ॥१५॥** (क्रम्- सेट्, सकर्मकः परस्मैपदी) पादविक्षेपो गमनम् ।

'क्रम्' इत्यस्य धातुसंज्ञायां तस्माद् लटि तिपि प्राप्तं शपं प्रबाध्य-

### विभाषया श्यन्विधायकं सूत्रम्

**वा भ्राशभ्लाशभ्रमुक्रमुक्लमुत्रसित्रुटिलषः ३।१।७०॥**

**एभ्यः श्यन्वा, कर्तरि सार्वधातुके । पक्षे शप् ।**

(भ्राशभ्लाशभ्रमुक्रमुक्लमुत्रसित्रुटिलषः, वा, श्यन्, कर्तरि, सार्वधातुके)

**सरलार्थः-** कर्त्रर्थे विहिते सार्वधातुके परे भ्राश्, भ्लाश्, भ्रम्, क्रम्, क्लम्, त्रस्, त्रुट्, लष् एभ्यो धातुभ्यो विकल्पेन श्यन्प्रत्ययो भवति ।

इति सूत्रेण विकल्पेन श्यन्प्रत्ययेऽनुबन्धलोपे 'क्रम् य ति' इति जाते-

### दीर्घादेशविधायकं विधिसूत्रम्

**क्रमः परस्मैपदेषु ७।३।७६॥**

**क्रमेर्दीर्घः, परस्मैपदे शिति । क्राम्यति । क्रामति । चक्राम । क्रमिता । क्रमिष्यति । क्राम्यतु । क्रामतु । अक्राम्यत् । अक्रामत् । क्राम्येत् । क्रामेत् । क्रम्यात् । अक्रमीत् । अक्रमिष्यत् ॥**

(क्रमः, अङ्गस्य, दीर्घः, परस्मैपदेषु, शिति)

**सरलार्थः-** परस्मैपदसंज्ञके शिति परे 'क्रम्'धातोः अकारस्य दीर्घो भवति ।

अनेन अकारस्य दीर्घे वर्णयोगे 'क्राम्यति' इति रूपं सिद्ध्यति । श्यन्प्रत्ययाभावे तु शपि अकारस्य दीर्घे 'क्रामति' इति रूपं सिद्ध्यति । लिटि प्रथमपुरुषे चक्राम, चक्रमतुः, चक्रमुः । थलि इडागमे चक्रमिथ, चक्रमथुः, चक्रम । चक्राम, चक्रम, चक्रमिव, चक्रमिम ।

लुङि तिपि च्लौ सिचि आर्धधातुकसंज्ञायामिडागमे 'अक्रम् इस् ति' इति जाते प्राप्ताया हलन्तलक्षणवृद्धेः 'नेटि' इति निषेधे पुनः 'अतो हलादेर्लघोः' इति वैकल्पिकवृद्धौ प्राप्तायां 'ह्म्यन्तक्षणश्वसजागृणिश्व्येदिताम्' इति सूत्रेण वृद्धिनिषेधे वर्णसम्मेलने इकारस्य लोपे ईडागमे सकारस्य लोपे सवर्णदीर्घे च '**अक्रमीत्**' इति रूपं सिद्ध्यति । तसादौ अपि एवमेव वृद्धिनिषेधे- अक्रमिष्टाम्, अक्रमिषुः, अक्रमीः, अक्रमिष्टम्, अक्रमिष्ट, अक्रमिषम्, अक्रमिष्व, अक्रमिष्म । लृङि **अक्रमिष्यत् ।**

**पा पाने ॥१६॥** (पा- अनिट्, सकर्मकः, परस्मैदी)

पानार्थकात् पाधातोर्लटि तिपि शपि 'पा अ ति' इति जाते-

### पिबाद्यादेशविधायकं विधिसूत्रम्

**पा-घ्रा-ध्मा-स्था-म्ना-दाण्-दृश्यर्ति-सर्ति-शद-सदां पिब-जिघ्र-धम-तिष्ठ-मन-यच्छ-**

**पश्यर्च्छ-धौ-शीय-सीदाः ७।३।७८॥**

**पादीनां पिबादयः स्युरित्संज्ञकशकारादौ प्रत्यये परे। पिबादेशोऽदन्तस्तेन न गुणः। पिबति।**

(पा-घ्रा-ध्मा-स्था-म्ना-दाण्-दृश्यर्ति-सर्ति-शद-सदाम्, अङ्गस्य, पिब-जिघ्र-धम-तिष्ठ-मन-यच्छ-पश्यर्च्छ-धौ-शीय-सीदाः, शिति)

**सरलार्थः-** शिति प्रत्यये परे पादीनां धातूनां स्थाने क्रमेण पिबादय आदेशा भवन्ति। तथाहि आदेशतालिका-

| | | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|---|
| पा | घ्रा | ध्मा | स्था | म्ना | दाण् | दृश् | ऋ | सृ | शद् | सद् |
| पिब | जिघ्र | धम | तिष्ठ | मन | यच्छ | पश्य | ऋच्छ | धौ | शीय | सीद |

'धौ' इति वर्जयित्वा पिबादय ये आदेशाः सन्ति, ते सर्वेऽपि अकारान्ता वर्तन्ते। तेन 'पिब' इत्यत्र लघूपधगुणो न भवति।

इति सूत्रेण 'पा' इत्यस्य स्थाने 'पिब' इत्यादेशे 'पिब अ ति' इति जाते 'अतो गुणे' इति पररूपे '**पिबति**' इति रूपं सिद्ध्यति।

लिटि तिपि णलि द्वित्वेऽभ्याससंज्ञायां ह्रस्वे 'प पा अ' इति जाते-

### औकारादेशविधायकं विधिसूत्रम्

**आत औ णलः ७।१।३४॥**

**आदन्ताद्धातोर्णल औकारादेशः स्यात्। पपौ।**

(आतः, धातोः, णलः, औ)

**सरलार्थः-** आकारान्ताद् धातोः परस्य 'णल्' इत्यस्य अकारस्य स्थाने औकारादेशो भवति।

इति सूत्रेण णलः अकारस्य स्थाने औकारादेशे 'पपा औ' इति जाते 'वृद्धिरेचि' इति वृद्धौ '**पपौ**' इति रूपं निष्पन्नं भवति। तसि अतुसि द्वित्वेऽभ्यासत्वे ह्रस्वे 'प पा अतुस्' इति जाते अतुसः कित्त्वे च-

### आकारलोपविधायकं विधिसूत्रम्

**आतो लोप इटि च**..........................................................

**अजाद्योरार्धधातुकयोः क्ङिदिटोः परयोरातो लोपः। पपतुः। पपुः। पपिथ। पपाथ। पपथुः। पप। पपौ। पपिव। पपिम। पाता। पास्यति। पिबतु। अपिबत्। पिबेत्।**

(आतः, अङ्गस्य, लोपः, आर्धधातुके, अचि, क्ङिति, इटि च)

**सरलार्थः**- अजादौ किति ङिति आर्धधातुके परे, इटि च परे आकारस्य लोपो भवति ।

इति सूत्रेण धातोः आकारस्य लोपे वर्णसम्मेलने पदत्वे रुत्वे विसर्गे च '**पपतुः**' इति रूपं सम्पद्यते । झौ एवमेव '**पपुः**' इति रूपं सिद्ध्यति । सिपि थलि भारद्वाजस्य मते इडागमे द्वित्वेऽभ्यासत्वे ह्रस्वे च 'पपा इथ' इति जाते 'आतो लोप इटि च' इति सूत्रेण आकारस्य लोपे '**पपिथ**' इति रूपम्, अन्येषां मते तु इडागमाभावे '**पपाथ**' इति रूपं भवति ।

लुटि इडागमनिषेधे 'पाता', लृटि 'पास्यति' । लोटि लङि विधिलिङि च पिबादेशे पिबतु, अपिबत्, पिबेत् इत्यादीनि रूपाणि । आशीर्लिङि तिपि आर्धधातुकत्वे यासुडागमे च 'पा यास् ति' इति जाते-

### एत्वादेशविधायकं विधिसूत्रम्

**एर्लिङि ६।४।६७॥**

**घुसंज्ञकानां मास्थादीनां चाऽऽत एत्वं स्यादार्धधातुके किति लिङि । पेयात् । 'गातिस्थे'ति सिचो लुक् । अपात् । अपाताम् ।**

(घुमास्थापाजहातिसाम्, आतः, एः, आर्धधातुके, किति, लिङि)

**सरलार्थः**- घुसंज्ञकानां धातूनां, मा माने, ष्ठा गतिनिवृत्तौ, गै शब्दे, पा पाने, ओहाक् त्यागे, षो अन्तःकर्मणि एतेषां धातूनां च आकारस्य एत्वं भवति, लिङ्सम्बद्धे आर्धधातुके किति प्रत्यये परे ।

अनेन आकारस्य एत्वे इकारस्य लोपे सकारतकारयोः संयोगत्वेन संयोगादेः सकारस्य लोपे च '**पेयात्**' इति रूपं निष्पद्यते । तसादौ पेयास्ताम्, पेयासुः, पेयाः, पेयास्तम्, पेयास्त, पेयासम्, पेयास्व, पेयास्म ।

लुङि तिपि च्लौ सिचि 'गाति-स्था...' इति सूत्रेण सिचो लुकि इकारस्य लोपे च 'अपात्' इति रूपं निष्पद्यते । तसि तसस्तामादेशे 'अपाताम्' इति रूपं भवति । झौ सिज्लुकि 'अपा झि' इति जाते-

### जुसादेशविधायकं नियमसूत्रम्

**आतः ३।४।११०॥**

**सिज्लुकि आदन्तादेव झेर्जुस् ।**

(आतः, (लुगन्तात्) सिचः, झेः, जुस्)

**सरलार्थः-** सिचो लुकि जाते आकारान्ताद् धातोः परस्यैव झेः स्थाने जुसादेशो भवति । अन्यस्माद् धातोः परस्य झेः स्थाने जुसादेशो न भवति ।

इति सूत्रेण झेर्जुसादेशेऽनुबन्धलोपे 'अपा उस्' इति जाते-

### पररूपविधायकं विधिसूत्रम्

**उस्यपदान्तात् ६।१।९६॥**

**अपदान्तादवर्णादुसि पररूपमेकादेशः । अपुः । अपास्यत् ।**

(अपदान्तात्, आत्, उसि, पूर्वपरयोः, एकः, पररूपम्)

**सरलार्थः-** अपदान्ते वर्तमानाद् अवर्णाद् उसि परे पूर्वपरयोः स्थाने पररूपम् एकादेशो भवति ।

इति सूत्रेण पररूपे पदत्वे रुत्वे विसर्गे च 'अपुः' इति रूपं जायते । तसादिषु अपाः, अपातम्, अपात, अपाम्, अपाव, अपाम । लृटि अपास्यत् ।

**ग्लै हर्षक्षये ॥१७॥** (ग्लै-अनिट्, अकर्मकः, परस्मैपदी) ।

ग्लैधातोः लटि, तिपि, शपि, धातोः ऐकारस्य आयादेशे वर्णसम्मेलने ग्लायति इति रूपम् ।

ग्लैधातोः लिटि, तिपि, णलि च 'ग्लै अ' इति जाते-

### आत्वविधायकं विधिसूत्रम्

**आदेच उपदेशेऽशिति ६।१।४५॥**

**उपदेशे एजन्तस्य धातोरात्त्वं न तु शिति । जग्लौ । ग्लाता । ग्लास्यति । ग्लायतु । अग्लायत् । ग्लायेत् ॥**

(उपदेशे, एचः, आत्, अशिति)

**सरलार्थः-** उपदेशे यो धातुः एजन्तो वर्तते, तस्य एचः स्थाने आकारादेशो भवति, शिति प्रत्यये परे तु न भवति । शित् नाम शबादिरेव, शबादयः शित्प्रत्ययाः सार्वधातुकलकारेषु विधीयन्ते न तु आर्धधातुकलकारेषु, अतः सार्वधातुकलकारेषु धातोरेच आत्वं न भवति, आर्धधातुकलकारेषु धातोरेच आत्वं भवति । अनेन सूत्रेण धातोः ऐकारस्य आत्वे 'ग्ला अ'

इत्यवस्थायां धातोः द्वित्वे, अभ्यासादिकार्ये च 'जग्ला अ' इति जाते 'आत औ णलः' इति णलः औकारादेशे 'अचो ञ्णिति' इति वृद्धौ '**जग्लौ**' इति रूपं सिद्ध्यति ।

अतुसादिषु परेषु 'जग्ला अतुस्' इत्यवस्थायाम् 'आतो लोप इटि च' इति धातोः आकारस्य लोपे वर्णसम्मेलने पदत्वे रूत्वे विसर्गे च '**जग्लतुः**' इत्यादीनि रूपाणि । जग्लुः, जग्लिथ । जग्लाथ, जग्लथुः, जग्ल, जग्लौ, जग्लिव, जग्लिम । लुटि ग्लाता । लृटि ग्लास्यति । लोटि ग्लायतु । लङि अग्लायत् । विधिलिङि ग्लायेत् ।

आशीर्लिङि धातोः आत्वे, यासुडागमे तस्य 'किदाशिषि' इति कित्वे इकारलोपे च 'ग्ला यास् त्' इति जाते-

## एत्वविधायकं विधिसूत्रम्

**वाऽन्यस्य संयोगादेः ६।४।६८॥**

**घुमास्थादेरन्यस्य संयोगादेर्धातोरात एत्वं वार्धधातुके किति लिङि । ग्लेयात् । ग्लायात् ।**

(घुमास्थादेः, अन्यस्य, संयोगादेः, धातोः, आतः, एः, वा, आर्धधातुके, क्ङिति, लिङि)

**सरलार्थः-** घुसंज्ञकेभ्यः, मा माने, ष्ठा गतिनिवृत्तौ, गै शब्दे, पा पाने, ओहाक् त्यागे, षो अन्तःकर्मणि इत्येतेभ्यो धातुभ्यश्च अन्यस्य संयोगादेः धातोः अवयवस्य आकारस्य स्थाने विभाषया एत्वं भवति आर्धधातुके किति ङिति च लिङि परे ।

अनेन धातोः आकारस्य विभाषया एत्वे 'ग्लेयास् ति' इति जाते इकारलोपे सकारस्य संयोगादिलोपे (स्कोः संयोगाद्योरन्ते च) च '**ग्लेयात्**' इति रूपम् । आत्वाभावे धातोः आत्वे- **ग्लायात्** । तसादिषु शेषप्रक्रिया पूर्ववत् ।

लुङि तिपि, च्लौ, तस्य सिचि, आत्वे, इकारलोपानन्तरं तकारस्य ईडागमे च 'अग्ला स् ईत्' इति जाते-

## इट्सकागमविधायकं विधिसूत्रम्

**यमरमनमातां सक् च ७।२।७३॥**

**एषां सक् स्यात्, एभ्यः सिच इट्, परस्मैपदेषु । अग्लासीत् । अग्लास्यत् ।**

(यमरमनमातां, सक्, सिचः, इट्, च, परस्मैपदेषु)

**सरलार्थः-** यम्, रम्, नम् इत्येतेषाम्, आकारान्तानाञ्च धातूनां सक् इत्यागमो भवति, एभ्यः परस्य सिचः इडागमश्च भवति, परस्मैपदसंज्ञकेषु प्रत्ययेषु

परेषु । सगागमस्यानुबन्धेन 'स्' इति शिष्यते ।

अनेन सूत्रेण धातोः परः सगागमे सिचः इडागमे च 'अग्ला स् इ स् ईत्' इति जाते सकारलोपे (इट ईटि) सवर्णदीर्घे वर्णसम्मेलने 'अग्लासीत्' इति रूपं जायते ।

**क्राम्यति**

क्रम्धातोः 'वर्तमाने लट्' इति सूत्रेण लटि अनुबन्धलोपे लस्य स्थाने 'तिप्तस्झिः०' इत्यादिना सूत्रेण तिबादेशेऽनुबन्धलोपे 'क्रम् ति' इति जाते 'तिङ्शित्सार्वधातुकम्' इति सूत्रेण तिपः सार्वधातुकसंज्ञायां प्राप्तं शपं बाधित्वा 'वा भ्राशभ्लाशभ्रमुक्रमुक्लमुत्रसित्रुटिलषः' इति सूत्रेण विकल्पेन श्यन्प्रत्ययेऽनुबन्धलोपे 'क्रम् य ति' इति जाते 'क्रमः परस्मैपदेषु' इति सूत्रेण दीर्घे वर्णसम्मेलने 'क्राम्यति' इति रूपं सिद्धम् । श्यन्प्रत्ययाभावपक्षे शपि दीर्घे च कृते 'क्रामति' इत्यपि प्रयोग इष्यते ।

**पपौ**

पाधातोः 'परोक्षे लिट्' इति सूत्रेण लिटि अनुबन्धलोपे लस्य स्थाने तिबादेशेऽनुबन्धलोपे 'परस्मैपदानां णलतुसुस्थलथुसणल्वमाः' इति सूत्रेण तिपः स्थाने णलादेशेऽनुबन्धलोपे 'पा अ' इति जाते 'लिटि धातोरनभ्यासस्य' इति सूत्रेण द्वित्वे 'पूर्वोऽभ्यासः' इति पूर्वस्य अभ्यासत्वे 'ह्रस्वः' इति अभ्यासस्य ह्रस्वे 'पपा अ' इति जाते 'आत औ णलः' इति सूत्रेण णलः स्थाने औकारादेशे 'वृद्धिरेचि' इति वृद्धौ 'पपौ' इति रूपं सिद्धम् ।

**अग्लासीत्**

ग्लैधातोः 'लुङ्' इति सूत्रेण लुङि अनुबन्धलोपे 'लुङ्लङ्लृङ्क्ष्वडुदात्तः' इति सूत्रेण अडागमेऽनुबन्धलोपे लस्य स्थाने तिबादेशेऽनुबन्धलोपे तिपः सार्वधातुकत्वेन प्राप्तं शपं बाधित्वा 'च्लि लुङि' इति च्लिप्रत्यये 'च्लेः सिच्' इति च्लेः स्थाने सिजादेशेऽनुबन्धलोपे 'अग्लै स् ति' इति जाते 'आदेच उपदेशेऽशिति' इति सूत्रेण आत्वे सिच 'आर्धधातुकं शेषः' इति सूत्रेण आर्धधातुकसंज्ञायाम् 'आर्धधातुकस्येड्वलादेः' इति सूत्रेण इडागमे प्राप्ते 'एकाच उपदेशेऽनुदात्तात्' इति सूत्रेण तन्निषेधे 'यमरमनमातां सक् च' इति सूत्रेण सिच इडागमे धातोः सगागमेऽनुबन्धलोपे जाते 'अग्ला स् इ स् ति' इति स्थिते 'इतश्च' इति इकारस्य लोपे 'अस्तिसिचोऽपृक्ते' इति सूत्रेण अपृक्तस्य ईडागमेऽनुबन्धलोपे 'इट ईटि' इति सकारस्य लोपे दीर्घे वर्णसम्मेलने 'अग्लासीत्' इति रूपं सिद्धम् ।

## ग्लैधातोः कर्तरि लुङि रूपाणि

| | | |
|---|---|---|
| अग्लासीत् | अग्लासिष्टाम् | अग्लासिषुः |
| अग्लासीः | अग्लासिष्टम् | अग्लासिष्ट |
| अग्लासिषम् | अग्लासिष्व | अग्लासिष्म |

## वाक्येषु प्रयोगनिदर्शनानि

१. विश्वामित्रः वने तपस्तेपे ।
२. रामः स्वगृहं प्रति क्राम्यति ।
३. तृषितो जनो जलं पिबति ।
४. महर्षिः अगस्त्यः समुद्रं पपौ ।
५. बालका दुग्धं पिबन्तु ।
६. अलसः छात्रः पठनभाराद् ग्लायति ।
७. त्वं ह्यो दूषितं जलम् अपिबः ?
८. जनः सुरां न पिबेत् ।
९. शिशुः मातृदुग्धम् अपात् ।
१०. रामः परीक्षायाम् असफलो भूत्वा अग्लायत् ।

## अभ्यासः

१. **शुद्धमुच्चारणं कुरुत**

(क) अकृत्सार्वधातुयोर्दीर्घः

(ख) वा भ्राशभ्लाशभ्रमुक्रमुक्लमुत्रसित्रुटिलषः

(ग) पाघ्राध्मास्थाम्नादाण्दृश्यर्तिसर्तिशदसदां
पिबजिघ्रधमतिष्ठमनयच्छपश्यर्च्छधौशीयसीदाः

(घ) यमरमनमातां सक् च

२. **तप्धातुः कस्मिन् अर्थे प्रयुज्यते ?**

३. **ग्लैधातोः प्रयोगः कस्मिन् अर्थे भवति ?**

४. 'तेपिथ' इत्यत्र एत्वाभ्यासलोपौ केन सूत्रेण भवतः ?

५. 'पाघ्राध्मा०' इति सूत्रं पूरयत ।

६. पाधातोः स्थाने पिबादेशः कस्मिन् कस्मिन् लकारे भवति ?

७. ग्लैधातोः आत्वं कस्मिन् कस्मिन् लकारे भवति ?

८. मास्थादिधातुषु के धातव आयान्ति ?

९. पिबादेशस्य अदन्तत्वाभावे को दोषः ?

१०. पाग्लैधातू सेटौ अनिटौ वा ? निश्चिनुत ।

११. पपुः, तप्यात्, अपाम्, चक्राम, ग्लेयाः, एषां धातुलकारपुरुषवचनानि निर्धारयत ।

१२. तप्धातोः लिटि, क्रम्धातोः लटि, पाधातोः लङि ग्लैधातोः लुङि च रूपाणि प्रदर्शयत ।

१३. अधो लिखितानां प्रयोगाणां साधनप्रकारं ससूत्रं लिखत

तताप, क्राम्यतु, पिबति, पपौ, अपुः, ग्लायति, जग्लौ, ग्लेयात् ।

१४. अधस्तनानां सूत्राणामर्थं लिखत

(क) आतो लोप इटि च

(ख) आतः

(ग) उस्यपदान्तात्

(घ) आदेच उपदेशेऽशिति

(ङ) यमरमनमातां सक् च

(च) क्रमः परस्मैपदेषु

(छ) आत औ णलः

(ज) एर्लिङि

(झ) वाऽन्यस्य संयोगादेः

१५. 'पा-घ्रा-ध्मा-...' इति सूत्रं प्रपूर्य स्थानिभिरादेशानां परस्परमेलनेन तदर्थं प्रकाशयत ।

१६. सिद्धपदानि दर्शयत

(क) तप् + लुट् (तस्)

(ख) तप् + लोट् (सिप्)

(ग) क्रम् + विधिलिङ् (झि)

(घ) क्रम् + लिट् (थ)

(ङ) पा + आशीर्लिङ् (मिप्)

(च) ग्लै + लृङ् (थस्)

(छ) पा + लृट् (तिप्)

(ज) ग्लै + लट् (मस्)

(झ) तप् + लङ् (वस्)

१७. पदानां वाक्ये प्रयोगं निदर्शयत

(क) अतपत् ।

(ख) तपामि

(ग) ग्लायसि

(घ) पास्यसि

(ङ) पेयात्

(च) ग्लाता

अष्टमः पाठः

# ह्वृप्रभृतीनां धातूनां रूपसिद्धिप्रक्रियानिदर्शनम्

**ह्वृ कौटिल्ये ॥१८॥**

(ह्वृ- अनिट्, सकर्मकः, परस्मैपदी)

ह्वृधातोः लटि तिपि शपि गुणे रपरत्वे वर्णसम्मेलने च 'ह्वरति' इति रूपं सिद्ध्यति ।

लिटि तिपि णलि 'ह्वृ अ' इति जाते-

## गुणविधायकं विधिसूत्रम्

**ऋतश्च संयोगादेर्गुणः ७।४।१०॥**

**ऋदन्तस्य संयोगादेरङ्गस्य गुणो लिटि । उपधाया वृद्धिः । जह्वार । जह्वरतुः । जह्वरुः । जह्वर्थ । जह्वरथुः । जह्वर । जह्वार, जह्वर । जह्वरिव । जह्वरिम । ह्वर्ता ।**

(संयोगादेः, ऋतः, च, अङ्गस्य, गुणः, लिटि)

**सरलार्थः-** लिटि परे संयोगादेः ऋकारान्तस्य अङ्गस्य गुणो भवति । अनेन सूत्रेण ऋकारस्य गुणे 'ह्वर् अ' इति जाते द्वित्वेऽभ्यासत्वे हलादिशेषे 'कुहोश्चुः' इति अभ्यासहकारस्य चवर्गादेशे अकारस्य उपधासंज्ञायां वृद्धौ वर्णसम्मेलने च '**जह्वार**' इति रूपं सिद्ध्यति । तसि झिप्रत्यये च '**जह्वरतुः**' '**जह्वरुः**' इति रूपे । थलि ऋदन्तत्वात् समेषां मते इडागमस्य निषेधे गुणे च **जह्वर्थ** इति । अथुसि गुणे **जह्वरथुः** । वस्मसोः जह्वरिव, जह्वरिम ।

लुटि इडागमनिषेधे 'ह्वर्ता' इति रूपं जायते ।

लृटि तिपि स्यप्रत्यये 'ह्वृ' स्य ति' इति जाते प्राप्तस्य इडागमस्य एकाच्त्वाद् निषेधे प्राप्ते-

## इडागमविधायकं विधिसूत्रम्

**ऋद्धनोः स्ये ७।२।७०॥**

**ऋतो, हन्तेश्च स्यस्य इट् । ह्वरिष्यति । ह्वरतु । अह्वरत् । ह्वरेत् ॥**

(ऋद्धनोः, अङ्गस्य, स्ये, इट्)

**सरलार्थः–** ऋकारान्ताद् धातोः 'हन्'धातोश्च परस्य स्यप्रत्ययस्य इडागमो भवति ।

इति सूत्रेण स्यस्य इडागमेऽनुबन्धलोपे टित्त्वादाद्यवयवे 'ह्वृ' इस्य ति' इति जाते धातोः अङ्गत्वेन ऋकारस्य गुणे वर्णसम्मेलने '**ह्वरिष्यति**' इति रूपं सिद्धम् ।

लोटि लङि विधिलिङि च शबादिना ह्वरतु, अह्वरत्, ह्वरेत् इत्यादिरूपाणि । आशीर्लिङि तिपि आर्धधातुकसंज्ञायाम् यासुडागमे 'ह्वृ यास् ति' इति जाते-

### गुणादेशविधायकं विधिसूत्रम्

**गुणोऽर्तिसंयोगाद्योः ७।४।२९॥**

**अर्तेः, संयोगादेर्ऋदन्तस्य च गुणः स्याद्यकि यादावार्द्धधातुके लिङि च । ह्वर्यात् । अह्वार्षीत् । अह्वरिष्यत् ।**

(अर्तिसंयोगाद्योः, ऋतः, असार्वधातुके, यग्लिङोः, यि, अङ्गस्य)

**सरलार्थः–** यकि, यकारादौ आर्धधातुके च परे ऋधातोः, संयोगादेः ऋकारान्तस्य च धातोः गुणो भवति ।

इति सूत्रेण ऋकारस्य गुणे 'ह्वर् यास् ति' इति जाते इकारस्य लोपे सकारतकारयोः संयोगसंज्ञायां संयोगादेः सकारस्य लोपे च '**ह्वर्यात्**' इति रूपं सिद्ध्यति । ह्वर्यास्ताम्, ह्वर्यासुः, ह्वर्याः, ह्वर्यास्तम्, ह्वर्यास्त, ह्वर्यासम्, ह्वर्यास्व, ह्वर्यास्म ।

लुङि तिपि च्लौ सिचि इडागमस्य एकाच्त्वाद् निषेधे 'अ ह्वृ' स् ति' इति जाते 'सिचि वृद्धिः परस्मैपदेषु' इति सूत्रेण ऋकारस्य वृद्धौ 'अह्वार् स् ति' इति जाते इकारस्य लोपे अपृक्तसंज्ञायामीडागमे वर्णसम्मेलने सकारस्य षत्वे च '**अह्वार्षीत्**' इति रूपं निष्पद्यते । लृङि 'ऋद्धन्नोः स्ये' इति इडागमे '**अह्वरिष्यत्**' इति रूपम् ।

**श्रु श्रवणे ॥१९॥** (श्रु- अनिट्, सकर्मकः, परस्मैपदी)

श्रु इत्यस्य धातुसंज्ञायां तस्माद् वर्तमाने कर्तर्यर्थे लट्लकारे तस्य स्थाने प्रथमपुरुषैकवचने तिपि 'श्रु ति' इति जाते-

### श्रृ इत्यादेशविधायकं विधिसूत्रम्

**श्रुवः शृ च ३।१।७४॥**

**श्रुवः 'शृ' आदेशः श्नुप्रत्ययश्च, कर्तरि सार्वधातुके । शृणोति ।**

(श्रुवः, शृ, श्नुः, च, कर्तरि, सार्वधातुके)

**सरलार्थः-** श्रुधातोः स्थाने 'शृ' इत्यादेशो भवति, ततः शपं प्रबाध्य श्नुप्रत्ययश्च भवति ।

इति सूत्रेण 'श्रु' इत्यस्य स्थाने 'शृ' इत्यादेशे ततः श्नुप्रत्यये च शकारस्यानुबन्धलोपे 'शृ नु ति' इति जाते विकरणविशिष्टस्य अङ्गत्वात् तिपि परे 'शृनु' इत्यस्य उकारस्य गुणे 'शृनोति' इति जाते ऋवर्णात् परस्य नकारस्य णत्वे 'शृणोति' इति रूपं सिद्धम् ।

तसि 'शृनु तस्' इति जाते सार्वधातुकसंज्ञायां 'सार्वधातुकार्धधातुकयोः इति गुणे प्राप्ते -

### ङित्वविधायकमतिदेशसूत्रम्

**सार्वधातुकमपित् १।२।४॥**

**अपित्सार्वधातुकं ङिद्वत्स्यात् । शृणुतः ।**

(अपित्, सार्वधातुकम्, ङित्)

**सरलार्थः-** पिद्भिन्नः सार्वधातुकप्रत्ययः ङिद्वद् भवति । पित् प्रत्ययाः तिप्, सिप्, मिप् च एतद्भिन्नानां प्रत्ययानामनेन ङिद्वद्भावो विधीयते । तत्र 'पिच्च ङिन्न, ङिच्च पिन्न' इति प्रसिद्धम् ।

अनेन सूत्रेण 'तस्' इत्यस्य ङित्त्वे, 'क्ङिति च' इति गुणनिषेधे नस्य णत्वे पदत्वे रुत्वे विसर्गे च 'शृणुतः' इति रूपम् ।

झौ 'शृनु झि' इत्यत्र झस्य अन्तादेशे 'श्रुनु अन्ति' इत्यत्र प्राप्तं यणं प्रबाध्य उवङादेशे प्राप्ते-

### यणादेशविधायकं विधिसूत्रम्

**हुश्नुवोः सार्वधातुके ६।४।८७॥**

**जुहोतेः, श्नुप्रत्ययान्तस्यानेकाचोऽङ्गस्यासंयोगपूर्वोवर्णस्य यण् स्यादचि सार्वधातुके । शृण्वन्ति । शृणोषि । शृणुथः । शृणुथ । शृणोमि ।**

(हुश्नुवोः, अनेकाचः, अङ्गस्य, असंयोगपूर्वस्य, ओः, यण्, अचि, सार्वधातुके)

**सरलार्थः-** अजादौ सार्वधातुके प्रत्यये परे हुधातोः श्नुप्रत्ययान्तस्य च अनेकाचोऽङ्गस्य असंयोगपूर्वस्य उवर्णस्य स्थाने यणादेशो भवति ।

इति सूत्रेण उकारस्य यणि नकारस्य णत्वे च 'शृण्वन्ति' इति रूपं सिद्ध्यति । एवमेव सिबादिषु श्रृणोषि, श्रृणुथः, श्रृणोमि इति रूपाणि । वसि 'शृनु वस्' इति जाते-

## विभाषया प्रत्ययोकारस्य लोपविधायकं सूत्रम्

**लोपश्चास्यान्यतरस्यां म्वोः ६।४।१०७।।**

**असंयोगपूर्वस्य प्रत्ययोकारस्य लोपो वा, म्वोः परयोः । शृण्वः, शृणुवः । शृण्मः, शृणुमः । शुश्राव शुश्रव । शुश्रुव । शुश्रुम । श्रोता । श्रोष्यति । शृणोतु शृणुतात् । शृणुताम् । शृण्वन्तु ।**

**(अस्य, असंयोगपूर्वस्य, उतः, प्रत्ययस्य, च, म्वोः, लोपः, अन्यतरस्याम्)**

**सरलार्थः–** संयोगः पूर्वं यस्य नास्ति तादृशस्य प्रत्ययस्य उकारस्य विभाषया लोपो भवति मकारवकारयोश्च परयोः ।

इति सूत्रेण विकल्पेन उकारस्य लोपे नकारस्य णत्वे पदत्वे रुत्वे विसर्गे च 'शृण्वः' इति रूपं सिद्ध्यति । उकारलोपाभावे तु 'शृणुवः' इति रूपम् । मसि एवमेव 'शृण्मः/शृणुमः' इति रूपे ।

लिटि तिपि णलि द्वित्वेऽभ्याससंज्ञायां हलादिशेषे 'शु श्रु अ' इति जाते अङ्गत्वेन उकारस्य वृद्धौ आवादेशे वर्णसम्मेलने च 'शुश्राव' इति रूपं निष्पद्यते । तसि 'शु श्रु अतुस्' इति जाते उकारस्य स्थाने उवङादेशेऽनुबन्धलोपे पदत्वे रुत्वे विसर्गे च 'शुश्रुवतुः' इति रूपं जायते । झौ पूर्ववत् 'शुश्रुवुः' इति रूपम् । सिपि थलि क्रादित्वेन इडागमो न भवति, तेन 'शुश्रोथ' इति एकमेव रूपं निष्पद्यते । थसि थे च पूर्ववत् 'शुश्रुवथुः' 'शुश्रुव' इति रूपे भवतः । मिपि णलो विकल्पेन णित्त्वात् 'शुश्राव/शुश्रव' इति रूपद्वयं जायते । वसि मसि च क्रादित्वाद् इडागमाभावे, कित्त्वाद् गुणाभावे च 'शुश्रुव' 'शुश्रुम' इति रूपे भवतः ।

लुटि, तिपि तासिप्रत्यये आर्धधातुकसंज्ञायामिडागमे प्राप्ते 'एकाच उपदेशेऽनुदात्ताद्' इति इडागमनिषेधे उकारस्य गुणे (सार्वधातुकार्धधातुकयोः) डादिकार्ये च 'श्रोता' इति रूपं सिद्ध्यति ।

लृटि तिपि स्यप्रत्यये पूर्ववत् 'श्रोष्यति' इति रूपम् ।

लोटि तिपि शपं प्रबाध्य श्नुप्रत्यये 'शृ'आदेशे णत्वे इकारस्य उत्वे च 'शृणुत' इति जाते विकल्पेन 'तातङ्' आदेशे ङित्वाद् गुणाभावे 'शृणुतात्' इति रूपम्, 'तातङ्'-आदेशाभावपक्षे 'शृणुतु इत्यत्र गुणे 'शृणोतु इति रूपं जायते । तसि 'शृणु तस्' इत्यत्र लङ्वद्भावेन तसस्तामादेशे 'शृणुताम्' इति रूपम् । झौ लटि इव 'शृण्वन्ति' इति जाते इकारस्य उत्वे 'शृण्वन्तु' इति रूपं सिद्ध्यति ।

सिपि पूर्ववत् 'शृणु सि' इति जाते सेर्ह्यादेशेऽपित्त्वे च 'शृणु हि' हेस्तातङि ङित्वाद् गुणनिषेधे च

'शृणुतात्' इति रूपं जायते, तातङोऽभावे तु हेः अपित्त्वेन ङित्त्वाद् गुणनिषेधे 'शृणु हि' इति जाते-

## हेर्लुगादेशविधायकं विधिसूत्रम्

**उतश्च प्रत्ययादसंयोगपूर्वात् ६।४।१०६॥**

**असंयोगपूर्वात्प्रत्ययोतो हेर्लुक् । शृणु-शृणुतात् । शृणुतम् । शृणुत । गुणावादेशौ । शृणवानि । शृणवाव । शृणवाम । अशृणोत् । अशृणुताम् । अशृण्वन् । अशृणोः । अशृणुतम् । अशृणुत । अशृणवम् । अशृण्व, अशृणुव । अशृण्म, अशृणुम । शृणुयात् । शृणुयाताम् । शृणुयुः । शृणुयाः । शृणुयातम् । शृणुयात । शृणुयाम् । शृणुयाव । शृणुयाम । श्रूयात् । अश्रौषीत् । अश्रोष्यत् ।**

(असंयोगपूर्वात्, उतश्च प्रत्ययात्, हेः, लुक्)

**सरलार्थः-** संयोगः पूर्वो नास्ति यस्य प्रत्ययस्य, तस्य उकारात् परस्य हेर्लुग् भवति ।

इति सूत्रेण हेर्लुकि 'शृणु' इति रूपं जायते । थसि श्रृणुतम्, थे- श्रृणुत । मिपि न्यादेशे 'शृणु नि' इति जाते उत्तमपुरुषस्य आडागमे गुणेऽवादेशे च 'शृणवानि' इति रूपं भवति । वसि मसि च पूर्ववदेव आडागमे गुणेऽवादेशे सकारस्य लोपे च (नित्यं ङितः)' शृणवाव' 'शृणवाम' इति रूपे निष्पद्येते ।

लङि अडागमे तिपि श्नुप्रत्यये 'शृ'आदेशे च 'अशृनु ति' इति जाते अङ्गसंज्ञायामुकारस्य गुणे नकारस्य णत्वे इकारस्य लोपे च 'अशृणोत्' इति रूपं सिद्ध्यति । तसि तामादेशे ङित्त्वे गुणनिषेधे च 'अशृणुताम्' इति रूपं भवति । झौ अन्तादेशे यणि इकारलोपे नकारतकारयोः संयोगत्वेन संयोगान्तस्य तकारस्य लोपे 'अशृण्वन्' इति रूपं जायते । सिबादिषु अश्रृणोः, अश्रृणुतम्, अश्रृणुत । मिपि 'अशृणु मि' इत्यत्र अमादेशे गुणेऽवादेशे च 'अशृणवम्' इति रूपं जायते । वसि मसि च विकल्पेन उकारस्य लोपे 'अशृण्व' 'अशृण्म' इति रूपे भवतः, तदभावे ङित्त्वेन गुणनिषेधे 'अशृणुव' 'अशृणुम' इति रूपे जायेते ।

विधिलिङि तिपि श्नुप्रत्यये 'शृ' आदेशे च 'शृनु ति' इति जाते यासुडागमे ङित्त्वाद् गुणनिषेधे 'लिङः सलोपोऽनन्त्यस्य' इति सूत्रेण सकारस्य लोपे नकारस्य णत्वे इकारस्य लोपे च 'शृणुयात्' इति रूपं जायते । तसि तामादेशे 'शृणुयाताम्' इति रूपं बोध्यम् । झौ झेर्जुसि अनुबन्धलोपे 'शृणुया उस्' इति जाते 'उस्यपदान्तात्' इति पररूपैकादेशे पदत्वेन रुत्वे विसर्गे च 'श्रृणुयुः' इति रूपं बोध्यम् । तसादिषु शृणुयाः, शुणुयातम्, शृणुयात, शृणुयाम्, शृणुयाव, शृणुयाम इति च रूपाणि पूर्ववत् ।

आशीर्लिङि- श्रूयात्, लुङि-अश्रौषीत्, लृङि-अश्रोष्यत् इति । तसादिषु क्षिधातोरिव रूपाणि भवन्ति ।

**गम्लृ गतौ ॥२०॥** (गम्- अनिट्, सकर्मकः, परस्मैपदी)

'गम्'इत्यस्य धातुसंज्ञायां तस्माद् लटि तिपि शपि च 'गम् अ ति' इति जाते-

### छकारादेशविधायकं विधिसूत्रम्

**इषुगमियमां छः ७।३।७७।**

**शिति । गच्छति । जगाम ।**

(इषुगमियमाम्, छः, शिति)

**सरलार्थः-** इष्धातोः, गम्धातोः, यम्धातोश्च अन्त्यवर्णस्य स्थाने 'छ्' इत्यादेशो भवति ।

इति सूत्रेण मकारस्य स्थाने 'छ' इत्यादेशे वर्णसम्मेलने 'गछति' इति जाते 'छे च' इत्यनेन तुगागमे तकारस्य श्चुत्वेन चकारे च 'गच्छति' इति रूपं जायते ।

लिटि तिपि णलि द्वित्वेऽभ्यासत्वे हलादिशेषे चुत्वे (कुहोश्चुः)'जगम् अ' इति जाते उपधावृद्धौ अत उपधायाः) 'जगाम' इति रूपं निष्पद्यते । तसि 'जगम् अतुस्' इति जाते उपधासंज्ञायाम्-

### उपधायाः (अकारस्य) लोपविधायकं विधिसूत्रम्

**गमहनजनखनघसां लोपः क्ङित्यनङि ६।४।९८।।**

**एषामुपधाया लोपः स्यादजादौ क्ङिति, न त्वङि । जग्मतुः । जग्मुः । जगमिथ - जगन्थ । जग्मथुः । जग्म । जगाम-जगम । जग्मिव । जग्मिम । गन्ता ।**

(गमहनजनखनघसाम्, उपधायाः, लोपः, अचि, क्ङिति, अनङि)

**सरलार्थः-** अजादौ किति ङिति च प्रत्यये परे गम्, हन्, जन्, खन्, घस् एषां धातूनाम् उपधाया (अकारस्य) लोपो भवति, अङि परे तु न भवति ।

इति सूत्रेण उपधाया अकारस्य लोपे वर्णसम्मेलने पदत्वे रुत्वे विसर्गे च 'जग्मतुः' इति रूपं बोध्यम् । एवं झौ 'जग्मुः' इति रूपम् । सिपि थलि अनुदात्तत्वाद् भारद्वाजस्य मते इडागमे 'जगमिथ', 'उपदेशेऽत्वतः' इत्यस्य प्रवृत्तौ 'जगम् थ' इति जाते अनुस्वारपसवर्णाभ्याम् 'जगन्थ' इति रूपद्वयं जायते । थसि थे च अतुसि इव जग्मतुः, जग्म इति रूपे भवतः । मिपि णलि विकल्पेन णित्त्वाद् 'जगाम/जगम' इति रूपे, वसि, मसि च क्रादिनियमेन इडागमे कित्त्वाद् उपधालोपे च (गमहजन....) 'जग्मिव' 'जग्मिम' इति रूपे भवतः ।

लुटि तिपि तासिप्रत्यये धातोः अनिट्त्वाद् इडागमनिषेधे डादिकार्येषु, अनुस्वारे, परसवर्णे च 'गन्ता' इति रूपं सिद्ध्यति । लृटि तिपि स्यप्रत्यये आर्धधातुकसंज्ञायामिडागमे प्राप्ते, तस्य 'एकाच उपदेशेऽनुदात्तात्' इति निषेधे प्राप्ते-

### इडागमविधायकं विधिसूत्रम्

**गमेरिट् परस्मैपदेषु ७।२।५८॥**

**गमेः परस्य सादेरार्द्धधातुकस्येट् परस्मैपदेषु । गमिष्यति । गच्छतु । अगच्छत् । गच्छेत् । गम्यात् ।**

(गमेः, से, आर्धधातुकस्य, इट्, परस्मैपदेषु)

**सरलार्थः-** परस्मैपदे परे 'गम्'धातोः परस्य सकारादेः आर्धधातुकस्य इडागमो भवति ।

इति सूत्रेण इडागमे वर्णसम्मेलने सकारस्य षत्वे च (आदेशप्रत्यययोः) 'गमिष्यति' इति रूपं बोध्यम् । लोटि गच्छतु । लङि-अगच्छत् । विधिलिङि गच्छेत् । आशीर्लिङि 'गद्'धातोरिव गम्यात्, गम्यास्ताम्, गम्यासुः इत्यादीनि रूपाणि भवन्ति । लुङि तिपि च्लौ प्राप्तं सिचं प्रबाध्य-

### अङादेशविधायकं विधिसूत्रम्

**पुषादिद्युताद्य्लृदितः परस्मैपदेषु ३।१।५५॥**

**श्यन्विकरणपुषादेर्द्युतादेर्लृदितश्च परस्य च्लेरङ्, परस्मैपदेषु । अगमत् । अगमिष्यत् ।**

(पुषादिद्युताद्य्लृदितः, च्लेः, अङ्, परस्मैपदेषु)

**सरलार्थः-** दिवादिगणपठितेभ्यः पुषादिभ्यो धातुभ्यः, द्युतादिभ्यो धातुभ्यः, लृकारस्य इत्संज्ञा भवति येषां धातूनां तेभ्यो धातुभ्यश्च परस्य च्लेः स्थाने 'अङ्'आदेशो भवति परस्मैपदे परे ।

इति सूत्रेण च्लेः स्थाने 'अङ्'आदेशेऽनुबन्धलोपे वर्णसम्मेलने च 'अगमत्' इति रूपं जायते । लृङि तिपि स्यस्य इडागमे (गमेरिट् परस्मैपदेषु) 'अगमिष्यत्' इति रूपम्, तसादिषु पूर्ववत् ।

**शृणुतः**

श्रवणार्थकाद् श्रुधातोः 'वर्तमाने लट्' इति सूत्रेण लटि अनुबन्धलोपे लस्य स्थाने प्रथमपुरुषस्य द्विवचनस्य विवक्षायां 'तिप्तस्झिः०' इत्यादिना सूत्रेण तसादेशे तसः 'तिङ् शित्सार्वधातुकम्' इति सूत्रेण सार्वधातुकसंज्ञायाम् 'कर्तरि शप्' इति सूत्रेण शपि प्राप्ते तं प्रबाध्य 'श्रुवः शृ च' इति सूत्रेण श्रुधातोः स्थाने शृ इत्यादेशे श्नुप्रत्यये चानुबन्धलोपे शृ नु तस् इति जाते श्नुप्रत्ययस्यापि शित्त्वात् सार्वधातुकसंज्ञायाम् 'सार्वधातुकार्धधातुकयोः' इति सूत्रेण शृ इत्यस्य ऋकारस्य गुणे प्राप्ते 'सार्वधातुकमपित्' इति सूत्रेण नु इत्यस्य ङित्त्वात् 'क्क्ङिति च' इति गुणनिषेधे नु इत्यस्य उकारस्य प्राप्तस्य गुणस्यापि तसो ङित्त्वेन गुणाभावे 'ऋवर्णान्नस्य णत्वं वाच्यम्' इति णत्वे सस्य रुत्वे विसर्गे च कृते 'शृणुतः' इति रूपं सिद्धं भवति ।

**गमिष्यति**

लृकारेत्संज्ञकाद् गत्यर्थकाद् गम्धातोः 'लृट् शेषे च' इति सूत्रेण लृटि अनुबन्धलोपे लस्य स्थाने तिबादेशेऽनुबन्धलोपे 'गम् ति' इति जाते सार्वधातुकत्वेन प्राप्तं शपं बाधित्वा 'स्यतासी लृलुटोः' इति सूत्रेण स्यप्रत्यये 'गम् स्य ति' इति स्थिते 'आर्धधातुकं शेषः' इति सूत्रेण स्यप्रत्ययस्य आर्धधातुकसंज्ञायाम् 'आर्धधातुकस्येड् वलादेः' इति सूत्रेण इडागमे प्राप्ते 'एकाच उपदेशेऽनुदात्तात्' इति सूत्रेण तन्निषेधे 'गमेरिट् परस्मैपदेषु' इति सूत्रेण इडागमेऽनुबन्धलोपे वर्णसम्मेलने 'आदेशप्रत्यययोः' इति सूत्रेण षत्वे गमिष्यति इति रूपं सिद्ध्यति ।

## वाक्येषु प्रयोगनिदर्शनानि

१. दुर्जना ह्वरन्ति ।

२. शकुनिः पाण्डवान् प्रति जह्वार ।

३. छात्रा गुरुणा पाठितं पाठं सम्यक्तया शृण्वन्ति ।

४. अर्जुनः श्रीकृष्णमुखाद् गीतां शुश्राव ।

५. अहमद्य कवितां श्रोष्यामि ।

६. भक्ताः प्रातःकाले मन्दिरं गच्छन्ति ।

७. वयं भ्रमणार्थं श्वः पोखरानगरीं गन्तास्मः ।

८. यूयं समये एव विद्यालयं गच्छथ ।

९. धार्मिकजनाः स्नानार्थं गङ्गाम् अगच्छन् ।

१०. हरिः स्वगृहम् अगमत् ।

## अभ्यासः

### १. अधस्तनप्रश्नानामुत्तराणि लिखित

(क) जह्वार इत्यत्र गुणः केन सूत्रेण भवति ।

(ख) ह्वरिष्यति इत्यत्र इडागमविधायकं सूत्रं किम् ?

(ग) शिति कस्य छादेशः ?

(घ) गम्धातोर्विहितस्य च्लेः स्थाने क आदेशो भवति ?

(ङ) श्रुधातौ शपं प्रबाध्य कः प्रत्ययः प्रवर्तते ?

(च) श्नु इत्यस्मिन् शित्करणस्य किं प्रयोजनम् ?

(छ) गम्धातोः छकारादेशः केषु केषु लकारेषु भवति ?

(ज) गम्लृ इत्यत्र लृदित्करणस्य फलं किम् ?

### २. शुद्धमुच्चारणं कुरुत

(क) गुणोऽर्तिसंयोगाद्योः

(ख) ऋद्धनोः स्ये

(ग) लोपश्चास्यान्यतरस्यां म्वोः

(घ) गमहनजनखनघसां लोपः क्ङित्यनङि

(ङ) पुषादिद्युताद्य्लृदितः परस्मैपदेषु

### ३. अधस्तनानां सूत्राणामर्थं लिखत

(क) सार्वधातुकमपित्

(ख) हुश्नुवोः सार्वधातुके

(ग) लोपश्चास्यान्यतरस्यां म्वोः

(घ) गमहनजनखनघसां लोपः क्ङित्यनङि

(ङ) पुषादिद्युताद्य्लृदितः परस्मैपदेषु

(च) गुणोर्तिसंयोगाद्योः

(छ) ऋतश्च संयोगादेर्गुणः

## ४. समीचीनमसमीचीनं वा सङ्केतयत

(क) श्रुवः शृ च इति सूत्रं शपोऽपवादकं श्यन्प्रत्ययं विधत्ते । ( )

(ख) लिङः सलोपोऽनन्त्यस्य इति आशीर्लिङि सलोपं करोति । ( )

(ग) अपित्सार्वधातुकं ङिद्वद् भवति । ( )

(घ) गम्धातोः पिति लिटि उपधालोपो भवति । ( )

(ङ) गम्धातुः अकर्मको वर्तते । ( )

(च) श्रुधातोः कस्मिन्नपि रूपे इडागमो न दृश्यते । ( )

(छ) ते अद्य प्रवचनम् अशृण्वन् । ( )

## ५. अधस्तनानां धातूनां निर्दिष्टलकारेषु रूपाणि विलिखत

(क) ह्वृधातोः विधिलिङि (घ) श्रुधातोर्लोटि (ङ) गम्धातोर्लुङि

## ६. प्रमुखसूत्रनिदर्शनपूर्वकं रूपसिद्धिप्रकारं प्रदर्शयत

(क) जह्वार (ख) ह्वरिष्यति (ग) ह्वर्यात् (घ) श्रूयात्

(ङ) शृणोति (च) शृणुतः (छ) शृण्वन्ति (ज) शृण्वः/शृणुवः

(झ) शृणु/शृणुतात् (ञ) गच्छति (ट) जग्मतुः (ठ) जगमिथ/जगन्थ

(ड) गमिष्यति (ढ) अगमत्

## ७. अधस्तनपदानां धातुलकारपुरुषवचनानि निर्दशत

(क) ह्वर्यासम् (ख) अह्वार्षीः (ग) श्रोता (घ) अशृणुत (ङ) अगमाव

## ८. सिद्धपदानि दर्शयत

(क) ह्वृ+ लुट् (तस्) (ख) श्रु+ लोट् (सिप्) (ग) गम् + विधिलिङ् (झि)

(घ) श्रु + लृट् (तिप्) (ङ) गम् + लङ् (वस्) (च) ह्वृ + आशीर्लिङ् (मिप्)

(छ) गम् + लुङ् (थस्) (ज) श्रु + लिट् (थ) (झ) ह्वृ + लट् (मस्)

## ९. पदानां वाक्ये प्रयोगं निदर्शयत

(क) ह्वरन्तु (ख) श्रृणु (ग) श्रोष्यामि (घ) जगाम

(ङ) अश्रोष्यत् (च) गच्छामः (छ) अश्रृणोत्

नवमः
पाठः

# भ्वादिगणे आत्मनेपदी एधधातुः

अनुदात्तेतो ङितश्च धातव आत्मनेपदिनः सन्ति । अर्थवशादुपसर्गयोगाच्च केचिद्धातव आत्मनेपदिनो भवन्ति । अयञ्च विषयः आत्मनेपदप्रक्रियानाम्नि प्रकरणे निरूपयिष्यते ।

आत्मनेपदसंज्ञका लादेशाः-

| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| **प्रथमपुरुषः** | त | आताम् | झ |
| **मध्यमपुरुषः** | थास् | आथाम् | ध्वम् |
| **उत्तमपुरुषः** | इट् | वहि | महिङ् |

**एध वृद्धौ** ॥१॥ (एध्- सेट्, अकर्मकः, आत्मनेपदी) ।

वृद्धचर्थे वर्तमानस्य 'एध'शब्दस्य अकारोनुदात्तः, तस्य अनुबन्धलोपे 'एध्' इत्यस्य धातुसंज्ञायाम्, तस्माद् 'अनुदात्तङित आत्मनेपदम्' इति सूत्रेण लः स्थाने आत्मनेपदसंज्ञके प्रथमपुरुषस्यैकवचने 'त'आदेशे 'एध् त' इति जाते सार्वधातुकसंज्ञायां शप्यनुबन्धलोपे वर्णसम्मेलने च 'एधत' इति जाते अन्त्यस्य अकारस्य टिसंज्ञायाम्-

### एत्वादेशविधायकं विधिसूत्रम्

**टित आत्मनेपदानां टेरे ३।४।७९॥**

**टितो लस्यात्मनेपदानां टेरेत्वम् । एधते ।**

(टितः, लस्य, आत्मनेपदानाम्, टेः,ए)

**सरलार्थः**- टिल्लकारसम्बद्धानामात्मनेपदानां टिभागस्य एत्वं भवति ।

इति टिसंज्ञकस्य अकारस्य एत्वे '**एधते**' इति रूपं निष्पन्नम् ।

प्रथमपुरुषस्य द्विवचने आतामि शपि 'एध आताम्' इति जाते अपित्त्वाद् 'आताम्' इत्यस्य ङित्त्वे-

### इयादेशविधायकं विधिसूत्रम्

**आतो ङितः ७।२।८१॥**

**अतः परस्य ङितामात इय् स्यात् । एधेते । एधन्ते ।**

(अतः, ङितः, आतः, इयः)

**सरलार्थः-** अकारात् परस्य ङित्प्रत्ययसम्बद्धस्य आकारस्य स्थाने 'इय्'आदेशो भवति ।

इति सूत्रेण आकारस्य स्थाने 'इय्'आदेशे गुणे 'एधेय् ताम्' इति जाते 'लोपो व्योर्वलि' इति यकारस्य लोपे 'आम्' इत्यस्य टिसंज्ञायां टेरेत्वे च कृते '**एधेते**' इति रूपं सिद्धम् ।

प्रथमपुरुषस्य बहुवचने झप्रत्यये, शपि 'एध झ' इत्यत्र झकारस्य अन्तादेशे पररूपे च 'एधन्त् इत्यत्र अन्त्यस्य अकारस्य टिसंज्ञायां टेरेत्वे च '**एधन्ते**' इति रूपम् ।

मध्यमपुरुषस्यैकवचने थासि शपि 'एध थास्' इति जाते-

### 'से' इत्यादेशविधायकं विधिसूत्रम्

**थासः से ३।४।८०॥**

**टितो लस्य थासः से स्यात् । एधसे । एधेथे । एधध्वे । एधे । एधावहे । एधामहे ।**

(टितः, लस्य, थासः, से)

**सरलार्थः-** टिल्लकारस्य स्थाने विहितस्य 'थास्' इत्यस्य स्थाने 'से'इत्यादेशो भवति ।

इति सूत्रेण थासः स्थाने 'सेआदेशे '**एधसे**' इति रूपं जायते ।

मध्यमपुरुषस्य द्विवचने आथामि आतामि इव '**एधेथे**' इति रूपम् ।

मध्यमपुरुषस्य बहुवचने ध्वमि शपि 'एधध्वम्' इति जाते 'अम्' इत्यस्य टिसंज्ञायां टेरेत्वे च '**एधध्वे**' इति रूपं निष्पद्यते ।

उत्तमपुरुषस्यैकवचने इटि शपि 'एध इ' इत्यत्र इकारस्य टिसंज्ञायां टेरेत्वे च 'एध ए' इति जाते 'अतो गुणे' पररूपे '**एधे**' इति रूपं सिद्धम् ।

उत्तमपुरुषस्य द्विवचने वहिङ्प्रत्यये शप्यनुबन्धलोपे 'एध वहि' इति जाते 'अतो दीर्घो यञि' इति अकारस्य दीर्घे इकारस्य टिसंज्ञायां टेरेत्वे च '**एधावहे**' इति रूपम् । बहुवचने महिङि च एवमेव '**एधामहे**' इति रूपं बोध्यम् ।

लिटि 'एध् ल्' इति जाते-

## आम्-प्रत्ययविधायकं विधिसूत्रम्

**इजादेश्च गुरुमतोऽनृच्छः ३।१।३६॥**

**इजादिर्यो धातुर्गुरुमानृच्छत्यन्यस्तत आम् स्याल्लिटि ।**

(इजादेः, गुरुमतः, अनृच्छः, धातोः, च, लिटि, आम्, प्रत्ययः, परश्च)

**सरलार्थः-** इजादिधातुः गुरुवर्णेन युक्तोऽपि वर्तते चेत् तादृशाद् धातोः 'आम्'प्रत्ययो भवति, लिटि परे, 'ऋच्छ्धातोस्तु न भवति ।

इति सूत्रेण इजादित्वाद् गुरुमत्त्वाच्च 'एध्'धातोः लिटि परे 'आम्'प्रत्यये वर्णसम्मेलने 'एधाम् ल्' इति जाते 'आमः' इति सूत्रेण लस्य लुकि 'एधाम्' इति जाते मान्तत्वाद् अव्ययत्वेन समुदायाद् विहितस्य सुपो लुकि 'एधाम्' इति जाते सुबन्तत्वेन पदत्वे 'कृञ्चानुप्रयुज्यते लिटि' इति सूत्रेण सलिट्कस्य कृधातोः अनुप्रयोगे 'एधाम् कृ ल्' इति जाते-

## आत्मनेपदविधाननियामकं सूत्रम्

**आम्प्रत्ययवत् कृञोऽनुप्रयोगस्य १।३।६३॥**

**आम्प्रत्ययो यस्मादित्यतद्गुणसंविज्ञानो बहुव्रीहिः । आम्प्रकृत्या तुल्यमनुप्रयुज्यमानात्कृञोऽप्यात्मनेपदं स्यात् ।**

(आम्प्रत्ययवत्, कृञः, अनुप्रयोगस्य, पूर्ववत्, आत्मनेपदम्)

**सरलार्थः-** आमः प्रकृतिभूतस्य धातोरनुरूपम् अनुप्रयुज्यमानात् कृधातोः परस्य लकारस्य स्थानेऽपि आत्मनेपदमेव भवति ।

आमः प्रकृतिभूतो धातुः परस्मैपदी वर्तते चेद् अनुप्रयुज्यमानात् कृधातोरपि परस्मैपदं भवति, आमः प्रकृतिभूतो धातुः आत्मनेपदी वर्तते चेद् अनुप्रयुज्यमानात् कृधातोरपि आत्मनेपदं भवति । अत आत्मनेपदिन एध्धातोः अनुप्रयुज्यमानात् कृधातोः परस्य लकारस्य स्थाने आत्मनेपदादेश एव भवति ।

इति सूत्रनियमेन लः स्थाने आत्मनेपदसंज्ञके प्रथमपुरुषस्यैकवचने 'त'आदेशे 'एधाम् कृ त' इति जाते-

## एशिरेजादेशविधायकं विधिसूत्रम्

**लिटस्तझयोरेशिरेच् ३।४।८१॥**

**लिडादेशयोस्तझयोरेश् इरेच् एतौ स्तः । एधाञ्चक्रे । एधाञ्चक्राते । एधाञ्चक्रिरे ।**

**एधाञ्चकृषे । एधाञ्चक्राथे ।**

(लिटः, तझयोः, एश् इरेच्)

**सरलार्थः-** लिट्लकारस्य स्थाने विहितयोः 'त' 'झः' इत्येतयोः स्थाने क्रमेण 'एश्' 'इरेच्' इत्यादेशौ भवतः । अत्र शकारचकारयोः अनुबन्धत्वाद् 'ए' 'इरे' इत्येतौ अवशिष्येते । अत्र एकारोच्चारणेन तङादेशानां टेरेत्वं न भवतीति ज्ञायते । तेन 'डा, रौ, रस्' एतेषु टेरेत्वं न भवति ।

इति सूत्रेण 'त' इत्यस्य स्थाने 'एश्' आदेशेऽनुबन्धलोपे 'एधाम् कृ ए' इति जाते प्राप्तस्य यणो 'द्विर्वचनेऽचि' इति निषेधे ततो द्वित्वेऽभ्यासत्वे अत्वे रपरत्वे हलादिशेषे च 'एधाम् चकृ ए' इत्यत्र अपित्त्वात् कित्त्वेन गुणनिषेधे यणि 'एधाम् चक्रे' इति जाते अनुस्वारे विकल्पेन परसवर्णे च '**एधाञ्चक्रे**' इति रूपं सिद्ध्यति, परसवर्णाभावे '**एधांचक्रे**' इति रूपम् ।

प्रथमपुरुषस्य द्विवचने आतामि पूर्ववत्कार्येषु 'एधाम् चकृ आताम्' इति जाते यणि 'आम्' इत्यस्य टिसंज्ञायां टेरेत्वे च 'एधाम् चक्राते' इति जाते अनुस्वारे विकल्पेन परसवर्णे च '**एधाञ्चक्राते**' इति रूपं सिद्ध्यति, परसवर्णाभावे '**एधांचक्राते**' इति रूपं बोध्यम् ।

प्रथमपुरुषस्य बहुवचने झस्य स्थाने 'इरेच्' आदेशे पूर्ववद् '**एधाञ्चक्रिरे/एधांचक्रिरे**' इति रूपे । मध्यमपुरुषस्यैकवचने थासि थासः 'से' इत्यादेशे एकाच्त्वाद् इडागमनिषेधे च कृते पूर्ववद् '**एधाञ्चकृषे/एधांचकृषे**' इति रूपद्वयं सिद्ध्यति । आथामि आतामि इव रूपद्वयं **एधाञ्चक्राथे, एधांचक्राते** इति रूपद्वयम् । ध्वमि 'एधाम् चकृ ध्वम्' इति जाते-

## ढकारादेशविधायकं विधिसूत्रम्

**इणः षीध्वंलुङ्लिटां धोऽङ्गात् ८।३।७८।**

**इणन्तादङ्गात्परेषां षीध्वंलुङ्लिटां धस्य ढः । एधाञ्चकृढ्वे । एधाञ्चक्रे । एधाञ्चकृवहे । एधाञ्चकृमहे । एधाम्बभूव । एधामास । एधिता । एधितारौ । एधितारः । एधितासे । एधितासाथे ।**

(इणः, षीध्वंलुङ्लिटाम्, धः, अङ्गात्)

**सरलार्थः-** इण् अस्ति अन्ते यस्य तादृशादङ्गाद् परस्थानां आशीर्लिङ्-लुङ्-लिट्लकाराणां धकारस्य स्थाने ढकारादेशो भवति ।

इति सूत्रेण धकारस्य स्थाने ढकारादेशे 'एधाम् चकृ ढ्वम्' इति जाते 'अम्' इत्यस्य टिसंज्ञायां टेरेत्वे च 'एधाम् चकृढ्वे' इति जाते अनुस्वारे विकल्पेन परसवर्णे च '**एधाञ्चकृढ्**

**वे/एधांचकृद्वे**' इति रूपद्वयं सिद्ध्यति ।

इटि अपित्त्वात् कित्त्वेन गुणनिषेधे 'एधाम् चकृ इ'इत्यत्र टिसंज्ञायां टेरेत्वे च 'एधाम् चकृ ए' इति जाते यणि अनुस्वारे विकल्पेन परसवर्णे च 'एधाञ्चक्रे/एधांचक्रे' इति रूपद्वयं जायते । वसि मसि च क्रादित्वाद् इडागमाभावे पूर्ववद् 'एधाञ्चकृवहे/एधांचकृवहे' 'एधाञ्चकृमहे/एधांचकृमहे' इति प्रत्येकं रूपद्वयं सिद्ध्यति । भूधातोरनुप्रयोगे 'एधाम्बभूव' इत्यादीनि, अस्धातोरनुप्रयोगे 'एधामास' इत्यादीनि च रूपाणि भवन्ति ।

लुटि प्रथमपुरुषस्यैकवचने तादेशे शपं प्रबाध्य तासिप्रत्यये आर्धधातुकत्वेन इडागमे 'एधितास् तु इति जाते 'त' इत्यस्य स्थाने 'डा'आदेशेऽनुबन्धलोपे 'आस्' इत्यस्य टिसंज्ञायां डित्त्वसामर्थ्याद् अभस्यापि टेर्लोपे वर्णसम्मेलने '**एधिता**' इति रूपं सिद्ध्यति । द्विवचने आतामि 'रौ' आदेशे 'रि च' इति सकारस्य लोपे '**एधितारौ**' इति रूपं जायते । एवं बहुवचने '**एधितारः**' इति रूपं भवति । मध्यमैकवचने थासि 'से' आदेशे 'तासस्त्योर्लोपः' इति सूत्रेण सकारस्य लोपे '**एधितासे**' इति रूपं निष्पद्यते । मध्यमपुरुषद्विवचने आथामि 'एधितास् आथाम्' इत्यत्र वर्णसम्मेलने 'आम्' इत्यस्य टिसंज्ञायां टेरेत्वे च '**एधितासाथे**' इति रूपं सम्पद्यते । मध्यमपुरुषस्य बहुवचने ध्वमि 'एधितास् ध्वम्' इत्यत्र-

### सकारलोपविधायकं विधिसूत्रम्

**धि च ८।२।२५॥**

**धादौ प्रत्यये सलोपः स्यात् । एधिताध्वे ।**

(धि, प्रत्यये, च, लोपः)

**सरलार्थः**- धकारादौ प्रत्यये परे सकारस्य लोपो भवति ।

इति सकारस्य लोपे 'अम्' इत्यस्य टिसंज्ञायां टेरेत्वे च '**एधिताध्वे**' इति रूपं जायते । उत्तमपुरुषैकवचने इटि 'एधितास् इ' इत्यत्र इकारस्य टिसंज्ञायां टेरेत्वे च 'एधितास् ए' इति जाते-

### सस्य हकारादेशविधायकं विधिसूत्रम्

**ह एति ७।४।५२॥**

**तासस्त्योः सस्य हः स्यादेति परे । एधिताहे । एधितास्वहे । एधितास्महे । एधिष्यते । एधिष्येते । एधिष्यन्ते । एधिष्यसे । एधिष्येथे । एधिष्यध्वे । एधिष्ये । एधिष्यावहे । एधिष्यामहे ।**

(तासस्त्योः,अङ्गस्य, सि, लोपः)

**सरलार्थः-** एकारे परे 'तास्' इत्यस्य 'अस्'धातोश्च सकारस्य स्थाने हकारादेशो भवति ।

इति सूत्रेण सकारस्य स्थाने हकारादेशे '**एधिताहे**' इति रूपं जायते । उत्तमपुरुषस्य द्विवचने 'एधितास् वहि' इति जाते इकारस्य टिसंज्ञायां टेरेत्वे च '**एधितास्वहे**' इति रूपं सिद्ध्यति । एवमेव उत्तमपुरुषस्य बहुवचने महिङि '**एधितास्महे**' इति रूपं ज्ञेयम् ।

लृटि प्रथमपुरुषैकवचने तप्रत्यये परे शपं प्रबाध्य स्यप्रत्यये आर्धधातुकंज्ञायामिडागमे षत्वे च 'एधिष्यत' इति जाते अकारस्य टिसंज्ञायां टेरेत्वे च '**एधिष्यते**' इति रूपं जायते । द्विवचनादिषु एवमेव स्यप्रत्यये इडागमे ततो लटि इव कार्येषु सर्वाणि रूपाणि ज्ञेयानि ।

लोटि प्रथमपुरुषैकवचने तादेशे शपि 'एधत' इति जाते अकारस्य टिसंज्ञायां टेरेत्वे च 'एधते' इत्यवस्थायाम्-

### आमादेशविधायकं सूत्रम्

**आमेतः ३।४।९०॥**

**लोट एत आम् । एधताम् । एधेताम् । एधन्ताम् ।**

(लोटः, एतः, आम्)

**सरलार्थः-** लोट्लकारसम्बन्धिन एकारस्य स्थाने 'आम्' आदेशो भवति ।

इति सूत्रेण एकारस्य स्थाने आमादेशे '**एधताम्**' इति रूपं सिद्ध्यति । प्रथमपुरुषस्य द्विवचने आतामि लटि इव शबादिकार्ये विहिते 'एधेते' इति जाते 'आमेतः' इति सूत्रेण एकारस्य स्थाने आमादेशे '**एधेताम्**' इति रूपं सिद्ध्यति । बहुवचने झेऽपि लटि इव शबादिकार्ये विहिते 'एधन्ते' इति जाते 'आमेतः' इति सूत्रेण एकारस्य स्थाने आमादेशे '**एधन्ताम्**' इति रूपं भवति । मध्यमपुरुषैकवचने थासि अपि लटि इव शबादिकार्ये विहिते 'एधसे' इति जाते-

### व-मादेशविधायकं विधिसूत्रम्

**सवाभ्यां वामौ ३।४।९१॥**

**सवाभ्यां परस्य लोडेतः क्रमाद्वामौ स्तः । एधस्व । एधेथाम् । एधध्वम् ।**

(सवाभ्याम्, लोटः, लस्य, सवाभ्याम्, एतः, वामौ)

**सरलार्थः-** सकारात् परस्य लोट्लकारसम्बन्धिनः एकारस्य स्थाने 'व'आदेशः, वकारात् परस्य लोट्लकारसम्बन्धिनः एकारस्य स्थाने 'अम्' आदेशश्च भवतः ।

इति सूत्रेण सकारात् परस्य एकारस्य स्थाने 'व'आदेशे '**एधस्व**' इति रूपं सिद्धम् । आथामि तु आतामि इव '**एधेथाम्**' इति रूपं भवति । ध्वमि पूर्ववद् लटि इव शबादिकार्ये विहिते 'एधध्वे' इति जाते अनेनैव सूत्रेण वकारात् परस्य एकारस्य स्थाने अमादेशे '**एधध्वम्**' इति रूपम् । उत्तमपुरुषैकवचने इटि लटि इव शबादिकार्ये विहिते 'एध ए' इति जाते-

## ऐकारादेशविधायकं विधिसूत्रम्

**एत ऐ ३।४।९३॥**

**लोडुत्तमस्य एत ऐ स्यात् । आमोऽपवादः । एधै । एधावहै । एधामहै । आटश्च । ऐधत । ऐधेताम् । ऐधन्त । ऐधथाः । ऐधेथाम् । ऐधध्वम् । ऐधे । ऐधावहि । ऐधामहि ।**

(लोटः, लस्य, उत्तमस्य, एत, ऐ)

**सरलार्थः**– लोट्लकारसम्बन्धिन उत्तमपुरुषस्य एकारस्य स्थाने ऐकारादेशो भवति ।

इति सूत्रेण एकारस्य स्थाने ऐकारादेशे 'एध ऐ' इति जाते लोडुत्तमत्वाद् आडागमे 'आटश्च' इति वृद्धौ 'एध ऐ' इति जाते पूर्वपरयोर्वृद्धौ '**एधै**' इति रूपं निष्पद्यते । उत्तमपुरुषद्विवचने पूर्ववद् लटि इव शबादिकार्ये विहिते 'एध वहे' इति जाते एकारस्य स्थाने ऐकारादेशे 'एध वहै' इति जाते आडागमे सवर्णदीर्घे '**एधावहै**' इति रूपं जायते । एवं महिङि '**एधामहै**' इति रूपं बोध्यम् ।

लङि अजादित्वाद् आडागमे 'आटश्च' इति वृद्धौ 'ऐध् ल्' इति जाते तादेशे शपि वर्णसम्मेलने च '**ऐधत**' इति रूपं सिद्ध्यति । आतामि पूर्ववद् 'ऐध आताम्' इति जाते आतामो ङित्त्वेन आकारस्य स्थाने 'इय्' आदेशे गुणे यकारस्य लोपे च 'एधेयाताम्' इति रूपं निष्पद्यते । झप्रत्यये पूर्ववद् 'ऐध झ' इति जाते अन्तादेशे पररूपे च '**ऐधन्त**' इति रूपं सम्पद्यते । थासि पूर्ववत् '**ऐधथाः**' इति रूपं सिद्ध्यति । आथामि तु आतामि इव '**ऐधेथाम्**' इति रूपं भवति । ध्वमि पूर्ववद् '**ऐधध्वम्**' इति रूपं बोध्यम् । इटि पूर्ववद् 'ऐध इ इति जाते अकार-इकारयोर्गुणे '**ऐधे**' इति रूपम् । वहौ पूर्ववद् 'ऐध वहि' इति जाते 'अतो दीर्घो यञि' इति अकारस्य दीर्घे '**ऐधावहि**' इति रूपं भवति । महिङि च एवमेव '**ऐधामहि**' इति रूपं भवति ।

विधिलिङि तादेशे शपि 'एध त' इति जाते-

## सीयुडागमविधायकं विधिसूत्रम्

**लिङः सीयुट् ३।४।१०२॥**

**सलोपः । एधेत । एधेयाताम् ॥**

(लिङः, सीयुट्)

**सरलार्थः**– लिङ्लकारस्य स्थाने विहितानां प्रत्ययानाम् 'सीयुट्' इत्यागमो भवति ।

इति सूत्रेण 'त' इत्यस्य सीयुडागमेऽनुबन्धलोपे टित्त्वादाद्यवयवे 'एध सीय् त' इति जाते 'लिङः सलोपोऽनन्त्यस्य' इति सूत्रेण सकारस्य लोपे 'एध ईय् त' इति जाते अकार-ईकारयोर्गुणे 'एधेय् त' इति जाते 'लोपो व्योर्वलि' इति यकारस्य लोपे च '**एधेत**' इति रूपं सिद्ध्यति । आतामि एवमेव 'एधेय् आताम्' इत्यत्र वर्णसम्मेलने '**एधेयाताम्**' इति रूपम् । झप्रत्यये 'एधेय् झ' इति जाते-

## रनादेशविधायकं विधिसूत्रम्

**झस्य रन् ३।४।१०५।।**

**लिङो झस्य रन् । एधेरन् । एधेथाः । एधेयाथाम् । एधेध्वम् ।**

(लिङः, झस्य, रन्)

**सरलार्थः**– लिङ्लकारस्य स्थाने विहितस्य 'झ' इत्यस्य स्थाने 'रन्'आदेशो भवति ।

इति सूत्रेण झस्य स्थाने 'रन्'आदेशे यकारस्य लोपे च '**एधेरन्**' इति रूपं सिद्धम् । थासि तप्रत्यये इव कार्येषु सत्सु '**एधेथाः**' इति रूपं सम्पद्यते । आथामि आतामि इव '**एधेयाथाम्**' इति रूपं जायते । ध्वमि अपि तप्रत्यये इव कार्येषु सत्सु '**एधेध्वम्**' इति रूपम् । इटि पूर्ववद् 'एधेय् इ इति जाते-

## अत् इत्यादेशविधायकं विधिसूत्रम्

**इटोऽत् ३।४।१०६।।**

**लिङादेशस्य इटोऽत्स्यात् । एधेय । एधेवहि । एधेमहि ।**

(लिङः, इटः, अत्)

**सरलार्थः**– लिङः स्थाने आदिष्टस्य इट इकारस्य स्थाने अदादेशो भवति । अत् इति ह्रस्वाकारः ।

इति सूत्रेण इकारस्य स्थाने अदादेशे वर्णसम्मेलने '**एधेय** इति रूपं सिद्ध्यति । वहौ, महिङि च तप्रत्यये इव कार्येषु सत्सु '**एधेवहि**' '**एधेमहि**' इति रूपे भवतः ।

आशीर्लिङि लः स्थाने तादेशे आर्धधातुकसंज्ञायां सीयुडागमे 'एध् सीय् तु' इति जाते यदागमपरिभाषया सीयुट्विशिष्टस्य आर्धधातुकत्वाद् इडागमे 'एधिसीय् तु इति जाते-

## सुडागमविधायकं विधिसूत्रम्

**सुट् तिथोः ३।४।१०७।।**

**लिङस्तथोः सुट् स्यात् । यलोपः । एधिषीष्ट । एधिषीयास्ताम् । एधिषीरन् । एधिषीष्ठाः । एधिषीयास्थाम् । एधिषीध्वम् । एधिषीय । एधिषीवहि । एधिषीमहि । ऐधिष्ट । ऐधिषाताम् ।**

(लिङः, तिथोः, सुट्)

**सरलार्थः-** लिङ्लकारस्य स्थाने विहितयोः तकारथकारयोः सुडागमो भवति ।

इति तकारस्य सुडागमेऽनुबन्धलोपे टित्त्वादाद्यवयवे 'एधिसीय् स् तु इति जाते 'लोपो व्योर्वलि' इति सूत्रेण यकारस्य लोपे उभयत्र षत्वे उत्तरत्र ष्टुत्वे '**एधिषीष्ट**' इति रूपं सिद्ध्यति । आतामि 'एधिसीय् आताम्' इत्यत्र तकारस्य सुडागमे इकारात् परस्य सकारस्य षत्वे वर्णसम्मेलने '**एधिषीयास्ताम्**' इति रूपं जायते । झे 'एधिसीय् झ' इति इत्यत्र झस्य स्थाने 'रन्' इत्यादेशे यलोपे सकारस्य षत्वे च '**एधिषीरन्**' इति रूपं सिद्ध्यति । थासि, आथामि, च पूर्ववद् '**एधिषीष्ठाः**', '**एधिषीयास्थाम्**' इति रूपे भवतः । ध्वमि यकारस्य लोपे '**एधिषीध्वम्**' इति रूपम् । इटि 'इटोऽत्' इति इकारस्य स्थाने अदादेशे '**एधिषीय**' इति रूपं निष्पद्यते । वहौ, महिङि च यकारस्य लोपे '**एधिषीवहि**', '**एधिषीमहि**' इति रूपे भवतः ।

लुङि आडागमे वृद्धौ च 'ऐध् ल्' इति जाते लः स्थाने तादेशे च्लौ सिचि आर्धधातुकसंज्ञायाम् इडागमे 'ऐधिस् त' इति जाते षत्वे ष्टुत्वे च '**ऐधिष्ट**' इति रूपं जायते । आतामि 'ऐधिस् आताम्' इति जाते षत्वे वर्णसम्मेलने च '**ऐधिषाताम्**' इति रूपं सिद्ध्यति । झप्रत्यये 'ऐधिस् झः' इत्यत्र-

## अतादेशविधायकं विधिसूत्रम्

**आत्मनेपदेष्वनतः ७।१।५।।**

**अनकारात्परस्याऽऽत्मनेपदेषु झस्य अत् स्यात् । ऐधिषत । ऐधिष्ठाः । ऐधिषाथाम् । ऐधिढ्वम् । ऐधिषि । ऐधिष्वहि । ऐधिष्महि । ऐधिष्यत । ऐधिष्येताम् । ऐधिष्यन्त । ऐधिष्यथाः । ऐधिष्येथाम् । ऐधिष्यध्वम् । ऐधिष्ये । ऐधिष्यावहि । ऐधिष्यामहि ।**

(आत्मनेपदेषु, अनतः, अङ्गात्, प्रत्ययस्य, झस्य, अत्)

**सरलार्थः-** अकारभिन्नाद् वर्णात् परस्य आत्मनेपदसंज्ञकस्य झकारस्य स्थाने 'अत्'आदेशो भवति ।

इति सूत्रेण सकारात् परस्य झकारस्य स्थाने 'अत्' इत्यादेशे वर्णसम्मेलने षत्वे च '**ऐधिषत**' इति रूपं सिद्ध्यति । थासि आथामि च पूर्ववद् '**ऐधिष्ठाः**' '**ऐधिषाथाम्**' इति रूपे भवतः । ध्वमि 'ऐधिस् ध्वम्' इति जाते 'धि च' इति सकारस्य लोपे 'इणः षीध्वंलुङ्लिटां धोऽङ्गात्' इति धकारस्य ढत्वे च '**ऐधिढ्वम्**' इति रूपम् । इटि, वहौ, महिङि च वर्णसम्मेलने षत्वे च '**ऐधिषि**' '**ऐधिष्वहि**' '**ऐधिष्महि**' इति रूपाणि निष्पद्यन्ते ।

लृङि आडागमे वृद्धौ च 'ऐध् ल्' इति जाते लः स्थाने तादेशे स्यप्रत्यये इडागमे सस्य षत्वे च '**ऐधिष्यत**' इति रूपं सिद्ध्यति । आतामादिषु स्यप्रत्यये लङ्वद् रूपाणि ज्ञेयानि ।

**एधेते**

एध्धातोः 'वर्तमाने लट्' इति सूत्रेण लटि अनुबन्धलोपे 'एध् ल्' इति जाते लस्य स्थाने 'अनुदात्तङित आत्मनेपदम्', 'शेषे प्रथमः', 'द्व्येकयोर्द्विवचनैकवचने' इति सूत्रत्रयसहयोगेन 'तिप्तस्झि०' इत्यादिना सूत्रेण आत्मनेपदस्य प्रथमपुरुषस्य द्विवचने आताम् इत्यादेशे 'तिङ्शित्सार्वधातुकम्' इति सूत्रेण आताम् इत्यस्य सार्वधातुकसंज्ञायां 'कर्तरि शप्' इति सूत्रेण शपि अनुबन्धलोपे 'एध् अ आताम्' इति जाते 'सार्वधातुकमपित्' इति सूत्रेण आतामो ङिद्वद्भावे 'आतो ङितः' इति सूत्रेण इयादेशे 'एध इय् ताम्' इति जाते 'आद् गुणः' इति सूत्रेण गुणे 'लोपो व्योर्वलि' इति सूत्रेण यकारस्य लोपे 'टित आत्मनेपदानां टेरे' इति सूत्रेण टेरेत्वे एधेते इति रूपं सिद्धम् ।

**एधिषीष्ट**

एध्धातोः 'आशिषि लिङ्लोटौ' इति सूत्रेण आशिष्यर्थे लिङि अनुबन्धलोपे लस्य स्थाने 'तिप्तस्झि०' इत्यादिना सूत्रेण आत्मनेपदस्य प्रथमपुरुषस्य एकवचने त इत्यादेशे एध् त इति जाते प्राप्तां सार्वधातुकसंज्ञां बाधित्वा 'लिङाशिषि' इति सूत्रेण आर्धधातुकसंज्ञायां 'लिङः सीयुट्' इति सूत्रेण सीयुडागमे अनुबन्धलोपे 'आर्धधातुकस्येड्वलादेः' इति सूत्रेण इडागमेऽनुबन्धलोपे 'एध् इ सीय् त' इति जाते 'लोपो व्योर्वलि' इति सूत्रेण यकारस्य लोपे 'सुट् तिथोः' इति सूत्रेण सुडागमेऽनुबन्धलोपे वर्णयोगे 'एधिसीस्त' इत्यत्र षत्वे ष्टुत्वे च विहिते 'एधिषीष्ट' इति रूपं निष्पन्नं भवति ।

## वाक्येषु प्रयोगनिदर्शनानि

१. विद्या निरन्तराभ्यासेन एधते ।
२. वर्षर्तौ जलवर्षणाद् नद्य एधन्ते ।
३. अद्य परिश्रमशीला जनाः श्वस्तनेषु दिनेषु एधितारः ।
४. खाद्यान्नस्य मूल्यं प्रतिदिनम् एधिष्यते ।
५. भगवति तव भक्तिभाव एधताम् ।
६. तव शत्रवो न एधेरन् ।
७. चन्द्रमसः कला शुक्लपक्षे ऐधत ।
८. राम इव श्यामो नैव ऐधिष्ट ।

## अभ्यासः

१. **शुद्धमुच्चारणं कुरुत**

(क) इजादेश्च गुरुमतोऽनृच्छः
(ख) आम्प्रत्ययवत् कृञोऽनुप्रयोगस्य
(ग) इणः षीध्वंलुङ्लिटां धोऽङ्गात्
(घ) आत्मनेपदेष्वनतः

२. **अधोऽङ्कितानां प्रश्नानामुत्तराणि लिखत**

(क) एध-धातुः कस्मिन्नर्थे प्रयुज्यते ?
(ख) एधधातुः केन कारणेन आत्मनेपदी भवति ?
(ग) लिटस्तझयोः स्थाने कौ आदेशौ भवतः ?
(घ) धादौ प्रत्यये परे कस्य लोपः ?
(ङ) सवाभ्यां परस्य लोट एकारस्य स्थाने कौ आदेशौ भवतः ?
(च) टेरेत्वं केषु लकारेषु भवति ?
(छ) लिङो झस्य क आदेशः ?
(ज) एध्धातौ झस्यान्तादेशं बाधित्वा कुत्र कुत्र लकारे कः क आदेशो भवति ?
(झ) लिङ्लकारसम्बद्धयोः कयोः 'सुट्' आगमो भवति ?

३. **रिक्तस्थानानि समुचितैः पदैः पूरयत**

(क) टितो लस्य थासः स्थाने ............ इत्यादेशो भवति ।
(ख) धादौ प्रत्यये परे सस्य लोपकम् ............ इति सूत्रमस्ति ।

(ग) लोट एकारस्य आम् विधायकम् ............ इति सूत्रमस्ति ।

(घ) लोडुत्तमस्य एकारस्य ............ इत्यादेशो भवति ।

(ङ) इटः स्थाने अत् इत्यादेशः ............ लकारे जायते ।

(च) लिङ्लकारे सुडागमः ............ भवति ।

(छ) संयोगे परे ह्रस्वस्य ............ संज्ञा भवति ।

४. **सोदाहरणं सूत्राणामर्थं लिखत**

(क) आतो ङितः (ख) धि च (ग) आमेतः

(घ) लिङः सीयुट् (ङ) इटोऽत् (च) इजादेश्च गुरुमतोऽनृच्छः

(छ) इणः षीध्वं-लुङ्-लिटां धोऽङ्गात् (ज) आत्मनेपदेष्वनतः

५. **अधस्तनधातोर्निर्दिष्टलकारेषु रूपाणि विलिखत**

(क) एध्धातोर्लिटि (ख) एध्धातोर्लोटि (ग) एध्धातोराशीर्लिङि

६. **प्रमुखसूत्रनिदर्शनपूर्वकं रूपसिद्धिप्रकारं प्रदर्शयत**

(क) एधते (ख) एधेते (ग) एधसे (घ) एधाञ्चक्रे (ङ)एधाञ्चकृढ्वे

(च) एधिताध्वे (छ) एधिताहे (ज) एधताम् (झ) एधस्व (ञ) एधध्वम्

(ट) एधै (ठ) ऐधत (ड) एधेत (ढ) एधेरन् (ण) एधेय

(त) एधिषीष्ट (थ) ऐधिष्ट (द) ऐधिषत (ध) ऐधिष्यत

७. **अधस्तनपदानां धातुलकारपुरुषवचनानि निदर्शयत**

(क) एधेथे (ख) एधितासे (ग) एधामहै (घ) एधेयाथाम् (ङ) ऐधिष्यन्त

८. **सिद्धपदानि दर्शयत**

(क) एध् + लुट् (महिङ्) (ख) एध् + विधिलिङ् (इट्)

(ग) एध् + लङ् (आथाम्) (घ) कम् + आशीर्लिङ् (थास्)

(ङ) एध् + लुङ् (झ) च) एध् + लट् (त)

९. **पदानां वाक्येषु प्रयोगं निर्दिशत**

(क) एधध्वे (ख) एधितारः (घ) एधिष्ये

(ङ) एधध्वम् (च) ऐधे

दशमः पाठः

# भ्वादिगणे कमादिधातवः

**कमु कान्तौ ॥२॥** (कम्- सेट्, सकर्मकः, आत्मनेपदी) उकारानुबन्धः अनुदात्तः तस्य इत्संज्ञालोपौ । कम् इत्यस्य धातुसंज्ञायां तस्मात्-

## णिङ्प्रत्ययविधायकं विधिसूत्रम्

**कमेर्णिङ् ३।१।३०॥**

**स्वार्थे । ङित्त्वात्तङ् । कामयते ।**

(कमेः, णिङ्)

**सरलार्थः-** कम्धातोः णिङ्-प्रत्ययो भवति स्वार्थे । णिङ् इत्यत्र णकारङकारौ इत्संज्ञकौ, इकारः अवशिष्यते ।

इति सूत्रेण णिङ्प्रत्ययेऽनुबन्धलोपे 'कम् इ इति जाते अकारस्य उपधासंज्ञायां वृद्धौ वर्णसम्मेलने 'कामि' इति जाते 'सनाद्यन्ता धातवः' इति 'कामि' इत्यस्य धातुसंज्ञायाम्, लटि ङित्वाद् आत्मनेपदित्वेन लः स्थाने आत्मनेपदसंज्ञके प्रथमपुरुषस्यैकवचने तप्रत्यये 'कामि त' इति जाते शपि गुणेऽयादेशे अकारस्य टिसंज्ञायां टेरेत्वे च 'कामयते' इति रूपं बोध्यम् । एवं तसादावपि ज्ञेयम् । कामयेते, कामयन्ते, कामयसे, कामयेथे, कामयध्वे, कामये, कामयावहे, कामयामहे ।

लिटो विवक्षायां विकल्पेन णिङि (आयादय आर्धधातुके वा) पूर्ववत् 'कामि' इति जाते धातुसंज्ञायां (सनाद्यन्ता धातवः) लिटि 'कास्यनेकाच आम् वक्तव्यो लिटि' इति 'आम्'प्रत्यये 'कामि आम्' इति जाते, 'णेरनिटि' इति इकारलोपे प्राप्ते आह-

## णेरयादेशविधायकं विधिसूत्रम्

**अयामन्ताल्वाय्येत्न्विष्णुषु ६।४।५५॥**

**एषु णेरय् आदेशः । कामयाञ्चक्रे । 'आयादय' इति वा णिङ् । चकमे । चकमाते । चकमिरे । चकमिषे । चकमाथे । चकमिध्वे । चकमे । चकमिवहे । चकमिमहे । कामयिता । कमिता । कामयिष्यते । कमिष्यते । कामयताम् । अकामयत । कामयेत । कामयिषीष्ट ।**

(आमन्ताल्वाय्येत्न्विष्णुषु, णेः, अय्)

**सरलार्थः–** आम्, अन्त, आलु, आय्य, इत्नु, इष्णु एषु प्रत्ययेषु परेषु णेः स्थाने 'अय्'आदेशो भवति ।

कामि इत्यत्र इकारस्य अनेन अयादेशे वर्णसम्मेलने 'कामयाम्' इत्यस्य धातुत्वात् तस्मात् परः लिट्परककृञः अनुप्रयोगे (कृञ्चानुप्रयुज्यते लिटि) लस्य स्थाने आत्मनेपदतप्रत्यये (आम्प्रत्ययवत्कृञोऽनुप्रयोगस्य) तस्य स्थाने एशादेशे (लिटस्तझयोरेशिरेच्) अनुबन्धलोपे धातोः द्वित्वे अभ्यासादिकार्ये 'कामयाम् चकृ ए' इति जाते यणि मान्तस्य पदस्यानुस्वारे परसवर्णे च 'कामयाञ्चक्रे' इति रूपं बोध्यम् । आतामादिषु एध्धातोरिव रूपाणि ।

भूधातोरनुप्रयोगे 'कामयाम्बभूव' इत्यादीनि, अस्धातोरनुप्रयोगे 'कामयामास' इत्यादीनि च रूपाणि ।

णिङः अभावपक्षे 'कृ लिट्' इति जाते लस्य तप्रत्यये धातोः द्वित्वे अभ्यासादिकार्ये तस्य एशादेशे वर्णसम्मेलने 'चकमे' इति रूपं सिद्ध्यति । आतामादिषु एवमेव चकमाते, चकमिरे, चकमिषे, चकमाथे, चकमिध्वे, चकमे, चकमिवहे, चकमिमहे ।

लुटो विवक्षायामपि विकल्पेन णिङि 'कामि' इति धातोर्लुटि तासिप्रत्यये इडागमे गुणे'यादेशे च डादिकार्येण 'कामयिता' इति रूपं जायते । णिङोऽभावे 'कमिता' इति रूपं भवति । एवमेव आतामादिषु पूर्ववद् रूपाणि भवन्ति ।

एवं लृटि 'कामयिष्यते/कमिष्यते' इत्यादीनि रूपाणि सम्पद्यन्ते । लोटि णिङो नित्यत्वे लटि इव कार्येषु विहितेषु 'कामयते' इति जाते एकारस्य स्थाने आमादेशे च 'कामयताम्' इति रूपं भवति । आतामादिषु पूर्ववद् रूपाणि जायन्ते ।

लङि अपि णिङो नित्यत्वे लटि इव कार्येषु विहितेषु 'अकामयत' इति रूपं जायते । आतामादिषु पूर्ववद् रूपाणि भवन्ति । विधिलिङि अपि णिङो नित्यत्वे लटि इव कार्येषु विहितेषु 'कामय त' इति जाते सीयुडागमे सकारस्य लोपे (लिङः सलोपोऽनन्त्यस्य) गुणे यकारस्य लोपे च 'कामयेत' इति रूपं सम्पद्यते । आतामादिषु पूर्ववद् रूपाणि निष्पद्यन्ते ।

आशीर्लिङि विकल्पेन णिङि पूर्ववत् 'कामि ल्' इति जाते लः स्थाने तादेशे आर्धधातुकत्वे सीयुडागमे इडागमे च 'कामि इ सीय् त' इति जाते गुणेऽयादेशे सुडागमे यलोपे षत्वे ष्टुत्वे च 'कामयिषीष्ट' इति रूपं सिद्ध्यति । णिङोऽभावे तु 'कमिषीष्ट' इति रूपं भवति । आतामादिषु कामयिषीयास्ताम्, कामयिषीरन्, कामयिषीष्ठाः, कामयिषीयास्थाम् । कामिधातोः आशीर्लिङि ध्वमि सीयुडागमेऽनुबन्धलोपे यकारस्य लोपे (लोपो व्योर्वलि) 'कामि सीध्वम्' इत्यत्र सीयुटः इडागमे 'कामि इसीध्वम्' इति जाते धातोः गुणेऽयादेशे षत्वे च 'कामयिषीध्वम्' इति जाते आह–

### विभाषया धस्य ढकारादेशविधायकं विधिसूत्रम्

**विभाषेटः ८।३।७९॥**

**इणः परो य इट् ततः परेषां षीध्वंलुङ्लिटां धस्य वा ढः । कामयिषीढ्वम्, कामयिषीध्वम् । कमिषीष्ट । कमिषीष्ट । कमिषीध्वम् ॥**

(इणः, इटः, अङ्गात्, षीध्वंलुङ्लिटाम्, धः, विभाषा, मूर्धन्यः)

**सरलार्थः-** इणन्तादङ्गात्परो य इट् ततः परेषां षीध्वंलुङ्लिटामवयवस्य धस्य स्थाने विभाषया ढकारादेशो भवति ।

अनेन सूत्रेण धस्य स्थाने विभाषया ढत्वे कामयिषीढ्वम्, ढत्वाभावपक्षे कामयिषीध्वम् इति रूपद्वयं बोध्यम् । कामयिषीय, कामयिषीवहि, कामयिषीमहि ।

लुङि विकल्पेन णिङि 'कामि ल्' इति जाते अडागमे तादेशे च्लौ च 'अ कामि च्लि त' इति जाते प्राप्तं सिचं प्रबाध्य-

### चङादेशविधायकं विधिसूत्रम्

**णिश्रिद्रुस्रुभ्यः कर्तरि चङ् ३।१।४८॥**

**ण्यन्तात्, श्र्यादिभ्यश्च च्लेश्चङ् कर्त्रर्थे लुङि । अ कामि अ त इति स्थिते-**

(णिश्रिद्रुस्रुभ्यः, च्लेः, चङ्, कर्तरि, लुङि)

**सरलार्थः-** कर्त्रर्थके लुङि परे ण्यन्तधातुभ्यः, श्रि-द्रु-स्रुधातुभ्यश्च विहितस्य च्लेः स्थाने 'चङ्' आदेशो भवति । चङि चकारङकारयोः अनुबन्धलोपेन अकार एवावशिष्यते ।

इति सूत्रेण च्लेः स्थाने 'चङ्' आदेशेऽनुबन्धलोपे 'अकामि अ त' इति जाते-

### णेर्लोपविधायकं विधिसूत्रम्

**णेरनिटि ६।४।५१॥**

**अनिडादावार्द्धधातुके परे णेर्लोपः ।**

(अनिटि, आर्धधातुके, णेः, लोपः)

**सरलार्थः-** यस्य आर्धधातुकस्य आदौ इडागमो न भवति, तस्मिन् आर्धधातुके परे णेः (इकारस्य) लोपो भवति ।

इति सूत्रेण णेः (इकारस्य) लोपे 'अ काम् अ त' इति जाते आकारस्योपधासंज्ञायाम्-

### ह्रस्वादेशविधायकं विधिसूत्रम्

**णौ चङ्युपधाया ह्रस्वः ७।४।१॥**

**चङ्परे णौ यदङ्गम्, तस्योपधाया ह्रस्वः स्यात् ।**

(चङि, णौ, अङ्गस्य, उपधायाः, ह्रस्वः)

**सरलार्थः-** चङ्परः अस्ति यस्मात् तादृशे णौ परे अङ्गस्य उपधायाः स्थाने ह्रस्वादेशो भवति ।

प्रत्ययलोपेऽपि प्रत्ययलक्षणाद् णिपरत्वेन उपधाया आकारस्य ह्रस्वे 'अ कम् अ त' इति जाते-

### द्वित्वविधायकं सूत्रम्

**चङि ६।१।११॥**

**चङि परे अनभ्यासस्य धात्ववयवस्यैकाचः प्रथमस्य द्वे स्तोऽजादेर्द्वितीयस्य ॥**

(चङि, धातोः, अनभ्यासस्य, प्रथमस्य, एकाचः, द्वे, अजादेः, द्वितीयस्य)

**सरलार्थः-** चङ्प्रत्यये परे सति धातोः अवयवस्य अभ्याससंज्ञकभिन्नस्य प्रथमस्य एकाचः द्वित्वं भवति, अजादेः धातोस्तु द्वितीयस्य एकाचः द्वित्वं भवति ।

इति सूत्रेण 'कम्' इत्यस्य द्वित्वेऽभ्याससंज्ञायां हलादिशेषे चुत्वे (कुहोश्चुः) च 'अ चकम् अ त' इति जाते-

### सन्वद्भावविधायकमतिदेशसूत्रम्

**सन्वल्लघुनि चङ्परेऽनग्लोपे ७।४।९३॥**

**चङ्परे णौ यदङ्गम्, तस्य योऽभ्यासो लघुपरस्तस्य सनीव कार्यं स्याण्णावग्लोपेऽसति ।**

(चङ्परे, णौ, अङ्गस्य, लघुनि, अभ्यासः,सन्वद्, अनग्लोपे)

**सरलार्थः-** चङ्परके णौ परे यदङ्गम्, तस्याङ्गस्य लघुपरो योऽभ्यासः, तस्य अभ्यासस्य सनि इव कार्यं भवति णिनिमित्तीकृत्य अग्लोपो विहितो नास्ति चेत् ।

इति सूत्रेण सन्वद्भावे-

### इत्वविधायकं विधिसूत्रम्

**सन्यतः ७।४।७९॥**

**अभ्यासस्याऽत इत्सनि ।**

(सनि, अभ्यासस्य, अतः, इत्)

**सरलार्थः-** सन्प्रत्यये परे अभ्यासस्य अकारस्य स्थाने इकारादेशो भवति ।

इति सूत्रेण अभ्यासस्य अकारस्य स्थाने इकारादेशे 'अ चिकम् अ त' इति जाते-

## दीर्घादेशविधायकं विधिसूत्रम्

**दीर्घो लघोः ७।४।९४॥**

**लघोरभ्यासस्य दीर्घः, सन्वद्भावविषये । अचीकमत । णिङभावपक्षे-**

(लघोः, अभ्यासस्य, दीर्घः, चङ्परे, अङ्गस्य, लघुनि, अभ्यासः, सन्वद्, अनग्लोपे)

**सरलार्थः-** सन्वद्भावो यत्र विहितोऽस्ति तत्र अभ्यासस्य लघोर्वर्णस्य स्थाने दीर्घादेशो भवति ।

इति सूत्रेण अभ्यासस्य इकारस्य दीर्घे वर्णसम्मेलने च 'अचीकमत' इति रूपं निष्पन्नं भवति । आतामादिषु अपि एवमेव चङादिविधानेन रूपाणि जायन्ते । अचीकमेताम्, अचीकमन्त, अचीकमथाः, अचीकमेथाम्, अचीकमध्वम्, अचीकमे, अचीकमावहि, अचीकमामहि ।

णिङभावपक्षे 'कम्'धातोर्लुङि अडागमे लः स्थाने तादेशे च्लौ 'अ कम् च्लि त' इति जाते प्राप्तं सिचं प्रबाध्य-

**वा. कमेश्च्लेश्चङ् वाच्यः । अचकमत । अकामयिष्यत । अकमिष्यत ॥**

**सरलार्थः-** 'कम्'धातोर्विहितस्य च्लेः स्थाने 'चङ्'आदेशो भवति ।

इति वार्तिकेन च्लेः स्थाने 'चङ्'आदेशेऽनुबन्धलोपे 'अकम् अ त' इति जाते द्वित्वेऽभ्यासत्वे हलादिशेषे च वर्णसम्मेलने 'अचकमत' इति रूपं बोध्यम् । णेः अभावेन सन्वद्भावाभावाद् इत्वदीर्घौ न भवतः । आतामादिषु एवमेव चङादिना पूर्ववद् रूपाणि जायन्ते- अचकमेताम्, अचकमन्त, अचकमथाः, अचकमेथाम्, अचकमध्वम्, अचकमे, अचकमावहि, अचकमामहि ।

लृङि विकल्पेन णिङि 'अकामयिष्यत/अकमिष्यत' इत्यादीनि रूपाणि भवन्ति ।

**अय गतौ ॥३॥** (अय्- सेट्, सकर्मकक: आत्मनेपदी) अकारानुदात्तानुबन्धकः ।

**अयते ॥** गत्यर्थकस्य 'अय्' इत्यस्य धातुसंज्ञायां तस्माद् लटि तादेशे शपि टिसंज्ञायां टेरेत्वे च 'अयते' इति रूपं निष्पद्यते ।

'प्र' इत्युपसर्गपूर्वकाद् 'अय्'धातोर्लटि 'प्र अयते' इत्यत्र, 'परा'उपसर्गपूर्वकाद् 'अय्'धातोर्लटि 'परा 'अयेत', इत्यत्र च -

### लकारादेशविधायकं विधिसूत्रम्

**उपसर्गस्याऽयतौ ८।२।१९॥**

**अयतावुपसर्गरेफस्य लत्वम् । प्लायते । पलायते ।**

(अयतौ, उपसर्गस्य, रः, लः)

**सरलार्थः-** अय्धातौ परे उपसर्गस्थरेफस्य स्थाने लकारादेशो भवति ।

इति सूत्रेण रेफस्य स्थाने लकारादेशे सवर्णदीर्घे च 'प्लायते', 'पलायते', इति रूपे सिद्धचतः ।

अय्धातोर्लिटि 'अय् ल्' इति जाते-

### आम्प्रत्ययविधायकं विधिसूत्रम्

**दयायासश्च ३।१।३७॥**

**एभ्य आम्लिटि । अयाञ्चक्रे । अयिता । अयिष्यते । अयताम् । आयत । अयेत । अयिषीष्ट । विभाषेटः । अयिषीढ्वम्, अयिषीध्वम् । आयिष्ट । आयिढ्वम् । आयिध्वम्, आयिष्यत ।**

(लिटि, दयायासः, आम्)

**सरलार्थः-** लिटि दय्, अय्, आस् एभ्यो धातुभ्यः 'आम्'प्रत्ययो भवति ।

इति सूत्रेण 'आम्' प्रत्यये जाते 'अयाम्' इत्यस्य धातुसंज्ञायाम् 'एध्'धातोरिव 'अयाञ्चक्रे' इत्यादीनि रूपाणि बोध्यानि । लुङादिषु अपि 'एध्'धातोरिव रूपाणि भवन्ति । आशीर्लिङि ध्वमि 'अयिषीध्वम्' इति जाते धकारस्य स्थाने विभाषया ढकारादेशे (विभाषेटः) अयिषीढ्वम् । ढकाराभावे धकार एव अयिषीध्वम् इति, शेषं पूर्ववत् । लुङि आयिष्ट । आयिढ्वम् । आयिध्वम् । लृङि आयिष्यत ।

**द्युत दीप्तौ ॥४॥** (दीप्त्यर्थको द्युत्-आत्मनेपदी, सेड्, अकर्मकः) अकारानुबन्धः तस्य इत्संज्ञालोपौ ।

**द्योतते ॥** द्युत्-धातोः लटि तादेशे शपि लघूपधगुणे वर्णसम्मेलने च 'द्योतते' इति रूपम् । लिटि तादेशे एशि द्वित्वेऽभ्याससंज्ञायां 'द्युत् ए' इति जाते-

### सम्प्रसारणादेशविधायकं विधिसूत्रम्

**द्युतिस्वाप्योः सम्प्रसारणम् ७।४।६७॥**

**अनयोरभ्यासस्य । दिद्युते ।**

(द्युतिस्वाप्योः, अभ्यासस्य, सम्प्रसारणम्)

**सरलार्थः-** 'द्युत्'धातोः 'स्वप्'धातोश्च अभ्यासस्य सम्प्रसारणं भवति ।

इति सूत्रेण सम्प्रसारणे यकारस्य स्थाने इकारादेशे 'दि उत् द्युत् ए' इति जाते 'सम्प्रसारणाच्च' इति पूर्वरूपे 'दित् द्युत् ए' इति जाते हलादिशेषे वर्णसम्मेलने च 'दिद्युते' इति रूपं सिद्ध्यति । एवं लिटि तसादिषु- दिद्युताते, दिद्युतिरे, दिद्युतिषे, दिद्युताथे, दिद्युतिध्वे, दिद्युते, दिद्युतिवहे, दिद्युतिमहे । लुटि द्योतिता । लृटि द्योतिष्यते । लोटि द्योतताम् । लङि अद्योतत । विधिलिङि द्योतेत । आशीर्लिङि द्योतिषीष्ट । लुङि अडागमे 'अद्युत् ल्' इत्यवस्थायामाह-

### विभाषया परस्मैपदविधायकं विधिसूत्रम्

**द्युद्भ्यो लुङि १।३।९१॥**

(द्युद्भ्यः, लुङि, परस्मैपदम्, वा)

**सरलार्थः-** द्युतादिगणपठितेभ्यो धातुभ्यः परस्य लुङः स्थाने विकल्पेन परस्मैपदसंज्ञकाः प्रत्ययाः भवन्ति ।

इति विकल्पेन परस्मैपदसंज्ञके प्रथमपुरुषस्यैकवचने तिबादेशे 'अ द्युत् ति' इति जाते च्लौ, तस्य स्थाने प्राप्तं सिचं प्रबाध्य 'पुषादिद्युताद्यलृदितः परस्मैपदेषु' इति सूत्रेण च्लेः स्थाने 'अङ्'आदेशेऽनुबन्धलोपे 'अद्युत् अ ति' इति जाते प्राप्तस्य लघूपधगुणस्य ङित्त्वाद् निषेधे वर्णसम्मेलने इकारस्य लोपे च 'अद्युतत्' इति रूपं सिद्ध्यति । परस्मैपदाभावे आत्मनेपदस्य प्रथमपुरुषैकवचने अद्योतिष्ट' इति रूपम् । लृङि 'अद्योतिष्यत' इत्यादीनि पूर्ववद् रूपाणि जायन्ते ।

**एवं श्विता वर्णे ॥५॥** (रागकरणार्थकः श्वित् सेट्, अकर्मकः आत्मनेपदी ।

लटि- श्वेतते । लिटि- शिश्विते । लुटि- श्वेतिता । लृटि- श्वेतिष्यते । लोटि- श्वेतताम् । लङि- अश्वेतत । विधिलिङि- श्वेतेत । आशीर्लिङि- श्वेतिषीष्ट । लुङि- परस्मैपदे-अश्वेतत् । (द्युद्भ्यो लुङि), लुङि- आत्मनेपदे-अश्वेतिष्ट । लृङि- अश्वेतिष्यत ।

**ञिमिदा स्नेहने ॥६॥** (स्नेहनमोचनार्थकः मिद्, सेड्, सकर्मकः, आत्मनेपदी । रूपाणि तावत्-

लटि मेदते, लिटि मिमिदे, लुटि मेदिता, लृटि मेदिष्यते, लोटि मेदताम्, लङि अमेदत, विधिलिङि मेदेत, आशीर्लिङि मेदिषिष्ट, लुङि परस्मैपदे अमेदत् (द्युद्भ्यो लुङि), लुङि आत्मनेपदे अमेदिष्ट, लृङि अमेदिष्यत ।

**ञिष्विदा स्नेहनमोचनयोः ॥७॥ मोहनयोरित्येके ॥ ञिक्ष्विदा चेत्येके ॥** (स्नेहनमोचनयोरर्थे विद्यमानः ष्विद्ः, आत्मनेपदी, सेट्, सकर्मकः) अनुदात्ताकारानुबन्धी ञिकारस्य इत्संज्ञालोपौ (आदिर्ञिटुडवः) । केचन आचार्याः ष्विद्धातोरर्थं स्नेहनमोहने स्वीकुर्वन्ति । केचन आचार्याश्च अस्य धातोः स्वरूपं ञिक्ष्विदा इति स्वीकुर्वन्ति । रूपाणि- लटि स्वेदते, लिटि सिष्विदे, लुटि स्वेदिता, लृटि स्वेदिष्यते, लोटि स्वेदताम्, लङि अस्वेदत, विधिलिङि स्वेदेत, आशीर्लिङि स्वेदिषीष्ट, लुङि परस्मैपदे अस्वेदत्, लुङि आत्मनेपदे अस्वेदिष्ट, लृङि अस्वेदिष्यत ।

**रुच दीप्तावभिप्रीतौ च ॥८॥** (दीप्ताभिप्रित्यर्थको रुच्, सेट्, अकर्मकः आत्मनेपदी । अकारानुदात्तेत्संज्ञकः । रूपाणि तावत्- रोचते, रुरुचे, रोचिता, रोचिष्यते, रोचताम्, अरोचत, रोचेत, रोचिषीष्ट, अरुचत् अरोचिष्ट, अरोचिष्यत ।

**घुट परिवर्तने ॥९॥** (परिवर्तनार्थको घुट्, सेट्, अकर्मकः आत्मनेपदी) अकारानुबन्धः । रूपाणि- घोटते, जुघुटे, घोटिता, घोटिष्यते, घोटताम्, अघोटत, घोटेत, घोटिषीष्ट, अघुटत् अघोटिष्ट, अघोटिष्यत ।

**शुभ दीप्तौ ॥१०॥** - दीप्त्यर्थकः शुभ्, सेट्, सकर्मकः आत्मनेपदी । रूपाणि - शोभते, शुशुभे, शोभिता, शोभिष्यते, शोभताम्, अशोभत, शोभेत, शोभिषीष्ट, अशुभत्, अशोभिष्ट, अशोभिष्यत ।

**क्षुभ सञ्चलने ॥११॥** (सञ्चलनार्थकः क्षुभ्, सेट्, सकर्मकः आत्मनेपदी । अकारानुबन्धः । क्षोभते, चुक्षुभे, क्षोभिता, क्षोभिष्यते, क्षोभताम्, अक्षोभत, क्षोभेत, क्षोभिषीष्ट, अक्षुभत्, अक्षोभिष्ट, अक्षोभिष्यत ।

**णभ तुभ हिंसायाम् ॥१२॥** (हिंसार्थकौ णभ्-तुभ्धातू आत्मनेपदिनौ, सेटौ, सकर्मकौ)

नभते, ननभे, नभिता, नभिष्यते, नभताम्, अनभत, नभेत, नभिषीष्ट, अनभत्, अनभिष्ट, अनभिष्यत ।

एवमेव तोभते, तुतुभे, तोभिता, तोभिष्यते, तोभताम्, अतोभत, तोभेत, तोभिषीष्ट, अतुभत्, अतोभिष्ट, अतोभिष्यत ।

**स्रंसु भ्रंसु ध्वंसु अवस्रंसने ॥१४-१५-१६॥ ध्वंसु गतौ च ॥** (अधःपतनार्थकाः स्रंस्-भ्रंस्-

ध्वंस्धातवः आत्मनेपदिनः, सेटः, सकर्मकाश्च वर्तन्ते । उकारानुबन्धः । ध्वंस्धातु गत्यर्थेऽपि वर्तते । रूपाणि-स्रंसते, सस्रंसे, स्रंसिता, संस्रिष्यते, स्रंसताम्, अस्रंसत, स्रंसेत, स्रंसिषीष्ट, अस्रसत्, अस्रसिष्ट, असं सिष्यत । एवमेव भ्रंस्-ध्वंस्धात्वोरपि रूपाणि ज्ञेयानि ।

**स्रम्भु विश्वासे ॥१७॥** (स्रम्भ्, सेट्, सकर्मकः आत्मनेपदी । रूपाणि- स्रंभते, सस्रभे, स्रभिता आदीनि रूपाणि बोध्यानि ।

**वृतु वर्तने ॥१८॥** -(वृत्, सेट्, अकर्मकः आत्मनेपदी ।

**लटि वर्तते । लिटि ववृते । वर्तिता ॥** 'वृतु'शब्दस्य धातुत्वे उकारस्यानुबन्धलोपे लटि तादेशे शपि लघूपधगुणे च 'वर्तते' इति रूपं सिद्धयति । लिटि तादेशे एशि च 'वृत् ए' इति जाते द्वित्वेऽभ्यासत्वे अत्वे रपरत्वे हलादिशेषे च 'ववृत् ए' इति जाते 'ऋदुपधेभ्यो लिटः कित्त्वं गुणात्पूर्वविप्रतिषेधेन' इति वार्तिकेन गुणात् पूर्वविप्रतिषेधेन 'ए' इत्यस्य कित्त्वे लघूपधगुणनिषेधे वर्णसम्मेलने च 'ववृते' इति रूपं सिद्धयति । लुटि पूर्ववत् 'वर्तिता' इति रूपं जायते । लृटि-

## विभाषया परस्मैपदविधायकं विधिसूत्रम्-

**वृद्भ्यः स्यसनोः १।३।९२॥**

**वृतादिभ्यः पञ्चभ्यो वा परस्मैपदं स्ये, सनि च ।**

(वृद्भ्यः, परस्मैपदं वा, स्यसनोः)

**सरलार्थः-** स्यप्रत्यये, सन्प्रत्यये च वृतु, वृधु, शृधु, स्यन्दु, कृपु एभ्यो धातुभ्यः परस्य लकारस्य स्थाने परस्मैपदादेशो विकल्पेन भवति ।

इति सूत्रेण स्यस्य विवक्षायां लस्य स्थाने परस्मैपदसंज्ञके प्रथमपुरुषस्यैकवचने तिबादेशे स्यप्रत्यये आर्धधातुकत्वे इडागमे प्राप्ते-

## इडागमनिषेधकं सूत्रम्

**न वृद्भ्यश्चतुर्भ्यः ७।२।५९॥**

**वृतु-वृधु-शृधु-स्यन्दभ्यः सादेरार्द्धधातुकस्येण्न स्यात्तङानयोरभावे । वर्त्स्यति । वर्त्तिष्यते । वर्त्तताम् । अवर्त्तत । वर्त्तेत । वर्त्तिषीष्ट । अवृतत् । अवर्त्तिष्ट । अवर्त्स्यत् । अवर्त्तिष्यत् ।**

**सरलार्थः-** तङ्प्रत्याहारस्य, शानच्-कानच्प्रत्यययोश्च अभावे अर्थात् परस्मैपदे परे वृतु, वृधु, शृधु, स्यन्दु एभ्यो धातुभ्यः परस्य सकारादेः आर्धधातुकस्य इडागमो न भवति ।

इति सूत्रेण इडागमनिषेधे लघूपधगुणे वर्णसम्मेलने च 'वर्त्स्यति' इति रूपं सिद्ध्यति । परस्मैपदाभावे आत्मनेपदसंज्ञके प्रथमपुरुषस्यैकवचने तादेशे स्यप्रत्यये इडागमे लघूपधगुणे च 'वर्तिष्यते' इति रूपं जायते । लोटमारभ्य लुङं यावत् पूर्ववद् रूपाणि जायन्ते । लृङि स्यस्य विवक्षायाः कारणेन विकल्पेन परस्मैपदादेशे 'अवर्त्स्यत्/अवर्तिष्यत' इत्यादीनि द्विविधानि रूपाणि भवन्ति ।

**दद दाने ॥१९॥** (दानार्थको दद्धातुः सेट्, सकर्मकः आत्मनेपदी) अकारानुबन्धः अनुदात्तः ।

**ददते ॥** दद्धातोः लटि, तप्रत्यये, शपि, वर्णसम्मेलने च ददते इति रूपं सिद्ध्यति ।

दद्धातोः लिटि प्रथमपुरुषैकवचने तप्रत्यये तस्य एशादेशेऽनुबन्धलोपे, धातोः द्वित्वे अभ्यासादिकार्ये च 'द दद् ए' इत्यवस्थायामेत्वाभ्यासलोपयोः (अत एकहल्मध्ये....) प्राप्तयोः आह-

## एत्वाभ्यासनिषेधकं सूत्रम्

**न शसददवादिगुणानाम् ।६।४।१२६॥**

**शसेर्ददेर्वकारादीनां गुणशब्देन विहितो योऽकारस्तस्य एत्त्वाभ्यासलोपौ न । ददते । ददाते । ददिरे । ददिता । ददिष्यते । ददताम् । अददत । ददेत । ददिषीष्ट । अददिष्ट । अददिष्यत ॥**

(शसददवादिगुणानाम्, अतः, एत्, अभ्यासलोपः, क्ङिति, थलि, च, सेटि )

**सरलार्थः-** शस्धातोः, दद्धातोः, वकारादिधातूनाम्, गुणशब्देन विहितश्च योऽकारः तस्य स्थाने एकारादेशः अभ्यासस्य लोपश्च न भवतः ।

अनेन एत्वाभ्यासलोपयोर्निषेधे वर्णसम्मेलने 'दददे' इति रूपं सिद्धम् । शेषं पूर्ववत् दददाते, ददिरे, ददिषे,दददाथे, दददिध्वे, ददे, ददिवहे, ददिमहे । शेषलकारेषु पूर्ववद् रूपाणि ।

**त्रपूष् लज्जायाम् ॥२९॥** (लज्जार्थको त्रपुष्धातुः अनिट्, सकर्मकः आत्मनेपदी) ऊकारषकारौ अनुबन्धौ । ऊकारोऽनुदात्तः तस्य 'उपदेशेऽजनुनासिक इत्' इति इत्संज्ञा, षकारस्य च हलन्त्यमित्यनेन । त्रप् इत्यस्य धातुसंज्ञायां तस्माद् लटि, तप्रत्यये, शप्यनुबन्धलोपे टेरेत्वे वर्णसम्मेलने च 'त्रपते' इति रूपम् । आतामादिषु पूर्ववत् ।

त्रप्धातोः लिटि प्रथमपुरुषैकवचने तप्रत्यये तस्य एशादेशेऽनुबन्धलोपे धातोः द्वित्वे हलादिशेषे च 'तत्रप् ए' इत्यवस्थायाम्

## एत्वाभ्यासलोपविधायकं विधिसूत्रम्

**तृफलभजत्रपश्च ।६।४।१२२॥**

**एषामत एत्वमभ्यासलोपश्च स्यात् किति लिटि सेटि थलि च । त्रेपे । त्रपिता, त्रप्ता । त्रपिष्यते, त्रप्स्यते । त्रपताम् । अत्रपत । त्रपेत । त्रपिषीष्ट, त्रप्सीष्ट । अत्रपिष्ट, अत्रप्त । अत्रपिष्यत, अत्रप्स्यत ।**

(तृफलभजत्रपश्च एत्वम्, अभ्यासलोपश्च, क्ङिति, सेटि, थलि, च)

**सरलार्थः-** तृ, फल्, भज्, त्रप् एतेषां धातूनाम् एत्वम् अभ्यासलोपश्च भवति किति, लिटि, सेटि थलि च परे ।

अनेन सूत्रेण धातोः अकारस्य एकारे अभ्यासस्य लोपे च 'त्रेप् ए' इति जाते वर्णसम्मेलने 'त्रेपे' इति रूपं सिद्धम् । त्रेपे, त्रेपाते, त्रेपिरे, त्रेपिषे, त्रेपाथे, त्रेपिध्वे, त्रेपे, त्रेपिवहे, त्रेपिमहे ।

धातोः ऊदित्वाद् लुडादिषु विभाषया इटि त्रपिता, त्रप्ता । त्रपिष्यते, त्रप्स्यते । लोटि, लङि, विधिलिङि पूर्ववत् । आशीर्लिङि, लुङि, लृङि च विभाषया इडागमे त्रपिषीष्ट, त्रप्सीष्ट । अत्रपिष्ट, अत्रप्त । अत्रपिष्यत, अत्रप्स्यत इत्यादीनि रूपाणि भवन्ति ।

**इत्यात्मनेपदिनः ॥**

**अचीकमत**

कम्धातोः 'आयादय आर्धधातुके वा' इति सूत्रेण विकल्पेन णिङ्प्रत्ययेऽनुबन्धलोपे 'अत उपधायाः' इति सूत्रेण उपधावृद्धौ कामि इति जाते तस्य 'सनाद्यन्ता धातवः' इति सूत्रेण धातुसंज्ञायां लुङ् इति सूत्रेण लुङि अनुबन्धलोपे अडागमे लस्य स्थाने 'तिप्तस्झि:०' इत्यादिना सूत्रेण त इत्यादेशे शपं बाधित्वा 'च्लि लुङि' इति सूत्रेण च्लिप्रत्यये तस्य स्थाने सिचं प्रबाध्य 'णिश्रिद्रुस्रुभ्यः कर्तरि चङ्' इति सूत्रेण चङादेशेऽनुबन्धलोपे 'अकामि अ त' इति जाते 'णेरनिटि' इति सूत्रेण णेर्लोपे 'णौ चङ्युपधाया ह्रस्वः' इति सूत्रेण उपधाया ह्रस्वे 'चङि' इति सूत्रेण द्वित्वे अभ्याससंज्ञायां हलादिशेषे 'कुहोश्चुः' इति चुत्वे 'अचकम् अत' इति जाते 'सन्वल्लघुनि चङ्परेऽनग्लोपे' इति सूत्रेण सन्वद्भावे 'सन्यतः' इति सूत्रेण इत्वे 'दीर्घो लघोः' इति सूत्रेण दीर्घे वर्णसम्मेलने 'अचीकमत' इति रूपं सिद्धम् । विकल्पेन णिङोऽभावे 'अचकमत' इत्यपि रूपं भवति ।

**पलायते**

परा इत्युपसर्गपूर्वकाद् अय्धातोः 'वर्तमाने लट्' इति सूत्रेण लटि अनुबन्धलोपे लस्य स्थाने त इत्यादेशे तस्य 'तिङ्शित्सार्वधातुकम्' इति सूत्रेण सार्वधातुकसंज्ञायाम् 'कर्तरि शप्' इति सूत्रेण शपि अनुबन्धलोपे 'परा अय् अ त' इति जाते 'टित आत्मनेपदानां टेरे' इति सूत्रेण टेरेत्वे 'उपसर्गस्यायतौ' इति सूत्रेण उपसर्गस्य रेफस्य लत्वे वर्णयोगे 'पलायते' इति ।

**दिद्युते**

द्युत्धातोः 'परोक्षे लिट्' इति सूत्रेण लिटि अनुबन्धलोपे लस्य स्थाने 'तिप्तस्झि०' इत्यादिना सूत्रेण त इत्यादेशे तस्य स्थाने 'लिटस्तझयोरेशिरेच्' इति सूत्रेण एशादेशेऽनुबन्धलोपे 'द्युत् ए' इति जाते 'लिटि धातोरनभ्यासस्य' इति सूत्रेण द्वित्वे 'पूर्वोऽभ्यासः' इति सूत्रेण अभ्याससंज्ञायाम् 'द्युतिस्वाप्योः संप्रसारणम्' इति सूत्रेण अभ्यासस्य संप्रसारणे 'द् इ उत् द्युत् ए' इति जाते 'संप्रसारणाच्च' इति पूर्वरूपे हलादिशेषे 'दिद्युत् ए' इति जाते 'असंयोगाल्लिट् कित्' इति कित्त्वाद् प्राप्तस्य लघूपधगुणस्य 'क्ङिति च' इति निषेधे वर्णयोगे 'दिद्युते' इति रूपं सिद्धम् ।

**वर्त्स्यति**

वृत्धातोः 'लृट् शेषे च' इति सूत्रेण लृटि अनुबन्धलोपे 'वृत् ल्' इति जाते लृटि स्यप्रत्ययस्य विवक्षितत्वाद् 'वृद्भ्यः स्यसनोः' इति सूत्रेण विकल्पेन परस्मैपदविधानाद् लस्य स्थाने 'तिप्तस्झि० इत्यादिना सूत्रेण प्रथमपुरुषस्य एकवचने तिबादेशेऽनुबन्धलोपे वृत् ति इति जाते सार्वधातुकत्वेन प्राप्तं शपं बाधित्वा 'स्यतासी लृलुटोः' इति सूत्रेण स्यप्रत्यये तस्य 'आर्धधातुकं शेषः' इति सूत्रेण आर्धधातुकसंज्ञायाम् 'आर्धधातुकस्येड् वलादेः' इति सूत्रेण इडागमे प्राप्ते 'न वृद्भ्यश्चतुर्भ्यः' इति सूत्रेण इटो निषेधे 'पुगन्तलघूपधस्य च' इति सूत्रेण लघूपधगुणे वर्णयोगे 'वर्त्स्यति' इति रूपं सिद्धम् । परस्मैपदस्याभावपक्षे 'वर्तिष्यते' इत्यपि रूपं सिद्ध्यति ।

## वाक्येषु प्रयोगनिदर्शनम्

१. रात्रौ तारका आकाशे द्योतन्ते ।

२. तपस्विनः तपःप्रभावेण अद्युतन् ।

३. शिशुः शय्यायां सुप्तो वर्तते ।

४. मम माता गृहे वर्तिष्यते ।

५. शिष्यो गुरुवाक्यं स्रम्भते ।

६. दण्डप्रहारेण घटो ध्वंसते ।

७. नववधूः श्वशुरं दृष्ट्वा त्रपते ।

## अभ्यासः

### १. शुद्धमुच्चारणं कुरुत

(क) अयामन्ताल्वाय्येत्न्विष्णुषु

(ख) णौ चङ्युपधाया ह्रस्वः

(ग) सन्वल्लघुनि चङ्परेऽनग्लोपे

(घ) कमेश्च्लेश्चङ् वाच्यः

(ङ) उपसर्गस्याऽयतौ

(च) द्युतिस्वाप्योः सम्प्रसारणम्

(छ) न वृद्भ्यश्चतुर्भ्यः

### २. अधस्तनप्रश्नानामुत्तराणि लिखत

(क) कमुधातोः कोऽर्थः ?

(ख) कम्धातोर्णिङ्प्रत्ययः कस्मिन्नर्थे भवति ?

(ग) केभ्यः परस्य च्लेः स्थाने चङादेशो भवति ?

(घ) कुत्र लघोरभ्यासस्य दीर्घो भवति ?

(ङ) द्युतधातोः कस्मिन्नर्थे प्रयोगो भवति ?

(च) द्युतधातोः कस्मिन् लकारे विकल्पेन परस्मैपदं भवति ?

(छ) वृत्धातुः केषु लकारेषु विकल्पेन परस्मैपदे प्रयुज्यते ?

(ज) त्रपूष्धातोरर्थं विलिख्य ऊदित्तवस्य फलं निर्दिशत ।

### ३. सोदाहरणं सूत्राणामर्थं लिखत

(क) कमेर्णिङ्

(ख) णेरनिटि

(ग) णौ चङ्युपधाया ह्रस्वः

(घ) सन्वल्लघूनि चङ्परेऽनग्लोपे

(ङ) सन्यतः

(च) द्युतिस्वाप्योः संप्रसारणम्

(छ) वृद्भ्यः स्यसनोः

(ज) न शसददवादिगुणानाम्

## ४. अधस्तनानां धातूनां निर्दिष्टलकारेषु रूपाणि विलिखत

(क) द्युतधातोर्लिट्लुङ्लकारयोः

(ख) रुच्शुभधात्वोर्लट्लोट्लकारयोः

(ग) वृत्धातोर्लृट्लकारे

(घ) कम् धातोः लुङ्लकारे

(ङ) त्रप्धातोर्लिट्लकारे

(च) अय्धातोराशीर्लिङि

## ५. अधोनिर्दिष्टानां प्रयोगाणां रूपसिद्धिप्रक्रियां ससूत्रं लिखत

कामयते । कामयाञ्चक्रे/चकमे । अचीकमत/अचकमत । दिद्युते । अद्युतत् । वर्त्स्यति । त्रेपे । त्रपिता । अयिषीढ्वम्/अयिषीध्वम् । अद्योतिष्ट । वत्स्यति/वर्तिष्यते । अवृतत्/अवर्तिष्ट

## ६. अधस्तनपदानां धातुलकारपुरुषवचनानि निर्दिशत

(क) चकमिरे

(ख) कामयिष्ये

(ग) आयिध्वम्

(घ) दिद्युते

(ङ) वर्तिता

(च) वर्तताम्

(छ) अत्रप्त

(ज) शुशुभे

(झ) रोचताम्

(ञ) पलायते

## ७. सिद्धपदानि दर्शयत

(क) कम्+ लिट् (त)

(ख) कम्+लुङ् (आताम्)

(ग) द्युत्+ लोट् (थास्)

(घ) रुच्+ लोट् (झप्रत्यये)

(ङ) वृत्+लृत् (मस्)

## ८. पदानां वाक्ये प्रयोगं निदर्शयत

कामये । कामयेत । द्योतते । पलायन्ते । रोचते । क्षोभते । वर्ते । वर्तेथे ।

एकादशः पाठ

# श्रिञादीनामुभयपदिधातूनां रूपसिद्धिनिदर्शनम्

## अथोभयपदिनः

स्वरितेतो ञितश्च धातवः कर्तृगे क्रियाफले आत्मनेपदिनो भवन्ति चेत् परगामिनि क्रियाफले तु परस्मैपदिनो भवन्ति। एते एव धातव उभयपदिनः कथ्यन्ते। उभयपदिभ्यो धातुभ्यो विहितानां लकाराणां स्थाने परस्मैपदादेशाः, आत्मनेपदादेशाश्च भवन्ति।

**श्रिञ् सेवायाम् ॥१॥**

**(श्रि-सेट्, सकर्मकः, उभयपदी)**

**श्रयति, श्रयते। शिश्राय, शिश्रिये। श्रयितासि, श्रयितासे। श्रयिष्यति, श्रयिष्यते। श्रयतु, श्रयताम्। अश्रयत्, अश्रयत। श्रयेत्, श्रयेत। श्रीयात्, श्रयिषीष्ट। चङ्। अशिश्रियत्, अशिश्रियत। अश्रयिष्यत्, अश्रयिष्यत।**

सेवार्थकश्रिधातोः ञकारः इत् तेन परगामिनि क्रियाफले लः स्थाने तिपि शपि गुणे' यादेशे श्रयति इति रूपं जायते। कर्तृगामिनि क्रियाफले तु लः स्थाने तादेशे शपि गुणेऽयादेशे टिसंज्ञायां टेरेत्वे च 'श्रयते' इति रूपं जायते।

एवं लिटि परगामिनि क्रियाफले तिपि णलि द्वित्वेऽभ्यासत्वे हलादिशेषे णिति इकारस्य वृद्धौ आयादेशे च 'शिश्राय' इति रूपं सिद्ध्यति। कर्तृगामिनि क्रियाफले तादेशे एशि द्वित्वेऽभ्यासत्वे हलादिशेषे कित्त्वे गुणनिषेधे इयङादेशे च 'शिश्रिये' इति रूपं निष्पद्यते।

एवं लुटि तिपि तादेशे च 'श्रयिता' इति रूपं भवति। लुटि सिपि 'श्रयितासि' इति भवति चेत् थासि 'श्रयितासे' इति रूपं भवति।

एवमेव उभयोः पदयोः लृटि 'श्रयिष्यति' 'श्रयिष्यते', लोटि 'श्रयतु', 'श्रयताम्', लङि 'अश्रयत्', 'अश्रयत' विधिलिङि 'श्रयेत्', 'श्रयेत' आशीर्लिङि 'श्रीयात्', 'श्रयिषीष्ट' इत्यादीनि रूपाणि निष्पद्यन्ते।

लुङि परगामिनि क्रियाफले लः स्थाने तिपि च्लौ सिचं प्रबाध्य 'णि-श्रि-द्रु-स्रुभ्यः कर्तरि चङ्' इति सूत्रेण च्लेः स्थाने चङि अनुबन्धलोपे 'अ श्रि अ ति' इति जाते 'चङि' इति द्वित्वेऽभ्यासत्वे हलादिशेषे 'अशिश्रि अति' इति जाते गुणनिषेधे इकारस्य स्थाने 'इयङादेशेऽनुबन्धलोपे

इकारस्य लोपे च 'अशिश्रियत्' इति रूपं सिद्ध्यति । कर्तृगामिनि क्रियाफले तु लः स्थाने तादेशे च्लौ चङि द्वित्वेऽभ्यासत्वे हलादिशेषे गुणनिषेधे इकारस्य स्थाने इयङादेशे 'अशिश्रियत' इति रूपं जायते । लृङि तिपि 'अश्रयिष्यत्' इति, तादेशे 'अश्रयिष्यत' इति च रूपे जायेते ।

**भृञ् भरणे ॥२॥**

**भरति, भरते । बभार । बभ्रतुः । बभ्रुः । बभर्थ । बभृव । बभृम । बभ्रे । बभृषे । भर्तासि, भर्तासे । भरिष्यति, भरिष्यते । भरतु, भरताम् । अभरत्, अभरत । भरेत्, भरेत ॥**

भृञ्-धातोः ञकार इत् । अत एव उभयपदी । तस्माद् लटि परस्मैपदे 'भरति' इत्यादीनि, आत्मनेपदे 'भरते' इत्यादीनि च रूपाणि भवन्ति ।

लिटि अनुप्रयुक्तस्य कृधातोरिव परस्मैपदे 'बभार', 'बभ्रतुः', 'बभ्रुः' इत्यादीनि रूपाणि, आत्मनेपदे च 'बभ्रे' 'बभ्राते', बभ्रिरे' इत्यादीनि रूपाणि भवन्ति ।

लुडादिषु पूर्ववदेव भर्तासि/भर्तासे, भरिष्यति/भरिष्यते, भरतु/भरताम्, अभरत्/अभरत भरेत्/भरेत इत्यादीनि रूपाणि जायन्ते ।

भृधातोः आशीर्लिङि तस्य परस्मैपदसंज्ञके तिपि आर्धधातुकसंज्ञायां यासुडागमादिषु कृतेषु 'भृ यात्' इत्यवस्थायामाह-

## रिङादेशविधायकं विधिसूत्रम्

**रिङ् शयग्लिङ्क्षु ७।४।२८॥**

**शे यकि यादावार्धधातुके लिङि च ऋतो रिङ् आदेशः स्यात् । रीङि प्रकृते रिङ्विधानसामर्थ्याद्दीर्घो न । भ्रियात् ।**

(शयग्लिङ्क्षु, ऋतः, रिङ्)

**सरलार्थः-** शप्रत्यये, यकि परे, यादौ आर्धधातुके लिङि च परे ऋतः स्थाने रिङादेशो भवति ।

अनेन भृधातोः ऋकारस्य स्थाने रिङादेशे 'भ्रियात्' इति रूपं सिद्ध्यति । अत्र ह्रस्वरिङादेशविधानसामर्थ्यात् इकारस्य 'अकृत्सार्वधातुकयोर्दीर्घः' इति सूत्रेण दीर्घो न ।

आशीर्लिङि तादेशे आर्धधातुकसंज्ञायां सीयुडागमे 'भृ सीय् त' इति जाते एकाच्त्वाद् इडागमनिषेधे-

## किद्वद्भावविधायकमतिदेशसूत्रम्

**उश्च १।२।१२॥**

**ऋवर्णात्परौ झलादी लिङ्-सिचौ कितौ स्तस्तङि । भृषीष्ट । भृषीयास्ताम् । अभार्षीत् ।**

(उः, च, झलः, आत्मनेपदेषु, लिङसिचौ, कित्)

**सरलार्थः-** ऋवर्णात् परः स्थितो झलादिर्लिङ्, आत्मनेपदपरकः सिच्च कितौ भवतः ।

इति सूत्रेण सीयुटः कित्त्वेन 'सार्वधातुकार्धधातुकयोः' इत्यनेन सूत्रेण प्राप्तस्य गुणस्य 'क्क्ङिति च' इति निषेधे 'भृसीय् त' इति जाते यलोपे (लोपो व्योर्वलि), सुडागमे (सुट् तिथोः), उभयत्र षत्वे उत्तरत्र ष्टुत्वे च 'भृषीष्ट' इति रूपं जायते ।

लुङि अडागमे परस्मैपदे 'अह्वार्षीत्' इतीव 'अभार्षीत्' इत्यादीनि रूपाणि जायन्ते । आत्मनेपदे तादेशे च्लौ सिचि आर्धधातुकत्वेन एकाच्त्वाद् इडागमनिषेधे 'उश्च' इति सिचः कित्त्वाद् गुणनिषेधे च 'अभृस् त' इति जाते-

## सिचो लोपविधायकं विधिसूत्रम्

**ह्रस्वादङ्गात् ८।२।२७॥**

**सिचो लोपो झलि । अभृत । अभरिष्यत् । अभरिष्यत ॥**

(झलि, ह्रस्वात्, अङ्गात्, सस्य, लोपः)

**सरलार्थः-** झलि परे ह्रस्वान्ताद् अङ्गात् परस्य सिचो लोपो भवति ।

इति सूत्रेण सिचो लोपे 'अभृत' इति रूपं सम्पद्यते, आतामि तु सिज्लोपाभावे 'अभृषाताम्' इति रूपम् । झे झस्य 'अत्' आदेशे 'अभृषत' इति रूपं निष्पद्यते । लृङि 'अभरिष्यत्/अभरिष्यत' इत्यादीनि रूपाणि सिद्ध्यन्ति ।

**हृञ् हरणे ॥३॥**

**हरति । हरते । जहार । जह्रतुः । जह्रुः । जहर्थ । जह्रिव । जह्रिम । जह्रे । जह्रिषे । हर्त्ता । हर्तासि । हर्तासे । हरिष्यति । हरिष्यते । हरतु, हरताम् । अहरत्, अहरत । हरेत्, हरेत । ह्रियात्, हृषीष्ट । हृषीयास्ताम् । अहार्षीत्, अहृत । अहरिष्यत्, अहरिष्यत ॥**

हृधातोः उभयोः पदयोः सर्वाण्यपि रूपाणि भृधातुवद् भवन्ति ।

**धृञ् धारणे ॥४॥**

(धृ-अनिट्, सकर्मकः, उभयपदी) धृधातोः उभयोः पदयोः सर्वाण्यपि रूपाणि भृधातुवद् भवन्ति । धरति, धरते । दधार, दध्रे । धर्तासि, धर्तासे । धरिष्यति, धरिष्यते । धरतु, धरताम् । अधरत्, अधरत । धरेत्, धरेत । ध्रियात्, धृषीष्ट । अधार्षीत्, अधृत । अधरिष्यत्, अधरिष्यत ।

**णीञ् प्रापणे ॥५॥**

(नी-अनिद्, सकर्मकः, उभयपदी)

णी इत्यस्य धातुसंज्ञायां 'णो नः' इति सूत्रेण धात्वादेः णस्य नकारादेशे तस्मात् कर्तर्यर्थे लट्लकारेऽनुबन्धलोपे लस्य स्थाने परस्मैपदसंज्ञके तिप्यनुबन्धलोपे शप्यनुबन्धलोपे 'नी अति' इति जाते गुणे (सार्वधातुकार्धधातुकयोः) अयादेशे वर्णसम्मेलने च 'नयति' इति रूपं सिद्धम् । तसादिषु पूर्ववत्- नयतः, नयन्ति, नयसि, नयथः, नयथ, नयामि, नयावः, नयामः ।

आत्मनेपदे तप्रत्यये शपि गुणे'यादेशे 'नयत' इति जाते टिसंज्ञायां 'टित आत्मनेपदानां टेरे' इति सूत्रेण टेरेत्वे नयते इति रूपम् । आतामादिषु नयेते, नयन्ते, नयसे, नयेथे, नयध्वे, नये, नयावहे, नयामहे ।

लिटि तिपि णलि द्वित्वेऽभ्यासत्वे ह्रस्वे वृद्धौ आयादेशे च 'निनाय' इति रूपम् । निन्यतुः, निन्युः, निनयिथ-निनेथ, निन्यथुः, निन्य, निनाय-निनय, निन्यिव, निन्यिम । आत्मनेपदे तादेशे तस्य एशि द्वित्वेऽभ्यासत्वे ह्रस्वे अपित्त्वाद् ङित्त्वेन गुणनिषेधे यणि 'निन्ये' इति रूपम् । आतामादिषु निन्याते, निन्यिरे, निन्यिषे, निन्याथे, निन्यिढ्वे-निन्यिध्वे, निन्ये, निन्यिवहे, निन्यिमहे ।

लुटि लृटि च इडागमनिषेधे 'नेतासि/नेतासे' इत्यादीनि, 'नेष्यति/नेष्यते' इत्यादीनि च रूपाणि जायन्ते । लोटि नयतु, नयताम् । लङि अनयत्, अनयत । विधिलिङि नयेत्, नयेत । आशीर्लिङि 'नीयात्/नेषीष्ट' इत्यादीनि रूपाणि भवन्ति । लुङि परस्मैपदे 'अनैषीत्' इत्यादीनि रूपाणि, आत्मनेपदे इडागमनिषेधाद् 'अनेष्ट' इत्यादीनि रूपाणि भवन्ति । लृङि 'अनेष्यत्/अनेष्यत' ।

**डुपचष् पाके ॥६॥**

(पच्-अनिट्, सकर्मकः, उभयपदी) । डु-अ-ष्-अनुबन्धाः । तत्र 'डु'-इत्यस्य 'आदिर्ञिटुडवः' इतीत्संज्ञा । अकारो स्वरितः । अत एव स्वरितेत्त्वाद् धातुरयमुभयपदी ।

पच्धातोः लटि 'पचति/पचते' इत्यादीनि रूपाणि भवन्ति । लिटि परस्मैपदे 'नद्'धातोरिव 'पपाच' 'पेचतुः' इत्यादीनि रूपाणि भवन्ति । सिपि थलि भारद्वाजस्य मते इडागमे 'थलि च सेटि' इति सूत्रेण अभ्यासस्य लोपे, अनभ्यासस्य एत्वे च 'पेचिथ' इति रूपं भवति, अन्येषां मते इडागमाभावे हलादिशेषानन्तरं चकारस्य कुत्वे 'पपक्थ' इति रूपं जायते । लिटि आत्मनेपदे पेचे पेचाते पेचिरे,पेचिषे, पेचाथे, पेचिध्वे, पेचे, पेचिवहे, पेचिमहे इति रूपाणि ।

लुटि इडागमनिषेधे चकारस्य कुत्वेन 'पक्तासि/पक्तासे' इत्यादीनि रूपाणि । लृटि चकारस्य कुत्वानन्तरं सकारस्य षत्वे कषसंयोगेन क्षकारे 'पक्ष्यति/पक्ष्यते' इत्यादीनि रूपाणि

निष्पद्यन्ते । लोटि, लङि, विधिलिङि च शबादिना पचतु, पचताम्, अपचत् अपचत पचेत्, पचेत इत्यादीनि रूपाणि पूर्ववत् । आशीर्लिङि परस्मैपदे 'पच्यात्' इत्यादीनि रूपाणि, आत्मनेपदे सीयुडागमे इडागमनिषेधे कुत्वे षत्वे क्षत्वे ततः सुडागमादिना 'पक्षीष्ट' इत्यादीनि रूपाणि सम्पद्यन्ते । लुङि परस्मैपदे 'अपाक्षीत्' इत्यादीनि रूपाणि, आत्मनेपदे तादेशे कुत्वानन्तरं 'झलो झलि' इत्यनेन सकारलोपे 'अपक्त' इति । आतामादिषु सलोपाभावेन षत्वे क्षत्वे च 'अपक्षाताम्' इत्यादीनि रूपाणि भवन्ति । लृङि 'अपक्ष्यत्/अपक्ष्यत' ।

**भज सेवायाम् ॥७॥** (भज्-अनिद, सकर्मकः, उभयपदी)। अकारोऽनुबन्धः स्वरितः ।

भज्धातोः सर्वेषु लकारेषु पच्धातुवद् रूपाणि भवन्ति । भजति, भजते । बभाज, भेजे । भक्तासि, भक्तासे । भक्ष्यति, भक्ष्यते । भजतु, भजताम् । अभजत्, अभजत । भजेत्, भजेत । भज्यात्, भक्षीष्ट । अभक्षीत्, अभक्त । अभक्ष्यत्, अभक्ष्यत ।

**यज देवपूजा-सङ्गतिकरण-दानेषु ॥८॥** (यज्-अनिट्, सकर्मकः, उभयपदी) यज्धातुः देवपूजायाम्, सङ्गतिकरणे, दाने च वर्तते ।

लटि 'यजति/यजते' इत्यादीनि रूपाणि जायन्ते । परस्मैपदे लिटि तिपि णलि द्वित्वेऽभ्यासादिकार्येषु च 'यज् यज् अ' इति जाते-

### सम्प्रसारणादेशविधायकं विधिसूत्रम्

**लिट्यभ्यासस्योभयेषाम् ६।१।१७॥**

**वच्यादीनां, ग्रह्यादीनां चाऽभ्यासस्य संप्रसारणं स्याल्लिटि । इयाज ।**

(उभयेषाम्, लिटि, अभ्यासस्य, सम्प्रसारणम्)

**सरलार्थः-** लिटि परे वच्यादीनां ग्रह्यादीनां धातूनां अभ्यासस्य सम्प्रसारणं भवति । वच्, स्वप्, यज्, वप्, वह्, वस्, वेञ्, व्येञ्, ह्वेञ्, वद्, श्वि एते धातवो वच्यादयो धातवः सन्ति । ग्रह्, ज्या, वय्, व्यध्, व्यष्ट्, विच्, व्रश्च्, प्रच्छ्, भ्रस्ज् एते धातवो ग्रह्यादयः सन्ति ।

इति सूत्रेण अभ्यासस्य यकारस्य सम्प्रसारणे पूर्वरूपे हलादिशेषे उपधावृद्धौ च 'इयाज' इति रूपं सिद्ध्यति । तसि अतुसि अतुसः कित्त्वे (असंयोगाल्लिट् कित्) 'यज् अतुस्' इति जाते-

### सम्प्रसारणादेशविधायकं विधिसूत्रम्

**वचिस्वपियजादीनां किति ६।१।१५॥**

**वचिस्वप्योर्यजादीनां च सम्प्रसारणं किति । ईजतुः । ईजुः । इयजिथ-इयष्ठ । ईजे । यष्टा ।**

(वचिस्वपियजादीनाम्, सम्प्रसारणम्, किति)

**सरलार्थः- किति परे** 'वच्'धातोः, 'स्वप्'धातोः यजादीनां नवानां धातूनां च यणः स्थाने: सम्प्रसारणादेशो भवति ।

अनेन धातोः सम्प्रसारणे पूर्वरूपे च 'इज् अतुस्' इति जाते 'इज्' इत्यस्य द्वित्वे हलादिशेषे दीर्घे वर्णसम्मेलने च 'ईजतुः' इति रूपम् । एवंरीत्या उसि 'ईजुः' इति रूपम् । थलि धातोः द्वित्वे अभ्यासादिकार्ये च 'ययज् थ' इति जाते 'लिट्यभ्यासस्योभयेषाम्' इति सूत्रेण अभ्यासस्य संप्रसारणे पूर्वरूपे च 'इयज् थ' इत्यत्र 'उपदेशेऽत्वतः' इति नियमेन विभाषया इडागमे 'इयजिथ' इति रूपम्, इडागमाभावपक्षे 'इयज् थ' इत्यत्र जकारस्य 'व्रश्चभ्रस्ज्.....' इत्यादिना सूत्रेण षत्वे थकारस्य ष्टुत्वे च 'इयष्ठ' इति रूपं सिद्ध्यति । ईजथुः, ईज, इयाज, इयज, ईजिव, ईजिम ।

आत्मनेपदे तादेशे एशि कित्त्वे सम्प्रसारणे पूर्वरूपे द्वित्वेऽभ्यासत्वे हलादिशेषे सवर्णदीर्घे वर्णसम्मेलने च 'ईजे' इति रूपं जायते । आतामादिष्वपि एवमेव ईजाते, ईजिरे, ईजिषे, ईजाथे, ईजिध्वे, ईजे, ईजिवहे, ईजिमहे चेति रूपाणि भवन्ति ।

लुटि 'यज् ता' इत्यवस्थायाम् 'व्रश्चभ्रश्जे'ति सूत्रेण जकारस्य षत्वे ष्टुत्वे च 'यष्टा' इति रूपम्, सिपि आत्मनेपदे 'यष्टासे' इत्यादीनि रूपाणि ।

लृटि 'यज् स्यति' इत्यवस्थायां धातोः जकारस्य व्रश्चेति सूत्रेण षत्वे आह-

### ककारादेशविधायकं विधिसूत्रम्

**षढोः कः सि ८।२।४१॥**

**यक्ष्यति । यक्ष्यते । इज्यात्, यक्षीष्ट । अयाक्षीत् । अयष्ट ।**

(षढोः, कः, सि)

अनेन सूत्रेण षकारस्य कत्वे, सकारस्य षत्वे (आदेशप्रत्यययोः) कषसंयोगेन क्षत्वे च 'यक्ष्यति/यक्ष्यते' इत्यादीनि रूपाणि भवन्ति । लोटि, लङि, विधिलिङि च शबादिना यजतु, अयजत् अयजत, यजेत् यजेत, चेति रूपाणि भवन्ति ।

आशीर्लिङि परस्मैपदे यासुटः कित्त्वेन 'वचिस्वपियजादीनां किति' इति सम्प्रसारणे 'इज्यात्' इत्यादीनि रूपाणि भवन्ति । आत्मनेपदे सीयुडागमे इडागमनिषेधे कुत्वादिना 'यक्षीष्ट' इत्यादीनि रूपाणि । लुङि परस्मैपदे पच्धातोरिव 'अयाक्षीत्' इत्यादीनि रूपाणि । आत्मनेपदे तादेशे 'झलो झलि' इति सकारस्य लोपे जकारस्य षत्वे तकारस्य ष्टुत्वे च

'अयष्ट' इति रूपं सिद्ध्यति, आतामादिषु पच्धातोरिव 'अयक्षाताम्' इत्यादीनि रूपाणि ज्ञेयानि । लृङि पूर्ववद् 'अयक्ष्यत्/अयक्ष्यत' इत्यादीनि रूपाणि ।

**वह प्रापणे ॥९॥** (वह्-अनिट्, सकर्मकः, उभयपदी) । अकारोऽनुबन्धः स्वरितः ।

**वहति । वहते । उवाह । ऊहतुः । ऊहुः । उवहिथ ।**

प्रापणार्थे वर्तमानस्य 'वह्' शब्दस्य धातुसंज्ञायां ततो लटि 'वहति/वहते' इत्यादीनि रूपाणि ।

लिटि तिपि तसि झौ च यज्धातोरिव 'उवाह' 'ऊहतुः', 'ऊहुः' इति रूपाणि सिद्ध्यन्ति ।

सिपि थलि भारद्वाजस्य मते इडागमे पूर्ववद् 'उवहिथ' इति रूपं भवति । अन्येषां मते इडागमाभावे 'उवह् थ' इति जाते 'हो ढः' इति हकारस्य ढकारे आह-

### धकारादेशविधायकं विधिसूत्रम्

**झषस्तथोर्धोऽधः ।८।२।४०।।**

**झषः परयोस्तथोर्धः स्यान्न तु दधातेः ॥**

(झषः, तथोः, धः, अधः)

**सरलार्थः-** झष्प्रत्याहारात् परयोः तकारथकारयोः स्थाने धकारादेशो भवति, दधातिरूपवतो धा-धातोस्तु न भवति ।

इति सूत्रेण थकारस्य धकारे धकारस्य ष्टुत्वेन ढकारे 'उवढ् ढ' इति जाते-

### ढकारलोपादेशविधायकं विधिसूत्रम्

**ढो ढे लोपः ८।३।१३।।**

(ढः, ढे, लोपः)

**सरलार्थः-** ढकारे परे ढकारस्य लोपो भवति ।

इति पूर्वढकारस्य लोपे 'उव ढ' इति जाते 'ढ्रलोपे पूर्वस्य दीर्घोऽणः' इति सूत्रेण अकारस्य दीर्घे प्राप्ते-

### ओदादेशविधायकं विधिसूत्रम्

**सहिवहोरोदवर्णस्य ६।३।११२।।**

**अनयोरवर्णस्य ओत्स्यात् ढलोपे । उवोढ । ऊहे । वोढा । वक्ष्यति । वहतु । वहताम् । अवहत् । अवहत । वहेत् । वहेत । उह्यात् । वक्षीष्ट । अवाक्षीत् । अवोढाम् । अवाक्षुः ।**

**अवाक्षीः । अवोढम् । अवोढ । अवाक्षम् । अवाक्ष्व । अवाक्ष्म । अवोढ । अवक्षाताम् । अवक्षत । अवोढाः । अवक्षाथाम् । अवोढ्वम् । अवक्षि । अवक्ष्वहि । अवक्ष्महि । अवक्ष्यत् । अवक्ष्यत ।**

(सहिवहोः, ओत्, अवर्णस्य)

**सरलार्थः–** ढकारलोपनिमित्तके ढकारे परे सह्-धातोः वह्-धातोश्च अवर्णस्य स्थाने ओदादेशो भवति ।

इति अकारस्य स्थाने ओकारादेशे 'उवोढ' इति रूपं जायते । थसादिषु ऊहथुः, ऊह, उवाह-उवह, ऊहिव, ऊहिम चेति रूपाणि भवन्ति । आत्मनेपदे 'ऊहे' इत्यादीनि रूपाणि ।

लुटि इडागमनिषेधानन्तरम् 'वह् तास् ति' इति जाते हकारस्य ढत्वे, तकारस्य धत्वे, धकारस्य ष्टुत्वे, ढकारस्य लोपे, अकारस्य ओत्वे च 'वोढास् ति' इति जाते डादेशादिना 'वोढा' इति रूपं जायते ।

लृटि इडागमनिषेधानन्तरं हकारस्य ढत्वे (हो ढः) ढकारस्य कत्वे (षढोः कः सि) सकारस्य षत्वे, कषयोः क्षत्वे च 'वक्ष्यति/वक्ष्यते' इत्यादीनि रूपाणि सिद्ध्यन्ति ।

आशीर्लिङि परस्मैपदे 'यज्'धातोरिव रूपाणि भवन्ति, आत्मनेपदे धातोः हकारस्य ढत्वे, ढकारस्य कत्वे, सकारस्य षत्वे, कषयोः क्षत्वे च सुडादिना 'वक्षीष्ट' इत्यादीनि रूपाणि भवन्ति ।

लुङि अडागमे तिपि च्लौ सिचि इडागमनिषेधे हलन्तलक्षणवृद्धौ (वदव्रजहलन्तस्याचः) हकारस्य ढत्वे, ढकारस्य कत्वे, सकारस्य षत्वे, कषयोः क्षत्वे, इकारलोपे, अपृक्तसंज्ञायामिडागमे च 'अवाक्षीत्' इति रूपं जायते । तसि 'अवह् स् ताम्' इत्यवस्थायाम् 'झलो झलि' इति सकारस्य लोपे हकारस्य ढत्वे, तकारस्य धत्वे, धकारस्य ष्टुत्वे, ढकारस्य लोपे, अकारस्य ओत्वे च 'अवोढाम्' इति रूपं जायते । आत्मनेपदे तादेशे च्लौ सिचि इडागमनिषेधानन्तरं सकारस्य लोपे 'अवह् त' इत्यत्र हकारस्य ढत्वे, तकारस्य धत्वे, धकारस्य ष्टुत्वे, ढकारस्य लोपे, अकारस्य ओत्वे च 'अवोढ' इति रूपम् । आतामि तु सलोपाभावे हलन्तलक्षणवृद्धौ 'अवाह् स् आताम्' इति जाते हकारस्य ढत्वे, ढकारस्य कत्वे, सकारस्य षत्वे, कषयोः क्षत्वे च 'अवाक्षाताम्' इति रूपं निष्पन्नम् । एवमन्यत्रापि रूपाणि सिद्ध्यन्ति । लृङि पूर्ववद् 'अवक्ष्यत्/अवक्ष्यत' इत्यादीनि रूपाणि भवन्ति ।

**भृषीष्ट**

भरणार्थकाद् भृधातोः 'आशिषि लिङ्लोटौ' इति सूत्रेण आशिष्यर्थे लिङि अनुबन्धलोपे लस्य स्थाने 'तिप्तस्झि०' इति सूत्रेण आत्मनेपदस्य प्रथमपुरुषस्य एकवचने 'त' इत्यादेशे प्राप्तां सार्वधातुकसंज्ञां बाधित्वा 'लिङाशिषि' इति सूत्रेण आर्धधातुकसंज्ञायाम् 'लिङः सीयुट्' इति सूत्रेण सीयुडागमेऽनुबन्धलोपे 'आर्धधातुकस्येड्वलादेः' इति सूत्रेण प्राप्तस्य इडागमस्य 'एकाच उपदेशेऽनुदात्तात्' इति सूत्रेण निषेधे 'सार्वधातुकार्धधातुकयोः' इति सूत्रेण गुणे प्राप्ते 'उश्च' इति सूत्रेण कित्त्वात् 'क्ङिति च' इति सूत्रेण गुणनिषेधे 'लोपो व्योर्वलि' इति सूत्रेण यकारस्य लोपे 'सुट् तिथोः' इति सूत्रेण सुडागमेऽनुबन्धलोपे 'भृसीस्त' इति जाते षत्वे ष्टुत्वे च कृते 'भृषीष्ट' इति रूपं निष्पन्नम् ।

**ईजतुः**

यज्धातोः 'परोक्षे लिट्' इति सूत्रेण लिटि अनुबन्धलोपे लस्य स्थाने परस्मैपदस्य प्रथमपुरुषस्य द्विवचनस्य विवक्षायां 'तिप्तस्झि०' इति सूत्रेण तसादेशे तसः स्थाने 'परस्मैपदानां णलतुसुस्थलथुसणल्वमाः' इति सूत्रेण अतुसादेशे 'यज् अतुस्' इति जाते अतुसः 'असंयोगाल्लिट् कित्' इति सूत्रेण किद्वद्भावे 'वचिस्वपियजादीनां किति' इति सूत्रेण संप्रसारणे 'संप्रसारणाच्च' इति सूत्रेण पूर्वरूपे 'इज् अतुस्' इति जाते 'लिटि धातोरनभ्यासस्य' इति सूत्रेण द्वित्वे अभ्याससंज्ञायां हलादिशेषे 'इ इज् अतुस्' इति जाते सवर्णदीर्घे वर्णयोगे सस्य रुत्वे विसर्गे च 'ईजतुः' इति रूपं सिद्धम् ।

## वाक्येषु प्रयोगनिदर्शनानि

१. विद्यानुरागिणः शिष्या गुरून् श्रयन्ते ।

२. लुब्धजनाः स्वोदरमेव भरन्ते ।

३. विद्याधनं कोऽपि न हरति ।

४. भगवान् शङ्करः शिरसि गङ्गां दधार ।

५. मम पिता मां मन्दिरं नयति ।

६. माता महानसे भोजनं पचति ।

७. भक्ताः सदैव भगवन्तं भजन्ति ।

८. मनुष्याः स्वेष्टदेवान् यजन्ति ।

९. गर्दभो भारं वहति ।

१०. नेपालदेशे बह्व्यो नद्यो वहन्ति ।

## अभ्यासः

### १. शुद्धमुच्चारणं कुरुत

(क) लिट्यभ्यासस्योभयेषाम्

(ख) ग्रहिज्यावयिव्यधिवष्टिविचतिवृश्चतिपृच्छतिभृज्जतीनां ङिति च

(ग) झषस्तथोर्धोऽधः

(घ) सहिवहोरोदवर्णस्य

### २. अधोऽङ्कितानां प्रश्नानामुत्तराणि लिखत

(क) श्रिञ्धातोः कोऽर्थः ?

(ख) यज्धातोः के'र्थाः ?

(ग) लिटि परे केषामभ्यासस्य सम्प्रसारणं भवति ?

(घ) ढकारे परे कस्य लोपो भवति ?

(ङ) कस्मात् परयोः तथवर्णयोः धत्वं भवति ?

(च) ढलोपनिमित्तके ढकारे परे पूर्वस्याणो दीर्घविधायकं सूत्रं किम् ?

### ३. सोदाहरणं सूत्राणामर्थं लिखत

(क) उश्च

(ख) वचिस्वपियजादीनां किति

(ग) झषस्तथोर्धोऽधः

(घ) सहिवहोरोदवर्णस्य

### ४. अधस्तनानां धातूनां निर्दिष्टलकारेषु रूपाणि विलिखत

(क) श्रिधातोरात्मनेपदे लिटि

(ख) भृधातोः परस्मैपदे लुटि

(ग) हृधातोरात्मनेपदे लृटि

(घ) धृधातोः परस्मैपदे लोटि

(ङ) नीधातोरात्मनेपदे लङि

(च) पच्धातोः परस्मैपदे विधिलिङि

(छ) भज्धातोरात्मनेपदे आशीर्लिङि

(ज) वह्धातोरात्मनेपदे लुङि

(झ) यज्धातोः परस्मैपदे लिटि

## ५. प्रमुखसूत्रनिदर्शनपूर्वकं रूपसिद्धिप्रकारं प्रदर्शयत

(क) शिश्रिये (ख) भृषीष्ट (ग) अहृत

(घ) अनैषीत् (ङ) पेचे (च) भक्ष्यते

(छ) इयाज (ज) ईजतुः (झ) यष्टा

(छ) उवोढ

## ७. अधस्तनपदानां धातुलकारपुरुषवचनानि निर्दिशत

(क) अश्रयन्त (ख) बभ्रे (ग) अहरिष्यः

(घ) पक्षीष्ट (ङ) यक्ष्ये (च) वोढाहे

(छ) अभक्षाताम् (ज) ईजुः (झ) अवोढम्

## ८. सिद्धपदानि दर्शयत

(क) श्रि + लुट् (थास्) (ख) भृ + लोट् (वस्)

(ग) हृ + विधिलिङ् (मिप्) (घ) पच् + लृट् (थ)

(ङ) यज् + लङ् (आताम्) (च) वह् + आशीर्लिङ् (महिङ्)

(छ) भज् + लुट् (झ)

## ९. पदानां वाक्ये प्रयोगप्रकारं दर्शयत

(क) श्रयिष्यते (ख) बभ्रे (ग) हरिष्यति

(घ) नयते (ङ) भक्तासे (च) यजे

(छ) वोढा

द्वादशः
पाठः

# अदादिगणे अद्-धातुः

तिङन्तप्रकरणे भ्वादिगणस्थधातुभ्यः क्रियापदानां निरूपणानन्तरमदादिगणस्थधातूनां रूपनिर्माणप्रकारो निरूप्यते । तिङन्तेषु धातूनां गणभेदाद् विकरणभेदेन रूपाणामपि भेदो ज्ञेयः । अदादिप्रकरणे सर्वेभ्यो धातुभ्यो विहितस्य शप्-प्रत्ययस्य लुग् भवतीति लुग्विकरणम् अर्थाद् विकरणप्रत्ययाभावोऽत्र विशेषः । अतो भ्वादिगणस्थधातूनां सार्वधातुकलकारेषु धातुविभक्त्योर्मध्ये दृश्यमानमकाररूपं विकरणं प्रकरणेऽस्मिन् न दृश्यते । यथा- अद्-हनादीनां धातूनां अत्ति, अत्तः, अदन्ति, हन्ति, हतः, घ्नन्ति इत्यादीनि भिन्नाकृतिकानि रूपाणि जायन्ते । आरम्भे अद्धातोः पाठाद् अदादिरिति प्रकरणस्यास्य संज्ञा ।

**अद भक्षणे ॥१॥** (अद्- अनिट्, सकर्मकः, परस्मैपदी)

अद (अद्) इति धातुर्भक्षणेऽर्थे वर्तते । अस्य दकारोत्तरवर्ती अकार उदात्तोऽनुनासिकश्च, आद्योऽकारस्तु अनुदात्तः । उदात्तस्येत्संज्ञकतया धातुरयं परस्मैपदी, एवमनुदात्ततया अनिट्, भक्षणार्थतया सकर्मकश्च वर्तते । अद् इत्यस्माद् वर्तमानक्रियावृत्तौ लटि, लस्य स्थाने तिपि पकारस्यानुबन्धलोपे 'अद्+ति' इति जाते तिपः सार्वधातुकसंज्ञायां 'कर्तरि शप्' इति शप्-प्रत्ययेऽनुबन्धलोपे 'अद्+अ+ति' इत्यवस्थायाम्-

### शपः लुग्विधायकं विधिसूत्रम्

**अदिप्रभृतिभ्यः शपः २।४।७२॥**

**लुक् स्यात् । अत्ति । अत्तः । अदन्ति । अत्सि । अत्थः । अत्थ । अद्मि । अद्वः । अद्मः ।**

(अदि-प्रभृतिभ्यः, शपः, लुक्)

**सरलार्थः** - अदादिगणपठितेभ्यो धातुभ्यो विहितस्य शपो लुग् भवति ।

अनेन सूत्रेण शपो लुकि 'अद्+ति' इति जाते 'खरि च' इति दकारस्य चर्त्वे 'अत्ति' इति सिद्ध्यति । तसादावपि शपो लुगेव विशेषः, झोऽन्तादेशादिविधयस्तु पूर्ववत् प्रवर्तन्त एव ।

अद्+लट् (ल्) - अद्+तस् - अद् शप् (अ)+तस् - अद् तस् (अदिप्रभृतिभ्यः शपः) - अत् तस् (खरि च) - अत्तस् - अत्तर् - **अत्तः** । अद्+लट् (ल्) - अद्+झि - अद् शप् (अ)+झि - अद् झि (अदिप्रभृतिभ्यः शपः) - अद् अन्ति (झोऽन्तः) - **अदन्ति** । अद्+लट् (ल्) -

अद्+सिप् (सि) - अद् शप् (अ)+सि - अद् सि (अदिप्रभृतिभ्यः शपः) - अत् सि (खरि च) - **अत्सि** । अद्+लट् (ल्) - अद्+मिप् (मि) - अद् शप् (अ)+मि - अद् मि (अदिप्रभृतिभ्यः शपः) - **अद्मि** ।

## विभाषया घस्लृ-आदेशविधायकं विधिसूत्रम्

**लिट्यन्यतरस्याम्** २।४।४०॥

**अदो घस्लृ वा स्याल्लिटि । जघास । उपधालोपः । घस्य चर्त्वे ।**

(लिटि, अदः, घस्लृ, अन्यतरस्याम्)

**सरलार्थः** - लिटि परे सति अद्-धातोः स्थाने घस्लृ इत्यादेशो विकल्पेन विधीयते । 'घस्लृ' इत्यस्य लृकार इत्, 'घस्' इत्येवावशिष्यते ।

अद्-धातोर्लिटि अनेन घस्लादेशपक्षे तिपि, णलि, द्वित्वे, अभ्यासकार्ये, उपधावृद्धौ '**जघास**' इति ।

अद्+लिट् (ल्) - घस्+ल् - घस्+तिप् (ति) - घस्+णल् (अ) - घस् घस्+अ - घ घस्+अ - ज घस्+अ - ज घास्+अ (अत उपधायाः) - जघास ।

अद्-धातोर्लिटि घस्लादेशपक्षे तसि, अतुसि, अभ्यासकार्ये 'ज घस् अतुस्' इत्यवस्थायां 'गमहनजनखनघसां लोपः क्ङित्यनङि' इत्यनेन उपधालोपे घकारस्य चर्त्वेन ककारे 'ज क् स् अतुस्' इत्यवस्थायाम्-

## षत्वादेशविधायकं विधिसूत्रम्

**शासिवसिघसीनां च** ८।३।६०॥

**इण्कुभ्यां परस्यैषां सस्य षः स्यात् । घस्य चर्त्वम् । जक्षतुः । जक्षुः । जघसिथ । जक्षथुः । जक्ष । जघास, जघस । जक्षिव । जक्षिम । आद । आदतुः । आदुः ।**

(इण्-कोः, शासि-वसि-घसीनाम्, च, अपदान्तस्य, सः, मूर्धन्यः)

**सरलार्थः** - इण्-प्रत्याहारस्थवर्णेभ्यः कवर्गस्थवर्णेभ्यश्च परस्य शास्-वस्-घस्-धातूनामपदान्तस्य सकारस्य स्थाने षकारादेशो भवति । शासु अनुशिष्टौ इति अदादिगणस्थो धातुः । वस निवासे, घस्लृ अदने च भ्वादिगणस्थौ धातू । अद्-धातोर्लिटि 'लिट्यन्यतरस्याम्' इत्यनेन यो वैकल्पिको घस्लादेशो भवति, तस्यापि ग्रहणमत्र भवतीति बोध्यम् ।

अनेन सूत्रेण सस्य षत्वे, कषसंयोगे क्षे, सकारस्य रुत्वे विसर्गे च '**जक्षतुः**' इति सिद्ध्यति ।

अद्+लिट् (ल्) - घस्+ल् - घस्+तस् - घस्+अतुस् - घस् घस्+अतुस् - घ घस्+अतुस् - ज घस्+अतुस् - ज घ् स्+अतुस् (गमहन...) - ज क् स्+अतुस् (खरि च) - ज क् ष्+अतुस् (शासिवसि...) - जक्षतुस् - जक्षतुर् - **जक्षतुः** ।

अद्-धातोस्तासिप्रत्यये घस्लादेशाभावात् थलि क्रादिनियमान्नित्यमेव इडागमो भवति । सिपि घस्लादेशपक्षे थलि, इटि, अभ्यासकार्ये '**जघसिथ**' इति । जक्षिव, जक्षिम इत्येतयोस्तु उपधालोपोऽपि भवति ।

अद्+लिट् (ल्) - घस्+ल् - घस्+सिप् - घस्+थल् (थ) - घस्+इथ - घस् घस्+इथ - घ घस्+इथ - ज घस्+इथ - **जघसिथ** । अद्+लिट् (ल्) - घस्+ल् - घस्+वस् - घस्+इव - घस् घस्+इव - घ घस्+इव - ज घस्+इव - ज घ् स्+इव (गमहन...) - ज क् स्+इव - ज क् ष्+व (शासिवसि...) - **जक्षिव** ।

घस्लादेशाभावपक्षे तु अत सातत्यगमने इति धातुवद् 'आद' इत्यादि । थलि-

## इडागमविधायकं विधिसूत्रम्

**इडत्त्यर्त्तिव्ययतीनाम् ७।२।६६॥**

**अद् ऋ व्येञ् एभ्यस्थलो नित्यमिट् स्यात् । आदिथ । अत्ता । अत्स्यति । अत्तु, अत्तात् । अत्ताम् । अदन्तु ॥**

(अत्ति-अर्ति-व्ययतीनाम्, थलि, इट्)

**सरलार्थः** - अद्, ऋ, व्येञ् इत्येतेभ्यो धातुभ्यः परस्य थल्-प्रत्ययस्य नित्यमिडागमो भवति ।

अद्-धातोर्थलि 'आर्धधातुकस्येड्वलादेः' इति प्राप्तस्य इडागमस्य 'एकाच...' इति निषेधः, तदनु क्रादिनियमान्नित्यं प्राप्तस्य इटः 'उपदेशेऽत्वतः' इति निषेधः, ततः 'ऋतो भारद्वाजस्य' इत्यनेन प्राप्तं वैकल्पिकमिटं बाधित्वा अनेन सूत्रेण नित्यमेव इडागमे जाते '**आदिथ**' इति सिद्ध्यति । आदिव, आदिम इत्येतयोस्तु क्रादिनियमान्नित्यमिडागमो ज्ञेयः ।

अद्+लिट् (ल्) - अद्+तिप् (ति) - अद्+णल् (अ) - अद् अद्+अ - अ अद्+अ - आ अद्+अ (अत आदेः) - आद्+अ (अकः सवर्णे दीर्घः) - **आद** । अद्+लिट् (ल्) - अद्+सिप् (सि) - अद्+थल् (थ) - अद्+इथ (इडत्त्यर्तिव्ययतीनाम्) - अद् अद्+इथ - अ अद्+इथ - आ अद्+इथ (अत आदेः) - आद्+इथ - **आदिथ** । अद्+लिट् (ल्) - अद्+वस् - अद्+व - अद्+इव (क्रादिनियमान्नित्यमिट्) - अद् अद्+इव - अ अद्+इव - आ अद्+इव (अत आदेः) - आद्+इव - **आदिव** ।

लुटि लृटि च इण्निषेधे **अत्ता**, **अत्स्यति** इत्यादीनि रूपाणि जायन्ते ।

अद्+लुट् (ल्) - अद्+तिप् (ति) - अद्+तासि (तास्)+ति (स्यतासी लृलुटोः) - अद्+तास्+डा (आ) - अद्+त्+आ (डित्त्वविधानसामर्थ्यादभस्यापि टेर्लोपः) - अत्+त्+आ (खरि च) - **अत्ता** ।

अद्+लृट् (ल्) - अद्+तिप् (ति) - अद्+स्य+ति (स्यतासी...) - अत्+स्य+ति (खरि च) - **अत्स्यति** ।

लोटि शपो लुकि अत्तु/अत्तात्, अत्ताम्, अदन्तु इति प्रथमपुरुषस्य रूपाणि ।

विध्यादिष्वर्थेषु- अद्+लोट्(ल्) - अद्+तिप्(ति) - अद्+शप्(अ)+ति - अद्+ति (अदिप्रभृतिभ्यः शपः) - अत्+ति (खरि च) - अत्ति - अत्तु (एरुः) । आशिषि त्वर्थे वैकल्पिके तातङि- **अत्तात्/अत्तु** ।

सिपि तु शपो लुकि, सेर्ह्यादेशे 'अद्+हि' इत्यवस्थायाम्-

## धि-इत्यादेशविधायकं विधिसूत्रम्

**हुझल्भ्यो हेर्धिः ६।४।१०१॥**

**होर्झलन्तेभ्यश्च हेर्धिः स्यात् । अद्धि । अत्तात् । अत्तम् । अत्त । अदानि । अदाव । अदाम ।**

(हु-झल्भ्यः, हेः, धिः)

**सरलार्थः** - हु-धातोः, झलन्तेभ्यो धातुभ्यश्च परस्य 'हि' इत्यस्य स्थाने 'धि' इत्यादेशो भवति ।

अनेन ध्यादेशे 'अद्धि' इति ।

विध्यादिष्वर्थेषु- अद्+लोट्(ल्) - अद्+सिप्(ति) - अद्+शप्(अ)+ति - अद्+सि (अदिप्रभृतिभ्यः शपः) - अद्+हि (सेर्ह्यपिच्च) - अद्+धि (हुझल्भ्यो हेर्धिः) - **अद्धि** । आशिषि त्वर्थे वैकल्पिके तातङि- **अत्तात्/अद्धि** ।

उत्तमपुरुषे 'आडुत्तमस्य पिच्च' इति आडागमे- अदानि, अदाव, अदाम इति रूपाणि ।

अद्+लोट्(ल्) - अद्+मिप्(मि) - अद्+शप्(अ)+मि - अद्+मि (अदिप्रभृतिभ्यः शपः) - अद्+आमि (आडुत्तमस्य पिच्च) - अदामि - **अदानि** (मेर्निः) ।

लुङि-

### अडागमविधायकं विधिसूत्रम्

**अदः सर्वेषाम् ७।३।१००॥**

**अदः परस्याऽपृक्तसार्वधातुकस्य अट् स्यात् सर्वमतेन। आदत्। आत्ताम्। आदन्। आदः। आत्तम्। आत्त। आदम्। आद्व। आद्म। अद्यात्। अद्याताम्। अद्युः। अद्यात्। अद्यास्ताम्। अद्यासुः।**

(अदः, अपृक्ते, सार्वधातुके, अट्, सर्वेषाम्)

**सरलार्थः** - अद्-धातोः परस्य अपृक्तसंज्ञकस्य सार्वधातुकस्य अट्-आगमो भवति। तिप्, सिप्, मिप् इत्येतेषु इतश्चेति इलोपानन्तरमपृक्तसंज्ञायामनेन सूत्रेण नित्यमडागमः, टित्वादाद्यवयवत्वं च बोध्यम्।

अद्-धातोरजादित्वाद् आडजादीनामिति लङि, लुङि, लृङि च अडागमं बाधित्वा धातोराडागमः, आटश्चेति वृद्धिश्च। लङि शपो लुक् च विशेषः।

अद् लङ् (ल्) - आ अद् ल् (आडजादीनाम्) - आद् ल् (आटश्च) - आद् तिप् (ति) - आद् शप् (अ) ति - आद् ति (अदिप्रभृतिभ्यः शपः)- आद् त् (इतश्च) - आद् अट् (अ) त् (अदः सर्वेषाम्) - आदत्। एवं सिपि- **आदः**, मिपि- **आदम्**।

तसादि-द्वि-बहुवचनयोस्तु शपो लुगेव विशेषः। अद् लङ् (ल्) - आ अद् ल् (आडजादीनाम्) - आद् ल् (आटश्च) - आद् तस् - आद् शप् (अ) तस् - आद् तस् (अदिप्रभृतिभ्यः शपः) - आद् ताम् (तस्थस्थ...) - आत् ताम् (खरि च) - **आत्ताम्**।

विधिलिङि शपो लुक्, यासुट्, यासः सलोपश्च सर्वत्रैव विधीयन्ते। अद् लिङ् (ल्) - अद् तिप् (ति) - अद् शप् (अ) ति - अद् ति (अदिप्रभृतिभ्यः शपः) - अद् यासुट् (यास्) ति - अद् या ति (लिङः सलोपोऽनन्त्यस्य) - अद् या त् (इतश्च) - **अद्यात्**।

आशीर्लिङि तु तिप्सिपोरेव यासुडागमस्य सस्य लोप इति पूर्ववत्प्रक्रिया ज्ञेया।

अद् लिङ् (ल्) - अद् तिप् (ति) - अद् यासुट् (यास्) ति - अद् यास् त् (इतश्च) - अद् या त् (स्कोः संयोगाद्योरन्ते च) - अद्यात्। अद् लिङ् (ल्) - अद् तस् - अद् यासुट् (यास्) तस् - अद् यास् ताम् (तस्थस्थ...) - अद्यास्ताम्।

### घस्लादेशविधायकं विधिसूत्रम्

**लुङ्सनोर्घस्लृ २।४।३७॥**

**अदो घस्लृ स्याल्लुङि सनि च । लृदित्त्वादङ् । अघसत् । आत्स्यत् ॥**

(अदः, घस्लृ, लुङ्-सनोः)

**सरलार्थः** - लुङ्-लकारे, सन्-प्रत्यये च परे अद्-धातोः स्थाने 'घस्लृ' इत्यादेशो भवति ।

घस्लादेशस्य लृदित्वाद् 'पुषादिद्युताद्यलृदितः परस्मैपदेषु' इति सूत्रेण च्लेः स्थाने सिचं बाधित्वा अङादेशो भवति । लुङो विवक्षायामनेन घस्लादेशे तस्य हलादित्वाद् अडागमो भवतीति स्मर्तव्यम् ।

अद् लुङ् (ल्) - घस्लृ (घस्) ल् (लुङ्सनोर्घस्लृ) - अघस् ल् - अघस् तिप् (ति) - अघस् च्लि ति - अघस् अङ् (अ) ति (पुषदिद्युता...) - अघस् अ त् - **अघसत्** । तसादौ अघसताम्, अघसन् इत्यादीनि रूपाणि जायन्ते ।

लृङि पूर्ववत्प्रकृयया- आत्स्यत् इत्यादि । अद् लृङ् (ल्) - आ अद् ल् (आडजादीनाम्) - आद् ल् (आटश्च) - आद् तिप् (ति) - आद् स्य ति (स्यतासी लृलुटोः) - आद् स्य त् (इतश्च) - आत् स्य त् (खरि च) - आत्स्यत् ।

**आदत्**

भक्षणार्थकाद् अद्-धातोः 'अनद्यतने लङ्' इति सूत्रेण लङ्लकारेऽनुबन्धलोपे 'अद् ल्' इति जाते अडागमं बाधित्वा 'आडजादीनाम्' इति सूत्रेण धातोराडागमेऽनुबन्धलोपे, टित्वादाद्यवयवत्वे 'आ अद् ल्' इत्यवस्थायाम् 'आटश्च' इत्यनेन वृद्धौ 'आद् ल्' इति जाते 'तिप्तस्झि...' इत्यादिना सूत्रेण प्रथमपुरुषस्यैकवचने तिबादेशेऽनुबन्धलोपे 'आद् ति' इति जाते तिपः सार्वधातुकसंज्ञायां 'कर्तरि शप्' इति सूत्रेण शप्यनुबन्धलोपे 'आद् अ ति' इति जाते 'अदिप्रभृतिभ्यः शपः' इति सूत्रेण शपो लुकि 'आद् ति' इति जाते 'इतश्च' इति इकारस्य लोपे 'आद् त्' इत्यवस्थायामपृक्तसंज्ञायाम् 'अदः सर्वेषाम्' इति सूत्रेण अपृक्तस्य अडागमेऽनुबन्धलोपे, टित्वादाद्यवयवत्वे 'आद् अत्' इति जाते वर्णसम्मेलने 'आदत्' इति रूपं सिद्धम् ।

**धातुरूपावलिः**

**अद्-धातोर्लटि रूपाणि-**

| | | |
|---|---|---|
| अत्ति | अत्तः | अदन्ति |
| अत्सि | अत्थः | अत्थ |
| अद्मि | अद्वः | अद्मः |

**अद्-धातोर्लिटि रूपाणि-**

**घस्लादेशपक्षे,**

| | | |
|---|---|---|
| जघास | जक्षतुः | जक्षुः |
| जघसिथ | जक्षथुः | जक्ष |
| जघास/जघस | जक्षिव | जक्षिम |

**घस्लादेशाभावपक्षे,**

| | | |
|---|---|---|
| आद | आदतुः | आदुः |
| आदिथ | आदथुः | आद |
| आद | आदिव | आदिम |

**अद्-धातोर्लुङि रूपाणि-**

| | | |
|---|---|---|
| अघसत् | अघसताम् | अघसन् |
| अघसः | अघसतम् | अघसत |
| अघसम् | अघसाव | अघसाम |

## वाक्येषु प्रयोगानुशीलनम्

१. बालिका रोटिकाम् अत्ति ।

२. आदिमकाले मानवाः कन्दमूलानि जघसुः/आदुः ।

३. भ्राता परश्वो यवागूम् अत्ता ।

४. त्वं सायं किम् अत्स्यसि ?

५. निरोगितामिच्छन्तो जनाः प्रतिदिनं फलानि अदन्ति ।

६. अहं ह्यः पायसम् आदम् ।

७. सर्वे जना मांसरहितं भोजनम् अद्युः ।

८. हिंस्रकपशवो मृगसावकान् न अद्यासुः ।

९. वयम् अद्य प्रातो नारिकेलफलम् अघसाम ।

१०. त्वं यदि अभक्ष्यं न आत्स्यः रुग्णो न अभविष्यः ।

## अभ्यासः

### १. सूत्राणि शुद्धमुच्चारयत

(क) गमहनजनखनघसां लोपः क्ङित्यनङि ।

(ख) शासिवसिघसीनां च ।

(ग) लुङ्सनोर्घस्लृ ।

(घ) अदिप्रभृतिभ्यः शपः ।

(ङ) इडत्त्यर्तिव्ययतीनाम् ।

### २. परस्परं मेलयत

| | |
|---|---|
| जक्षतुः | अङादेशः |
| आदम् | इण्निषेधः |
| आत्स्यत् | उपधालोपः |
| अदाव | अडागमः |
| अघसत् | आडागमः |

### ३. अधोऽङ्कितानां प्रश्नानामुत्तराणि लिखत

(क) अद्-धातोः कोऽर्थः ?

(ख) अद्-धातुः कस्मिन् पदे प्रयुज्यते ? सकारणं लिखत ।

(ग) अद्-धातोः स्थाने घस्लादेशः कस्मिन् कस्मिन् लकारे भवति ?

(घ) 'अद्धि' इत्यत्र हेर्धिविधायकं सूत्रं किम् ?

(ङ) 'अदः सर्वेषाम्' इति सूत्रेण कुत्र कुत्र अडागमो विधीयते ?

(च) 'घस्लृ' इत्यादेशे लृदित्करणस्य फलं किम् ?

(छ) 'अद्याताम्' इत्यत्र सलोपविधायकं सूत्रं किम् ?

(ज) अद्-धातोः कर्तरि लुटि थसि किं रूपम् ?

(झ) 'अदानि' इत्यत्र को लकारः का च विभक्तिः ?

(ञ) 'अद्+लुङ्(झि)' इत्यत्र किं रूपं निष्पद्यते ?

(ट) अदादिगणस्य विकरणविशेषः कः ?

(ठ) 'जघास' इति पदं प्रयुज्य वाक्यमेकं रचयत ।

(ङ) 'लिट्यन्यतरस्याम्' इति सूत्रं किं करोति ?

(ढ) 'शासिवसिघसीनां च' इति सूत्रे के धातवो निर्दिष्टाः सन्ति ?

(ण) अद्-धातोः कर्तरि विधिलिङि मध्यमपुरुषे कानि रूपाणि ?

**४. अधस्तनानां सूत्राणामर्थं सोदाहरणं लिखत**

(क) इडत्त्यर्तिव्ययतीनाम् ।

(ख) शासिवसिघसीनां च ।

(ग) हुझल्भ्यो हेर्धिः ।

(घ) अदः सर्वेषाम् ।

(ङ) अदिप्रभृतिभ्यः शपः ।

**५. अद भक्षणे धातोः कर्तरि लङि रूपाणि लिखत ।**

**६. प्रमुखसूत्रनिदर्शनपूर्वकं रूपसिद्धिप्रकारं प्रदर्शयत**

(क) जघसिथ (ख) आदत्

(ग) अद्यासुः (घ) अघसत्

(ङ) अत्ता

**७. अद्-धातोः कर्तरि अनद्यतनभविष्यत्कालस्य रूपाणि लिखत ।**

**८. पदानां वाक्ये प्रयोगं निदर्शयत**

(क) अदन्ति (ख) अघसताम्

(ग) अद्धि (घ) अद्यात्

(ङ) अदाम

त्रयोदशः पाठः

# हन्-आदिधातवः

**हन हिंसागत्योः ॥२॥** (हन्- अनिट्, सकर्मकः, परस्मैपदी)

**हन्ति ।**

हन (हन्) इति धातुर्हिंसार्थे गत्यर्थे च वर्तते । लटि, तिपि, शपो लुकि 'हन् ति' इत्यवस्थायां नस्यानुस्वारे परसवर्णे च '**हन्ति**' इति रूपं भवति । तसि अनुनासिकस्य नस्य लोपार्थं विशेषमाह-

### अनुनासिकलोपविधायकं विधिसूत्रम्

**अनुदात्तोपदेशवनतितनोत्यादीनामनुनासिकलोपो झलि क्ङिति ।६।४।३७।**

**अनुनासिकान्तानामेषां वनतेश्च लोपः स्याज्झलादौ क्ङिति परे । यमि-रमि-नमि-गमि-हनि-मन्यतयोऽनुदात्तोपदेशाः । तनु-षणु-क्षणु-क्षिणु-ऋणु-तृणु-घृणु-वनु-मनु-तनोत्यादयः । हतः । घ्नन्ति । जघान । जघ्नतुः । जघ्नुः ।**

(अनुनासिक, अनुदात्तोपदेश-वनति-तनोति-आदीनाम्, अन्त्यस्य, लोपः, झलि, क्ङिति । 'अनुनासिक' इति लुप्तषष्ठीकं वनतीतरेषां विशेषणम् ।)

**सरलार्थः** - ये धातवोऽनुनासिकान्ता अनुदात्तोपदेशाश्च सन्ति तेषाम् अङ्गस्य, वन् इति धातोरङ्गस्य, तनोत्यादिधातूनामङ्गस्य च अनुनासिकस्य लोपो भवति, झलादौ किति ङिति च प्रत्यये परे । अत्र येषां धातूनामन्तिमवर्ण अनुनासिकोऽस्ति तथा च औपदेशिकावस्थायामुदात्तस्वरो विद्यते, ते एव अनुनासिकान्ता अनुदात्तोपदेशाश्च धातवः सन्ति । धातुपाठे एतादृशाः षड्धातवः पठ्यन्ते- यम (यम्) उपरमे, रमु (रम्) क्रीडायाम्, णम (नम्) प्रह्वत्वे शब्दे च, गम्लृ (गम्) गतौ, हन (हन्) हिंसागत्योः, मन (मन्) ज्ञाने इति । वनतेरित्यनेन वन (वन्) सम्भक्तौ इति भ्वादिगणस्य धातोर्ग्रहणं भवति । अनुनासिकास्तनोत्यादय इत्यनेन तनादिगणपठिता अनुनासिकान्ता धातवः ग्राह्याः । ते च तन्, क्षण्, क्षिण्, ऋण्, तृण्, घृण्, वन्, मन् सन्ति । अत्र निर्दिष्टो वन्-धातुस्तनादिगणस्य अस्तीति स्मर्तव्यम् । तनादिगणस्थस्य अनुनासिकान्तस्य षणु (सन्) दाने धातोस्तु अनुनासिकलोपं बाधित्वा 'जनसनखनां सञ्झलोः' इत्यनेन आकारान्तादेशो विधीयते ।

हन् लट् (ल्) - हन् तस् - हन् शप् (अ) तस् - हन् तस् - हतस् (अनुदात्तोपदेश...) - हतर् **- हतः** । झौ उपधालोपः, कुत्वं च विशेषकार्ये- हन् झि - हन् अन्ति - हन् शप् (अ) अन्ति - हन् अन्ति - ह्न् अन्ति (गमहनजन...)- घ्न् अन्ति (हो हन्तेर्ञ्णिन्नेषु) - **घ्नन्ति** । सिपि नस्यानुस्वारः- **हंसि** । थसि, थे च अनुनासिकलोपः- **हथः**, **हथ** । मिबादौ शपो लुगेव विशेषः- **हन्मि**, **हन्वः**, **हन्मः** ।

लिटि- हन् लिट् (ल्) - हन् तिप् (ति) - हन् णल् (अ) - हन् हन् अ - ह हन् अ - झ हन् अ (कुहोश्चुः) - ज हन् अ (अभ्यासे चर्च) - ज हान् अ (अत उपधायाः) - ज घान् अ (हो हन्तेर्ञ्णिन्नेषु) - **जघान** ।

हन् लिट् (ल्) - हन् तस् - हन् अतुस् - हन् हन् अतुस् - ह हन् अतुस् - झ हन् अतुस् (कुहोश्चुः) - ज हन् अतुस् (अभ्यासे चर्च) - ज ह्न् अतुस् (गमहनजन...) - ज घ्न् अतुस् (हो हन्तेर्ञ्णिन्नेषु) - जघ्नतुस् - जघ्नतुर् - **जघ्नतुः** । एवं **जघ्नुः** ।

### कुत्वादेशविधायकं विधिसूत्रम्

**अभ्यासाच्च ७।३।५५॥**

**अभ्यासात्परस्य हन्तेर्हस्य कुत्वं स्यात् । जघनिथ । जघन्थ । जघ्नथुः जघ्न । जघान जघन । जघ्निव । जघ्निम । हन्ता । हनिष्यति । हन्तु । हतात् । हताम् । घ्नन्तु ।**

(अभ्यासात्, च, हः, हन्तेः, कु)

**सरलार्थः** - अभ्यासाद् उत्तरस्य हन्-धातोर्हकारस्य स्थाने कवर्गादेशो भवति ।

थलि 'ऋतो भारद्वाजस्य' इति इड्विकल्पः, इट्पक्षे इडभावे च अनेन सूत्रेण कुत्वम् ।

हन् लिट् (ल्) - हन् थल् (थ) - हन् इथ (ऋतो भारद्वाजस्य) - हन् हन् इथ - ह हन् इथ - झ हन् इथ (कुहोश्चुः) - ज हन् इथ - ज घन् इथ (अभ्यासाच्च) - **जघनिथ** । इडभावपक्षे- **जघन्थ** ।

हन् लिट् (ल्) - हन् थल् (थ) - हन् इथ (ऋतो भारद्वाजस्य) - हन् हन् इथ - ह हन् इथ - झ हन् इथ (कुहोश्चुः) - ज हन् इथ - ज घन् इथ (अभ्यासाच्च) - **जघनिथ** । जघ्नथुः, जघ्न इत्यत्र प्रथमपुरुषवद् उपधालोप-कुत्वादिप्रक्रिया ज्ञेया । मिपि णलो णित्वविकल्पनाद् णित्वाभावपक्षे उपधावृद्धेरप्यप्रवृत्तौ जघान/जघन इति रूपद्वयम् । **जघ्निव**, **जघ्निम** इत्यत्र क्रादिनियमाद् नित्यमिट्, पूर्ववद् उपधालोपः कुत्वञ्चेति विधयः स्मर्तव्याः ।

लुटि 'एकाच उप...' इति इण्निषेधः । हन् लुट् (ल्) - हन् तिप् (ति) - हन् डा (आ) - हन्

तास् आ - हन् त् आ - हन् ता - **हन्ता** ।

लृटि 'ऋद्धनोः स्ये' इति इट् । हन् लृट् (ल्) - हन् तिप् (ति) - हन् स्य ति - हन् इस्य ति (ऋद्धनोः स्ये) - हन् इष्य ति - हनिष्यति ।

लोटि विध्यादिष्वर्थेषु तिपि पूर्ववत्- हन्तु । आशिषि 'तु' इत्यस्य विकल्पेन तातङादेशे 'हन् तात्' इत्यवस्थायां ङित्वाद् 'अनुदात्तोपदेश...' इति नलोपे 'हतात्' इति । एवम् 'हताम्' इत्यत्रापि । सिपि तु विशेषमाह-

## जकारादेशविधायकं विधिसूत्रम्

**हन्तेर्जः ६।४।३६॥**

**हन्तेर्जः स्यात् हौ परे ।**

(हन्तेः, हौ, जः)

**सरलार्थः** - हि-शब्दे परे सति हन्-धातोः स्थाने 'ज' इत्यादेशो भवति ।

हन्-धातोर्लोटि, सिपि, शपो लुकि, सेर्ह्यादेशे, अनेन सूत्रेण 'हन्' इत्यस्य स्थाने जादेशे कृते 'ज हि' इत्यवस्थायाम् 'अतो हेः' इत्यनेन हेर्लुकि प्राप्ते-

## असिद्धत्वप्रतिपादकमधिकारसूत्रम्

**असिद्धवदत्राऽऽभात् ६।४।२२॥**

**इत ऊर्ध्वमापादपरिसमाप्तेराभीयम्, समानाश्रये तस्मिन्कर्तव्ये तदसिद्धं स्यात् । इति जस्याऽसिद्धत्वान्न हेर्लुक् । जहि हतात् । हतम् । हत । हनानि । हनाव । हनाम । अहन् । अहताम् । अघ्नन् । अहन् । अहतम् । अहत । अहनम् । अहन्व । अहन्म । हन्यात् । हन्याताम् । हन्युः ।**

(असिद्धवत्, अत्र, आ-भात्)

**सरलार्थः** - आभीयम् इति पदेन अस्मिन् अधिकारे उक्तं कार्यं बोध्येत । अस्मात् सूत्रादारभ्य षष्ठाध्यायस्य चतुर्थपादस्य परिसमाप्तिपर्यन्तमसिद्धत्वं भवति, समानाश्रये एवेति सूत्रार्थः । यत्र द्वयोः सूत्रयोः आश्रयः समानो भवति ते समानाश्रये सूत्रे । स्थानी निमित्तञ्च आश्रयपदेन व्यवह्रियेते । यदि द्वयोराभीयकार्ययोः समानाश्रयोऽस्ति ते परस्परम् असिद्धे भवत इति सूत्रस्यास्य फलितार्थः ।

अनेन सूत्रेण जादेशस्यासिद्धत्वान्न हेर्लुक्, जहि/हतात् इति । थसादौ हतम्, हत, हनानि, हनाव, हनाम इति रूपाणि ।

लङि- अटि, तिपि, शपि, शपो लुकि 'अहन् ति' इत्यवस्थायाम् इकारलोपे, तकारस्य संयोगान्तलोपे '**अहन्**' इति । एवं सिपि 'अहन् स्' इत्यवस्थायां हल्ङ्यादिलोपे '**अहन्**' इत्येव । अहताम्, अहतम्, अहत इत्यत्र 'अनुदात्तोपदेश...' इति अनुनासिकलोपः ।'अघ्नन्' इत्यत्र गमहनेति उपधालोपानान्तरं पूर्ववद् हस्य कुत्वम् ।

विधिलिङि 'लिङः सलोपोऽनन्त्यस्य' इत्यनेन सर्वत्रैव यासुटः सलोपः, हन्यात्, हन्याताम् इत्यादि । झौ तु 'उस्यपदान्तात्' इति पररूपे 'हन्युः' इति सिद्ध्यति ।

### अधिकारसूत्रम्

**आर्द्धधातुके ६।४।४६॥**

**इत्यधिकृत्य**

### वधादेशविधायकं विधिसूत्रम्

**हनो वध लिङि ६।४।४२॥**

(हनः, आर्धधातुके, लिङि, वध । 'वध' इति लुप्तप्रथमाकं पदम् ।)

**सूत्रार्थः** - आर्धधातुकसंज्ञके लिङ्लकारे परे सति हन्-धातोः स्थाने 'वध' इत्यादेशो भवति ।

### वधादेशविधायकं विधिसूत्रम्

**लुङि च ६।४।४३॥**

**वधादेशोऽदन्तः । 'आर्द्धधातुके' इति विषयसप्तमी । तेनाऽऽर्धधातुकोपदेशेऽकारान्तत्वाददतो लोपः । वध्यात् । वध्यास्ताम् । आदेशस्यानेकाच्त्वादेकाच इतीण्निषेधाभावादिट् । 'अतो हलादेः०' इति वृद्धौ प्राप्तायाम्-**

(हनः, आर्धधातुके, लुङि, च, वध ।'वध' इति लुप्तप्रथमाकं पदम् ।)

**सरलार्थः** - आर्धधातुकसंज्ञके लुङ्लकारे परतः सत्यपि हन्-धातोः स्थाने 'वध' इत्यादेशो भवति । अत्र विहितो वधादेशोऽदन्तो वर्तते, तस्य च 'अतो लोपः' इत्यनेन लोपो भवति ।

आशीर्लिङि सर्वत्रैव हन्-धातोः स्थाने वधादेशे, यासुडादिकार्ये, वधस्यान्त्याकारस्य लोपे **वध्यात्, वध्यास्ताम्, वध्यासुः** इत्यादीनि रूपाणि जायन्ते ।

लुङि अटि तिपि सिजादिकार्ये, वधादेशस्यानेकाच्त्वाद् एकाच इति निषेधाभावाद् इटि, वधस्यान्त्याकारलोपे, 'अवध् इ स् ई त्' इत्यवस्थायाम् 'अतो हलादेर्लघोः' इत्यनेन उपधाया अकारस्य विकल्पेन वृद्धौ प्राप्तायाम्-

## स्थानिवद्भावविधायकमतिदेशसूत्रम्

**अचः परस्मिन् पूर्वविधौ १।१।१७।।**

**परनिमित्तोऽजादेशः स्थानिवत्, स्थानिभूतादचः पूर्वत्वेन दृष्टस्य विधौ कर्तव्ये । इत्यल्लोपस्य स्थानिवत्त्वान्न वृद्धिः । अवधीत् । अहनिष्यत् ।।**

(अचः, आदेशः, परस्मिन्, पूर्वविधौ, स्थानिवत्) स्थानम् अस्य अस्ति इति स्थानी, स्थानिना तुल्यं स्थानिवत्, स्थानिधर्मक इत्यर्थः ।

**सरलार्थः** - परनिमित्तम् आश्रित्य अच्वर्णस्य स्थाने विहित आदेशः स्थानिवृत्तिधर्मवान् भवति स्थानिभूतेन अचा पूर्वस्मिन् दृष्टस्य स्थाने विधौ कर्तव्ये । 'स्थानिवदादेशोऽनल्विधौ' इति पूर्वसूत्रेण अलाश्रितानि (एकवर्णमाश्रित्य जायमानानि) कार्याणि विहाय अन्येषु स्थान्याश्रयेषु कार्येषु आदेशस्य थानिवद्भावे सिद्धे अनेन सूत्रेण अलाश्रितेष्वपि कार्येषु स्थानिवद्भावो विधीयते ।

अनेन सूत्रेण अल्लोपस्य स्थानिवत्वान्न वृद्धौ, सिज्लोपे, दीर्घे च कृते 'अवधीत्' इति सिद्ध्यति । तसादौ पूर्ववत्प्रक्रियया अवधिष्टाम्, अवधिषुः इत्यादि । लृङि- अहनिष्यत् इत्यादि ।

**यु मिश्रणामिश्रणयोः ।।३।।** (यु- सेट्, सकर्मकः, परस्मैपदी)

यु-धातुः मिश्रणेऽर्थे अमिश्रणेऽर्थे च वर्तते । लटि, तिपि, शपि, शपो लुकि 'यु ति' इत्यवस्थायाम्-

## वृद्ध्यादेशविधायकं विधिसूत्रम्

**उतो वृद्धिर्लुकि हलि ७।३।८९।।**

**लुग्विषये उतो वृद्धिः पिति हलादौ सार्वधातुके न त्वभ्यस्तस्य । यौतिः । युतः । युवन्ति । यौषि । युथः । युथ । यौमि । युवः । युमः । युयाव । यविता । यविष्यति । यौतु, युतात् । अयौत् । अयुताम् । अयुवन् । युयात् । इह उतो वृद्धिर्न, भाष्ये- 'पिच्च ङिन्न ङिच्च पिन्न' इति व्याख्यानात् । युयाताम् । युयुः । यूयात् । यूयास्ताम् । यूयासुः । अयावीत् । अयविष्यत् ।।**

(उतः, सार्वधातुके, पिति, लुकि, हलि, वृद्धिः, न, अभ्यस्तस्य)

**सरलार्थः** - लुक्सम्बन्धिनि विषये हलादौ पिति सार्वधातुकसंज्ञके प्रत्यये परे सति अभ्यस्तसंज्ञकभिन्नस्य धातोरन्त्यस्य उकारस्य स्थाने वृद्धिर्भवति ।

अनेन सूत्रेण उकारस्य वृद्धौ औकारे- यौति । एवं यौषि, यौमि इत्यत्रापि पित्वादनेन वृद्धिर्भवति । तसादौ तु अपित्वादनेन वृद्धेरभावे 'सार्वधातुकार्धधातुकयोः' इत्यनेन प्राप्तं गुणमपित्सार्वधातुकतया ङित्वेन निषेधे- युतः । झौ अन्तादेशे 'अचि श्नुधातु...' इति उवङादेशे- युवन्ति ।

लिटि- यु लिट् (ल्) - यु तिप् (ति) - यु णल् (अ) - यु यु अ - यु यौ अ (अचो ञ्णिति) - यु य् आव् अ - युयाव । युयुवतुः, युयुवुः इत्यादौ उवङादेशो विशेषः । थलि युधातोरुदात्ततया सेट्त्वाद् इटि, द्वित्वे, गुणे, अवादेशे च- युयविथ । उत्तमपुरुषे णलि णित्वविकल्पनाद् णित्वपक्षे वृद्धौ- युयाव, णित्वाभावे च गुणे- युयव इति रूपद्वयम् ।

लुटि, लृटि च इडागमे, गुणे, अवादेशे च- यविता, यविष्यति इत्यादीनि रूपाणि जायन्ते ।

लोटि तिपि तातङादेशपक्षे ङित्वाद् अनेन सूत्रेण प्राप्ता वृद्धिर्निषिध्यते, तातङाभावे तु वृद्धिर्भवत्येव- यौतु/युतात् । तस्-थस्-थेष' अपित्सार्वधातुकत्वेन ङित्वाद् वृद्धिनिषेधः- युताम् इत्यादि । झौ गुणनिषेधे उवङि- युवन्तु । सिपि 'हि' इत्यादेशे अपित्वविधानात् युवन्ति वृद्धिनिषेधे- युहि/युतात् । युतम् । युत । उत्तमपुरुषे 'आडुत्तमस्य पिच्च' इति आडागमस्य पित्वात् सर्वत्रैव गुणे- यवानि, यवाव, यवाम । अत्र हलादित्वाभावाद् वृद्धेः प्रवृत्तिर्नास्तीति स्मर्तव्यम् ।

लङि तिपि वृद्धौ- अयौत्, तसि वृद्धिनिषेधे- अयुताम्, झौ गुणनिषेधाद् उवङि- अयुवन् इत्यादि ।

विधिलिङि तिपि, शपि, शपो लुकि, यासुडागमे, इलोपे, 'लिङः सलोपोऽनन्त्यस्य' इति सलोपे 'यु या त्' इत्यवस्थायां यासुडागमे ङित्वविधानेऽपि तिप आगमत्वेन तत्र पित्वे सिद्धे अनेन सूत्रेण वृद्धौ प्राप्तायाम् 'पित्वं ङित्वं च एकत्र न सम्भवतः' इत्यर्थकेन 'पिच्च ङिन्न ङिच्च पिन्न' इति भाष्यवचनेन यासुटि पित्वं बाधित्वा ङित्वे विहिते वृद्धिनिषेधे- **युयात्** । तसि- **युयाताम्** । झौ जुसि कृते 'उस्यपदान्तात्' इति पररूपे-**युयुः** इत्यादि ।

आशीर्लिङि 'अकृत्सार्वधातुकयोः' इति दीर्घे- **यूयात्, यूयास्ताम्, यूयासुः** इत्यादि ।

लुङि अटि, तिपि, च्लौ, सिचि, इटि, ईटि 'अयु इस् ईति' इत्यवस्थायाम् 'सिचि वृद्धिः परस्मैपदेषु' इति वृद्धौ, अवादेशे, इलोपे, सिज्लुकि, दीर्घे- **अयावीत्** । तसादौ अयाविष्टाम्, अयाविषुः इत्यादि ।

लृङि सर्वत्रैव अटि, स्ये, इटि, गुणे, अवादेशे च- **अयविष्यत्, अयविष्यताम्, अयविष्यन्** इत्यादि ।

**या प्रापणे ॥४॥** (या-धातुरनिट्, सकर्मकः, परस्मैपदी)

**याति । यातः । यान्ति । ययौ । याता । यास्यति । यातु । अयात् । अयाताम् ॥**

प्रापणार्थकाद्या-धातोर्लटि तिपि, शपि, शब्लुकि- **याति** इत्यादि ।

लिटि- या लिट् (ल्) - या तिप् (ति) - या णल् (अ) - या औ (आत औ णलः) - या या औ - य या औ - **ययौ** (वृद्धिरेचि) । एवं तसादौ अपि सर्वत्रैव पा-धातुवत्प्रक्रियया **ययतुः, ययुः, ययिथ/ययाथ, ययथुः, यय, ययौ, ययिव, ययिम** इति रूपाणि जायन्ते । लुटि, लृटि च पा-धातुवत्प्रक्रिया ज्ञेया । लोटि- **यातु/यातात्** इत्यादि । लङि तिपि, तसि च अटि, शब्लुकि च पूर्ववद् **अयात्, अयाताम्** इति । झौ तु विशेषमाह-

## जुसादेशविधायकं विधिसूत्रम्

**लङः शाकटायनस्यैव ३।४।१११॥**

**आदन्ताल्लङो झेर्जुस्वा । अयुः अयान् । यायात् । यायाताम् । यायुः । यायात् । यायास्ताम् । यायासुः । अयासीत् । अयासिष्टाम् । अयास्यत् ॥**

(आतः, लङः, झेः, जुस्, शाकटायनस्य, एव)

**सरलार्थः** - आकारान्ताद् धातोरुत्तरस्य लङादेशस्य झेः स्थाने विकल्पेन 'जुस्' इत्यादेशो भवति ।

या लङ्, अया ल्, अया अ झि, अया झि इत्यवस्थायां प्राप्तं झोऽन्तादेशं बाधित्वा अनेन सूत्रेण विकल्पेन झेर्जुसि 'अया उस्' इत्यवस्थायाम् 'उस्यपदान्तात्' इति पररूपे- अयुः, पक्षान्तरे झोऽन्तादेशे, इकारतकारयोर्लोपे, सवर्णदीर्घे- अयान् इति रूपद्वयम् ।

विधिलिङि सार्वधातुकलकारत्वेन सर्वत्रैव यासुटः सलोपे- यायात्, यायाताम्, यायुः इत्यादि । आशीर्लिङि तु आर्धधातुकत्वात् तिप्सिपोरेव सलोपे- यायात्, यायास्ताम्, यायासुः इत्यादि ।

लुङि- अटि, तिपि, च्लौ, सिचि, इण्निषेधे 'अयास् ति' इत्यवस्थायाम् 'यमरमनमातां सक् च' इति धातोः सगागमे, सिच इडागमे च कृते 'अयास् इस् ति' इति जाते इतश्चेति इलोपानन्तरम् ईडागमे, सिचो लुकि, दीर्घे- अयासीत् । तसादौ **अयासिष्टाम्, अयासिषुः** इत्यादि ।

लृङि पूर्ववत्- **अयास्यत्, अयास्यताम्, अयास्यन्** इत्यादि ।

**वा गतिगन्धनयोः ॥५॥** (वा- अनिट्, सकर्मकः, परस्मैपदी)

**वा**-धातुः गत्यर्थकः, गन्धनार्थकश्च वर्तते । गतिश्चात्र वायोर्बोध्या, गन्धनञ्च सूचनम् । अस्य च सर्वत्रैव या-धातुवत्प्रक्रियया **वाति, ववौ, वाता, वात्स्यति, वातु/वातात् । अवात् । वायात् । वायात्, अवासीत्, अवास्यत्** इत्यादीनि रूपाणि जायन्ते । एवमेव प्रक्रिया आगामिषु भा-ष्णादिषु नवधातुष्वपि बोध्या । संयोगादिधातूनां आशीर्लिङि 'वान्यस्य संयोगादेः' इति वैकल्पिकमेत्वं विशेषः ।

**भा दीप्तौ ॥६॥** (भा- अनिट्, अकर्मकः, परस्मैपदी)

**भा**-धातुः दीप्त्यर्थे वर्तते । या-धातुवत्- भाति, बभौ, भाता, भास्यति, भातु/भातात् । अभात् । भायात् । भायात् । अभासीत् । अभास्यत् इत्यादि ।

**ष्णा शौचे ॥७॥** (स्ना- अनिट्, अकर्मकः, परस्मैपदी)

**ष्णा** (स्ना) इति धातुः शौचेऽर्थे वर्तते । या-धातुवत्- स्नाति, सस्नौ, स्नाता, स्नास्यति, स्नातु । स्नातात् । अस्नात् । स्नायात् । स्नेयात्/स्नायात् । अस्नासीत् । अस्नास्यत् इत्यादि । अत्र आशीर्लिङि 'वान्यस्य संयोगादेः' इति विकल्पेन एत्वम् ।

**श्रा पाके ॥८॥** (श्रा- अनिट्, सकर्मकः, परस्मैपदी)

**श्रा**-धातुः पाकेऽर्थे वर्तते । या-धातुवत्- श्राति । शश्रौ । श्राता । श्रास्यति । श्रातु/श्रातात् । अश्रात् । श्रायात्, श्रेयात्/श्रायात् (वान्यस्य संयोगादेः), अश्रासीत् । अश्रास्यत् इत्यादि ।

**द्रा कुत्सायां गतौ ॥९॥** (द्रा- अनिट्, अकर्मकः, परस्मैपदी)

**द्रा**-धातुः पलायनेऽर्थे (कुत्सायां गतौ इत्यर्थे) वर्तते । या-धातुवत्- द्राति, दद्रौ, द्राता, द्रास्यति, द्रातु/द्रातात्, अद्रात्, द्रायात्, द्रेयात्/द्रायात्, अद्रासीत्, अद्रास्यत् इत्यादि । नि-पूर्वको द्रा-धातुः स्वप्नेऽर्थे (निद्रायाम्) प्रयुज्यते- निद्राति ।

**प्सा भक्षणे ॥१०॥** (प्सा- अनिट्, सकर्मकः, परस्मैपदी)

**प्सा**-धातुः भक्षणेऽर्थे वर्तते । या-धातुवत्- प्साति, पप्सौ, प्साता, प्सास्यति, प्सातु/प्सातात्, अप्सात्, प्सायात्, प्सेयात्/प्सायात्, अप्सासीत्, अप्स्यास्यत् इत्यादि ।

**रा दाने ॥११॥** (रा- अनिट्, सकर्मकः, परस्मैपदी)

**रा**-धातुः दानार्थको वर्तते । ग्रहणेऽप्यर्थे अस्य प्रयोगो दृश्यते । या-धातुवत्- राति, ररौ, राता, रास्यति, रातु/रातात्, अरात्, रायात्, रायात्, अरासीत्, अरास्यत् इत्यादि ।

**ला आदाने ॥१२॥** (ला- अनिट्, सकर्मकः, परस्मैपदी)

**ला**-धातु आदाने (ग्रहणे) अर्थे वर्तते । या-धातुवत्- लाति, ललौ, लाता, लास्यति, लातु/लातात्, अलात्, लायात्, लायात्, अलासीत्, अलास्यत् इत्यादि ।

**दाप् लवने ॥१३॥** (दा- अनिट्, सकर्मकः, परस्मैपदी)

**दाप्** (दा) इति धातुः लवने (छेदने) अर्थे वर्तते । या-धातुवत्- दाति, ददौ, दाता, दास्यति, दातु/दातात्, अदात्, दायात्, दायात्, अदासीत्, अदास्यत् इत्यादि ।

**पा रक्षणे ॥१४॥** (पा- अनिट्, सकर्मकः, परस्मैपदी)

**पा**-धातुः रक्षणेऽर्थे वर्तते । या-धातुवत्- पाति, पपौ, पाता, पास्यति, पातु/पातात्, अपात्, पायात्, पायात्, अपासीत्, अपास्यत् इत्यादि ।

**ख्या प्रकथने ॥१५॥** (ख्या- अनिट्, सकर्मकः, परस्मैपदी)

अयं सार्वधातुक एव प्रयोक्तव्यः ॥

**ख्या**-धातुः प्रकथनेऽर्थे वर्तते । प्रकथनञ्च कथनम्, प्रसिद्धिश्च । धातोरस्य प्रयोगः सार्वधातुकलकारेषु एव भवतीति विशेषः । आर्धधातुकलकारेषु अस्य प्रयोगो नास्तीति लट्, लोट्, लङ्, विधिलिङ् इति चतुर्षु लकारेषु एव अस्य रूपाणि निष्पाद्यन्ते । या-धातुवत्, लटि- ख्याति, लोटि- ख्यातु/ख्यातात्, लङि- अख्यात्, विधिलिङि- ख्यायात् इत्यादि ।

**विद ज्ञाने ॥१६॥** (विद्-सेट्, सकर्मकः, परस्मैपदी)

ज्ञानार्थकाद् विद (विद्) इति धातोर्लटि, तिपि, शपो लुकि 'विद् ति' इत्यवस्थायाम्-

### णलाद्यादेशविधायकं विधिसूत्रम्

**विदो लटो वा ३।४।८३॥**

**वेत्तेर्लटः परस्मैपदानां णलादयो वा स्युः । वेद । विदतुः । विदुः । वेत्थ । विदथुः । विद । वेद । विद्व । विद्म । पक्षे- वेत्ति । वित्तः । विदन्ति ।**

(विदः, लटः, परस्मैपदानाम्, णल्-अतुस्-उस्-थल्-अथुस्-अ-णल्-व-माः, वा)

**सरलार्थः** - विद्-धातोर्लट्-लकारस्य विषये परस्मैपदसंज्ञकप्रत्ययानां स्थाने विकल्पेन णल्, अतुस्, उस्, थल्, अथुस्, अ, णल्, व, म इत्येते आदेशाः क्रमाद् भवन्ति ।

अनेन सूत्रेण तिपो विकल्पेन णलि, लघूपधगुणे-**वेद** । लटि णलादिविधानात् सार्वधातुकत्वाच्च इडागम-द्वित्वादिविधयस्तु अत्र नैव प्रवर्तन्ते । तसाद्यपित्सु ङित्वाद् गुणाभावे- विदतुः,

विदुः । वेत्थ, विदथुः, विद । वेद, विद्व, विद्म । णलाद्यादेशाभावपक्षे- वेत्ति, वित्तः, विदन्ति इत्यादीनि रूपाणि जायन्ते ।

वेद/वेत्ति- विद् लट् (ल्) - विद् तिप् (ति) - विद् अ ति - विद् ति - विद् णल् (अ) (विदो लटो वा) - वेद् अ (पुगन्तलघूपधस्य च) - वेद । णलादेशाभावपक्षे- विद् ति - वेद् ति (पुगन्तलघूपधस्य च) - वेत् ति (खरि च) - वेत्ति ।

## आम्विधायकं विधिसूत्रम्

**उषविदजागृभ्योऽन्यतरस्याम् ३।१।३८॥**

**एभ्यो लिटि आम्वा स्यात् । विदेरदन्तत्वप्रतिज्ञानादामि न गुणः । विदाञ्चकार । विवेद । वेदिता । वेदिष्यति ।**

(उष-विद-जागृभ्यः, लिटि, आम्, अन्यतरस्याम्)

**सरलार्थः** - लिटि परे सति उष (उष्) दाहे, विद ज्ञाने, जागृ निद्राक्षये, इत्येतेभ्यो धातुभ्यो विकल्पेन आम्-प्रत्ययो भवति । विद इति अकारान्तस्वीकरणाद् आमि लघूपधगुणो न भवति, 'अतो लोपः' इत्यनेन कृतस्य अल्लोपस्य स्थानिवत्वादिति स्मर्तव्यम् ।

लिटि अनेन सूत्रेण आम्, गुणाभावः, लिटो लुक्, लिट्परकस्य कृधातोरनुप्रयोग इत्यादिपूर्ववत्प्रक्रिया ज्ञेया । विद् लिट् (ल्) - विद् आम् ल् (उषविद...) - विदाम् (आमः) - विदाम् कृ ल् (कृञ्चानुप्रयुज्यते लिटि) - विदाम् कृ तिप् (ति) - विदाम् कृ णल् (अ) - विदाम् कृ कृ अ - विदाम् कर् कृ अ - विदाम् क कृ अ - विदाम् च कृ अ - विदाम् च क् आर् अ (अचो ञ्णिति) विदाम् चकार - विदां चकार - **विदाञ्चकार/विदांचकार** । भूधातोरनुप्रयोगे- विदाम्बभूव/विदांबभूव । अस्-धातोरनुप्रयोगे- विदामास । तसादौ विदाञ्चक्रतुः इत्यादि । आमभावपक्षे- विद् अ - विद् विद् अ - वि विद् अ - वि वेद् अ (पुगन्तलघूपधस्य च) - विवेद । विदाञ्चकार, पक्षे- विवेद । विविदतुः । विविदुः । थल्, व, म इत्येतेषु सेट्त्वात् नित्यमिटि विवेदिथ, विविदिव, विविदिम इति रूपाणि जायन्ते । लुटि, लृटि च सर्वत्रैव नित्यमिटि- वेदिता, वेदिष्यति इत्यादि । लोटि तु विशेषमाह-

**विदाङ्कुर्वन्त्वित्यन्यतरस्याम् ।३।१।४१।**

**वेत्तेर्लोटि आम्, गुणाभावो, लोटो लुक्, लोडन्तकरोत्यनुप्रयोगश्च वा निपात्यते । पुरुषवचने न विवक्षिते ।**

(विदाङ्कुर्वन्तु, इति, अन्यतरस्याम्)

**सरलार्थः** - 'विदाङ्कुर्वन्तु इति प्रयोगो विकल्पेन निपात्यते। विद्-धातोर्लोटि आम्-प्रत्ययः, गुणाभावः, लोटो लुक्, लोट्परस्य कृ-धातोरनुप्रयोगश्च विकल्पेन निपात्यन्ते इति फलितार्थः। सूत्रेऽस्मिन् 'विदाङ्कुर्वन्तु इति प्रथमाबहुवचनान्तनिपातनेऽपि 'इति' शब्दस्य पाठात् न केवलं प्रथमपुरुषबहुवचनं सर्वाण्येव लोट्-वचनानि अनुप्रयुज्यन्ते।

लोटि 'विद् ल्' इत्यवस्थायाम् अनेन सूत्रेण निपातनाद् आम्-प्रत्यये, गुणनिषेधे, लोटो लुकि, लोट्परकस्य कृ-धातोरनुप्रयोगे च 'विदाम् कृ ल्' इति जाते, लस्य स्थाने तिपि 'विदाम् कृ ति' इत्यवस्थायां तिपः सार्वधातुकसंज्ञायां शपि प्राप्ते-

## उ इति विकरणप्रत्ययविधायकं विधिसूत्रम्

**तनादिकृञ्भ्य उः ३।१।७९॥**

**तनादेः, कृञश्च उप्रत्ययः स्यात्। शपोऽपवादः। विदाङ्करोतु।**

(तनादि-कृञ्भ्यः, धातोः, कर्तरि, सार्वधातुके, उः)

**सरलार्थः** - कर्त्रऽर्थे विहिते सार्वधातुकसंज्ञके प्रत्यये परे सति तनादिगणपठितेभ्यो धातुभ्यः, डुकृञ् (कृ) करणे इति धातोश्च 'उ' इति प्रत्ययो भवति। सार्वधातुकलकारेषु शपं बाधित्वा अनेन सूत्रेण उ-प्रत्ययो विधीयते।

शपं बाधित्वा अनेन सूत्रेण उ-प्रत्यये'विदाम् कृ उ ति' इति जाते उ-प्रत्ययस्य आर्धधातुकसंज्ञायां 'सार्वधातुकार्धधातुकयोः' इति उभयत्र गुणे ऋकारस्य स्थाने रपरत्वेन 'अर्' इत्यादेशे, उकारस्य च ओकारे 'विदाम् कर् ओ ति' इति जाते 'एरुः' इति उत्वे, मस्यानुस्वारे वैकल्पिके परसवर्णे च- विदाङ्करोतु, विदांकरोतु इति। आशिषि तु-

## उदादेशविधायकं विधिसूत्रम्

**अत उत्सार्वधातुके ६।४।११०॥**

**उप्रत्ययान्तस्य कृञोऽत उत्स्यात्सार्वधातुके क्ङिति। विदाङ्कुरुतात्। विदाङ्कुरुताम्। विदाङ्कुर्वन्तु। 'उतश्चे'ति हेर्लुक्। आभीयत्वेन लुकोऽसिद्धत्वादुत्त्वम्। विदाङ्कुरु। विदाङ्करवाणि। वेत्तु। अवेत्। अवित्ताम्। अविदुः।**

(उतः, प्रत्ययस्य, करोतेः, अङ्गस्य, अतः, सार्वधातुके, क्ङिति, उत्)

**सरलार्थः** - यस्य अन्ते उकारान्त-प्रत्ययोऽस्ति, तादृशस्य कृ-धातोरङ्गस्य अकारस्य स्थाने उकारादेशो भवति, किति ङिति च प्रत्यये परे।

आशीर्वादेऽर्थे तुह्योः स्थाने तातङादेशपक्षे 'विदाम् कृ उ तात्' इत्यवस्थायां तातङादेशस्य ङित्वात् तदव्यवहितपूर्वस्य उकारस्य गुणनिषेधे, पूर्वस्य ऋकारस्य तु गुणे, रपरत्वे 'विदाम् करु+तात्' इत्यवस्थायाम् अनेन सूत्रेण अकारस्य उत्वे, मस्यानुस्वारे, वैकल्पिकपरसवर्णे च- **विदाङ्कुरुतात्, विदांकुरुतात्।** उत्तमपुरुषे तु आडागमस्य पित्वाद् ङित्वाभावे अस्य सूत्रस्य अप्रवृत्तौ- विदाङ्करवाणि, विदाङ्करवाव, विदाङ्करवाम इति। आमादीनां निपातनाभावे तु पूर्ववत् प्रक्रियया वेत्तु/वित्तात्, वित्ताम्, विदन्तु। सिपि सेर्हौ, हुझल्भ्यो इति धौ, तस्य स्थानिवत्वेन ङित्वाल्लघूपधगुणनिषेधे- विद्धि/वित्तात्, वित्तम्, वित्त। उत्तमपुरुषे आटः पित्वाल्लघूपधगुणे- वेदानि, वेदाव, वेदाम।

लङि- अविद्+त्, लघूपधगुणे, तकारस्य हल्ङ्यादिलोपे, दकारस्य वैकल्पिके चर्त्वे- अवेत्/अवेद्, अवित्ताम्। झौ 'सिजभ्यस्तविदिभ्यश्च' इति जुसि- अविदुः। सिपि 'अवेद्स्' इत्यवस्थायां सकारस्य हल्ङ्यादिलोपे 'अवेद्' इति जाते-

## रु इत्यादेशविधायकं विधिसूत्रम्

**दश्च ८।२।७५॥**

**धातोर्दस्य पदान्तस्य सिपि रुर्वा। अवेः। अवेत्। विद्यात्। विद्याताम्। विद्युः। विद्यात्। विद्यास्ताम्। विद्यासुः। अवेदीत्। अवेदिष्यत्।**

(दः, धातोः, सिपि, रुः, वा, पदान्ते)

**सरलार्थः** - सिपि परे सति धातोः पदान्त-दकारस्य स्थाने विकल्पेन 'रु' इत्यादेशो भवति।

अनेन सूत्रेण दकारस्य वैकल्पिके रुत्वेऽनुबन्धलोपे, रेफस्य विसर्गे- अवेः, रुत्वाभावे दकारस्य वैकल्पिके चर्त्वे- अवेत्/अवेद् इति त्रीणि रूपाणि जायन्ते। तसादौ क्रमाद् अवित्तम्, अवित्त, अवेदम्, अविद्व, अविद्म इति। विधिलिङि पूर्ववत् सर्वत्रैव यासुटः सलोपे- विद्यात्, विद्याताम्, विद्युः इत्यादि। आशीर्लिङि तु तिप्सिपोरेव सलोपे- विद्यात्, विद्यास्ताम्, विद्यासुः इत्यादि।

लुङि तिपि 'वदव्रजहलन्तस्याचः' इत्यनेन प्राप्तां वृद्धिं 'नेटि' इत्यनेन निषिध्य लघूपधगुणो विधातव्यः। विद् लुङ् (ल्) - अविद् ल् - अविद् ति - अविद् च्लि ति - अविद् सिच् (स्) ति - अविद् स् त् - अविद् इस् त् - अविद् इस् ईत् - अवेद् इस् ईत् - अवेद् इ ईत् - अवेद् ईत् - अवेदीत्। तसादौ अवेदिष्टाम्, अवेदिषुः इत्यादि। लृङि- अवेदिष्यत्, अवेदिष्यताम्, अवेदिष्यन् इत्यादीनि रूपाणि पूर्ववत्प्रक्रियया सिद्धचन्ति।

**जहि**

हन हिंसागत्योरिति धातोः 'लोट् च' इति सूत्रेण विध्यादिष्वर्थेषु लोट्-लकारेऽनुबन्धलोपे 'हन् ल्' इति जाते लस्य स्थाने मध्यमपुरुषस्य एकवचनस्य विवक्षायां 'तिप्तस्झि...' इत्यादिना सूत्रेण सिबादेशेऽनुबन्धलोपे 'हन् सि' इति जाते सिपः सार्वधातुकसंज्ञायां 'कर्तरि शप्' इति सूत्रेण शप्यनुबन्धलोपे 'हन् अ सि' इति जाते 'अदिप्रभृतिभ्यः शपः' इत्यनेन शपो लुकि 'हन् सि' इति स्थिते 'सेर्ह्यपिच्च' इति सूत्रेण सेः स्थाने 'हि' इत्यादेशे 'हन् हि' इति जाते 'हन्तेर्जः' इति सूत्रेण 'हन्' इत्यस्य स्थाने 'ज' इत्यादेशे 'ज हि' इति जाते 'अतो हेः' इत्यनेन हेर्लुकि प्राप्ते 'असिद्धवदत्राभात्' इति सूत्रेण जादेशस्य असिद्धत्वाद् लुगभावे 'जहि' इति रूपं सिद्धम् ।

## धातुरूपावलिः

**हन्-धातोराशीर्लिङि रूपाणि-**

| | | |
|---|---|---|
| वध्यात् | वध्यास्ताम् | वध्यासुः |
| वध्याः | वध्यास्तम् | वध्यास्त |
| वध्यासम् | वध्यास्व | वध्यास्म |

**रक्षणार्थकस्य पा-धातोर्लोटि रूपाणि-**

| | | |
|---|---|---|
| पातु/पातात् | पाताम् | पान्तु |
| पाहि/पातात् | पातम् | पात |
| पानि | पाव | पाम |

**प्रापणार्थकस्य या-धातोर्लुङि रूपाणि-**

| | | |
|---|---|---|
| अयासीत् | अयासिष्टाम् | अयासिषुः |
| अयासीः | अयासिष्टम् | अयासिष्ट |
| अयासिषम् | अयासिष्व | अयासिष्म |

## वाक्येषु प्रयोगानुशीलनम्

१. बिडालो मूषकं हन्ति ।

२. सज्जनाः पशुपक्षिणो नैव घ्नन्ति ।

३. त्रेतायां रामो रावणं जघान ।

४. योद्धारः शत्रून् हनिष्यन्ति ।

५. मानवाः प्राणिनो न हन्युः ।

६. व्याघ्रः मृगान् अवधीत् ।

७. तव शत्रवः पातालमूलं यायासुः/यान्तु ।

८. त्वं मां दुष्टेभ्यो अपाः ।

९. अहं श्वः प्रातः स्नातास्मि ।

## अभ्यासः

### १. सूत्राणां शुद्धोच्चारणं कुरुत

(क) असिद्धवदत्राभात् ।

(ख) अनुदात्तोपदेशवनतितनोत्यादीनामनुनासिकलोपो झलि क्ङिति ।

(ग) उषविदजागृभ्योऽन्यतरस्याम् ।

(घ) उतो वृद्धिर्लुकि हलि ।

(ङ) विदाङ्कुर्वन्त्वित्यन्यतरस्याम् ।

### २. कोष्ठकात् समुचितपदं चित्वा रिक्तस्थानं पूरयत

(क) हन्-धातुः ..................... वर्तते । (सकर्मकः, अकर्मकः)

(ख) ..................... धातुः सार्वधातुकलकारेष्वेव प्रयोक्तव्यः । (ला, ख्या)

(ग) या-धातुः ..................... अर्थे प्रयुज्यते । (प्रापणे, रक्षणे)

(घ) विद्-धातुः ..................... वर्तते । (सेट्, अनिट्)

(ङ) आशीर्लिङि लुङि च हन्-धातोः स्थाने ......... भवति । (घस्लादेशः, वधादेशः)

(च) 'अवधीत्' इत्यत्र अलोपस्य स्थानिवद्भावविधायकं सूत्रम् ........... अस्ति ।
(स्थानिवदादेशोऽनल्विधौ, अचः परस्मिन् पूर्वविधौ)

(छ) 'वेद्' इति ..................... लकारस्य क्रियापदमस्ति । (लटः, लिटः)

## ३. अधोऽङ्कितानां प्रश्नानामुत्तराणि लिखत

(क) श्रा-धातुः कस्मिन्नर्थे वर्तते ?

(ख) दाप् लवने इति धातुः कस्मिन् पदे प्रयुज्यते ?

(ग) लुङि परे हन्-धातोः स्थाने कः आदेशो भवति ?

(घ) 'अयुः' इत्यत्र झेर्जुसादेशविधायकं सूत्रं किम् ?

(ङ) 'विदो लटो वा' इत्यनेन केषां स्थाने के आदिश्यन्ते ?

(च) 'वेत्सि' इत्यत्र धातुविभक्ती निर्दिशत ।

(छ) 'विदाङ्कुरुतात्' इत्यत्र उत्वविधायकं सूत्रं किम् ?

(ज) हन्-धातोर्लिटि उत्तमपुरुषे कानि रूपाणि जायन्ते ?

(झ) 'घ्नन्ति' इत्यत्र को लकारः का च विभक्तिः ?

(ञ) हन्-धातोः स्थाने वधादेशः कस्मिन् कस्मिन् लकारे भवति ?

(ट) हौ परे हनो जादेशकं सूत्रं किम् ?

(ठ) 'विदाङ्कुर्वन्तु इति पदं प्रयुज्य वाक्यमेकं रचयत ।

(ड) 'तनादिकृञ्भ्य उः' इति सूत्रं किं करोति ?

(ढ) 'उषविदजागृभ्योऽन्यतरस्याम्' इति सूत्रे कति धातवो निर्दिष्टाः सन्ति ? के च ते ?

(ण) यु+लुङ्(तिप्) इत्यत्र किं रूपं जायते ?

## ४. सूत्राणां सोदाहरणर्थं लिखत

(क) अत उत्सार्वधातुके ।

(ख) लङः शाकटायनस्यैव ।

(ग) अचः परस्मिन् पूर्वविधौ ।

(घ) लुङि च ।

(ङ) हन्तेर्जः ।

५. **विद्-धातोः कर्तरि लटि सविकल्पं रूपाणि लिखत ।**

६. **प्रमुखसूत्रनिदर्शनपूर्वकं रूपसिद्धिप्रकारं प्रदर्शयत**

(क) वध्यात्
(ख) जघान
(ग) घ्नन्तु
(घ) अवधीत्
(ङ) यौति
(च) अयुः
(छ) वेद
(ज) अवेः
(झ) स्नेयात्
(ञ) विदाञ्चकार

७. **भा दीप्तौ धातोः कर्तरि लोटि रूपाणि लिखत ।**

८. **हन्-धातोः कर्तरि लिटि लुङि च रूपाणि लिखत ।**

९. **णु (नु) स्तुतौ इति धातोः 'यु मिश्रणामिश्रणयोः' इति धातुवद् दशसु लकारेषु रूपाणि विलिख्य कक्षायां श्रावयत ।**

१०. **अधस्तनपदानां वाक्ये प्रयोगं दर्शयत**

(क) विदुः
(ख) हन्यात्
(ग) वाति
(घ) अख्यात्
(ङ) यास्यामः

११. **अनुनासिकान्तेषु तनादीनाम् अनुदात्तोपदेशानां च धातूनां सूचीं निर्माय सारिण्यां दर्शयत ।**

चतुर्दशः पाठः

# अदादिप्रकरणे

## असादिधातवः

**अस भुवि ॥१७॥** (अस्- सेट्, अकर्मकः, परस्मैपदी)

अस्-धातुः भुवि (सत्तायाम्) अर्थे वर्तते । लटि, तिपि, शपि, शपो लुकि- **अस्ति** । तसि- शपो लुकि 'अस्+तस्' इत्यवस्थायां तसः 'सार्वधातुकमपित्' इति ङित्वे जाते-

### अकारलोपविधायकं विधिसूत्रम्

**श्नसोरल्लोपः ६।४।१११॥**

**श्नस्याऽस्तेश्चाऽतो लोपः, सार्वधातुके क्ङिति । स्तः । सन्ति । 'तासस्त्यो' रिति सलोपः । असि । स्थः । स्थ । अस्मि । स्वः । स्मः ।**

(श्नसोः, सार्वधातुके, क्ङिति, अल्लोपः)

**सरलार्थः** - सार्वधातुकसंज्ञके किति ङिति च प्रत्यये परे सति श्नम्-विकरणस्य, अस्-धातोश्च अङ्गस्य अकारस्य लोपो भवति ।

अनेन सूत्रेण असोऽकारस्य लोपे 'स् तस्' इति जाते सकारस्य रुत्वे विसर्गे च **स्तः** । एवमेव झौ शपो लुकि, झोऽन्तादेशे, अनेन अलोपे- **सन्ति** । सिपि 'तासस्त्योर्लोपः' इति सलोपे- असि । थसि थे च पूर्ववदनेन अलोपे- स्थः, **स्थ** । मिपि- **अस्मि** । वसि मसि च पूर्ववदलोपे- **स्वः स्मः** ।

### षकारादेशविधायकं विधिसूत्रम्

**उपसर्गप्रादुर्भ्यामस्तिर्यच्परः ८।३।८७॥**

**उपसर्गेणः प्रादुसश्चास्तेः सस्य षो यकारेऽचि च परे । निष्यात् । प्रनिषन्ति । प्रादुःषन्ति । यच्परः किम् ? अभिस्तः ॥**

(उपसर्ग-प्रादुर्भ्याम्, इणः, अस्तिः, यच्परः, सः, मूर्धन्यः) उपसर्गप्रादुर्भ्याम् = उपसर्गश्च प्रादुश्च उपसर्गप्रादुसौ, ताभ्याम् । 'इणः' इति उपसर्गेण सम्बध्यते न तु प्रादुसि । 'अस्तिः' इति षष्ठ्यर्थे प्रथमा । यच्परः = य् च अच् च यचौ, यचौ परौ यस्मात् ।

**सरलार्थः** - उपसर्गस्थाद् इणप्रत्याहारस्थवर्णात्, प्रादुस्-शब्दाच्च उत्तरस्य अस्-धातोः सकारस्य स्थाने मूर्धन्यादेशः (षकारादेशः) भवति, यकारे अचि च परे ।

अस्-धातोर्विधिलिङि तिपि 'स्यात्' इति रूपं जायते, तस्य च निरूपणमग्रे भविष्यति । 'नि' इत्युपसर्गपूर्वकाद् अस्-धातोर्विधिलिङि, तिपि 'नि स्यात्' इत्यवस्थायाम् अनेन सूत्रेण सकारस्य षत्वे- **निष्यात्** । एवं प्र, नि इत्युपसर्गद्वयपूर्वकाद् अस्-धातोर्लटि, झौ 'प्रनि सन्ति' इत्यवस्थायामनेन सूत्रेण सकारस्य षत्वे- **प्रनिषन्ति** । एवमेव प्रादुस् इत्यव्ययपूर्वकाद् अस्-धातोर्लटि, झौ 'प्रादुस् सन्ति' इत्यवस्थायामनेन सूत्रेण धातोः सकारस्य षत्वे 'प्रादुस् षन्ति' इति जाते पदान्ते विद्यमानस्य पूर्वसकारस्य रुत्वे, विसर्गे च '**प्रादुः षन्ति**' इति जाते सत्वं बाधित्वा 'वा शरि' इति विकल्पेन विसर्गस्य विसर्ग एवादेशे '**प्रादुःषन्ति**' इति रूपम् । विसर्गाभावे तु 'विसर्जनीयस्य सः' इति विसर्गस्य सत्वे, तस्य ष्टुत्वेन षकारे '**प्रादुष्षन्ति**' इति द्वे रूपे सिद्ध्यतः । अभि इत्युपसर्गपूर्वकाद् अस्-धातोर्लटि, तसि 'अभि स्तः' इत्यवस्थायान्तु अस्-धातोः सकारस्य यच्परत्वाभावाद् अस्य षत्वविधेरप्रवृत्तौ 'अभिस्तः' इत्येव रूपं साधु ।

लिटि 'अस्+ल्' इत्यवस्थायाम्-

### भू-आदेशविधायकं विधिसूत्रम्

**अस्तेर्भूः ६।४।५६।।**

**अस्तेर्भूः आर्धधातुके । बभूव । भविता । भविष्यति । अस्तु, स्तात् । स्ताम् । सन्तु ।**

(अस्तेः, आर्धधातुके, भूः)

**सरलार्थः** - आर्धधातुकस्य विवक्षायाम् अस्-धातोः स्थाने 'भू' इत्यादेशो भवति ।

अनेन सूत्रेण 'भू' इत्यादेशे 'भू ल्' इति जाते प्रागुक्तरीत्या भू-धातुवत्प्रक्रियया- बभूव, बभूवतुः, बभूवुः इत्यादीनि रूपाणि जायन्ते । आर्धधातुकस्य विवक्षायां सर्वत्रैव अनेन सूत्रेण अस्-धातोः स्थाने भ्वादेशविधानाद् लुडादिष्वा आर्धधातुकलकारेषु अस्-धातो रूपाणि भविता, भविष्यति, भूयात्, अभूत्, अभविष्यत् इत्यादीनि भू-धातुसदृशान्येव जायन्ते ।

लोटि- विध्यादिष्वर्थेषु तिपि पूर्ववद् अस्तु, आशिषि तु तातङ्पक्षे ङित्वात् 'श्नसोरल्लोपः' इति अलोपे- स्तात् इति । तसादौ अपित्सु ङित्वात् सर्वत्रैव अलोपे- स्ताम्, सन्तु इत्यादि । सिपि सेर्ह्यादेशे कृते-

### एत्वाभ्यासलोपविधायकं विधिसूत्रम्

**घ्वसोरेद्धावभ्यासलोपश्च ६।४।११९॥**

**घोरस्तेश्चैत्वं स्याद्धौ परेऽभ्यासलोपश्च। आभीयत्वाद्धेर्धिः। एधि स्तात्। स्तम्। स्त। असानि। असाव। असाम। आसीत्। आस्ताम्। आसन्। स्यात्। स्याताम्। स्युः। भूयात्। अभूत्। अभविष्यत्।**

(घु-असोः, हौ, एत्, अभ्यासलोपः, च)

**सरलार्थः** - हौ परे सति घुसंज्ञक-धातोः, अस्-धातोश्च एत्वं भवति, अभ्यासस्य लोपश्च भवति। अस्धातौ एत्वमभ्यासलोपश्चेति द्वयोः कार्ययोरेत्वस्यैव प्रवृत्तिर्भवति न त्वाभ्यासलोपस्य, अस्धातोर्हौ अभ्यासस्याभावात्। जुहोत्यादिगणे हि-परकानां घुसंज्ञकधातूनान्तु अभ्यासलोपोऽपि भवत्येव। 'अलोऽन्त्यस्य' इत्यनेन अन्त्यस्यालःस्थाने एत्वम्।

अनेन सूत्रेण सकारस्य एत्वे आभीयत्वेन 'असिद्धवदत्राभात्' इति एत्वस्यासिद्धत्वाद् 'हुझल्भ्यो हेर्धिः' इति हेर्ध्यादेशो भवति, हेरपित्वात् स्थानिवत्वेन ङित्वे 'श्नसोरल्लोपः' इति अलोपश्च। अस् लोट् (ल्) - अस् सिप् (सि) - अस् हि - अ ए+हि (घ्वसोरेद्धाव...) - अए+धि (हुझल्भ्यो हेर्धिः) - ए धि (श्नसोरल्लोपः) - **एधि**। तातङ्पक्षे तु परत्वात् एत्वं बाधित्वा तातङि पूर्ववत्- स्तात्। स्तम्। स्त। उत्तमपुरुषे आडागमे तस्य पित्वेन अलोपस्याप्राप्तौ पूर्ववत्- **असानि, असाव, असाम**।

लङि 'अस्तिसिचोऽपृक्ते' इति ईडागमो विशेषः- अस् ल्, आटि, वृद्धौ, तिपि, शपि, लुकि, इलोपे 'आस्+त्' इत्यवस्थायाम् ईटि- आसीत्। तसि 'आ अस्+तस्' इत्यवस्थायां ङित्वात् 'श्नसो'रिति अलोपे, तसः तामादेशे- **आस्ताम्**। झौ- आसन् इत्यादि।

विधिलिङि यासुटो ङित्वात् सर्वत्रैव अलोपे- स्यात्, स्याताम्, स्युः इत्यादि।

**इण् गतौ ॥१८॥** (इ- अनिट्,अर्थवशात् सकर्मकोऽकर्मकश्च, परस्मैपदी)

**एति। इतः।**

गत्यर्थकाद् इण् (इ) इति धातोर्लटि, तिपि, शपि, लुकि, 'सार्वधातुके'ति गुणे- **एति**। तसो ङित्वाद् गुणनिषेधे- **इतः**। झौ 'इ+अन्ति' इत्यवस्थायाम् 'अचि श्नुधातुभ्रुवां य्वोरियङुवङौ इत्यनेन इयङि प्राप्ते-

### यणादेशविधायकं विधिसूत्रम्

**इणो यण् ६।४।८१॥**

**अजादौ प्रत्यये परे । इयङोऽपवादः । यन्ति ।**

(इणः, अचि, यण्)

**सरलार्थः** - अजादौ प्रत्यये परे इण्-धातोरङ्गस्य स्थाने यणादेशो भवति । अयं यणादेशः केवलम् इयङादेशस्य अपवादो वर्तते न तु गुणवृद्ध्योरिति स्मर्तव्यम् ।

इयङं बाधित्वा अनेन यणि, स्थानसाम्याद् इकारस्य स्थाने यकारे- य् अन्ति- **यन्ति** । सिबादौ- एषि, इथः, इथ । एमि, इवः, इमः । लिटि धातोर्द्वित्वे 'इ इ+अ' इति जाते 'अचो ञ्णिति' इति वृद्धौ 'इ ऐअ' इत्यवस्थायाम्-

### इयङुवङादेशविधायकं विधिसूत्रम्

**अभ्यासस्यासवर्णे ६।४।७८।**

**अभ्यासस्य इवर्णोवर्णयोरियङुवङौ स्तोऽसवर्णेऽचि । इयाय ।**

(अभ्यासस्य, य्वोः, असवर्णे, अचि, इयङ्-उवङौ)

**सरलार्थः** - सवर्णभिन्ने अचि परे सति अभ्यासस्य अन्ते विद्यमानस्य इवर्णस्य उवर्णस्य च स्थाने क्रमेण इयङ्, उवङ् इत्येतौ आदेशौ भवतः ।

अनेन सूत्रेण इकारस्य इयङादेशेऽनुबन्धलोपे 'इय् ऐ अ' इत्यवस्थायाम् ऐकारस्य आयादेशे- **इयाय** । अतुसि 'इ इ अतुस्' इत्यवस्थायाम्-

### दीर्घादेशविधायकं विधिसूत्रम्

**दीर्घ इणः किति ७।४।६९॥**

**इणोऽभ्यासस्य दीर्घः स्यात् किति लिटि । ईयतुः । ईयुः । इययिथ, इयेथ । एता । एष्यति । एतु । ऐत् । ऐताम् । आयन् । इयात् । ईयात् ।**

(इणः, अभ्यासस्य, किति, लिटि, दीर्घः)

**सरलार्थः** - किति लिटि परे सति इण्-धातोरभ्यासस्य दीर्घो भवति । अत्र दीर्घविधानसामर्थ्याद् 'ह्रस्वः' इत्यनेन अभ्यासस्य ह्रस्वो न भवतीति बोध्यम् ।

'येन नाव्यवधानं तेन व्यवहितेऽपि' इति न्यायेन अनेन सूत्रेण अभ्यासस्य दीर्घे, ई इ+अतुस्,

'इणो यण्' इति यणादेशे, पररूपे- ईयतुः, ईयुः। थलि भारद्वाजमते इडागमे, द्वित्वे 'इ इ+इथ' इति जाते अभ्यासोत्तरस्य इकारस्य गुणेन एकारे, अयादेशे 'अभ्यासस्यासवर्णे' इति इयङि-**इययिथ**। इडभावे तु अनभ्यासस्य इकारस्य गुणे, अभ्यासस्य इयङादेशे, गुणे- **इयेथ**। अत्र इयङ्विधानसामर्थ्याद् हलादिशेषो नेति ज्ञेयम्। अथुसादौ- ईयथुः, ईय, इयाय/इयय, ईयिव, ईयिम।

लुटि- एता, एतारौ, एतारः इत्यादि। लृटि- एष्यति, एष्यतः, एष्यन्ति इत्यादि। लोटि- एतु/इतात्, इताम्, यन्तु, इहि/इतात्, इतम्, इत, अयानि, अयाव, अयाम। लङि तिपि- इ ल् - आ इ ल् - ऐ ल् (आटश्च) - ऐ ति - ऐ अ ति - ऐ ति - **ऐत्**। एवं तसि- ऐताम्। झौ- 'ऐ अन्ति' इत्यवस्थायाम् आयादेशे, इलोपे, संयोगान्तलोपे च- **आयन्**। सिपि- ऐ सि - ऐ स् (इतश्च) - ऐर् - **ऐः**। थसादौ- ऐतम्, ऐत, आयम्, ऐव, ऐम। विधिलिङि सार्वधातुकलिङ्त्वात् सर्वत्रैव यासुटः सलोपे- इयात्, इयाताम्, इयुः, इयाः, इयातम्, इयात, इयाम्, इयाव, इयाम।

आशीर्लिङि सर्वत्रैव 'अकृत्सार्वधातुकर्योर्दीर्घः' इत्यनेन दीर्घे कृते ईयात्, ईयास्ताम्, ईयासुः इत्यादीनि रूपाणि जायन्ते। सोपसर्गस्य इण्-धातोराशीर्लिङि तु विशेषमाह-

### ह्रस्वादेशविधायकं विधिसूत्रम्

**एतेर्लिङि ६।४।६७॥**

**उपसर्गात्परस्य इणोऽणो ह्रस्वः स्यादार्द्धधातुके किति लिङि। निरियात्।**

**उभयत आश्रयणे नान्तादिवद् आभीयात्। अणः किम्? समेयात्।**

(उपसर्गात्, एतेः, अणः, आर्धधातुके, किति, लिङि, ह्रस्वः)

**सरलार्थः** - आर्धधातुकसंज्ञके किति लिङि परे सति उपसर्गाद् उत्तरस्य इण्-धातोः अणः स्थाने ह्रस्वादेशो भवति।

निर् इत्युपसर्गपूर्वकाद् इण्-धातोराशीर्लिङि 'निर्+ईयात्' इत्यवस्थायामनेन सूत्रेण ईकारस्य ह्रस्वे, वर्णयोगे- **निरियात्**।

अभ्युपसर्गपूर्वकाद् इण्-धातोराशीर्लिङि 'अभि+ईयात्' इत्यत्र सवर्णदीर्घे, पूर्वपरयोः स्थाने ईकार एकादेशे, तस्य 'अन्तादिवच्च' सूत्रेण पूर्वान्तवद्भावेन उपसर्गस्यावयवत्वे, परादिवद्भावेन च धातोरवयवत्वे अनेन सूत्रेण ह्रस्वे प्राप्ते तन्निवारणाय परिभाषामुपस्थापयति- '**उभयत आश्रयणे नान्तादिवत्**' इति।

**परिभाषार्थः** - उभयत आश्रयणे ! पूर्वान्तवद्भावस्य, परादिवद्भावस्य चोभयोराश्रये क्रियमाणे 'अन्तादिवच्च' इति सूत्रं न प्रवर्तते । अनया निषेधेन 'अभीयात्' इत्यत्र ह्रस्वो न ।

लुङि विशेषमाह-

### सिज्लुगादेशविधायकं विधिसूत्रम्

**इणो गा लुङि २।४।४५॥**

**'गातिस्थे'ति सिचो लुक् । अगात् । अगाताम् । अगुः । ऐष्यत् ।**

(इणः, लुङि, गा)

**सरलार्थः** - लुङ्लकारे परे सति इण्-धातोः स्थाने 'गा' इत्यादेशो भवति ।

अनेन सूत्रेण गादेशे कृते 'गातिस्थाघुपाभूभ्यः सिचः परस्मैपदेषु' इत्यनेन सिचो लुग् विधीयते । 'गाल्' इत्यवस्थायाम् अटि, तिपि, च्लौ, सिचि, सिचो लुकि, इलोपे- **अगात्** । तसादौ- अगाताम्, अगुः इत्यादीनि रूपाणि जायन्ते । लृङि- ऐष्यत्, ऐष्याताम्, ऐष्यन् इत्यादि ।

इति परस्मैपदिनः

**आसीत्**

अस् भुवि धातोः भूतानद्यतनकालस्य विवक्षायाम् 'अनद्यतने लङ्' इति सूत्रेण लङ्यनुबन्धलोपे 'अस् ल्' इति जाते प्राप्तमडागमं बाधित्वा 'आडजादीनाम्' इत्यनेन आडागमेऽनुबन्धलोपे 'आ अस् ल्' इति जाते 'आटश्च' इति वृद्धौ 'आस् ल्' इति जाते लस्य स्थाने 'तिप्तस्झि...' इत्यादिना सूत्रेण प्रथमपुरुषस्यैकवचने तिबादेशेऽनुबन्धलोपे 'आस् ति' इत्यवस्थायां सार्वधातुकसंज्ञायां शपि, तस्य लुकि 'इतश्च' इति सूत्रेण इलोपे 'आस् त्' इति जाते अपृक्तसंज्ञायाम् 'अस्तिसिचोऽपृक्ते' इति सूत्रेण अपृक्तस्य ईडागमेऽनुबन्धलोपे टित्वादाद्यवयवत्वे 'आस् ईत्' इति जाते वर्णसम्मेलने 'आसीत्' इति रूपं सिद्ध्यति ।

**धातुरूपावलिः**

**अस्-धातोर्विधिलिङि रूपाणि-**

| | | |
|---|---|---|
| स्यात् | स्याताम् | स्युः |
| स्याः | स्यातम् | स्यात |
| स्याम् | स्याव | स्याम |

**इण्-धातोर्लुङि रूपाणि-**

| | | |
|---|---|---|
| अगात् | अगाताम् | अगुः |
| अगाः | अगातम् | अगात |
| अगाम् | अगाव | अगाम |

## वाक्येषु प्रयोगानुशीलनम्

१. क्रीडकाः चत्वरे क्रीडन्तः सन्ति ।

२. त्वं कदा आगतोऽसि ?

३. सर्वे प्राणिनो निरामयाः सन्ति ।

४. पूर्वं नेपाले एकात्मकशासनम् आसीत् ।

५. सांस्कृतिकसम्पदां स्वरूपाणि यथासन् तथैव स्युः ।

६. बालका यथासमयं विद्यालयं यन्ति ।

७. त्वम् अद्य सायं भ्रमणार्थम् इहि ।

८. माता प्रातो मन्दिरम् अगात् ।

९. यूयं श्वः कुत्र एतास्थ ?

## अभ्यासः

### १. शद्वोच्चारणं कुरुत

(क) घ्वसोरेद्धावभ्यासलोपश्च ।

(ख) श्नसोरल्लोपः ।

(ग) उपसर्गप्रादुर्भ्यामस्तिर्यच्परः ।

(घ) अभ्यासस्यासवर्णे ।

(ङ) एत्वस्यासिद्धत्वाद्धेर्धिः ।

### २. पाठाधारेण समुचितपदै रिक्तस्थानं पूरयत

(क) आर्धधातुके परे असो भू-विधायकं सूत्रम् .......................... अस्ति ।

(ख) लुङि परे इणः स्थाने .......................... इत्यादेशो भवति ।

(ग) अस्-धातोर्विधिलिङि उत्तमपुरुषैकवचने .......................... रूपम् ।

(घ) 'असाम्' इत्यत्र आटि पित्वादङित्वेन .......................... न भवति ।

(ङ) 'आसीत्' इत्यत्र .......................... इति सूत्रेण ईडागमो विधीयते ।

### ३. सङ्क्षेपेण उत्तरं लिखत

(क) अस्, इण् इत्येतौ धातू कयोरर्थयोः प्रयुज्येते ?

(ख) किति ङिति च सार्वधातुके परतः अस्-धातोरकारस्य लोपः केन सूत्रेण भवति ?

(ग) अस्-धातोः स्थाने भू इत्यादेशः केषु लकारेषु विधीयते ?

(घ) अस्-धातोः साधनप्रक्रियायां कुत्र कुत्र केन ईट् क्रियते ?

(ङ) इण्-धातोः कस्मिन् कस्मिन् प्रयोगे अभ्यासस्यासवर्णे इति इयङ् विधीयते ?

(च) लुङि परे इणो गादेशविधायकं सूत्रं किम् ?

(छ) 'इण्+लुङ्(झि)' इत्यत्र किं रूपं निष्पद्यते ?

(ज) 'अभीयात्' इत्यत्र 'एतेर्लिङि' इति कथं न प्रवर्तते ?

(झ) 'निष्यात्' इत्यत्र केन सूत्रेण सकारस्य षत्वम् ?

(ञ) 'अभिस्तः' इत्यत्र 'उपसर्गप्रादुर्भ्यामस्तिर्यच्परः' इति षत्वं कथं न भवति ?

४. **अस्-धातोर्लोटि आशिषि रूपाणि लिखत ।**

५. **अधस्तनप्रयोगेषु धातु-लकार-पुरुष-वचनानि निर्धारयत**

असानि, स्याताम्, ईयुः, आयन्, ऐष्यत्, अगाः, स्वः, आसीः, इमः, इहि ।

६. **इण्-धातोर्लिटि आशिषि लिङि च रूपाणि लिखत ।**

७. **सूत्राणामर्थं लिखत**

(क) एतेर्लिङि
(ख) दीर्घ इणः किति
(ग) इणो यण्
(घ) इणो गा लुङि
(ङ) अभ्यासस्यासवर्णे

८. **अधस्तनप्रयोगाणां ससूत्रं सिद्धिपथं प्रदर्शयत**

(क) स्तः
(ख) असि
(ग) एधि
(घ) स्युः
(ङ) अगात्
(च) ईयतुः
(छ) यन्ति
(ज) इयाय
(झ) निरियात्
(ञ) निष्यात्

९. **अस्-धातोर्लटि लोटि च रूपाणि लिखत ।**

१०. **पदानि प्रयुज्य वाक्यानि रचयत**

स्वः, असाम, इययिथ, प्रनिषन्ति, एष्यति, स्तात्, स्यात्, अगाताम् ।

# पञ्चदशः पाठः
# शीङ्डावात्मनेपदिनौ दुहाद्युभयपदिनश्च धातवः

**शीङ् स्वप्ने ॥१९॥** (शी- सेट्, अकर्मकः, आत्मनेपदी)

अथ अदादिगणपठितानाम् आत्मनेपदिधातूनां रूपसिद्धिप्रक्रिया प्रारभते । आत्मनेपदसंज्ञकानां लादेशानां तङां कस्यापि पित्वाभावात् सर्वत्रैव ङित्वमिति स्मर्तव्यो विषयः ।

शीङ्-धातोर्ङकार इत् वर्तते, तेन धातुरयम् 'अनुदात्तङित आत्मनेपदम्' इति सूत्रेण आत्मनेपदी । शयनेऽर्थे विद्यमानोऽयं धातुः सेट्, अकर्मकश्चास्ति । अनुबन्धविनिर्मुक्तात् शीधातोः कर्तरि लटि, लस्य स्थाने आत्मनेपदसंज्ञके त इत्यादेशे, सार्वधातुकत्वेन शपि, अदादित्वात् शपो लुकि जाते 'शी+त' इति जाते, त इत्यस्य अपित्सार्वधातुकत्वेन ङित्वात् 'सार्वधातुकार्धधातुकयोः' इति प्राप्तस्य गुणस्य 'क्ङिति च' इति निषेधे सिद्धे गुणविधानार्थं प्रतिप्रसवं विधिमाह-

## गुणादेशविधायकं विधिसूत्रम्

**शीङः सार्वधातुके गुणः ७।४।२१॥**

**क्ङिति चेत्यस्यापवादः । शेते । शयाते ।**

(शीङः, सार्वधातुके, गुणः)

**सरलार्थः** - सार्वधातुकसंज्ञके प्रत्यये परे सति शीङ्-धातोरङ्गस्य गुणो भवति । सार्वधातुकलकारेषु सत्यपि ङित्वे निषेधं बाधित्वा अनेन विशेषविधानेन शीङ्धातोरिकः स्थाने गुणो विधीयते ।

'शी त' इत्यवस्थायाम् अनेन सूत्रेण ईकारस्य गुणे, टेरेत्वे- **शेते** । आतामि गुणोऽयादेशश्च-

शी लट् (ल्) - शी आताम् - शी शप् (अ) आताम् - शी आताम् - शे आताम् (शीङः सार्वधातुके गुणः) - श् अय् आताम् - श् अय् आते (टित आत्मनेपदानां टेरे) - **शयाते** । बहुवचने लस्य झादेशे, झोऽन्तादेशं बाधित्वा 'आत्मनेपदेष्वनतः' इति अदादेशे, अनेन गुणे, टेरेत्वे 'शे+अते' इत्यवस्थायाम्-

## रुडागमविधायकं विधिसूत्रम्

**शीङो रुट् ७।१।६॥**

**शीङः परस्य झादेशस्यातो रुट् । शेरते । शेषे । शयाथे । शेध्वे । शये । शेवहे । शेमहे ।**

**शिश्ये । शयिता । शयिष्यते । शेताम् । अशेत । अशयाताम् । अशेरत । शयीत । शयीयाताम् । शयीरन् । शयिषीष्ट । अशयिष्ट । अशयिष्यत ॥**

(शीङः, झः, अतः, रुट्)

**सरलार्थः** - शीङ्-धातोः परस्य झस्य स्थाने आदिश्यमानस्य 'अत्' इत्यस्य रुट् (र्) इत्यागमो भवति । रुट उकारटकारौ इतौ स्तः, टित्वादाद्यवयवत्वम् ।

अनेन रुडागमेऽनुबन्धलोपे- शे र् अते -**शेरते** । सिबादौ- शेषे, शयाथे, शेध्वे, शये, शेवहे, शेमहे । लिटि- तिपः स्थाने एशादेशे, द्वित्वादिकार्ये 'शिशी ए' इत्यवस्थायाम् इयङादेशं बाधित्वा 'एरनेकाचोऽसंयोगपूर्वस्य' इत्यनेन यणि- **शिश्ये** । तसादौ- शिश्याते, शिश्यिरे इत्यादि । लुटि, लृटि च इटि, सार्वधातुकेति गुणे, अयादेशे- **शयिता, शयिष्यते** इत्यादि । लोटि- 'आमेतः' इति एकारस्यामि - **शेताम्**, शयाताम्, शेरताम् इत्यादि । लङि- पूर्वसूत्रेण गुणे- **अशेत**, अशयाताम्, अशेरत इत्यादि । विधिलिङि सीयुटि कृते- शयीत, शयीयाताम्, शयीरन् इत्यादि । आशीर्लिङि सीयुटि, सुटि, इटि च- **शयिषीष्ट**, शयिषीयास्ताम्, शयिषीरन् । ध्वमि तु- 'विभाषेटः' इति विकल्पेन ढत्वे- **शयिषीढ्वम्/शयिषीध्वम्** । लुङि- अशयिष्ट, अशयिषाताम्, अशयिषत इत्यादि । लृङि- अशयिष्यत, अशयिष्येताम्, अशयिष्यन्त इत्यादीनि रूपाणि जायन्ते ।

**इङ् अध्ययने ॥२०॥** (अधी (अधि+इ)- अनिट्, सकर्मकः, आत्मनेपदी)

**इङिकावध्युपसर्गतो न व्यभिचरतः । अधीते । अधीयाते । अधीयते ॥**

अध्ययनार्थक **इङ्** (इ) इति धातुः, स्मरणार्थक इक्-धातुश्च अधि इत्युपसर्गपूर्वकौ एव लोके प्रयुज्येते । अध्युपसर्गं विना न प्रयुज्येते इत्यर्थः । अनुबन्धविनिर्मुक्ताद् अध्युपसर्गपूर्वकाद् अध्ययनार्थकाद् इ-धातोर्लटि, ते, शपो लुकि, ङित्वाद् गुणनिषेधे, टेरेत्वे, सवर्णदीर्घे- **अधीते** । आतामादौ अजादिप्रत्यये परे इकारस्य इयङादेशे, ततो दीर्घे- **अधीयाते**, झौ झोऽदादेशे च- **अधीयते** इत्यादीनि रूपाणि जायन्ते । लिटि- 'अधि इ ल्' इत्यवस्थायाम्-

### गाङादेशविधायकं विधिसूत्रम्

**गाङ् लिटि ६।४।६९॥**

**इङो गाङ् स्याल्लिटि । अधिजगे । अध्येता । अध्येष्यते । अधीताम् । अधीष्व । अधीयाथाम् । अधीध्वम् । अध्ययै । अध्ययावहै । अध्ययामहै । अध्यैत । अध्यैयाताम् । अध्यैयत । अध्यैथाः । अध्यैयाथाम् । अध्यैध्वम् । अध्यैयि । अध्यैवहि । अध्यैमहि । अधीयीत । अधीयीयाताम् ।**

**अधीयीरन् । अधीयीध्वम् । अध्येषीष्ट ।**

(इङः, लिटि, गाङ्)

**सरलार्थः** - लिटि परे इङ्-धातोः स्थाने 'गाङ्' इत्यादेशो भवति । गाङो ङकार इत् ।

अनेन सूत्रेण गाङादेशे, लस्य ते, तस्य एशि, धातोर्द्वित्वे, अभ्यासकार्ये 'अधि ज गाए' इति जाते 'आतो लोप इटि च' इत्यनेन आलोपे- **अधिजगे** । तसादौ- अधिजगाते, अधिजगिरे इत्यादि । लुटि- अध्येता, अध्येतारौ, अध्येतारः इत्यादि । लृटि- अध्येष्यते, अध्येष्येते, अध्येष्यन्ते इत्यादि । लोटि प्रथमपुरुषे- अधीताम्, अधीयाताम्, अधीयताम् । मध्यमपुरुषे- अधीष्व, अधीयाथाम्, अधीध्वम् । उत्तमपुरुषे मिपि- अधि इ मिप् (मि) - अधि इ इट् (इ) - अधि इ शप् (अ) इ - अधि इ इ - अधि इ आट् (आ) इ - अधि इ आ ए - अधि इ ऐ (आटश्च) - अधि ए ऐ - (सार्वधातुकार्धधातुकयोः) - अधि अय् ऐ - अध् य् अय् ऐ - **अध्ययै** । वस्-मसोः- अध्ययावहै, अध्ययामहै ।

लङादिषु अडाडौ आगमौ धातोः पूर्वं भवति न तु उपसर्गादिति अत्रापि स्मर्तव्यम् । लङि- आडागमे, आटश्चेति वृद्धौ, ततो यणि- **अध्यैत**, अध्यैयाताम्, अध्यैयत इत्यादि । विधिलिङि- सीयुटि, इयङि च- **अधीयीत**, अधीयीयाताम्, अधीयीरन् इत्यादि । आशीर्लिङि- अध्येषीष्ट इत्यादि । लुङि- अधि इ+ल्, इति स्थिते-

### विभाषया गाङादेशविधायकं विधिसूत्रम्

**विभाषा लुङ्लृङोः २।४।५०॥**

**इणो गाङ् वा स्यात् ।**

(इङः, लुङ्-लृङोः, गाङ्, विभाषा)

**सरलार्थः** - लुङि, लृङि च परे सति इङ्-धातोः स्थाने विकल्पेन गाङ् (गा) इत्यादेशो भवति ।

अनेन सूत्रेण वैकल्पिके गाङादेशे, गाङो हलादित्वाद् अडागमे, लस्य ते, च्लौ, च्लेः सिजादेशे, इण्निषेधे 'अधि अगा स् त' इति जाते-

### ङिद्वद्विधायकमतिदेशसूत्रम्

**गाङ्कुटादिभ्योऽञ्णिन्ङित् १।२।१॥**

**गाङादेशात्कुटादिभ्यश्चाऽञ्णितः प्रत्यया ङितः स्युः ।**

(गाङ्-कुट्-आदिभ्यः, अञ्णित्-णित्, ङित्)

**सरलार्थः** - आदिश्यमानाद् गाङ्-धातोः, कुटादिभ्यो धातुभ्यश्च परस्य ञित्-णित्-भिन्नानां प्रत्ययानां ङिद्वद्भावो भवति ।

अनेन सूत्रेण सिचो ङित्वे-

### ईकारादेशविधायकं विधिसूत्रम्

**घु-मा-स्था-गा-पा-जहाति-सां हलि ६।४।६६॥**

**एषामात ईत्स्याद्धलादौ क्ङित्यार्द्धधातुके । अध्यगीष्ट । अध्यैष्ट । अध्यगीष्यत । अध्यैष्यत ।**

(घु-मा-स्था-गा-पा-जहाति-साम्, आतः, आर्धधातुके, क्ङिति, हलि, ईत्)

**सरलार्थः** - घुसंज्ञकानां धातूनाम्, मा, स्था, गा, पा, ओहाक् (हा), षो (सा) इत्येतेषां धातूनाञ्च आकारस्य स्थाने ईकारादेशो भवति, आर्धधातुकसंज्ञके हलादौ किति ङिति च प्रत्यये परे ।

अनेन सूत्रेण आकारस्य ईत्वे 'अधि गी स् तु इति जाते, यणि, सस्य षत्वे, तकारस्य ष्टुत्वे- **अध्यगीष्ट** । तसादौ- अध्यगीषाताम्, अध्यगीषत इत्यादि । गाङादेशाभावपक्षे अजादित्वाद् आटि, वृद्धौ, पूर्ववत्कार्ये- **अध्यैष्ट**, तसादौ अध्यैषाताम्, अध्यैषत इत्यादि । लृङि- गाङ्पक्षे- अध्यगीष्यत, अध्यगीषेताम्, अध्यगीष्यन्त इत्यादि, गाङभावे- अध्यैष्यत, अध्यैष्येताम्, अध्यैष्यन्त इत्यादि बोध्यम् ।

**दुह प्रपूरणे ॥२१॥** (दुह्- अनिट्, सकर्मकः, उभयपदी)

**दोग्धि । दुग्धः । दुहन्ति । धोक्षि । दुग्धे । दुहाते । दुहते । धुक्षे । दुहाथे । धुग्ध्वे । दुहे । दुह्वहे । दुह्महे । दुदोह, दुदुहे । दोग्धासि, दोग्धासे । धोक्ष्यति, धोक्ष्यते । दोग्धु, दुग्धात् । दुग्धाम् । दुहन्तु । दुग्धि, दुग्धात् । दुग्धम् । दुग्ध । दोहानि । दोहाव । दोहाम । दुग्धाम् । दुहाताम् । दुहताम् । धुक्ष्व । दुहाथाम् । धुग्ध्वम् । दोहै । दोहावहै । दोहामहै । अधोक् । अधोग् । अदुग्धाम् । अदुहन् । अदोहम् । अदुग्ध । अदुहाताम् । अदुहत । अधुग्ध्वम् । दुह्यात् । दुहीत ॥**

प्रपूरणार्थकस्य दुह (दुह्) इति धातोर्हकारोत्तरवर्ती अकारः स्वरितः, अनुनासिकश्च, अतोऽस्माद्धातोः स्वरितेत्वाद् 'स्वरितञितः कर्त्रभिप्राये क्रियाफले' इत्यनेन कर्तृगामिनि क्रियाफले आत्मनेपदं भवति, परगामिनि क्रियाफले तु 'शेषात्कर्तरि परस्मैपदम्' इत्यनेन परस्मैपदं भवति । तेन धातुरयम् उभयपदी वर्तते ।

लटि क्रियाफलेऽकर्तृगे परस्मैपदे- तिपि, शपि, लुकि कृते 'दुह्+ति', लघूपधगुणे 'दोह्+ति',

झल्परकत्वाद् 'दादेर्धातोर्घः' इत्यनेन हस्य घत्वे, 'झषस्तथोर्धोऽधः' इत्यनेन तकारस्य धत्वे, पूर्वधकारस्य जश्त्वे- **दोग्धि**, दुग्धः, दुहन्ति । सिपि 'एकाच...' इति भष्भावे च- **धोक्षि** । थसादौ- दुग्धः, दुग्ध, दोह्मि, दुह्वः, दुह्मः ।

क्रियाफले कर्तृगे तु आत्मनेपदे- ङित्वात् सर्वत्र गुणनिषेधे- **दुग्धे**, दुहाते, दुहते, धुक्षे, दुहाथे, धुग्ध्वे, दुहे, दुह्वहे, दुह्महे ।

लिटि- परस्मैपदे- दुदोह, दुदुहतुः, दुदुहुः, दुदोहिथ इत्यादि । आत्मनेपदे- दुदुहे, दुदुहाते, दुदुहिरे, दुदुहिषे, दुदुहाथे, दुदुहिढ्वे/दुदुहिध्वे, दुदुहे, दुदुहिवहे, दुदुहिमहे । लुटि- प्रथमपुरुषे उभयोः पदयोः- दोग्धा, दोग्धारौ दोग्धारः । सिबादौ- दोग्धासि इत्यादि । थासादौ- दोग्धासे इत्यादि । लृटि- सर्वत्रैव भष्भावे- धोक्ष्यति, धोक्ष्यते इत्यादि ।

लोटि- परस्मैपदे- दोग्धु/दुग्धात्, दुग्धाम्, दुहन्तु, दुग्धि/दुग्धात्, दुग्धम्, दुग्ध, दोहानि, दोहाव, दोहाम । आत्मनेपदे- दुग्धाम्, दुहाताम्, दुहताम्, धुक्ष्व, दुहाथाम्, धुग्ध्वम्, दोहै, दोहावहै, दोहामहै ।

लङि- परस्मैपदे- अधोक्, अदुग्धाम्, अदुहन्, अधोक्, अदुग्धम्, अदुग्ध, अदोहम्, अदुह्व, अदुह्म । आत्मनेपदे- अदुग्ध, अदुहाताम्, अदुहत, अदुग्धाः, अदुहाथाम्, अधुग्ध्वम्, अदुहि, अदुह्वहि, अदुह्महि । विधिलिङि- परस्मैपदे- दुह्यात्, दुह्याताम्, दुह्युः इत्यादि । आत्मनेपदे- दुहीत, दुहीयाताम्, दुहीरन् इत्यादि ।

आशीर्लिङि- परस्मैपदे- दुह्यात्, दुह्यास्ताम्, दुह्यासुः इत्यादि । आत्मनेपदे तु- सीयुटि, सुटि च 'दुह् सीय् स्+तु इत्यवस्थायाम् अनिट्त्वाद् इडभावे, लघूपधगुणे प्राप्ते तद्वारणार्थमाह-

### किद्वद्विधायकमतिदेशसूत्रम्

**लिङ्सिचावात्मनेपदेषु १।२।११॥**

**इक्समीपाद्धलः परौ झलादी लिङ्सिचौ कितौ स्तस्तङि । धुक्षीष्ट ॥**

(इकः, हलन्तात्, झल्, लिङ्-सिचौ, कित्, आत्मनेपदेषु)

**सरलार्थः** - आत्मनेपदसंज्ञके तङ्-प्रत्यये परे सति इकः समीपस्थाद् हलः परस्य झलादेर्लिङः सिचश्च किद्वद्भावो भवति ।

अनेन सूत्रेण किद्वद्भावे 'क्ङिति च' इति गुणनिषेधे, घत्वे, भष्भावे, सन्धिकार्ये- **धुक्षीष्ट** । आतामादौ- धुक्षीयास्ताम्, धुक्षीरन् इत्यादि ।

लुङि- परस्मैपदे- अटि, तिपि, इलोपे, च्लौ 'अ दुह् च्लि त्' इत्यवस्थायां च्लेः सिचि प्राप्ते-

### क्सादेशविधायकं विधिसूत्रम्

**शल इगुपधादनिटः क्सः ३।१।४५॥**

**इगुपधो यः शलन्तस्तस्मादनिटश्च्लेः क्सादेशः स्यात् । अधुक्षत् ॥**

(इगुपधात्, शलः, च्लेः, अनिटः, क्सः)

**सरलार्थः** -इक् अस्ति उपधायां यस्य स धातुः इगुपधः, यस्य धातोरन्ते शल् वर्तते स शलन्त-धातुः । इगुपधधातुर्यदि शलन्तोऽपि वर्तते चेत् तस्मात् परस्य अनिटः च्लेः स्थाने 'क्स' इत्यादेशो भवति ।

अनेन सूत्रेण सिचं बाधित्वा क्सादेशेऽनुबन्धलोपे- अ दुह् स त् - अदुघ् स त् (दादेर्धातोर्घः) - अधुघ् स त् (एकाचो वशो भष्...) - अधुक् स त् (खरि च) - अधुक् ष त् (आदेशप्रत्यययोः) - **अधुक्षत्** । तसादौ- अधुक्षताम्, अधुक्षन् इत्यादि । आत्मनेपदे- अटि, ते, च्लौ, सिचं बाधित्वाऽनेन सूत्रेण क्सादेशे 'अदुह् स त' इत्यवस्थायाम्-

### क्सस्य लुगादेशविधायकं विधिसूत्रम्

**लुग्वा दुहदिहलिहगुहामात्मनेपदे दन्त्ये ७।३।७३॥**

**एषां क्सस्य लुग्वा, दन्त्ये तङि । अदुग्ध, अधुक्षत ॥**

(दुह-दिह-लिह-गुहाम्, क्सस्य, दन्त्ये, आत्मनेपदे, लुक्, वा)

**सरलार्थः** - दुह्, दिह्, लिह्, गुह्, इत्येतेषां धातुरूपाणाम् अङ्गानाम् (एतत्सम्बन्धिनः) क्सप्रत्ययस्य लुग् भवति, दन्तस्थानिकवर्णादौ (दन्त्यादौ) तङि परे ।

अनेन सूत्रेण क्सस्य लुकि, घत्वादिकार्ये- **अदुग्ध**, पक्षान्तरे घत्व-भष्भावादिकार्ये- **अधुक्षत** । आतामि- अदुह् स आताम्, इत्यत्र 'आतो ङितः' इत्यनेन इयादेशे प्राप्ते-

### क्सस्य लोपादेशविधायकं विधिसूत्रम्

**क्सस्याचि ७।३।७२।**

**अजादौ तङि क्सस्य लोपः । अधुक्षाताम् । अधुक्षन्त । अधुक्षथाः, अदुग्धाः । अधुक्षाथाम् । अधुग्ध्वम्, अधुक्षध्वम् । अधुक्षि । अदुह्वहि, अधुक्षावहि । अधुक्षामहि । अधोक्ष्यत ॥**

(क्सस्य, अचि, आत्मनेपदे, लोपः)

**सरलार्थः** – अजादौ तङ्-प्रत्यये परे सति क्स-प्रत्ययस्य (अन्त्यवर्णस्य) लोपो भवति। 'अलोऽन्त्यस्य' इत्यनेन 'क्स' इत्यस्य अन्त्यस्य अकारस्य लोपो भवति।

अनेन सूत्रेण क्सस्य अन्त्यस्यालोऽकारस्य लोपे 'अदुह् स् आताम्' इति जाते पूर्ववत्कार्ये- **अधुक्षाताम्**। झादौ- अधुक्षन्त, अदुग्धाः/अधुक्षथाः, अधुक्षाथाम्, अधुग्ध्वम्, अधुक्षि, अदुह्वहि/अधुक्षावहि, अधुक्षामहि।

लृङि- परस्मैपदे- अधोक्ष्यत्, अधोक्ष्यताम्, अधोक्ष्यन् इत्यादि। आत्मनेपदे- अधोक्ष्यत, अधोक्ष्येताम्, अधोक्ष्यन्त इत्यादि।

**एवं दिह उपचये ॥२२॥** (दिह्- अनिट्, सकर्मकः, उभयपदी)

स्वरितेतो **दिह** (दिह्) इति धातुः उपचये (उन्नतौ) अर्थे वर्तते। अस्य च सर्वेषु लकारेषु दुह्-धातुवदेव रूपाणि जायन्ते। यथा लटि- देग्धि/दिग्धे, दिग्धः/दिहाते, दिहन्ति/दिहते इत्यादि।

**लिह आस्वादने ॥२३॥** (लिह्- अनिट्, सकर्मकः, उभयपदी)

**लेढि। लीढः। लिहन्ति। लीढे। लिहाते। लिहते। लिक्षे। लिहाथे। लिढ्वे। लिलेह, लिलिहे। लेढासि, लेढासे। लेक्ष्यति, लेक्ष्यते। लेढु। लीढाम्। लिहन्तु। लीढि। लेहानि। लीढाम्। अलेट्, अलेड्। अलिक्षत्, अलीढ। अलिक्षत। अलेक्ष्यत्। अलेक्ष्यत॥**

आस्वादनार्थको लिह (लिह्) धातुः स्वरितेत्वादुभयपदी वर्तते। हकारान्तत्वाद् झलि परे पदान्ते च 'हो ढः' इति हस्य ढत्वं भवति। तदनु झषन्ततया ढकारात् परयोः तकारथकारयोः 'झषस्तथोर्धोऽधः' इत्यनेन धत्वं विधीयते। तस्य धकारस्य ढकारेण योगे ष्टुत्वेन ढकारो भवति। ततः पूर्वढकारस्य 'ढो ढे लोपः' इत्यनेन लोपो जायते। ततो ढकारलोपनिमित्तस्य ढकारस्य परस्मिन् विद्यमानत्वात् पूर्वस्य अण इकारस्य 'ढ्रलोपे पूर्वस्य दीर्घोऽणः' इति दीर्घो भवति। सकारे परे तु हस्य ढत्वम्, ढस्य च 'षढोः कः षि' इति कत्वम्, ककारात् परस्य सकारस्य षत्वम्, कषसंयोगेन क्षत्वं चेति प्रक्रिया स्मर्तव्या।

लिह् लट् (ल्) - लिह् तिप् (ति) - लिह् शप् (अ) ति - लिह् ति - लिढ् ति (हो ढः) - लेढ् ति (पुगन्तलघूपधस्य च) - लेढ् धि (झषस्तथोर्धोऽधः) - लेढ् ढि (ष्टुना ष्टुः) - ले ढि (ढो ढे लोपः) - **लेढि**।

लिह् लट् (ल्) - लिह् तस् - लिह् शप् (अ) तस् - लिह् तस् - लिढ् तस् (हो ढः) - लिढ् धस् (झषस्तथोर्धोऽधः) - लिढ् ढस् (ष्टुना ष्टुः) - लि ढस् (ढो ढे लोपः) - ली ढस् (ढ्रलोपे...) -

लीढस् - लीढर् - **लीढः** । झौ अन्तादेशे, वर्णयोगे च- लिहन्ति । सिपि- लिह् सि - लिढ् सि (हो ढः) - लेढ् सि (पुगन्तलघूपधस्य च) - लेक् सि (षढोः कः सि) - लेक् षि (आदेशप्रत्यययोः) - **लेक्षि** । थसादौ ढत्वे, थकारस्य धत्वे जाते पूर्ववत्- लीढः, लीढ । मिपि गुणे- **लेह्मि** । वसि मसि च गुणनिषेधे- **लिह्वः, लिह्मः** । आत्मनेपदे पित्वाभावात् सर्वत्र ङित्वे सिद्धे गुणनिषेधे लीढे, लिहाते, लिहते इत्यादीनिरूपाणि सिद्ध्यन्ति । लिटि विशेषकार्याभावे पूर्ववत्प्रक्रियया- लिलेह, लिलिहे इत्यादि । थल्, व, म इत्येतेषु क्रादिनियमान्नित्यमिडागमो बोध्यः । लुटि सिपि- लेढासि, थासि- लेढासे । लृटि- ढत्व-कत्व-षत्व-क्षत्वे- **लेक्ष्यति, लेक्ष्यते** इत्यादि । लोटि परस्मैपदे- लेढु/लीढात्, लीढाम्, लिहन्तु, लीढि/लीढात्, लीढम्, लीढ, लेहानि, लेहाव, लेहाम । आत्मनेपदे तु- लीढाम्, लिहाताम्, लिहताम् । लिक्ष्व, लिहाथाम्, लीढ्वम् । लेहै, लेहावहै, लेहामहै ।

लिह् लङ् (ल्) - अलिह् ल् - अलिह् ति - अलिह् अ ति - अलिह् ति - अलेह् ति (पुगन्त...) - अलेह् त् (इतश्च) - अलेह् (हल्ङ्याब्भ्यो दीर्घात्...) - अलेढ् (हो ढः) - अलेड् (झलां जशोऽन्ते) - **अलेट्/अलेड्** (वाऽवसाने) । एवं सिपि अपि । तसादौ तु- अलीढाम्, अलिहन् इत्यादि । आत्मनेपदे- अलीढ, अलिहाताम्, अलिहत, अलीढाः, अलिहाथाम्, अलीढ्वम्, अलिहि, अलिह्वहि, अलिह्महि । विधिलिङि परस्मैपदे- लिह्यात्, लिह्याताम्, लिह्युः इत्यादि । आत्मनेपदे- लिहीत, लिहीयाताम्, लिहीरन् इत्यादि । आशीर्लिङि परस्मैपदे- लिह्यात्, लिह्यास्ताम्, लिह्यासुः इत्यादि । आत्मनेपदे तु 'लिङ्सिचावात्मनेपदेषु' इति लिङः कित्वे गुणनिषेधे ढत्व-कत्व-षत्व-क्षत्वे- **लिक्षीष्ट**, लिक्षीयास्ताम्, लिक्षीरन् इत्यादीनि रूपाणि जायन्ते । लुङि परस्मैपदे 'शल इगुपधादनिट क्सः' इति च्लेः क्सादेशे ढत्व-कत्व-षत्व-क्षत्वे- **अलिक्षत्**, अलिक्षताम्, अलिक्षन् इत्यादि । आत्मनेपदे महि-भिन्नेषु हलादिप्रत्ययेषु (त, थास्, ध्वम्, वहि इत्येतेषु) दन्त्यादित्वात् 'लुग्वा दुहदिहलिह...) इत्यनेन सर्वादेशत्वेन 'क्स (स)' इत्यस्य विकल्पेन लुग्-विधीयते । अजादौ विभक्तौ तु 'क्सस्याचि' इत्यनेन क्सस्य अन्त्यस्यालोऽकारस्य नित्यमेव लोपो भवति । क्सस्य लुगभावे, अजादौ अलोपे च ढत्व-कत्व-षत्व-क्षत्वविधयः प्रवर्तन्ते । क्सस्य लुक्पक्षे तु त, थास् इत्येतयोः ढत्व-धत्व-ष्टुत्व-ढलोप-दीर्घविधयः क्रमात् प्रवर्तन्ते । ध्वमि तु ढत्व-ष्टुत्व-ढलोप-दीर्घाः । उक्तप्रक्रियया लिह्-धातोर्लुङ्यात्मनेपदे जायमानानि रूपाणि यथा- अलीढ/अलिक्षत, अलिक्षाताम्, अलिक्षन्त । अलीढाः/अलिक्षथाः, अलिक्षाथाम्, अलीढ्वम्/अलिक्षध्वम् । अलिक्षि, अलिह्वहि/अलिक्षावहि, अलिक्षामहि । लृङि लृड्वत्प्रक्रियया- अलेक्ष्यत्, अलेक्ष्यत इत्यादीनि रूपाणि ज्ञेयानि ।

**शेरते**

स्वप्नार्थकादकर्मकात् शी-धातोर्लट्यनुबन्धलोपे 'शी ल्' इति जाते, लस्य स्थाने ङित्वादात्मनेपदसंज्ञके प्रथमपुरुषस्य बहुवचने झ-प्रत्यये 'शी झः' इति जाते,झोऽन्तादेशं बाधित्वा 'आत्मनेपदेष्वनतः' इति अदादेशे 'शी अत' इति जाते, सार्वधातुकसंज्ञायां 'शीङः सार्वधातुके गुणः' इति सूत्रेण गुणे 'शे अत् इति जाते 'टित आत्मनेपदानां टेरे' इत्यनेन टेरेत्वे 'शे+अते' इत्यवस्थायाम् 'शीङो रुट्' इति सूत्रेण अतो रुडागमेऽनुबन्धलोपे, टित्वादाद्यवयवत्वे, वर्णयोगे 'शेरते' इति रूपं सिद्धम् ।

**धातुरूपावलिः**

**शीङ् स्वप्ने धातोर्लङि रूपाणि–**

| | | |
|---|---|---|
| अशेत | अशयाताम् | अशेरत |
| अशेथाः | अशयाथाम् | अशेध्वम् |
| अशयि | अशेवहि | अशेमहि |

**दुह प्रपूरणे धातोर्लुङि परस्मैपदे रूपाणि–**

| | | |
|---|---|---|
| अधुक्षत् | अधुक्षताम् | अधुक्षन् |
| अधुक्षः | अधुक्षतम् | अधुक्षत |
| अधुक्षम् | अधुक्षाव | अधुक्षाम |

**लिह आस्वादने धातोर्लटि आत्मनेपदे रूपाणि–**

| | | |
|---|---|---|
| लीढे | लिहाते | लिहते |
| लीक्षे | लिहाथे | लीढ्वे |
| लिहे | लीह्वहे | लीह्महे |

## वाक्येषु प्रयोगानुशीलनम्

१. बालकः खट्वायां शेते ।

२. सन्न्यासी भूमौ शयीत ।

३. अहं ह्यः सखिगृहे अशयि ।

४. शिष्या वेदमधीयते ।

५. पिता गां दुग्धं दोग्धि ।

६. छात्रा अद्य प्रातः बहुपाठान् अध्यगीषत ।

७. त्वं महिषीं पयो धुक्ष्व ।

## अभ्यासः

### १. अधस्तनसूत्राणि पठत

(क) क्सस्याचि ।

(ख) लुग्वा दुहदिहलिहगुहामात्मनेपदे दन्त्ये ।

(ग) लिङ्सिचावात्मनेपदेषु ।

(घ) गाङ्कुटादिभ्योऽञ्णिन्ङित् ।

(ङ) शल इगुपधादनिटः क्सः ।

### २. पाठात् समुचितपदमन्विष्य रिक्तस्थानं पूरयत

(क) इङो लिटि .......................... आदेशो भवति ।

(ख) .......................... लकारयोः इङो विकल्पेन गाङादेशो भवति ।

(ग) लिह्-धातोर्लुटि आत्मनेपदे मध्यमपुरुषैकवचने .......................... रूपम् ।

(घ) अजादौ तङि क्सस्य लोपकं सूत्रं .......................... अस्ति ।

(ङ) दिह्-धातो रूपाणि .......................... इति धातुवन्निष्पद्यन्ते ।

### ३. सङ्क्षेपेण उत्तरं लिखत

(क) लिह्-धातुः कस्मिन्नर्थे वर्तते ?

(ख) 'घुमास्थागापाजहातिसां हलि' इति सूत्रे के धातवो निर्दिष्टाः सन्ति ?

(ग) इङ्-धातुः कस्मादुपसर्गान्न व्यभिचरति ?

(घ) दुह्-धातुः केन कारणेन उभयपदी भवति ?

(ङ) दुह्-धातोः केषु प्रयोगेषु क्सस्य लुग्भवति ?

(च) इङ्-धातोर्लिटि गाङादेशविधायकं सूत्रं किम् ?

(छ) 'दुह्+लट्(थास्)' इत्यत्र किं रूपं निष्पद्यते ?

(ज) शीङ्-धातोरात्मनेपदप्रयोगे कारणं किम् ?

(झ) शीङः सार्वधातुके परे केन सूत्रेण प्राप्तं गुणं केन निषिद्धय पुनः केन गुणो भवति ?

(ञ) शिङो रुडागमः कुत्र कुत्र भवति ?

**४. दुह्-धातोर्लोटि उभयोः पदयो रूपाणि लिखत ।**

**५. अधस्तनप्रयोगेषु धातु-लकार-पुरुष-वचनानि निर्धारयत**

अध्यैष्ट, शेषे, धोक्ष्यते, अध्यैयि, लीढ्वे, दिग्धे, अधिजगिरे ।

**६. अधि+इ-धातोर्लुङि सविकल्पं रूपाणि लिखत ।**

**७. सूत्राणामर्थं लिखत**

(क) शीङः सार्वधातुके गुणः (ख) विभाषा लुङ्लृङोः

(ग) गाङ् लिटि (घ) शीङो रुट्

(ङ) शल इगुपधादनिटः क्सः

**८. अधस्तनप्रयोगाणां ससूत्रं सिद्धिपथं प्रदर्शयत**

(क) अध्यगीष्ट (ख) शेरते (ग) अधीते (घ) अधिजगे

(ङ) दोग्धि (च) अधोक् (छ) धुक्षीष्ट (ज) अधुक्षत्

(झ) अदुग्ध (ञ) लेक्षि

**९. शीङ्-धातोर्लिटि लुटि च रूपाणि लिखत ।**

**१०. पदानि प्रयुज्य वाक्यानि रचयत**

अधुक्षामहि, लेहानि, देग्धि, अधुक्षत, अधीषे, अधीष्व, शयीत ।

षोडशः पाठः

# ब्रू-ऊर्णु-धातू

**ब्रूञ् व्यक्तायां वाचि ॥२४॥** (ब्रू- अनिट्, सकर्मकः, ञित्वाद् उभयपदी)

ब्रूञ्-धातुर्व्यक्तायां वाचि अर्थे वर्तते । तत्र लटि क्रियाफलेऽकर्तृगे परस्मैपदे 'ब्रू ति' इत्यवस्थायां शपो लुकि कृते-

## णलाद्यादेशविधायकं विधिसूत्रम्

**ब्रुवः पञ्चानामादित आहो ब्रुवः ३।४।८४॥**

**ब्रुवो लटस्तिबादीनां पञ्चानां णलादयः पञ्च वा स्युर्ब्रुवश्चाऽऽहादेशः ।** अकार उच्चारणार्थः । **आह । आहतुः । आहुः ।**

(ब्रुवः, लटः, परस्मैपदानाम्, आदितः, पञ्चानाम्, णल्-अतुस्-उस्-थल्-अथुस्, ब्रुवः, आहः, वा)

**सरलार्थः** - ब्रू-धातोर्विहितानां लडादेशानां तिप्, तस्, झि, सिप्, थस् इत्येतेषां पञ्चानां स्थाने क्रमाद् णल्, अतुस्, उस्, थल्, अथुस् इत्येते पञ्च विकल्पेन आदिश्यन्ते, 'ब्रू' इति अङ्गस्य स्थाने 'आह्' इत्यादेशश्च भवति ।

अनेन सूत्रेण ब्रू-धातोः स्थाने आहादेशे तिपः स्थाने णलादेशे च कृतेऽनुबन्धलोपे- आह् अ -**आह** । एवं तसादौ- आहतुः, आहुः । सिपि 'आह्+थ' इति कृते-

## थकारादेशविधायकं विधिसूत्रम्

**आहस्थः ८।२।३५॥**

**चर्त्वम् । आत्थ । आहथुः ।**

(आहः, हः, झलि, थः)

**सरलार्थः** - झलि परे 'आह्' इत्यस्य (हकारस्य स्थाने) थकारादेशो भवति । 'अलोऽन्त्यस्य' इत्यनेन अन्त्यस्यालो हकारस्य स्थाने थादेशो भवति ।

अनेन सूत्रेण हकारस्य थकारे 'आथ् थ' इति जाते, पूर्वथकारस्य चर्त्वेन तकारे- आत्थ । थसि- आहथुः । णलादीनामभावपक्षे तु तिपि, शपो लुकि 'ब्रू ति' इत्यवस्थायाम्-

### ईडागमविधायकं विधिसूत्रम्

**ब्रुव ईट् ७।३।९३॥**

**ब्रुवः परस्य हलादेः पित ईट् स्यात् । ब्रवीति । ब्रूतः । ब्रुवन्ति । ब्रूते । ब्रुवाते । ब्रुवते ।**

(ब्रुवः, अङ्गात्, सार्वधातुके, हलि, पिति, ईट्)

**सरलार्थः** - ब्रू-धातोः परस्य हलादेः पित्-प्रत्ययस्य 'ईट्' आगमो भवति ।

अनेन सूत्रेण ईटि, गुणेऽवादेशे- **ब्रवीति** । तसि गुणनिषेधे- ब्रूतः । झोऽन्तादेशे उवङि- **ब्रुवन्ति** इत्यादि । आत्मनेपदे- गुणनिषेधे- **ब्रूते**, अजादिषु उवङि- ब्रुवाते, ब्रुवते, इत्यादि । लिटि- 'ब्रू+ल्' इति जाते-

### वचादेशविधायकं विधिसूत्रम्

**ब्रुवो वचिः २।४।५३॥**

**आर्धधातुके । उवाच । ऊचतुः । ऊचुः । उवचिथ, उवक्थ । ऊचे । वक्तासि, वक्तासे । वक्ष्यति, वक्ष्यते । ब्रवीत', ब्रूतात् । ब्रूताम् । ब्रुवन्तु । ब्रूहि, ब्रूतात् । ब्रूतम् । ब्रूत । ब्रवाणि । ब्रवाव । ब्रवाम । ब्रूताम् । ब्रवै । अब्रवीत् । अब्रूताम् । अब्रूत । ब्रूयात् । ब्रुवीत । उच्यात् । वक्षीष्ट ॥**

(ब्रुवः, आर्धधातुके, वचिः)

**सरलार्थः** - आर्धधातुकस्य विवक्षायां ब्रू-धातोः स्थाने वचि (वच्) इत्यादेशो भवति। 'वचि' इत्यस्य इकार उच्चारणार्थः ।

अनेन सूत्रेण'ब्रू' इत्यस्य 'वच्' इत्यादेशे, ततः तिपि, णलि 'वच् अ', धातोर्द्वित्वादिकार्ये, अभ्यासस्य 'लिट्यभ्यासस्योभयेषाम्' इत्यनेन सम्प्रसारणे, पूर्वरूपे, अनभ्यासस्य उपधावृद्धौ- **उवाच** । अतुसि तु द्वित्वात् प्रागेव 'वचिस्वपी'ति सम्प्रसारणे, पूर्वरूपे, ततो द्वित्वादिकार्ये- **ऊचतुः**, ऊचुः । थलि वैकल्पिके इटि- उवचिथ, इडभावे 'चोः कुरिति कुत्वे- **उवक्थ** इत्यादि । आत्मनेपदे- प्रागेव सम्प्रसारणे- **ऊचे**, ऊचाते, ऊचिरे इत्यादि । लोटि-ब्रवीत'/ब्रूयात्, ब्रूताम्, ब्रुवन्तु, ब्रूहि/ब्रूतात्, ब्रूतम्, ब्रूत, ब्रवाणि, ब्रवाव, ब्रवाम । आत्मनेपदे- ब्रूताम्, ब्रुवाताम्, ब्रुवताम् इत्यादि । लङि- अब्रवीत्, अब्रूत । अजादौ उवङादेशः । विधिलिङि- ब्रूयात्, ब्रुवीत । आशीर्लिङि- परस्मैपदे यासुटः कित्वाद् वचिस्वपीति सम्प्रसारणे- उच्यात् इत्यादि । आत्मनेपदे- वक्षीष्ट, वक्षीयास्ताम्, वक्षीरन् इत्यादि । लुङि- वच्यादेशादिकार्ये कृते 'अवच् च्लि त्' इत्यवस्थायाम्-

### अङादेशविधायकं विधिसूत्रम्

**अस्यतिवक्तिख्यातिभ्योऽङ् ३।१।५२॥**

**एभ्यश्च्लेरङ् स्यात् ॥**

(अस्यति-वक्ति-ख्यातिभ्यः, च्लेः, अङ्)

**सरलार्थः** - असु क्षेपणे (अस्), वच परिभाषणे (वच्), ख्या प्रकथने इत्येतेभ्यो धातुभ्यः परस्य च्लेः स्थाने 'अङ्' इत्यादेशो भवति । अत्र वच्, ख्या इत्येताभ्यां धातुभ्यां ब्रूञादेशस्य वच्-धातोः, चक्षिङादेशस्य ख्या-धातोरपि ग्रहणं भवतीति स्मर्तव्यम् ।

अनेन सूत्रेण च्लेरङि 'अवच् अ त्' इति जाते-

### उमागमविधायकं विधिसूत्रम्

**वच उम् ७।४।२०॥**

**अङि परे । अवोचत्, अवोचत । अवक्ष्यत्, अवक्ष्यत ।**

(वचः, अङि, उम्)

**सरलार्थः** - अङि परे सति वच्-धातोरङ्गस्य 'उम्' इत्यागमो भवति । मित्वाद् वचोऽन्त्यादचोऽकारात् परावयवत्वेन 'उ' इति आगमो भवति ।

अनेन सूत्रेण वच उमागमे, मित्वाद् अन्त्यादचः परावयवत्वे 'अव उच् अ त्' इति जाते, गुणे- **अवोचत्** । एवं तसादौ- अवोचताम्, अवोचन् इत्यादि । आत्मनेपदेऽपि एवमेव प्रक्रियया अवोचत, अवोचताम्, अवोचन्त इत्यादि । लृङि- अवक्ष्यत् । अवक्ष्यत ।

**चर्करीतं च** (ग.सू.) **। चर्करीतमिति यङ्लुगन्तस्य संज्ञा, तददादौ बोध्यम् ॥**

**सरलार्थः** - 'चर्करीतम्' इति यङ्लुगन्तस्य संज्ञा, तच्च यङ्लुगन्तप्रकरणम् अदादिगणान्तर्गतं बोध्यम् ॥ अयम् अदादिगणस्थं गणसूत्रं वर्तते । अदादिगणेऽस्य पाठेन यङ्लुगन्तस्यापि अदादिगणेऽन्तर्भावात् तत्रापि 'अदिप्रभृतिभ्यः शपः' इति शपो लुग् विधीयते ।

**ऊर्णुञ् आच्छादने ॥२५॥** (ऊर्णु- सेट्, सकर्मकः, उभयपदी)

आच्छादनार्थक ऊर्णुञ्-धातुरनेकाचो वर्तते । अस्य धातोरनुबन्धविनिर्मुक्तस्वरूपे द्वयोरचोर्विद्यमानत्वाद् धातुरयं सेट्, फलव्यधिकरणव्यापारवाचकत्वात् सकर्मकः, ञित्वाद् उभयपदी चेति बोध्यम् ।

### वृद्ध्यादेशविधायकं विधिसूत्रम्

**ऊर्णोतेर्विभाषा ७।३।९०॥**

**वा वृद्धिः स्याद्धलादौ पिति सार्वधातुके । ऊर्णौति, ऊर्णोति । ऊर्णुतः । ऊर्णुवन्ति । ऊर्णुते । ऊर्णुवाते । उर्णुवते ।**

(ऊर्णोतेः, पिति, हलि, सार्वधातुके, वृद्धिः, विभाषा)

**सरलार्थः** - हलादौ पिति सार्वधातुकसंज्ञके प्रत्यये परे सति ऊर्णुञ्-धातोरङ्गस्य विकल्पेन वृद्धिर्भवति । वैकल्पिकी वृद्धिरियं गुणं बाधित्वा विधीयते, पक्षान्तरे गुणोऽपि भवति ।

ऊर्णु लट् (ल्) - ऊर्णु तिप् (ति) - ऊर्णु अ ति - ऊर्णु ति - ऊर्णौ ति (ऊर्णोतेर्विभाषा) - **ऊर्णौति** । वृद्ध्यभावपक्षे 'सार्वधातुकार्धधातुकयोः' इति गुणे- **ऊर्णोति** । तसादौ अपिति ङित्वे सिद्धे गुणनिषेधः, अजादौ ङिति उवङादेशश्च- **ऊर्णुतः**, ऊर्णुवन्ति इत्यादि । आत्मनेपदे अपित्वात् सर्वत्र गुणनिषेधे पूर्ववत्- **ऊर्णुते**, ऊर्णुवाते, ऊर्णुवते इत्यादि । लिटि-

**वा. (ऊर्णोतेराम्नेति वाच्यम्) ॥**

(ऊर्णोतेः, आम्, न, इति, वाच्यम्)

**सरलार्थः** - ऊर्णुञ्-धातोः आम्-प्रत्ययो न भवति । लिटो विवक्षायाम् 'इजादेश्च गुरुमतोऽनृच्छः' इत्यनेन प्राप्तम् आम् अनेन वार्तिकेन निषिध्यते ।

ऊर्णु-धातोर्लिटि प्राप्तस्य आमोऽनेन वार्तिकेन निषेधे- ऊर्णु ल् - ऊर्णु तिप् (ति) - उर्णु णल् (अ) इत्यवस्थायाम् अजादित्वाद् 'अजादेर्द्वितीयस्य' इत्यनेन द्वितीयस्याचो णकारोत्तरवर्तिन उकारस्य द्वित्वे प्राप्ते 'वृक्षप्रचलने शाखा अपि प्रचलन्ति' इति न्यायेन 'र्णु इति भागस्य द्वित्वे प्राप्ते-

### द्वित्वनिषेधविधायकं सूत्रम्

**न न्द्राः संयोगादयः ६।१।३॥**

**अचः पराः संयोगादयो नदरा द्विर्न भवन्ति ।**

(द्वितीयस्य, एकाचः, संयोगादयः, न्द्राः, न, द्वे)

**सरलार्थः** - अचः परेषां संयोगादौ स्थितानां नकार-दकार-रेफाणां द्वित्वं न भवति ।

अनेन सूत्रेण रेफस्य द्वित्वनिषेधे, द्वित्वं प्रति णत्वस्यासिद्धत्वाद् 'नु' इति भागस्यैव द्वित्वे 'ऊर्णु नु अ' इति जाते 'अचोऽञ्णिति' इति वृद्धौ 'ऊर्णु नौ अ' इति जाते आवादेशे, वर्णयोगे-

**ऊर्णुनाव** । अतुसादौ अपिति 'असंयोगाल्लिट् कित्' इति कित्वे सिद्धे गुणनिषेधः, अजादौ उवङादेशश्च- **ऊर्णुनुवतुः**, ऊर्णुनुवुः इत्यादि । थलि 'उर्णु नु इथ' इत्यवस्थायां गुणे प्राप्ते-

### ङित्वद्विधायकमतिदेशसूत्रम्

**विभाषोर्णोः १।२।३॥**

**इडादिप्रत्ययो वा ङित् स्यात् । ऊर्णुनुविथ, ऊर्णुनविथ । ऊर्णुविता, ऊर्णविता । ऊर्णुविष्यति, ऊर्णविष्यति । ऊर्णौतु, ऊर्णोतु । ऊर्णुवानि । ऊर्णवै ॥**

(ऊर्णोः, इट्, ङित्, विभाषा)

**सरलार्थः** - ऊर्णुञ् आच्छादने इति धातोः परस्य इडादिप्रत्ययस्य विकल्पेन ङिद्वद्भावो भवति । अनेन लिङ्भिन्नेषु सर्वेषु आर्धधातुकलकारेषु कृते इटि ङित्वविकल्पो बोध्यः ।

अनेन सूत्रेण ङित्वपक्षे गुणनिषेधे, उकारस्य उवङादेशे- ऊणुनुविथ, ङित्वाभावे गुणे, अवादेशे- **ऊर्णुनविथ** । लुटि- ऊर्णुविता/ऊर्णविता, ऊर्णुवितारौ, ऊर्णुवितारः इत्यादि । लृटि- ऊर्णुविष्यति/ऊर्णविष्यति, ऊर्णुविष्यतः, ऊणुविष्यन्ति इत्यादि, आत्मनेपदे- ऊर्णुविष्यते, ऊर्णुविष्येते, ऊर्णुविष्यन्ते इत्यादि । लोटि तिपि विध्यादिष्वर्थेषु लट्वत्प्रक्रियया- ऊर्णौतु/ऊर्णोतु, आशिषि तु- ऊर्णुतात् । तसि, झौ च- ऊर्णुताम्, ऊर्णुवन्तु इत्यादि । सिपि- ऊर्णुहि/ऊर्णुतात् । थसि, थे च- ऊर्णुतम्, ऊर्णुत । उत्तमपुरुषे आटः पित्वाद् गुणे- ऊर्णवानि, ऊर्णवाव, ऊर्णवाम । आत्मनेपदे प्रथममध्यमपुरुषयोर्गुणनिषेधः, अजादौ उवङादेशश्च, उत्तमपुरुषे गुणः- ऊर्णुताम्, ऊर्णुवाताम्, ऊर्णुवताम्, ऊर्णुष्व, ऊर्णुवाथाम्, ऊर्णुध्वम्, ऊर्णवै, ऊर्णवावहै, ऊर्णवामहै ।

### गुणादेशविधायकं विधिसूत्रम्

**गुणोऽपृक्ते ७।३।९१॥**

**ऊर्णोतेर्गुणोऽपृक्ते हलादौ पिति सार्वधातुके । वृद्ध्यपवादः । और्णोत् । और्णोः । ऊर्णुयात् । ऊर्णुयाः । ऊर्णुवीत । ऊर्णूयात् । ऊर्णुविषीष्ट, ऊर्णविषीष्ट ॥**

(ऊर्णोतेः, अपृक्ते, पिति, हलि, सार्वधातुके, गुणः)

**सरलार्थः** - अपृक्तसंज्ञके हलादौ पित्-सार्वधातुकप्रत्यये परे सति ऊर्णुञ्-धातोरन्त्यस्य इकः स्थाने गुणादेशो भवति । गुणोऽयम् 'ऊर्णोतेर्विभाषा' इत्यस्यापवादो वर्तते । तिपि, सिपि च वृद्धिं बाधित्वा गुणोऽनेन विधीयते ।

ऊर्णु लङ् (ल्) - आ ऊर्णु ल् (आडजादीनाम्) - और्णु ल् (आटश्च) - और्णु तिप् (ति) - और्णु अ ति - और्णु ति - और्णु त् (इतश्च) - और्णो त् (गुणोऽपृक्ते) - **और्णोत्**। एवं सिपि- और्णोः। तसादौ ङित्वे गुणनिषेधे- और्णुताम्, और्णुवन् इत्यादि। आत्मनेपदेऽपि ङित्वेन गुणनिषेधे- और्णुत, और्णुवाताम्, और्णुवत इत्यादि। आत्मनेपदे सर्वत्रैव गुणे- और्णुत, और्णुवाताम्, और्णुवत इत्यादि। विधिर्लिङि- ऊर्णुयात्, ऊर्णुवीत इत्यादि। आशीर्लिङि परस्मैपदे 'णु इत्यस्य उकारस्य 'अकृत्सार्वधातुकयोः' इति दीर्घे- **ऊर्णूयात्**, ऊर्णूयास्ताम्, ऊर्णूयासुः इत्यादि। आत्मनेपदे ऊर्णु-धातोः सेट्त्वात् सीयुट इडागमे कृते 'विभाषोर्णोः' इति ङित्वपक्षे उवङादेशः, पक्षान्तरे च गुणोऽवादेशश्च- **ऊर्णुविषीष्ट/ऊर्णविषीष्ट** इत्यादि।

## विभाषया वृद्ध्यादेशविधायकं सूत्रम्

**ऊर्णोतेर्विभाषा ७।२।६॥**

**इडादौ सिचि वा वृद्धिः परस्मैपदे परे। पक्षे गुणः। और्णावीत्, और्णुवीत्, और्णवीत्। और्णाविष्टाम्, और्णुविष्टाम्, और्णविष्टाम्। और्णुविष्ट, और्णविष्ट। और्णुविष्यत्, और्णविष्यत्। और्णुविष्यत, और्णविष्यत॥**

(ऊर्णोतेः, इटि, सिचि, परस्मैपदे, विभाषा, वृद्धिः)

**सरलार्थः** - परस्मैपदसंज्ञकप्रत्ययपरके इडादौ सिचि परे सति ऊर्णुञ्-धातोरन्त्यस्य उकारस्य विकल्पेन वृद्धिर्भवति। अनेन सूत्रेण 'सिचि वृद्धिः परस्मैपदेषु' इत्यनेन प्राप्तां नित्यवृद्धिं बाधित्वा वैकल्पिकी वृद्धिर्विधीयते, अनेन वृद्ध्यभावपक्षे गुणो भवति।

लुङि परस्मैपदे एकस्मिन् पक्षे 'विभाषोर्णोः' इति ङित्वे सिद्धे सर्वत्रैव उवङादेशे- **और्णुवीत्**, और्णुविष्टाम्, और्णुविषुः इत्यादीनि रूपाणि जायन्ते। ङित्वाभावे नित्यवृद्धिं बाधित्वा अनेन सूत्रेण विकल्पेन वृद्धौ आवादेशे- **और्णावीत्**, और्णाविष्टाम्, और्णाविषुः इत्यादीनि रूपाणि निष्पद्यन्ते। अनेन वृद्ध्यभावे गुणे अवादेशे- **और्णवीत्**, और्णविष्टाम्, और्णविषुः इत्यादीनि रूपाणि च सिद्ध्यन्ति। आत्मनेपदे ङित्वपक्षे उवङादेशे, पक्षान्तरे च गुणे- **और्णुविष्ट, और्णविष्ट** इत्यादि। लृङि उभयोः पदयोः ङित्वे उवङि, अङित्वे च गुणभेदेन- **और्णुविष्यत्/और्णविष्यत्**, और्णुविष्यत, और्णविष्यत इत्यादीनि रूपाणि पूर्ववद् ज्ञेयानि।

**उवाच**

'ब्रूञ् व्यक्तायां वाचि' इत्यर्थकाद् ञितोभयपदिनो ब्रू-धातोः परोक्षानद्यतनभूतकालस्य विवक्षायाम् 'परोक्षे लिट्' इति सूत्रेण लिट्-लकारेऽनुबन्धलोपे 'ब्रू ल्' इति जाते, लस्य स्थानेऽकर्तृगे क्रियाफले 'तिप्तस्झि...' इत्यादिना सूत्रेण प्रथमपुरुषस्यैकवचने तिबादेशेऽनुबन्धलोपे 'ब्रू ति' इति जाते 'लिट् च' इत्यनेन आर्धधातुकसंज्ञायाम् 'ब्रुवो वचिः' इति सूत्रेण ब्रू-धातोः स्थाने वच्यादेशेऽनुबन्धलोपे 'वच् ति' इति जाते 'परस्मैपदानां णल...' इत्यादिना सूत्रेण तिपो णलादेशेऽनुबन्धलोपे 'वच् अ' इति जाते 'लिटि धातोरनभ्यासस्य' इति द्वित्वे, द्विरुक्तस्य पूर्वस्य अभ्याससंज्ञायाम् 'लिट्यभ्यासस्योभयेषाम्' इत्यनेन अभ्यासस्य वकारस्य सम्प्रसारणे, पूर्वरूपे 'उच् वच् अ' इति जाते, हलादिशेषे 'अत उपधायाः' इति उपधावृद्धौ 'उ वाच् अ' इति जाते वर्णसम्मेलने 'उवाच' इति रूपं सिद्ध्यति ।

**धातुरूपावलिः**

**ब्रूञ् व्यक्तायां वाचि धातोर्लङि परस्मैपदे रूपाणि–**

| | | |
|---|---|---|
| अब्रवीत् | अब्रूताम् | अब्रुवन् |
| अब्रवीः | अब्रूतम् | अब्रूत |
| अब्रवम् | अब्रूव | अब्रूम |

**ब्रूञ् व्यक्तायां वाचि धातोर्लुङि आत्मनेपदे रूपाणि–**

| | | |
|---|---|---|
| अवोचत | अवोचेताम् | अवोचन्त |
| अवोचथाः | अवोचेथाम् | अवोचध्वम् |
| अवोचे | अवोचावहि | अवोचामहि |

**ऊर्णुञ् आच्छादने धातोर्लोटि आत्मनेपदे रूपाणि–**

| | | |
|---|---|---|
| ऊर्णुताम् | ऊर्णुवाताम् | ऊर्णुवताम् |
| ऊर्णुष्व | ऊर्णुवाथाम् | ऊर्णुध्वम् |
| ऊर्णवै | ऊर्णवावहै | ऊर्णवामहै |

## वाक्येषु प्रयोगानुशीलनम्

१. बुधोऽर्थवद् वचो ब्रूते ।

२. जनाः सत्यं प्रियं च ब्रूयुः ।

३. महाराजा पृथ्वीनारायणो दिव्योपदेशान् उवाच ।

४. गुरुः त्वां किमवोचत् ?

५. त्वं श्वो भाषणे किं किं वक्तासि ?

६. भगिनी लज्जया हस्ताभ्यां मुखम् ऊर्णोति ।

७. मम पितामही प्रतिदिनं रामकथामाह ।

## अभ्यासः

**१. शुद्धमुच्चारयत**

(क) ऊर्णोतेर्विभाषा ।

(ख) न न्द्राः संयोगादयः ।

(ग) अस्यतिवक्तिख्यातिभ्योऽङ् ।

(घ) ब्रुवः पञ्चानामादित आहो ब्रुवः ।

(ङ) विभाषोर्णोः ।

**२. कोष्ठकात् समुचितपदं विचित्य रिक्तस्थानं पूरयत**

(क) अङि परे वचः .......................... जायते । (उमागमः, इडागमः)

(ख) 'अस्यतिवक्तिख्यातिभ्योऽङ्' इति सूत्रे ................... अस् धातुर्निर्दिष्टोऽस्ति । (आदादिकः, दैवादिकः)

(ग) ब्रू-धातोर्लटि सिपिआहपक्षे .......................... रूपम् । (आह्थः, आत्थः)

(घ) ब्रुवः परस्य हलादेः पितः .......................... भवति । (इट्, ईट्)

(ङ) ऊर्णु-धातोर्लिटि आम्-प्रत्ययः ..........................। (भवति, न भवति)

**३. सङ्क्षेपेण उत्तरं लिखत**

(क) ब्रू-धातुः कस्मिन्नर्थे प्रयुज्यते ?

(ख) 'अस्यतिवक्तिख्यातिभ्योऽङ्' इति सूत्रे के धातवो निर्दिष्टाः सन्ति ?

(ग) ब्रुवो लटि केषां वचनानां स्थाने णलादयो भवन्ति ?

(घ) ऊर्णु-धातुर्ब्रू-धातुश्च केन कारणेन उभयपदिनौ स्तः ?

(ङ) ब्रू-धातोः वच्यादेशः केषु लकारेषु भवति ?

(च) ऊर्णु-धातोः कोऽर्थः ?

(छ) 'ऊर्णु+लिट्(त)' इत्यत्र किं रूपं निष्पद्यते ?

(ज) 'आहस्थः' इति सूत्रं किं करोति ?

(झ) 'ऊचतुः' इत्यत्र केन कस्य सम्प्रसारणं विधीयते ?

(ञ) 'चर्करीतम्' इति कस्य संज्ञा? तच्च कस्मिन् गणेऽन्तर्भवति ?

४. **ब्रू-धातोर्लटि उभयोः पदयो रूपाणि सविकल्पं लिखत ।**

५. **अधस्तनप्रयोगेषु धातु-लकार-पुरुष-वचनानि निदर्शयत**

और्णोः, और्णविष्यत, ऊर्णुयाः, उच्यास्ताम्, अवक्ष्यत्, ब्रुवीत, ऊचे, आहथुः, ब्रुवते ।

६. **ऊर्णु-धातोर्लिटि परस्मैपदेसविकल्पं रूपाणि लिखत ।**

७. **सूत्राणामर्थं लिखत**

(क) विभाषोर्णोः (ख) न न्द्राः संयोगादयः

(ग) ऊर्णोतेराम्नेति वाच्यम् (घ) चर्करीतं च

(ङ) गुणोऽपृक्ते

८. **अधस्तनप्रयोगाणां ससूत्रं सिद्धिपथं प्रदर्शयत**

(क) आह (ख) ब्रवीति (ग) ब्रुवन्ति (घ) ऊचुः

(ङ) और्णोत् (च) ऊर्णुनुविथ (छ) ऊर्णौति

(ज) उच्यात् (झ) अवोचत (ञ) आत्थ

९. **'ब्रुवः पञ्चानामादित आहो ब्रुवः' इत्यनेन निर्दिष्टानां स्थान्यादेशानां सूचीं निर्मात ।**

१०. **यथानिर्देशं धातुरूपाणि विलिख्य तेषां वाक्येषु प्रयोगं दर्शयत**

(क) ब्रू-धातोर्लटि झौ आहपक्षे (ख) ब्रू-धातोर्लटि तसि आहाभावे

(ग) ब्रू-धातोर्विधिलिङि तिपि (घ) ब्रू-धातोर्लृटि प्रथमैकवचने

(ङ) ब्रू-धातोर्लोटि मिपि (च) ब्रू-धातोर्लुङि तिपि

(छ) ऊर्णु-धातोर्लटि सिपि (ज) ऊर्णुधातोर्लोटि थासि

सप्तदशः पाठः

# जुहोत्यादिगणे हु-भी-ह्रीधातवः

जुहोत्यादिप्रकरणे सार्वधातुकलकारेषु विहितस्य शप्-प्रत्ययस्य श्लुर्भवति। 'श्लुः' इति लोपस्य संज्ञा। तेनात्र शपः श्लुशब्देन लोपो भवति। अतोऽत्र श्लु-विकरणो भवति अर्थाद् अत्रापि विकरणप्रत्ययाभावो दृश्यते। परं लोपे सत्यपि 'श्लौ' इत्यादिसूत्रेण धातोर्द्वित्वं विधीयते तदनु अभ्यासादिकार्याणि जायन्ते। अत्र 'प्रत्ययस्य लुक्श्लुलुपः' इति सूत्रनिर्देशात् श्लुसंज्ञायां 'प्रत्ययलोपे प्रत्ययलक्षणम्' इति प्राप्तं प्रत्ययलक्षणकार्यं तु 'न लुमताङ्गस्य' इति सूत्रेण निषिद्ध्यते। अतः श्लुकरणात् शपो न स्थानिवद्भावः, तेन लुप्तस्य शपः शित्व-पित्वबलात् प्रवर्त्यमानानि कार्याणि अत्र न जायन्ते। एवमेव सार्वधातुकलकारेषु शपः श्लौ धातोर्द्वित्वे प्रथमस्य अभ्याससंज्ञा, उभयोश्च अभ्यस्तसंज्ञा भवतीति तत्प्रयुक्तकार्याणि विधीयन्ते। तत्र अभ्यस्तत्वाद् झोऽन्तादेशं बाधित्वा अदादेशो भवति।

**हु दानाऽऽदनयोः ॥१॥** (हु- अनिट्, सकर्मकः, परस्मैपदी)

हु-धातुः दानेऽर्थे, अदने (भक्षणे) अर्थे च वर्तते। लटि, तिपि, शपि 'हु अ ति' इत्यवस्थायाम्-

### शपः श्लुविधायकं विधिसूत्रम्

**जुहोत्यादिभ्यः श्लुः २।४।७५॥**

**जुहोत्यादिभ्यः परस्य शपः श्लुः स्यात्।**

(जुहोति-आदिभ्यः, शपः, श्लुः)

**सरलार्थः** - जुहोत्यादिगणपठितेभ्यो धातुभ्यो विहितस्य शप्प्रत्ययस्य श्लुर्भवति। अनेन श्लु-शब्देन लुप्तत्वाद् वक्ष्यमाणसूत्रेण धातोर्द्वित्वं भवति, शपः स्थानिवत्वञ्च न।

अनेन सूत्रेण शपः श्लौ 'हु ति' इति जाते-

### द्वित्वविधायकं विधिसूत्रम्

**श्लौ ६।१।१०॥**

**धातोर्द्वे स्तः श्लौ। जुहोति। जुहुतः॥**

(धातोः, अनभ्यासस्य, श्लौ, द्वे)

**सरलार्थः** - श्लौ परे सति धातोर्द्वित्वं भवति ।

अनेन सूत्रेण धातोर्द्वित्वे 'हु हु ति' इत्यवस्थायां द्विरुक्तस्य पूर्वस्य अभ्याससंज्ञायाम् 'कुहोश्चुः' इति हस्य कुत्वे 'ज' हु ति' इति जाते 'सार्वधातुकार्धधातुकयोः' इत्यनेन गुणे '**जुहोति**' इति रूपम् । तसि तु ङित्वाद् गुणनिषेधे- **जुहुतः** । झौ तु 'ज' हु झि' इत्यवस्थायाम् 'उभे अभ्यस्तम्' इति सूत्रेण अभ्यस्तसंज्ञायां झोऽन्तादेशं बाधित्वा-

### अतादेशविधायकं विधिसूत्रम्

**अदभ्यस्तात् ७।१।४॥**

**झस्यात्स्यात् । हुश्नुवोरिति यण् । जुह्वति ॥**

(अभ्यस्तात्, प्रत्ययस्य, झः, अत्)

**सरलार्थः** - अभ्यस्तसंज्ञकाद् अङ्गात् परस्य प्रत्ययस्थस्य झकारस्य स्थाने 'अत्' इत्यादेशो भवति । विधिरयम् 'झोऽन्तः' इति अन्तादेशस्यापवादो वर्तते ।

अनेन सूत्रेण झकारस्य अदादेशे 'ज' हु अति' इति जाते ङित्वाद् गुणनिषेधे, उवङादेशं बाधित्वा 'हुश्नुवोः सार्वधातुके' इत्यनेन यणि '**जुह्वति**' इति सिद्ध्यति । सिबादौ शपः श्लुरेव विशेषः, द्वित्वाभ्यासकार्य-गुण-गुणनिषेधादिकार्याणि तु पूर्ववदेव, तेन जुहोषि, जुहुथः, जुहुथ, जुहोमि, जुहुवः, जुहुमः इति रूपाणि जायन्ते ।

### विभाषया आमादेशविधायकं श्लुवद्विधायकञ्च विधिसूत्रम्

**भीह्रीभृहुवां श्लुवच्च ३।१।३९।**

**एभ्यो लिट्याम् वा स्यादामि श्लाविव कार्यं च । जुहवाञ्चकार । जुहाव । होता । होष्यति । जुहोतु । जुहुतात् । जुहुताम् । जुह्वतु । हेर्धिः । जुहुधि । आटि परत्वाद् गुणः । जुहवानि । अजुहोत् । अजुहुताम् ॥**

(भी-ह्री-भृ-हुवाम्, लिटि, आम्, अन्यतरस्याम्, श्लुवत्, च)

**सरलार्थः** - लिटि परे सति ञिभी (भी) भये, ह्री लज्जायाम्, डुभृञ् (भृ) धारणपोषणयोः, हु दानादनयोः इति चतुर्भ्यो धातुभ्यो विकल्पेन आम्-प्रत्ययो भवति, अस्मिन् (आमि) श्लौ इव कार्यं च भवति ।

लिटि 'हु ल्' इत्यवस्थायाम् अनेन सूत्रेण वैकल्पिके आम्-प्रत्यये तस्य श्लुवद्भावे च 'हु आम् ल्' इति जाते, श्लुवद्भावे धातोर्द्वित्वे, अभ्यासकार्ये 'जुहु आम् ल्' इति जाते, आर्धधातुकसंज्ञायां

गुणे, अवादेशे 'जुहवाम् ल्' इत्यवस्थायाम् 'आमः' इति आमो लुकि, पूर्ववद् लिट्परकस्य कृ-धातोरनुप्रयोगादिकार्ये **'जुहवाञ्चकार/जुहवांचकार'** इति। अस्-धातोर्भू-धातोश्चानुप्रयोगे सति पूर्ववत्प्रक्रियया 'जुहवामास, जुहवाम्बभूव/जुहवांबभूव' इति रूपाण्यपि भवन्त्येव। एवं तसादावपि बोध्यम्। आमभावपक्षे तु लिटि, तिपि, णलि, द्वित्वे, अभ्यासकार्ये 'जुहु अ' इत्यवस्थायां णित्वाद् 'अचो ञ्णिति' इत्यनेन वृद्धौ, आवादेशे 'जुहाव' इति सिद्ध्यति। तसि, झौ, थसि, थे च अतुसाद्यादेशानन्तरम् अजादित्वाद् ङित्वेन गुणनिषेधाच्च उवङादेशे **जुहुवतुः, जुहुवुः** इत्यादीनि रूपाणि जायन्ते। सिपः स्थाने थलि भारद्वाजमतेन इडागमस्य विकल्पनात् पक्षद्वयेऽपि गुणे, इट्पक्षे अवादेशे च **'जुहविथ/जुहोथ'** इति। मिपः स्थाने णलि 'णलुत्तमो वा' इति णित्वविकल्पनात् णित्वपक्षे वृद्धौ, अणित्वपक्षे च गुणे, आववौ च **'जुहाव/जुहव'** इति रूपे। वस्मसौ तु क्र्यादिनियमान्नित्यमेव इटि, उवङादेशे **जुहुविव, जुहुविम** इति सिद्ध्यतः। लुटि, लृटि च विशेषकार्याभावे पूर्ववत् होता, होष्यति इत्यादीनि रूपाणि जायन्ते।

लोटि प्रथमपुरुषे पूर्ववत्- जुहोतु/जुहुतात्, जुहुताम्, जुह्वतु। विध्याद्यर्थेषु सिपि, शपो लुकि, द्वित्वेऽभ्यासकार्ये, सेर्ह्यादेशे, हेरपित्वाद् ङिद्वद्भावे, गुणनिषेधे 'जुहु हि' इत्यवस्थायां 'हुझल्भ्यो हेर्धिः' इत्यनेन हेर्ध्यादेशे **'जुहुधि'** इति सिद्ध्यति। आशिषि तु हेर्वैकल्पिके तातङि 'जुहुतात्' इत्यपि जायते। उत्तमपुरुषे 'आडुत्तमस्य पिच्च' इति आटः पित्वाद् सर्वत्रैव गुणे- **जुहवानि, जुहवाव, जुहवाम**। लङि- अजुहोत्, अजुहुताम्, झौ- अदादेशं बाधित्वा 'सिजभ्यस्ते'ति जुसि, शपः श्लौ, द्वित्वादिकार्ये 'अजुहु+उस्' इत्यवस्थायां यणं बाधित्वा सवर्णदीर्घे प्राप्ते, तं बाधित्वा उवङि प्राप्ते, तं बाधित्वा सार्वधातुकेति गुणे प्राप्ते, ङित्वात् तन्निषेधे, पुनरुवङि प्राप्ते, तं बाधित्वा हुश्नुवोरिति यणि प्राप्ते, तमपि बाधित्वा-

### गुणादेशविधायकं विधिसूत्रम्

**जुसि च ७।३।८२॥**

**इगन्ताङ्गस्य गुणोऽजादौ जुसि। अजुहवुः। जुहुयात्। हूयात्। अहौषीत्। अहोष्यत्।**

(इकः, अङ्गस्य, अचि, जुसि, च, गुणः)

**सरलार्थः** - अजादौ जुस्-प्रत्यये परे सति इगन्तस्य अङ्गस्य अन्त्यवर्णस्य स्थाने गुणादेशो विधीयते।

अनेन सूत्रेण गुणे, अवादेशे- **अजुहवुः**। विधिलिङि- जुहुयात्, जुहुयाताम्, जुहुयुः इत्यादि। आशीर्लिङि- 'अकृत्सार्वधातुकयोरिति दीर्घे- **हूयात्**, हूयास्ताम्, हूयासुः इत्यादि। लुङि- 'सिचि

वृद्धिरिति वृद्धौ- **अहौषीत्** (अश्रौषीत् इतिवत्), अहौष्टाम्, अहौषुः इत्यादि । लृङि- अहोष्यत्, अहोष्यताम्, अहोष्यन् इत्यादि ।

**एवं ञिभी भये ॥२॥** (भी- अनिट्, अकर्मकः, परस्मैपदी)

**बिभेति ॥**

भयार्थको ञिभी-धातोरादौ विद्यमानस्य 'ञि' इत्यस्य 'आदिर्ञिटुडवः' इत्यनेन इत्संज्ञायां लोपो भवति । अत्र 'ञि' इत्यस्य इत्संज्ञा न तु 'कारस्य, तेनात्र ञित्वं नास्तीति स्मर्तव्यम् । तेन धातुरयं ञित्वादुभयपदी स्यादिति नैव चिन्तनीयम् । लटि, तिपि, शपि, श्लौ, धातोर्द्वित्वे, अभ्यासकार्ये 'बिभी+ति' इत्यवस्थायां गुणे '**बिभेति**' इति सिद्ध्यति ।

## इदादेशविधायकं विधिसूत्रम्

**भियोऽन्यतरस्याम् ६।४।११५॥**

**इकारो वा स्याद्धलादौ क्ङिति सार्वधातुके । बिभितः । बिभीतः ।**

**'एरनेकाचो' इति यण् । बिभ्यति । बिभयाञ्चकार । बिभाय । भेता । भेष्यति । बिभेतु । बिभितात् । बिभीतात् । बिभिताम् । बिभीताम् । अबिभेत् । बिभियात् । बिभीयात् । भीयात् । अभैषीत् । अभेष्यत् ॥**

(भियः, हलि, सार्वधातुके, क्ङिति, इत्, अन्यतरस्याम्)

**सरलार्थः** - किति ङिति च सार्वधातुकसंज्ञके प्रत्यये परे सति भी-धातोः ईकारस्य स्थाने इकारादेशो विकल्पेन भवति ।

तसि अनेन वैकल्पिके ह्रस्वे कृते- **बिभितः**, पक्षान्तरे- **बिभीतः** । जसि ङित्वाद् गुणनिषेधानन्तरम् 'एरनेकाचोऽसंयोगपूर्वस्य' इत्यनेन यणि- **बिभ्यति** । सिबादौ- बिभेषि, बिभिथः/बिभीथः, बिभिथ/बिभिथ, बिभेमि, बिभिवः/बिभीवः, बिभिमः/बिभीमः । लिटि 'भी ल्' इत्यवस्थायाम् 'भीह्रीभृहुवां श्लुवच्चे'ति वैकल्पिके आम्-प्रत्यये तस्य श्लुवद्भावे च पूर्ववत्प्रक्रियया 'बिभयाञ्चकार' इत्यादि, आमभावे- **बिभाय** । थलि भारद्वाजमतेन इटि- बिभयिथ/बिभेथः, वसि मसि च क्रादिनियमान्नित्यमिटि- **बिभ्यिव, बिभ्यिम** । लुटि- भेत्ता, भेत्तारौ, भेत्तारः इत्यादि । लृटि- भेष्यति, भेष्यतः, भेष्यन्ति इत्यादि । लोटि- अजादौ विभक्तौ वैकल्पिको ह्रस्वः, झौ अदादेशानन्तरम् 'एरनेकाचो...' इति यण्, उत्तमपुरुषे आटि ईकारस्य गुणोऽयादेशश्च- **बिभेतु/बिभितात्/बिभीतात्**, बिभिताम्/बिभीताम्, बिभ्यतु, बिभिहि/बिभीहि/बिभितात्/बिभीतात्, बिभितम्/बिभीतम्, बिभित/बिभीत,

बिभयानि, बिभयाव, बिभयाम। लङि- अबिभेत्, अबिभिताम्/अबिभीताम्, अबिभयुः इत्यादि। विधिलिङि यासुटः हलादिङित्वात् सर्वत्र वैकल्पिके ह्रस्वे- बिभियात्/बिभीयात्, बिभियाताम्/बिभीयाताम्, बिभियुः/बिभीयुः इत्यादि। आशीर्लिङि आर्धधातुकतया ह्रस्वाभावे- भीयात्, भीयास्ताम्, भीयासुः इत्यादि। लुङि 'सिचि वृद्धिरिति ईकारस्य वृद्धौ- अभैषीत्, अभैष्टाम्, अभैषुः इत्यादि। लृङि- अभेष्यत्, अभेष्यताम्, अभेष्यन् इत्यादि।

**ह्री लज्जायाम् ॥३॥** (ह्री- अनिट्, अकर्मकः, परस्मैपदी)

**जिह्रेति। जिह्रीतः। जिह्रियति। जिह्रयाञ्चकार, जिह्राय। ह्रेता। ह्रेष्यति। जिह्रेतु जिह्रीयात्। अजिह्रेत्। जिह्रीयात्। ह्रीयात्। अह्रैषीत्। अह्रेष्यत् ॥**

लज्जार्थकाद्ह्री-धातोर्लटि- जिह्रेति, जिह्रीतः, झौ अदादेशे, गुणनिषेधे, इयङादेशे च- जिह्रियति। जिह्रेषि, जिह्रीथः, जिह्रीथ। जिह्रेमि, जिह्रीवः, जिह्रीमः। लिटि भीधातुवद् विकल्पेन आम्, श्लुवद्भावश्च, आमभावे तु अजादौ किति 'अचि श्नु...' इति इयङ्ङिति भीधातोर्भिन्नप्रक्रिया बोध्या। तेन जिह्रयाञ्चकार/जिह्राय इत्यादीनि रूपाणि जायन्ते। लुडादौ भीधातुसदृशैव प्रक्रिया भवति परन्तु अत्र 'भियोऽन्यतरस्याम्' इति न प्रवर्तते। भीधातोः सिद्धिप्रक्रियायां यत्र यत्र यण् विधीयते तत्र तत्र च ह्रीधातौ इयङादेशो विधातव्यः।

**जुह्वति**

हु दानादनयोरिति जुहोत्यादिगणपठितात् सकर्मकाद् धातोर्वर्तमानक्रियावृत्तौ 'वर्तमाने लट्' इति लट्यनुबन्धलोपे, लटः स्थाने प्रथमपुरुषस्य बहुवचने झ्यादेशे 'हु झि' इति जाते, झेः सार्वधातुकसंज्ञायाम् 'कर्तरि शप्' इत्यनेन शप्यनुबन्धलोपे 'हु अ झि' इति जाते 'जुहोत्यादिभ्यः श्लुः' इति सूत्रेण शपो लुकि 'हु झि' इति जाते 'श्लौ' इति सूत्रेण धातोर्द्वित्वे 'हु हु झि' इति जाते 'पूर्वोऽभ्यासः' इत्यनेन अभ्याससंज्ञायाम् 'कुहोश्चुः' इत्यभ्यासस्य हकारस्य चुत्वे, बाह्यप्रयत्नसाम्याद् वर्गचतुर्थादेशे 'झः' हु झि' इति जाते 'अभ्यासे चर्च' इत्यनेन झकारस्य जश्त्वेन जकारे 'ज' हु झि' इति जाते 'उभेऽभ्यस्तम्' इति सूत्रेण अभ्यस्तसंज्ञायाम्, झोऽन्तादेशं बाधित्वा 'अदभ्यस्तात्' इति सूत्रेण झकारस्य स्थाने अदादेशे 'ज' हु अति' इति जाते 'सार्वधातुकार्धधातुकयोः' इत्यनेन प्राप्तस्य गुणस्य 'सार्वधातुकमपित्' इति ङित्वेन 'क्क्ङिति च' इति निषेधे, प्राप्तमुवङादेशं बाधित्वा 'हुश्नुवोः सार्वधातुके' इत्यनेन यणि, उकारस्य स्थाने वकारादेशे 'ज' ह् व् अति' इति जाते, वर्णयोगे 'जुह्वति' इति रूपं सिद्धम्।

**धातुरूपावलिः**

**हु-धातोर्लटि रूपाणि-**

| | | |
|---|---|---|
| जुहोति | जुहुतः | जुह्वति |
| जुहोषि | जुहुथः | जुहुथ |
| जुहोमि | जुहुवः | जुहुमः |

**भी-धातोर्लोटि रूपाणि-**

| | | |
|---|---|---|
| बिभेतु/बिभितात्/बिभीतात् | बिभिताम्/बिभीताम् | बिभ्यतु |
| बिभिहि/बिभीहि/बिभितात्/बिभीतात् | बिभितम्/बिभीतम् | बिभित/बिभीत |
| बिभयानि | बिभयाव | बिभयाम |

**ह्री-धातोर्लङि रूपाणि-**

| | | |
|---|---|---|
| अजिह्रेत् | अजिह्रीताम् | अजिह्रवुः |
| अजिह्रेः | अजिह्रीतम् | अजिह्रीत |
| अजिह्रयम् | अजिह्रीव | अजिह्रीम |

## वाक्येषु प्रयोगानुशीलनम्

१. अहं व्याघ्रादपि न बिभेमि ।

२. त्वं मार्जारान्न बिभीहि ।

३. बालिका कुक्कुराद् अबिभेत् ।

४. यूयं स्वप्रतिभायाः प्रस्फुटने मा जिह्रीत ।

५. यज्वा प्रतिदिनम् अग्नौ जुहोति ।

६. आस्तिकः अग्निहोत्रं जुहुयात् ।

७. याज्ञिका घृतम् अजुहवुः ।

## अभ्यासः

१. **शुद्धमुच्चारयत**

(क) जुहोत्यादिभ्यः श्लुः

(ख) भियोऽन्यतरस्याम्

(ग) भीह्रीभृहुवां श्लुवच्च

(घ) अदभ्यस्तात्

२. **परस्परं मेलयत**

| | |
|---|---|
| जुहोत्यादिगणे | इगन्ताङ्गस्य गुणः क्रियते । |
| श्लौ | हेर्धिर्विधीयते । |
| अभ्यस्ताद् झस्य | यण् विहितमस्ति । |
| जुहुधि इत्यत्र | श्लुविकरणं भवति । |
| 'जुसि च' इत्यनेन | लज्जायामर्थे वर्तते । |
| बिभ्यतुरित्यत्र | धातोर्द्वित्वं भवति । |
| ह्री-धातुः | अदादेशो विधीयते । |

३. **सङ्क्षेपेण उत्तरं लिखत**

(क) हु-धातुः कयोरर्थयोः प्रयुज्यते ?

(ख) 'भीह्रीभृहुवां श्लुवच्च' इत्यत्र केषां धातूनां निर्देशो विद्यते ?

(ग) अभ्यस्तसंज्ञाविधायकं सूत्रं किम् ? कस्य च तत्संज्ञा ?

(घ) जुहोत्यादिगणस्य विकरणविशेषविधायकं सूत्रं किम् ?

(ङ) जुहोत्यादिगणे झेर्जुसादेशः कस्मिन् कस्मिन् लकारे भवति ?

(च) भी-धातोः प्रयोगः कस्मिन्नर्थे क्रियते ?

(छ) 'भी+लृङ्(तिप्)' इत्यत्र किं रूपं निष्पद्यते ?

(ज) 'भियोऽन्यतरस्याम्' इति सूत्रेण किं विधीयते ?

(झ) 'बिभ्यति' इत्यत्र धातुविभक्ती निर्दिशत ?

(ञ) भी-ह्रीधात्वोर्लिटि आमः श्लुवद्भावस्य च विधायकं सूत्रं किम् ?

४. **हु-धातोर्लुटि लङि च रूपाणि लिखत ।**

५. **अधस्तनप्रयोगेषु धातु-लकार-पुरुष-वचनानि दर्शयत**

बिभ्युः, होतास्मि, जुहवाञ्चकार, जुहुयाः, भेष्यामः, जिह्रियति, अभैषीः ।

६. **ह्री-धातोर्लिटिरूपाणि लिखत ।**

७. **सूत्राणामर्थं लिखत**

(क) जुहोत्यादिभ्यः श्लुः
(ख) अदभ्यस्तात्
(ग) जुसि च
(घ) श्लौ

८. **अधस्तनप्रयोगाणां ससूत्रं सिद्धिपथं प्रदर्शयत**

(क) जुहोति
(ख) बिभ्यति
(ग) जुहाव
(घ) बिभयाञ्चकार
(ङ) बिभितः
(च) अजुहवुः
(छ) जिह्रेति
(ज) अभैषीत्

९. **यथानिर्देशं धातुरूपाणि विलिख्य तेषां वाक्येषु प्रयोगं दर्शयत**

(क) हु-धातोर्लटि मध्यमैकवचने
(ख) भी-धातोर्लुटि प्रथमपुरुषस्य बहुवचने
(ग) ह्री-धातोर्लुटि प्रथमपुरुषैकवचने
(घ) हु-धातोर्लृटि प्रथमपुरुषैकवचने
(ङ) हु-धातोर्लङि उत्तमपुरुषैकवचने
(च) भी-धातोर्लिटि प्रथमपुरुषबहुवचने

अष्टादशः पाठः

# पृ-हा-मा-धातवः

**जुहोत्यादिप्रकरणे**

**पॄपालनपूरणयोः** ॥४॥ (पॄ- सेट्, सकर्मकः, परस्मैपदी)

**पॄ**-धातुः पालनेऽर्थे पूरणेऽर्थे च वर्तते ।

## इदादेशविधायकं विधिसूत्रम्

**अर्तिपिपर्त्योश्च** ७।४।७७॥

**अभ्यासस्य इत्स्यात् श्लौ । पिपर्त्ति ॥**

(अर्ति-पिपर्त्योः, च, अभ्यासस्य, श्लौ, इत्)

**सरलार्थः** - श्लौ परे सति ऋ-धातोः, पॄ-धातोश्चाऽभ्यासस्य स्थाने इकारादेशो भवति ।

पॄ लट्(ल्), पॄ तिप्(ति), पॄ शप्(अ)ति, पॄ ति, पॄ पॄ ति, इत्यवस्थायामनेन सूत्रेण अभ्यासस्य इत्वे रपरत्वे, अनभ्यासस्य ॠकारस्य गुणे रपरत्वे- पिपर्ति । तसि- पॄ पॄ तस्, इत्यवस्थायामनेन अभ्यासस्य ॠकारस्य इत्वे रपरत्वे, हलादिशेषे 'पिपॄतस्' इति जाते-

## उदादेशविधायकं विधिसूत्रम्

**उदोष्ठ्यपूर्वस्य** ७।१।१०२॥

**अङ्गावयवौष्ठ्यपूर्वो य ॠत् तदन्तस्याङ्गस्य उत्स्यात् ॥**

(ओष्ठ्यपूर्वस्य, ॠतः, धातोः, उत्)

**सरलार्थः** - यस्मिन् धातौ अन्त्यवर्णो दीर्घ ॠकारो भवति, तस्मात् पूर्ववर्णश्च ओष्ठस्थानी भवति, तस्य धातोः ॠकारस्य स्थाने उकारादेशो भवति । 'उरण् रपरः' इति रपरत्वम् ।

अनेन सूत्रेण ॠकारस्य उत्वे, रपरत्वे'उर्' इत्यादेशे 'पिपुर्तस्' इति जाते-

## दीर्घादेशविधायकं विधिसूत्रम्

**हलि च** ८।२।७७॥

**रेफवान्तयोर्धातोरुपधाया इको दीर्घो हलि । पिपूर्तः । पिपुरति । पपार ॥**

(र्वोः, धातोः, उपधायाः, इकः, हलि, दीर्घः)

**सरलार्थः** - हलि परे सति रेफान्तस्य वकारान्तस्य च धातोः उपधाया इकः स्थाने दीर्घादेशो भवति ।

अनेन रेफस्योपधाया उकारस्य दीर्घे- पिपूर्तः । झौ तु झोऽदादेशे कृते हल्परत्वाभावाद् अनेन दीर्घाभावे- पिपुरति । लिटि, तिपि, णलि, धातोर्द्वित्वे, अभ्यासकार्ये 'अचो ञ्णिती'ति वृद्धौ, रपरत्वे- पपार । तसि- पूर्ववत् 'पपृ अतुस्' इत्यवस्थायाम्-

## विभाषया ह्रस्वादेशविधायकं विधिसूत्रम्

**शॄ दॄ प्रां ह्रस्वो वा ७।४।१२॥**

**शॄदॄप्रां ह्रस्वो वा स्यात् किति लिटि । पप्रतुः । पप्रुः ॥**

(शॄ-दॄ-प्राम्, लिटि, ह्रस्वः, वा)

**सरलार्थः** - किति लिटि परे सति शॄ-धातोः, दॄ-धातोः, पॄ-धातोश्च विकल्पेन ह्रस्वो भवति ।

अनेन सूत्रेण वैकल्पिके ह्रस्वे 'पपृ अतुस्' इति जाते, कित्त्वाद् गुणनिषेधे, ततः यणि- पप्रतुः,उसि- पप्रुः । अनेन ह्रस्वाभावे तु 'पपॄ अतुस्' इत्यवस्थायाम्-

## गुणादेशविधायकं विधिसूत्रम्

**ऋच्छत्यॄताम् ७।४।११॥**

**तौदादिकऋच्छेर्ऋधातोर्ऋृतां च गुणो लिटि । पपरतुः । पपरुः ॥**

(ऋच्छति-ऋृताम्, लिटि, गुणः)

**सरलार्थः** - लिटि परे सति तुदादिगणपठितस्य ऋच्छ्-धातोः, ऋ-धातोः, ॠकारान्तधातूनां च गुणो भवति ।

अनेन गुणे, रपरत्वे- पपरतुः, पपरुः इत्यादि ।

## विभाषया दीर्घादेशविधायकं सूत्रम्

**वॄतो वा ७।२।३८॥**

**वृङ्वृञ्भ्यामृदन्ताच्चेटो दीर्घो वा स्यान्न तु लिटि । परिता । परीता । परिष्यति । परीष्यति । पिपर्त्तु । पिपुरतु । पिपूर्हि । अपिपः । अपिपूर्त्ताम् । अपिपरुः । पिपूर्यात् । पिपूर्युः । पूर्यात् । अपारीत् ॥**

(वृतः, इटः, अलिटि, दीर्घः, वा) वृ च ऋृत् च वृतौ तस्मात् वृतः । 'वृ' इति वृङ्, वृञ् इत्यनयोर्ग्रहणम् ।

**सरलार्थः** - वृङ्-धातोः, वृञ्-धातोः, ॠकारान्तेभ्यो धातुभ्यश्च परस्य इट इकारस्य विकल्पेन दीर्घो भवति, लिटि परे तु अयं दीर्घो न भवति ।

पॄ लुट्(ल्), लस्य तिपि, तिपो डाभावे, तासिप्रत्यये, इटि, टिलोपे 'पॄ इता' इत्यवस्थायाम् अनेन सूत्रेण वैकल्पिके दीर्घे 'उदोष्ठ्यपूर्वस्ये'ति प्राप्तम् उत्वं बाधित्वा 'सार्वधातुके'ति गुणे- **परीता/परिता** इत्यादि । लृट्यपि दीर्घविकल्प एव विशेषः- **परिष्यति/परीष्यति** इत्यादि । लोटि ङिति गुणनिधेषे जाते 'उदोष्ठ्ये'ति उत्वम्, हलादौ विभक्तौ 'हलि चे'ति दीर्घश्चेति बोध्यम्, उत्तमपुरुषे तु आडागमस्य पित्वाद् गुणो भवत्येव । लङि तिपि 'अपिपर्+त्' इत्यवस्थायां तकारस्य हल्ङ्यादिलोपे, रेफस्य विसर्गे- **अपिपः**, एवं सिप्यपि । तसि गुणनिषेधे 'उदोष्ठ्ये'ति उत्वे रपरत्वे'हलि चे'ति दीर्घे- **अपिपूर्ताम्** । झौ अभ्यस्तत्वात् 'सिजभ्यस्ते'ति जुसि, 'जुसि चे'ति गुणे- **अपिपरुः** । अपिपः, अपिपूर्तम्, अपिपूर्त । मिपि पित्वाद् गुणे- अपिपरम् । अपिपूर्व, अपिपूर्म । विधिलिङि 'पिपॄ यास् त्' इत्यवस्थायां सलोपे, उत्वरपरत्वे, दीर्घे च- **पिपूर्यात्** । तसादौ पिपूर्याताम्, पिपूर्युः इत्यादि । आशीर्लिङि उरादेशे, दीर्घे च- **पूर्यात्**, पूर्यास्ताम्, पूर्यासुः इत्यादि । विशेषाः- लुङि, अटि, तिपि, च्लौ, च्लेः सिचि, इटि, इलोपे, ईटि 'अपॄ इस् ईत्' इति जाते, वक्ष्यमाणसूत्रेण इटो दीर्घस्य निषेधे'सिचि वृद्धि'रिति वृद्धौ, सलोपादिपूववत्कार्येषु- **अपारीत्** ।

## दीर्घादेशनिषेधविधायकं सूत्रम्

**सिचि च परस्मैपदेषु ७।२।४०॥**

**अत्र वृत इटो न दीर्घः । अपारिष्टाम् । अपरीष्यत् । अपरिष्यत् ।**

(वृतः, इटः, सिचि, च, परस्मैपदेषु, दीर्घः, न)

**सरलार्थः** - परस्मैपदसंज्ञक-प्रत्ययपरके सिचि परे सति वृङ्-धातोः, वृञ्-धातोः, ॠकारान्तेभ्यो धातुभ्यश्च परस्य इट इकारस्य दीर्घो न भवति । पूर्वसूत्रेण वैकल्पिके दीर्घे प्राप्तेऽनेन निषिध्यते ।

तसि अनेन सूत्रेण दीर्घनिषेधे, पूर्ववत्- अपारिष्टाम् । लृङि 'वृतो वा' इति इटो वैकल्पिकदीर्घे- **अपरीष्यत्/अपरिष्यत्** इत्यादि ।

**ओहाक् त्यागे ॥५॥** (हा- अनिट्, सकर्मकः, परस्मैपदी)

**जहाति ॥**

त्यागे'र्थे प्रयुज्यमानाद् ओहाक् इति धातो ओकार-ककारौ इतौ स्तः । ओकारस्य अनुनासिकत्वाद् 'उपदेशेऽजनुनासिक इत्' इति अन्त्यस्य ककारस्य च 'हलन्त्यम्' इति इत्संज्ञायां 'हा' इत्याकारान्तस्वरूपमवशिष्यते । तस्य च सार्वधातुकलकारेषु किति ङिति च हलादौ विभक्तौ 'जहातेश्च' इत्यागामिना सूत्रेण विकल्पेन आकारस्य स्थाने इकारादेशो विधीयते । पक्षान्तरे 'ई हल्यघोः' इति ईत्वं भवति । अजादौ विभक्तौ तु 'श्नाभ्यस्तयोरातः' इत्यनेन आकारस्य लोपः क्रियते ।

हा लट् (ल्) - हा तिप् (ति) - हा शप् (अ) ति - हा ति (जुहोत्यादिभ्यः श्लुः) - हा हा ति (श्लौ) - ह हा ति (ह्रस्वः) - झ हा ति (कुहोश्चुः) - ज हा ति (अभ्यासे चर्च) - **जहाति** ।

## इदादेशविधायकं विधिसूत्रम्

**जहातेश्च ६।४।११६॥**

**इद्वा स्याद्धलादौ क्ङिति सार्वधातुके । जहितः ॥**

(जहातेः, हलि, सार्वधातुके, क्ङिति, इत्, अन्यतरस्याम्)

**सरलार्थः** - हलादि-सार्वधातुके किति ङिति च प्रत्यये परे सति हा-धातोः (ओहाक्-धातोः) अन्त्यवर्णस्य स्थाने विकल्पेन इकारादेशो भवति ।

हा लट् (ल्) - हा तस् - हा शप् (अ) तस् - हा तस् (जुहोत्यादिभ्यः श्लुः) - हा हा तस् (श्लौ) - ह हा तस् (ह्रस्वः) - झ हा तस् (कुहोश्चुः) - ज हा तस् (अभ्यासे चर्च) - ज हि तस् (जहातेश्च) - जहितस् - जहितर् - **जहितः** । इत्वाभावपक्षे-

## ईदादेशविधायकं विधिसूत्रम्

**ई हल्यघोः ६।४।११३॥**

**श्नाभ्यस्तयोरात ईत् स्यात् सार्वधातुके क्ङिति हलादौ न तु घोः । जहीतः ॥**

(श्ना-अभ्यस्तयोः, आतः, हलि, सार्वधातुके, क्ङिति, ई, अघोः)

**सरलार्थः** - हलादि-सार्वधातुके किति ङिति च प्रत्यये परे सति श्ना-विकरणस्य, घु-संज्ञकभिन्नानाम् अभ्यस्तसंज्ञकानां च आकारस्य स्थाने ईकारादेशो भवति । सूत्रेऽस्मिन् 'अघोः' इति निर्देशात् घुसंज्ञकेषु डुदाञ् (दा) दाने, दाण् (दा) दाने, डुधाञ् धारणपोषणयोः

इत्येतेषु आकारान्तधातुषु सत्यामपि अभ्यस्तसंज्ञायाम् ईत्वविधेः प्रसक्तिर्नास्तीति स्मर्तव्यम् ।

ज हा तस् - ज ही तस् (ई हल्यघोः) - जहीतस् - जहीतर् - **जहीतः** ।

## आकारलोपविधायकं विधिसूत्रम्

**श्नाभ्यस्तयोरातः ६।४।११२॥**

**अनयोरातो लोपः स्यात् क्ङिति सार्वधातुके । जहति । जहौ । हाता । हास्यति । जहातु, जहितात्, जहीतात् ॥**

(श्ना-अभ्यस्तयोः, आतः, सार्वधातुके, क्ङिति, लोपः)

**सरलार्थः** - सार्वधातुकसंज्ञके किति ङिति च प्रत्यये परे सति श्ना-विकरणस्य, अभ्यस्तसंज्ञकस्य च आकारस्य लोपो भवति ।

झि-विभक्तौ पूर्ववत्- ज हा झि - ज हा अति (अदभ्यस्तात्) - ज ह् अति (श्नाभ्यस्तयोरातः) - **जहति** । जहासि, जहिथः/जहीथः, जहिथ/जहीथ । जहामि, जहिवः/जहीवः, जहिमः/जहीमः । लिटि- तिपि, णलि 'आत औ णलः' इति णलोऽकारस्य औकारे- हा औ, द्वित्वे, अभ्यासकार्ये- जहा औ, वृद्धौ- **जहौ** । अतुसि पूर्ववत्- जहा अतुस्, 'आतो लोप इटि च' इति आलोपे- जह् अतुस् - जहतुस् - जहतुर् - **जहतुः** । जहुः । थलि 'ऋतो भारद्वाजस्य' इति वेटि, इट्पक्षे आकारलोपे- **जहिथ/जहाथ** । जहथुः । जह । जहौ । वे, मे च क्रादिनियमान्नित्यमिटि- **जहिव, जहिम** । लुटि- हाता, लृटि- हास्यति इत्यादि । लोटि- विध्यादिष्वर्थेषु तिपि- **जहातु**, आशिषि तु विकल्पितस्य तातङो ङित्वाद् पूर्ववद् धातोराकारस्य विकल्पेन इत्वे, तदभावे च ईत्वे- **जहितात्/जहीतात्/जहातु** ।झौ झोऽदादेशे, आलोपे च- **जहतु** । सिपि-

## आ-इ-ई- आदेशविधायकं सूत्रम्

**आ च हौ ६।३।११७॥**

**जहातेर्हौ परे आ स्याच्चादिदीतौ । जहाहि, जहिहि, जहीहि । अजहात् । अजहुः ॥**

(जहातेः, हौ, आ, इत्, च, अन्यतरस्याम्)

**सरलार्थः** - हौ परतः सति हा-धातोरन्त्यवर्णस्य (आकारस्य) स्थाने आकारः, इकारः, ईकारश्चेति त्रयो वैकल्पिका आदेशा भवन्ति । आकारान्तादेशविधायके'स्मिन् सूत्रे 'च' इत्यस्य पाठात् इत्वम्, ईत्वं च विधीयेते इति स्मर्तव्यम् ।

हा लोट् (ल्) - हा सिप् (सि) - हा शप् (अ) सि) - हा सि - हा हा सि - ह हा सि -

झ हा सि - ज हा सि - ज हा हि (सेर्ह्यपिच्च), इत्यवस्थायाम् 'आ च हौ' इति सूत्रेण आकारस्य आत्वे, इत्वे, ईत्वे च कृते क्रमात्- **जहाहि/जहिहि/जहीहि**, आशिषि तु पूर्ववत्- **जहितात्/जहीतात्** इत्यपि । जहितम्/जहीतम् । जहित/जहीत । उत्तमपुरुषे शप्-श्लु-द्वित्वाभ्यासकार्यानन्तरम् आडागमे, तस्य च पित्वेन आलोपस्याप्राप्तौ सवर्णदीर्घे- **जहानि, जहाव, जहाम** । लङि- अजहात्, अजहिताम्/अजहीताम्, अजहुः इत्यादि । विधिलिङि-

## आकारलोपविधायकं विधिसूत्रम्

**लोपो यि ६।४।११८॥**

**जहातेरालोपो यादौ सार्वधातुके । जह्यात् । एर्लिङि । हेयात् । अहासीत् । अहास्यत् ॥**

(जहातेः, आतः, सार्वधातुके, यि, लोपः)

**सरलार्थः** - यकारादि-सार्वधातुक-प्रत्यये परे सति हा-धातोः आकारस्य लोपो भवति ।

हा लिङ् (ल्) - हा तिप् (ति) - हा शप् (अ) ति - हा ति - हा यास् ति (यासुट् परस्मैपदेषूदात्तो ङिच्च) - हा हा यास् ति - ह हा यास् ति - झ हा यास् ति - ज हा यास् ति - ज ह् यास् ति (लोपो यि) - ज ह् यास् त् (इतश्च) - ज ह् या त् (लिङः सलोपोऽनन्त्यस्य) - **जह्यात्** । तसादौ- जह्याताम्, जह्युः इत्यादि । आशीर्लिङि 'एर्लिङि' इति धातोराकारस्य एत्वं विधीयते । हा ल् - हा तिप् (ति) - हा यास् ति - हे यास् ति (एर्लिङि) - हे यास् त् (इतश्च) - हे या त् (स्कोः संयोगाद्योरन्ते च) - **हेयात्** । तसादौ- हेयास्ताम्, हेयासुः इत्यादि । लुङि अनिट्त्वात् सिच इण्निषेधे 'यमरमनमातां सक्च' इत्यनेन इट्-सकौ विधीयेते । तिपि- हा ल् - अहा ल् - अहा ति - अहा च्लि ति - अहा सिच् (स्) ति - अहा स् त् (इतश्च) - अहा स् ईत् (अस्तिसिचोऽपृक्ते) - अहास् इस् ईत् (यमरमनमातां सक्च) - अहास् इ ईत् (इट ईटि) - अहास् ई त् (अकः सवर्णे दीर्घः) - **अहासीत्** । तसि- अहा सिच् (स्) तस् - अहा स् ताम् (तस्थस्थमिपां तान्तन्तामः) -अहास् इस् ताम् (यमरम...) - अहास् इष् ताम् (आदेशप्रत्यययोः) - अहास् इष् टाम् (ष्टुना ष्टुः) - **अहासिष्टाम्** । अहासिषुः । अहासीः, अहासिष्टम्, अहासिष्ट । अहासिषम्, अहासिष्व, अहासिष्म । लृङि- अहास्यत्, अहास्यताम्, अहास्यन् इत्यादि ।

**माङ् माने शब्दे च ॥६॥** (मा- अनिट्, सकर्मकः, ङित्वाद् आत्मनेपदी)

मानार्थे शब्दार्थे च प्रयुज्यमानो माङ्-धातोर्ङकारस्य 'हलन्त्यम्' इति इत्वे 'मा' इति शिष्यते । ङित्वविधानाद् धातोरस्माद्विहितस्य लस्य स्थाने 'अनुदात्त ङित आत्मनेपदम्' इति

आत्मनेपदसंज्ञका तङादयो विधीयन्ते ।

## इदादेशविधायकं विधिसूत्रम्

**भृञामित् ७।४।७६॥**

**भृञ् माङ् ओहाङ् एषां त्रयाणामभ्यासस्य इत्स्यात् श्लौ । मिमीते । मिमाते । मिमते । ममे । माता । मास्यते । मिमीताम् । अमिमीत । मासीष्ट । अमास्त । अमास्यत ॥**

(भृञाम्, त्रयाणाम्, अभ्यासस्य, श्लौ, इत्)

**सरलार्थः** - श्लु-विषये भृञ् (भृ), माङ् (मा), ओहाङ् (हा) इति धातुत्रयस्याऽभ्यासस्य अन्त्यवर्णस्य स्थाने इकारादेशो भवति ।

मा लट् (ल्) - मा त - मा शप् (अ) त - मा त (जुहोत्यादिभ्यः श्लुः) - मा मा त - मि मा त (भृञामित्) - मि मी त (ई हल्यघोः) - मि मी ते (टित आत्मनेपदानां टेरे) - **मिमीते** । आतामि- मा मा आताम् - मि मा आताम् (भृञामित्) - मि म् आताम् (श्नाभ्यस्तयोरातः) - मि म् आते (टित आत्मनेपदानां टेरे) - **मिमाते** । झे- मा मा झ - मि मा झ (भृञामित्) - मि मा अत (अदभ्यस्तात्) - मि म् अत (श्नाभ्यस्तयोरातः) - मि म् अते (टित आत्मनेपदानां टेरे) - **मिमते** । मिमीषे, मिमाथे, मिमीध्वे । मिमे, मिमीवहे, मिमीमहे । एवम्प्रकारेण लोडादावपि सार्वधातुकलकारेषु अनेन सूत्रेण अभ्यासस्य इत्वं बोध्यम्, हलादौ 'ई हल्यघोः' इत्यनभ्यासस्य ईत्वञ्च । लिडादिष्वार्धधातुकलकारेषु तु विशेषकार्याभावे पूर्ववदेव प्रक्रियया- ममे, माता, मास्यते इत्यादीनि रूपाणि जायन्ते ।

**जहितः/जहीतः**

ओहाक् त्यागे इति सकर्मकाद् धातोर्वर्तमानकालस्य विवक्षायां 'वर्तमाने लट्' इति लट्यनुबन्धलोपे, लटः स्थाने प्रथमपुरुषस्य द्विवचने तसादेशे 'हा तस्' इति जाते, तसः सार्वधातुकसंज्ञायां 'कर्तरि शप्' इत्यनेन शप्यनुबन्धलोपे 'हा अ तस्' इति जाते 'जुहोत्यादिभ्यः श्लुः' इति सूत्रेण शपो लुकि 'हातस्' इति जाते 'श्लौ' इति सूत्रेण धातोर्द्वित्वे 'हा हा तस्' इति जाते 'पूर्वोऽभ्यासः' इत्यनेन अभ्याससंज्ञायां 'ह्रस्वः' इत्यभ्यासस्य ह्रस्वे 'ह हा तस्' इति जाते 'कुहोश्चुः' इति चुत्वे 'झ हा तस्' इति जाते 'अभ्यासे चर्च' इत्यनेन झकारस्य जश्त्वे 'ज हातस्' इति जाते 'सार्वधातुकमपित्' इति ङित्वे 'जहातेश्च' इति सूत्रेण आकारस्य वैकल्पिके इत्वे, वर्णयोगे 'जहितस्' इति जाते, सकारस्य रुत्वे विसर्गे च 'जहितः' इति रूपं सिद्धम्। इत्वाभावपक्षे अभ्यस्तसंज्ञायाम् 'ई हल्यघोः' इत्यनेन आकारस्य ईत्वे, सकारस्य रुत्वे विसर्गे च 'जहीतः' इत्यपि रूपं सिद्धचति ।

**धातुरूपावलिः**

**पॄ-धातोः आशीर्लिङि रूपाणि-**

| | | |
|---|---|---|
| पूर्यात् | पूर्यास्ताम् | पूर्यासुः |
| पूर्याः | पूर्यास्तम् | पूर्यास्त |
| पूर्यासम् | पूर्यास्व | पूर्यास्म |

**हा-धातोर्विधिलिङि रूपाणि-**

| | | |
|---|---|---|
| जह्यात् | जह्याताम् | जह्युः |
| जह्याः | जह्यातम् | जह्यात |
| जह्याम् | जह्याव | जह्याम |

**मा-धातोर्लोटि रूपाणि-**

| | | |
|---|---|---|
| मिमीताम् | मिमाताम् | मिमताम् |
| मिमीष्व | मिमाथाम् | मिमीध्वम् |
| मिमै | मिमावहै | मिमामहै |

## वाक्येषु प्रयोगानुशीलनम्

१. विश्ववाहो जगत् पिपुरति ।

२. सरस्वती तव मस्तिष्कं ज्ञानेन पूर्यात् ।

३. विद्यार्थी स्वाध्ययनं न जहाति ।

४. महात्मा गौतमबुद्धो राजप्रासादं जहौ ।

५. सज्जनाः काम-क्रोध-लोभ-मोहान् जह्युः ।

६. अभियन्ता मार्गं क्षेत्रञ्च मिमीते ।

७. ह्यो रात्रौ वने व्याघ्र उच्चैः अमिमीत ।

## अभ्यासः

### १. शुद्धोच्चारणं विधत्त

(क) श्नाभ्यस्तयोरातः

(ख) ई हल्यघोः

(ग) उदोष्ठ्यपूर्वस्य

(घ) ऋच्छत्यॄताम्

(ङ) अर्तिपिपर्त्योश्च

### २. पाठस्य साहाय्येन समुचितपदैः रिक्तस्थानं पूरयत

(क) हा-धातुः .................... अर्थे प्रयुज्यते ।

(ख) परीष्यति इत्यत्र .................... सूत्रेण वैकल्पिको दीर्घो भवति ।

(ग) हलि परे रेफान्तस्य .................... च धातोरुपधाया इको दीर्घो भवति ।

(घ) श्लुविषये मा-धातोरभ्यासस्य .................... भवति ।

(ङ) हा-धातोर्हौ .................... रूपाणि जायन्ते ।

### ३. सङ्क्षेपेण उत्तरं लिखत

(क) ङितो मा-धातोः प्रयोगः कस्मिन्नर्थे भवति ?

(ख) 'भृञामित्' इत्यत्र भृञामित्यनेन केषां ग्रहणं भवति ?

(ग) 'श्नाभ्यस्तयोः' इति कयोः पदयोः समस्तरूपम् ?

(घ) 'पिपूर्तः' इत्यत्र इकारस्य दीर्घसम्पादकं सूत्रं किम् ?

(ङ) आशीर्लिङि हा-धातोराकारस्य एत्वं केन सूत्रेण विधीयते ?

(च) पृ-धातोः प्रयोगः कस्मिन्नर्थे क्रियते ?

(छ) 'मा+लृट्(वस्)' इत्यत्र किं रूपं निष्पद्यते ?

(ज) 'लोपो यि' इति सूत्रं किं करोति ?

(झ) 'जहाति' इत्यत्र ईत्त्वादेशाप्रवृत्तौ कारणं किम् ?

(ञ) हा-धातोः कस्मिन् प्रयोगे त्रीणि कार्याणि पर्यायेण भवन्ति ?

**४. पॄ-धातोर्लिटिलुटि च रूपाणि लिखत ।**

**५. अधस्तनप्रयोगेषु धातु-लकार-पुरुष-वचनानि दर्शयत**

पप्रतुः, परीतारौ, पिपराणि, जहौ, मिमते, अहासीः, अजहीम ।

**६. मा-धातोर्लृङिरूपाणि लिखत ।**

**७. सूत्राणामर्थं लिखत**

(क) आ च हौ

(ख) सिचि च परस्मैपदेषु

(ग) ऋच्छत्यॄताम्

(घ) शॄदॄप्रां ह्रस्वो वा

(ङ) श्नाभ्यस्तयोरातः

**८. अधस्तनप्रयोगाणां ससूत्रं सिद्धिपथं प्रदर्शयत**

(क) पिपर्ति (ख) पपरतुः (ग) पिपूर्तः (घ) परीता

(ङ) अपारिष्टाम् (च) जहति (छ) जहाहि (ज) जह्यात्

(झ) हेयात् (ञ) अहासीत् (ट) मिमीते

**९. अधस्तनपदानां वाक्येषु प्रयोगं दर्शयत**

पपरुः, अमास्त, मास्यते, जहातु, जह्याः, हाता, परिष्यति ।

एकोनविंशः पाठः

# डुभृञाद्युभयपदिनो धातवः

## जुहोत्यादिगणे

**डुभृञ् धारण-पोषणयोः ॥८॥** (भृ- अनिट्, सकर्मकः, ञित्वाद् उपयपदी)

**बिभर्त्ति । बिभृतः । बिभ्रति । बिभृते । बिभ्राते । बिभ्रते । बिभराञ्चकार । बभार । बभर्थ । बभृव । बभृम । बिभराञ्चक्रे । बभ्रे । भर्त्ता । भरिष्यति । भरिष्यते । बिभर्तु । बिभृहि । बिभराणि । बिभृताम् । बिभृध्वम् । अबिभः । अबिभृताम् । अबिभरुः । अबिभृत । बिभृयात् । बिभ्रीत । 'रिङ्शये'ति रिङ् । भ्रियात् । ('उश्च') । भृषीष्ट । अभार्षीत् । 'ह्रस्वादङ्गात्' । अभृत । अभरिष्यत् । अभरिष्यत ॥**

धारणे, पोषणे चार्थे विद्यमानस्य डुभृञ् (भृ) इति धातो 'डु' इत्यस्य, 'कारस्य च इत्संज्ञायां लोपे 'भृ' इत्येव शिष्यते । ञित्वादुभयपदिनोऽस्माद्धातोर्लटि, अकर्तृगामिनि क्रियाफले परस्मैपदे तिपि, शपि, तस्य श्लौ, द्वित्वे, अभ्यासकार्ये 'बभृति' इति जाते 'भृञामित्' इत्यनेन इत्वे'सार्वधातुके'ति गुणे- बिभर्ति । तसादौ- बिभृतः, बिभ्रति इत्यादि । कर्तृगामिनि क्रियाफले आत्मनेपदे तु सर्वत्रैव ङित्वाद् गुणनिषेधे- बिभृते, बिभ्राते, बिभ्रते इत्यादीनि रूपाणि ज्ञेयानि । लिटि 'भीह्रीभृहुवामि'ति वैकल्पिक आम् बोध्यः ।

**डुदाञ् दाने ॥९॥** (दा- अनिट्, सकर्मकः, उभयपदी)

**प्रणिददाति । दत्तः । ददति । दत्ते । ददाते । ददते । ददौ । ददे । दाता । दास्यति । दास्यते । ददातु ॥**

दानार्थकस्य डुदाञ् इति धातोर्डोञ्कारस्य चेत्संज्ञायाम् 'दा' इत्येव तस्याऽनुबन्धविनिमुक्तस्वरूपम् । तसि श्नाभ्यस्तयोरात इति आलोपः, झौ अदभ्यस्तादिति अदादेशश्च ।

### घुसंज्ञाविधायकं सूत्रम्

**दाधा घ्वदाप् १।१।२०॥**

**दारूपा धारूपाश्च धातवो घुसंज्ञाः स्युर्दाप्दैपौ विना ।**

**घ्वसोरित्येत्वम् । देहि । दत्ताम् । अददात्, अदत्त । दद्यात्, ददीत । देयात्, दासीष्ट । अदात् ।**

**अदाताम्। अदुः।**

(दा-धा, घु, अदाप्)

**सरलार्थः** - दाप्, दैप् इत्येतौ द्वौ धातू वर्जयित्वा अन्ये दा-रूपवन्तः, धा-रूपवन्तश्च धातवो घु-संज्ञका भवन्ति।

### इदादेशविधायकं सिचः कित्वविधायकञ्च सूत्रम्

**स्थाघ्वोरिच्च १।२।१७॥**

**अनयोरिदन्तादेशः स्यात्, सिच्च कित्स्यादात्मनेपदेषु। अदित। अदास्यत्। अदास्यत।**

(स्था-घ्वोः, इत्, आत्मनेपदेषु, सिच्, कित्, च)

**सरलार्थः** आत्मनेपदसंज्ञके प्रत्यये परे सति स्था-धातोः, घु-संज्ञकधातूनाञ्च अन्त्यवर्णस्य स्थाने इकारादेशो भवति, सिचः किद्वद्भावश्च भवति।

लुङि, अटि, आत्मनेपदे ते, च्लौ, सिचि, इण्निषेधे 'अदा स् त' इत्यवस्थायाम् अनेन सूत्रेण आकारस्य इत्वे सिचः कित्वे च कृते, कित्वाद् इकारस्य गुणनिषेधे, ह्रस्वादङ्गादिति सिचो लुकि- अदित।

**डुधाञ् धारण-पोषणयोः ॥१०॥** (धा- अनिट्, सकर्मकः, उभयपदी)

**दधाति॥**

डुधाञ् (धा) इति धातुर्धारणेऽर्थे पोषणेऽर्थे च वर्तते।

### झष्भावविधायकं विधिसूत्रम्

**दधस्तथोश्च ८।२।३८॥**

**द्विरुक्तस्य झषन्तस्य धाञो बशो भष् स्यात् तथोः स्ध्वोश्च परतः। धत्तः। दधति। दधासि। धत्थः। धत्ते। दधाते। धत्से। धद्ध्वे। 'घ्वसोरेद्धावभ्यासलोपश्च'। धेहि। अदधात्। अधत्ताम्। अदधुः। अदधाः। अधत्तम्। अधत्त। अदधाम्। अदध्व। अदध्म। अधत्त। अदधाताम्। अदधत। अधत्थाः। अदधाथाम्। अधद्ध्वम्। अदधि। अदध्वहि। अदध्महि। दध्यात्। दधीत। दधीयाताम्। धेयात्। धासीष्ट। अधात्। अधाताम्। अधित्त। अधिषाताम्। अधास्यत्। अधास्यत।**

(दधः, तथोः, झषन्तस्य, एकाचः, बशः, स्ध्वोः, तथोः, च, भष्)

**सरलार्थः** - तकारे, थकारे, सकारे, ध्व-शब्दे च परे सति द्वित्वं कृतस्य झषन्तस्य धाञ्-धातोः बशः स्थाने भष्भावो भवति । बश्-भषौ प्रत्याहारौ, वर्गतृतीयस्य स्थाने वर्गचतुर्थमादिश्यमानो विधिरयं भष्भाव-पदेन व्यवह्रियते ।

**णिजिर् शौचपोषणयोः ॥११॥**

**वा. इर इत्संज्ञा वाच्या**

### गुणादेशविधायकं सूत्रम्-

**णिजां त्रयाणां गुणः श्लौ ७।४।७५॥**

**णिज्विज्विषामभ्यासस्य गुणः स्यात् श्लौ । नेनेक्ति । नेनिक्तः । नेनिजति । नेनिक्ते । नेक्ष्यति, नेक्ष्यते । नेनेक्तु । नेनिग्धि ॥**

(णिजाम्, त्रयाणाम्, अभ्यासस्य, श्लौ, गुणः)

**सरलार्थः** - श्लु-विषये णिज्, विज्, विष् इत्येतेषां त्रयाणां धातूनाम् अभ्यासस्य इकः स्थाने गुणादेशो भवति । णिज्, विज्, विष् इत्येते णिजादयो धातवः कथ्यन्ते ।

### लघूपधगुणनिषेधकं सूत्रम्

**नाभ्यस्तस्याचि पिति सार्वधातुके ७।३।८७॥**

**लघूपधगुणो न स्यात् । नेनिजानि । नेनिक्ताम् । अनेनेक् । अनेनिक्ताम् । अनेनिजुः । अनेनिजम् । अनेनिक्त । नेनिज्यात् । नेनिजीत । निज्यात्, निक्षीष्ट ॥**

(अभ्यस्तस्य, लघूपधस्य, अचि, पिति, सार्वधातुके, गुणः, न)

**सरलार्थः** - अजादि-पित्-सार्वधातुक-प्रत्यये परे सति अभ्यस्तसंज्ञकस्य धातोः स्थाने लघूपधलक्षण-गुणो न भवति । 'पुगन्तलघूपधस्य च' इत्यनेन प्राप्तो गुणोऽनेन निषिद्ध्यते ।

### विभाषया अङादेशविधायकं सूत्रम्

**इरितो वा ३।१।५७॥**

**इरितो धातोश्च्लेरङ् वा परस्मैपदेषु । अनिजत्, अनैक्षीत्, अनिक्त । अनेक्ष्यत्, अनेक्ष्यत ॥**

(इरितः, धातोः, च्लेः, परस्मैपदेषु, अङ्, वा) इरितः, इर् इत् यस्य, यस्मिन् इर्-भागस्य इत्संज्ञा भवति तस्य ।

**सरलार्थः** - परस्मैपदसंज्ञके प्रत्यये परे सति इरितो धातोः परस्य 'च्लि' इत्यस्य स्थाने 'अङ्' इत्यादेशो भवति । सिचं बाधित्वाऽनेन अङ् विधीयते ।

**देहि**

डुदाञ् दाने इति सकर्मकाद् धातोर्विध्यादिष्वर्थेषु 'लोट् च' इति लोट्यनुबन्धलोपे, परगामिनि क्रियाफले लस्य स्थाने मध्यमपुरुषस्यैकवचने सिबादेशे 'दा सि' इति जाते, सिपः सार्वधातुकसंज्ञायाम् 'कर्तरि शप्' इत्यनेन शप्यनुबन्धलोपे 'दा अ सि' इति जाते 'जुहोत्यादिभ्यः श्लुः' इति सूत्रेण शपो लुकि 'दा सि' इति जाते 'श्लौ' इति सूत्रेण धातोर्द्वित्वे 'दा दा सि' इति जाते 'पूर्वोऽभ्यासः' इत्यनेन अभ्याससंज्ञायां 'ह्रस्वः' इत्यभ्यासस्य ह्रस्वे 'ददा सि' इति जाते 'सेर्ह्यपिच्च' इति सूत्रेण सेर्ह्यादेशे 'ददा हि' इति जाते 'दाधा घ्वदाप्' इति सूत्रेण धातोर्घुसंज्ञायां 'घ्वसोरेद्धावभ्यासलोपश्च' इति सूत्रेण एत्वाभ्यासलोपे, वर्णमेलने 'देहि' इति रूपं सिद्धम् । 'आशिषि लिङ्लोटौ' इति आशीर्वादेऽर्थे लोटि तु 'ददा हि' इत्यवस्थायाम् 'तुह्योस्तातङ...' इत्यादिना सूत्रेण हेर्वैकल्पिके तातङि 'ददा तात्' इति जाते 'श्नाभ्यस्तयोरातः' इति सूत्रेण आकारस्य लोपे, दकारस्य चर्त्वेन तकारे, वर्णमेलने 'दत्तात्' इति, तातङभावे पूर्ववत् 'देहि' इति रूपद्वयं सिद्धम् ।

**धातुरूपावलिः**

**दा-धातोर्लुङि रूपाणि-**

| | | |
|---|---|---|
| अदित | अदिषाताम् | अदिषत |
| अदिथाः | अदिषतम् | अदिढ्वम् |
| अदिषि | अदिष्वहि | अदिष्महि |

**धा-धातोर्लटि रूपाणि-**

| | | |
|---|---|---|
| दधाति | धत्तः | दधति |
| दधासि | धत्थः | धत्थ |
| दधामि | दध्वः | दध्मः |

**भृ-धातोर्लटि आत्मनेपदे रूपाणि-**

| | | |
|---|---|---|
| बिभृते | बिभ्राते | बिभ्रते |
| बिभृषे | बिभ्राथे | बिभृध्वे |
| बिभ्रे | बिभृवहे | बिभृमहे |

## वाक्येषु प्रयोगानुशीलनम्

१. ईशः सर्वान् जन्तून् बिभ्रति ।

२. जननीजनकौ आत्मजान् यत्नेन बिभृतः ।

३. हे सरस्वति ! मह्यं विद्यां देहि ।

४. माता भिक्षवे भिक्षां ददाति ।

५. बुद्धिमान् छात्रो विद्यां सम्यग् धत्ते ।

६. वयं प्रतिदिनं निर्मलं वस्त्रं दधाम ।

७. अद्य प्रातः अहं पञ्चवादने अनिक्षि ।

## अभ्यासः

**१. शुद्धोच्चारणं कुरुत**

(क) णिजां त्रयाणां गुणः श्लौ

(ख) नाभ्यस्तस्याचि पिति सार्वधातुके

(ग) स्थाघ्वोरिच्च

(घ) दधस्तथोश्च

(ङ) इर इत्संज्ञा वाच्या

**२. धातूनां द्वयोः पदयो रूपाणि यथायथं मिथो मेलयत**

| | |
|---|---|
| दातास्मि | दासीध्वम् |
| दधिव | अधास्यम् |
| दत्तः | अदास्येताम् |
| धत्त | अधिषि |
| अददाः | दधीय |
| अधाम् | धद्ध्वम् |
| दध्याम् | अदत्थाः |
| देयास्त | दाताहे |
| अधास्ये | दधिवहे |
| अदास्यतम् | ददाते |

३. **सङ्क्षेपेण उत्तरं लिखत**

(क) दा-धातोरर्थं लिखत ।

(ख) केषां धातूनां घुसंज्ञा भवति ? सा च केन सूत्रेण विधीयते ?

(ग) धारणपोषणार्थकस्य धा-धातोरुभयपदप्रयोगे कः हेतुः ?

(घ) 'धत्तः' इत्यत्र केन सूत्रेण भष्भावो विधीयते ?

(ङ) दारूपसत्त्वेऽपि कस्य कस्य धातोर्घुसंज्ञा न भवति ?

(च) भृ-धातोः प्रयोगः कस्मिन्नर्थे क्रियते ?

(छ) 'भृ+विधिलिङ्(इट्)' इत्यत्र किं रूपं निष्पद्यते ?

(ज) केषु परतः सत्सु धा-धातौ भष्भावो भवति ?

(झ) 'णिजां त्रयाणाम्...' इत्यत्र 'णिजाम्' बहुवचननिर्देशेन केषां धातूनां बोधो भवति ?

(ञ) लुङि परस्मैपदे इरितां धातूनां वैकल्पिकरूपावल्यां कारणं किम् ?

४. **निज्-धातोर्लुङ्यात्मनेपदस्य लङि परस्मैपदस्य च रूपाणि लिखत ।**

५. **अधस्तनप्रयोगेषु धातु-लकार-पुरुष-वचनानि दर्शयत**

नेनिक्ष्व, निनिजे, धेहि, दधुः, दधते, दत्से, दासीमहि, बिभराणि, अभरिष्यत् ।

६. **दा-धातोर्लुटि उभयोः पदयो रूपाणि लिखत ।**

७. **सूत्रवार्तिकार्थं सोदाहरणं लिखत**

(क) इर इत्संज्ञा वाच्या (ख) दाधा घ्वदाप्

(ग) दधस्तथोश्च (घ) इरितो वा

८. **अधस्तनप्रयोगाणां ससूत्रं सिद्धिपथं प्रदर्शयत**

(क) अनिजत् (ख) नेनिजानि (ग) नेनेक्ति (घ) धेहि (ङ) धत्तः

(च) अदित (छ) बिभर्ति (ज) देयात् (झ) दत्ते (ञ) धद्ध्वे

९. **अधस्तनक्रियापदानां पदान्तरस्य रूपाणि विलिख्य तेषां वाक्येषु प्रयोगं दर्शयत**

दधासि, ददति, दातासे, धास्यन्ति, बभृषे, भ्रियात्, अनैक्षीत्, नेनिक्ते ।

विशः पाठः

# दिवादिगणे परस्मैपदिधातवः

प्रकरणेऽस्मिन् श्यन्-विकरणधातूनां निरूपणं भवति । प्रारम्भे दिव्-धातोः पाठाद् दिवादिरिति प्रकरणस्यास्य संज्ञा । अस्मिन् सार्वधातुकलकारेषु शपं बाधित्वा धातोः श्यन्-प्रत्ययो भवति । श्यन्नित्यस्य शकारनकारौ इतौ, य इत्येव शिष्यते । शित्वात् सार्वधातुकसंज्ञा तत्प्रयुक्तकार्याणि च विधीयन्ते परमपित्सार्वधातुकस्य ङित्वाद्गुणनिषेधो भवति ।

दिवादिगणे

**परस्मैपदिधातवः**

**दिवु क्रीडाविजिगीषाव्यवहारद्युतिस्तुतिमोदमदस्वप्नकान्तिगतिषु ॥१॥** (दिव्- सेट्, अर्थवशात् सकर्मकोऽकर्मश्च, परस्मैपदी)

दिव्-धातुः क्रीडायाम्, विजिगीषायाम्, व्यवहारे, द्युतौ, स्तुतौ, मोदने, मदे, स्वप्ने, कान्तौ, गतौ चार्थेषु वर्तते । तस्य उकार उदात्त इच्च । उदात्तेत्वात् परस्मैपदी, सेट् च । धातुरयमर्थानुसारेण सकर्मकोऽकर्मश्च भवति ।

## श्यन्विकरणप्रत्ययविधायकं विधिसूत्रम्

**दिवादिभ्यः श्यन् ३।१।६९॥**

**शपोऽपवादः । हलि चेति दीर्घः । दीव्यति । दिदेव । देविता । देविष्यति । दीव्यतु । अदीव्यत् । दीव्येत् । दीव्यात् । अदेवीत् । अदेविष्यत् ।**

(दिवादिभ्यः, धातोः, कर्तरि, सार्वधातुके, श्यन्)

**सरलार्थः** - कर्त्रर्थे विहिते सार्वधातुकसंज्ञके प्रत्यये परे सति दिवादि-गणपठितेभ्यो धातुभ्यः श्यन्-प्रत्ययो भवति । श्यन्-प्रत्ययस्य आद्यशकारस्य 'लशक्वतद्धिते' इत्यनेन, अन्त्यनकारस्य च 'हलन्त्यम्' इत्यनेन इत्संज्ञायामुभयोर्लोपो भवति । दिवादिधातूनां विषये 'कर्तरि शप्' इत्यनेन प्राप्तः शबनेन बाध्यते । दिव् इति वान्तधातुत्वाद् हलि परे 'हलि च' इत्यनेन उपधाया दीर्घो भवति ।

दिव्-धातोर्लटि, तिपि, शपं बाधित्वा अनेन सूत्रेण श्यनि 'दिव् य ति' इत्यवस्थायां 'हलि च' इत्यनेन उपधाया दीर्घे 'दीव्यति' इति रूपम् । एवं प्रकारेण दीव्यतः, दीव्यन्ति इत्यादीनि

रूपाण्यपि सिद्ध्यन्ति । लिटि पिद्विभक्तिषु पुगन्तलघूपधस्य चेति गुणो विधीयते । लुटि, लृटि, लुङि, लृङि च सर्वत्रैव लघूपधगुणो भवति । लुङि 'वदव्रजे'ति प्राप्तां वृद्धिं नेटीति निषेधाद् लघूपधगुणः सुलभः ।

**एवं षिवु तन्तुसन्ताने ॥२॥**

तन्तुसन्तानार्थकस्य षिवु-धातोरन्त्यस्य उकारस्य इत्संज्ञा, आद्यस्य षकारस्य 'धात्वादेः षः सः' इति सकारादेशे'सिव्' इत्यस्मिन् व्यवहारो भवति (सेट्, सकर्मकः, परस्मैपदी) । अस्य धातो रूपाणि दिव्-धातुवदेव जायन्ते, तेषां सिद्धिप्रक्रिया च तद्वदेव भवति । यथा- सीव्यति, सिसेव, सेविता, सेविष्यति, सीव्यतु, असीव्यत्, सीव्येत्, सिव्यात्, असेवीत्, असेविष्यत् इत्यादि ।

**नृती गात्रविक्षेपे ॥३॥ नृत्यति । ननर्त्त । नर्त्तिता ।**

**नृती** (नृत्) इति धातुर्गात्रविक्षेपे (नर्तने) अर्थे वर्तते (सेट्, अकर्मकः, परस्मैपदी) । अस्य लटि दिव्धातुवदेव रूपाणि भवन्ति । लिटि पिद्विभक्तिषु ऋकारस्य अर्-गुणानन्तरं रेफात् परस्य तकारस्य 'अचो रहाभ्यां द्वे' इति वैकल्पिकं द्वित्वं भवति, लुटि तु सर्वत्रैव गुणो द्वित्वञ्च ।

## विभाषया इडागमविधायकं विधिसूत्रम्

**सेऽसिचिकृतचृतछृदतृदनृतः ७।२।५७॥**

**एभ्यः सिज्भिन्नस्य सादेरार्द्धधातुकस्येड् वा । नर्त्तिष्यति । नर्त्स्यति । नृत्यात् । अनर्त्तीत् । अनर्त्तिष्यत् । अनर्त्स्यत् । त्रसी उद्वेगे ॥४॥ वा भ्राशेति श्यन्वा । त्रस्यति । त्रसति । तत्रास ।**

(कृत-चृत-छृद-तृद-नृतः, आर्धधातुके, असिचि, से, इट्, वा)

**सरलार्थः** - कृत्, चृत्, छृद्, तृद्, नृत् इत्येतेभ्यः धातुभ्यो परस्य सिज्-भिन्नस्य सकारादेरार्धधातुकस्य इडागमो वा भवति । अनेन सूत्रेण नित्यमिडागमं बाधित्वा विकल्पेन इटि कृते लृटि लृङि च नृत्-धातुर्वेड् भवति, तेन लृटि नर्त्तिष्यति, नर्त्स्यति, लृङि च अनर्त्तिष्यत्, अनर्त्स्यत् इत्यादीनि रूपाणि जायन्ते । शेषलकारेषु दिव्धातुवदेव प्रक्रियया अस्य रूपाणि निष्पद्यन्ते ।

**त्रसी** (त्रस्) इति धातुरुद्वेगे (भये) अर्थे वर्तते । दिवादिगणस्थत्वात् सार्वधातुकलकारेषु नित्यमेव श्यनि प्राप्ते 'वा भ्राशभ्लाशभ्रमुक्रमुक्लमुत्रसित्रुटिलषः' इत्यनेन शपं बाधित्वा विकल्पेन श्यन्-प्रत्ययो भवति, श्यनभावे शपि भ्वादिगणस्थधातुवच्च अस्य रूपाणि जायन्ते । यथा- त्रस्+लट्(ल्), त्रस्+तिप्(ति), त्रस् श्यन्(य)+ति (वा श्यन्-प्रत्यये),

त्रस्यति । श्यनभावे- त्रस्+लट्(ल्), त्रस्+तिप्(ति), त्रस् शप्(अ)+ति (कर्तरि शप्), त्रसति । एवं त्रस्यतः, त्रसतः इत्यादीन्यपि ।

## एत्वाभ्यासलोपविधायकं विधिसूत्रम्

**वा जॄभ्रमुत्रसाम् ६।४।१२४॥**

**एषां किति लिटि सेटि थलि च एत्वाभ्यासलोपौ वा स्तः । त्रेसतुः । तत्रसतुः । त्रेसिथ । तत्रसिथ । त्रसिता ।**

(जॄ-भ्रमु-त्रसाम्, किति, लिटि, सेटि, थलि, च, एत्, वा)

**सरलार्थः** - किति लिटि, सेटि थलि च परे सति जॄष् (जॄ), भ्रमु (भ्रम्), त्रस (त्रस्) इत्येतेषां धातूनाम् अकारस्य स्थाने विकल्पेन एकारादेशो भवति, अभ्यासस्य लोपश्च भवति ।

लिटि, तसि, अतुसि 'त्रस् त्रस् + अतुस्' इत्यवस्थायामनेन सूत्रेण एत्वाभ्यासलोपे, वर्णयोगे, सकारस्य रुत्वविसर्गे 'त्रेसतुः' इति सिद्ध्यति । एत्वाभ्यासलोपाभावपक्षे अभ्यासकार्ये 'तत्रसतुः' इति । एवं सिपि, इडागमे कृते त्रेसिथ/तत्रसिथ इति । लुटि तिपि - त्रसिता ।

**शो तनूकरणे ॥५॥**

## ओकारलोपविधायकं विधिसूत्रम्

**ओतः श्यनि ७।३।७१॥**

**लोपः स्यात् । श्यति । श्तः । श्यन्ति । शशौ । शशतुः । शाता । शास्यति ।**

(ओतः, श्यनि, लोपः)

**सरलार्थः** - श्यन्-प्रत्यये परे सति ओकारस्य लोपो भवति ।

## सिचो लुगादेशविधायकं विधिसूत्रम्

**विभाषा घ्राधेट्शाच्छासः २।४।७८॥**

**एभ्यः सिचो लुग्वा स्यात् परस्मैपदे परे । अशात् । अशाताम् । अशुः । इट्सकौ । अशासीत् । अशासिष्टाम् ॥**

(घ्रा-धेट्-शा-छा-सः, सिचः, परस्मैपदेषु, विभाषा, लुक्)

**सरलार्थः** – परस्मैपदसंज्ञके प्रत्यये परे सति घ्रा गन्धोपादाने, धेट् पाने, शो तनूकरणे, छो छेदने, षो अन्तकर्मणि इत्येतेभ्यो धातुभ्यः परस्य सिचो विकल्पेन लुग् भवति ।

**छो छेदने ॥६॥ छ्यति ॥ षोऽन्तकर्मणि ॥७॥ स्यति । ससौ ॥ दोऽवखण्डने ॥८॥ द्यति । ददौ । देयात् । अदात् । व्यध ताडने ॥९॥**

### सम्प्रसारणादेशविधायकं विधिसूत्रम्

**ग्रहिज्यावयिव्यधिवष्टिविचतिवृश्चतिपृच्छतिभृज्जतीनां ङिति च ।६।१।१**

**एषां सम्प्रसारणं स्यात्किति ङिति च । विध्यति । विव्याध । विविधतुः । विविधुः । विव्यधिथ, विव्यद्ध । व्यद्धा । व्यत्स्यति । विध्येत् । विध्यात् । अव्यात्सीत् ॥**

(ग्रहि-ज्या-वयि-व्यधि-वष्टि-विचति-वृश्चति-पृच्छति-भृज्जतीनाम्, किति, ङिति, च, सम्प्रसारणम्)

**सरलार्थः** - किति ङिति च प्रत्यये परतः ग्रह उपादाने, ज्या वयोहानौ, व्यध ताडने, वश कान्तौ, व्यच् व्याजीकरणे, ओव्रश्चू छेदने, प्रच्छ ज्ञीप्सायाम्, भ्रस्ज पाके इत्येतेषां धातूनां सम्प्रसारणं भवति ।

**पुष पुष्टौ ॥१०॥ पुष्यति । पुपोष । पुपोषिथ । पोष्टा । पोक्ष्यति । 'पुषादी'त्यङ्-आपरस्मैपदात् । अपुषत् । अपोक्ष्यत् । णश अदर्शने ॥११॥ नश्यति । ननाश । नेशतुः । नेशुः ।**

पुष्ट्यर्थकस्य **पुष** इति धातोरन्त्याकारस्य इत्संज्ञा (अनिट्, अकर्मकः, परस्मैपदी) । पुष्-धातोर्लुङि, अटि, तिपि, इलोपे 'अपुष् त्' इत्यवस्थायां शपं बाधित्वा च्लौ, च्लेरित्यस्य सिचं बाधित्वा 'पुषादिद्युताद्यॢदितः परस्मैपदेषु' इत्यनेन अङादेशेऽनुबन्धलोपे 'अपुषत्' इति सिद्ध्यति ।

अदर्शनार्थकस्य **णश** इति धातोरन्त्याकारस्य इत्संज्ञायां लोपे, आद्यणकारस्य च 'णो नः' इत्यनेन नत्वे 'नश्' इत्यस्मिन् व्यवहारो भवति (वेट्, अकर्मकः, परस्मैपदी) । तस्माल्लिटि, तसि, अतुसि 'नश् नश् अतुस्' इत्यवस्थायाम् 'अत एकहल्मध्ये...' इत्यादिना सूत्रेण एत्वाभ्यासलोपे 'नेशतुः' इति । सिपि तु थलादेशे 'नश् थ' इत्यवस्थायां नित्यमिडागमे प्राप्ते-

### विभाषया इडागमविधायकं विधिसूत्रम्

**रधादिभ्यश्च ७।२।४५॥**

**रध् नश् तृप् दृप् द्रुह् मुह् ष्णुह् ष्णिह् एभ्यो वलाद्यार्द्धधातुकस्य वेट् स्यात् । नेशिथ ।**

(रधादिभ्यः, च, वलादेः, आर्धधातुकस्य, इट्, वा)

**सरलार्थः** - रध हिंसासंसिद्ध्योः इत्यादिभ्योऽष्टाभ्यो धातुभ्य उत्तरस्य वलादेरार्धधातुक-संज्ञकस्य प्रत्ययस्य विकल्पेन 'इट्' इत्यागमो भवति । रधादयोऽष्टौ धातवो यथा- रध्, नश्, तृप्, दृप्, दुह्, मुह्, ष्णुह्, ष्णिह् ।

अनेन सूत्रेण वैकल्पिके इडागमे 'नश् इथ' इति जाते, द्वित्वे 'नश् नश् इथ' इत्यवस्थायां 'थलि च सेटि' इत्यनेन एत्वाभ्यासलोपयोः 'नेशिथ' इति । इडभावे तु 'नश् थ' इत्यवस्थायाम्-

## नुमागमविधायकं विधिसूत्रम्

**मस्जिनशोर्झलि ७।१।६०॥**

**मस्जिनशोर्नुम् स्यात् झलि । ननंष्ठ । नेशिव, नेश्व । नेशिम, नेश्म । नशिता, नंष्टा । नशिष्यति, नङ्क्ष्यति । नश्यतु । अनश्यत् । नश्येत् । नश्यात् । अनशत् ।**

(मस्जि-नशोः, झलि, नुम्)

**सरलार्थः** - झलि परे सति मस्ज्-धातोः, नश्-धातोश्च नुमागमो भवति ।

अनेन सूत्रेण नुमागमे 'नन्श् थ' इति जाते, द्वित्वे, हलादिशेषे 'न नन्श् थ' इत्यवस्थायां 'व्रश्चभ्रस्जे'ति शस्य षत्वे, थकारस्य ष्टुत्वेन ठकारे, नस्यानुस्वारे 'ननंष्ठ' इति साधु । मिपि- उत्तमपुरुषे णलो णित्वविकल्पनाद् णित्वपक्ष एव उपधाया अकारस्य वृद्धौ 'ननाश, ननश' इति रूपद्वयम् । वसि मसि च वैकल्पिके इटि इट्पक्षे इडभावे एत्वाभ्यासलोपे क्रमाद् 'नेशिव, नेश्व', 'नेशिम, नेश्म' इति रूपाणि । लुटि लृङि च सर्वत्रैव वैकल्पिके इटि, तदभावे झलादित्वादनेन सूत्रेण नुमागमो भवति । लुङि पुषादित्वात् च्लेरङ् ।

**नेशिथ / ननंष्ठ**

णश अदर्शने इत्यकर्मकाद् धातोऽन्त्याकारस्य इत्संज्ञायां लोपे, णकारस्य 'णो नः' इत्यनेन नत्वे 'नश्' इत्यस्मात्'परोक्षे लिट्' इति लिट्यनुबन्धलोपे, लस्य स्थाने मध्यमपुरुषस्यैकवचने सिबादेशे 'नश्सि' इति जाते, सिपः स्थाने 'परस्मैपदाना' मित्यादिना सूत्रेण थलादेशेऽनुबन्धलोपे 'नश् थ' इति जाते 'लिट् च' इति सूत्रेण आर्धधातुकसंज्ञायाम् 'आर्धधातुकस्येड्वलादेः' इत्यनेन प्राप्तं नित्यमिडागमं बाधित्वा 'रधादिभ्यश्च' इति सूत्रेण वैकल्पिके इटि 'नश् इथ' इति जाते 'लिटि धातोरनभ्यासस्य' इति सूत्रेण धातोर्द्वित्वे 'नश् नश् इथ' इति जाते 'पूर्वोऽभ्यासः' इत्यनेन पूर्वस्याभ्याससंज्ञायां हलादिशेषे 'न नश् इथ' इति जाते 'थलि च सेटि' इति सूत्रेण एत्वे अभ्यासस्य लोपे च कृते, वर्णयोगे 'नेशिथ' इति रूपं साधु । इडागमाभावपक्षे 'न नश् थ' इत्यवस्थायां 'मस्जिनशोर्झलि' इति सूत्रेण नुमागमेऽनुबन्धलोपे, मित्वादन्त्यादचः परावयवत्वे 'न नन्श्थ' इति जाते 'नश्चापदान्तस्य झलि' इति नस्यानुस्वारे 'व्रश्चभ्रस्ज...' इत्यादिना सूत्रेण शकारस्य षत्वे, थकारस्य ष्टुत्वेन ठकारे, वर्णयोगे 'ननंष्ठ' इति रूपञ्च सिद्ध्यतः ।

**धातुरूपावलिः**

**दिव्-धातोर्लङि रूपाणि-**

| | | |
|---|---|---|
| अदीव्यत् | अदीव्यताम् | अदीव्यन् |
| अदीव्यः | अदीव्यतम् | अदीव्यत |
| अदीव्यम् | अदीव्याव | अदीव्याम |

**नृत्-धातोर्लृटि रूपाणि-**

| | | |
|---|---|---|
| नर्तिष्यति | नर्तिष्यतः | नर्तिष्यन्ति |
| नर्तिष्यसि | नर्तिष्यथः | नर्तिष्यथ |
| नर्तिष्यामि | नर्तिष्यावः | नर्तिष्यामः |

**व्यध्-धातोर्लटिरूपाणि-**

| | | |
|---|---|---|
| विध्यति | विध्यतः | विध्यन्ति |
| विध्यसि | विध्यथः | विध्यथ |
| विध्यामि | विध्यावः | विध्यामः |

## वाक्येषु प्रयोगानुशीलनम्

१. स्वच्छेन पौष्टिकेन च भोजनेन शरीरं पुष्यति ।

२. यूयं कन्दुकेन दीव्यत ।

३. तव दुःखं नश्यात् ।

४. ग्रीष्मर्तौ कूपे जलं शुष्यति ।

५. परश्वो विद्यालये बालिका बालकैः सह नर्तितारः ।

६. शिक्षकाश्छात्रान् न विध्येयुः ।

७. मम पुत्री ह्यः सायं कुक्कुराद् अत्रष्यत् ।

## अभ्यासः

१. **शुद्धमुच्चारयत**

(क) ग्रहिज्यावयिव्यधिवष्टिविचतिवृश्चतिपृच्छतिभृज्जतीनां ङिति च

(ख) विभाषा घ्राधेट्शाच्छासः

(ग) वा जृभ्रमुत्रसाम्

(घ) सेऽसिचि कृतचृतच्छृदतृदनृतः

(ङ) मस्जिनशोर्झलि

२. **पाठं पठित्वा समुचितपदैः रिक्तस्थानं पूरयत**

(क) शुष्-धातुः ................. अर्थे प्रयुज्यते ।

(ख) पुष्-धातोर्लिटि थसि ................. रूपं भवति ।

(ग) श्यनि परे ओकारस्य लोपविधायकं सूत्रम् ................. वर्तते ।

(घ) श्यन्-विकरणप्रत्ययस्यानुबन्धविनिर्मुक्तस्वरूपम् ................. ।

(ङ) 'श्यति' इति क्रियापदम् ................. इति धातोर्वर्तते ।

३. **सङ्क्षेपेण उत्तरं लिखत**

(क) दिवादिगणस्य विकरणप्रत्ययः कः ?

(ख) दिव्-धातुः केष्वर्थेषु प्रयुज्यते ?

(ग) दिव्-धातोः कुत्र कुत्र केन उपधादीर्घो भवति ?

(घ) श्यनि शित्वस्य प्रयोजनं किम् ?

(ङ) 'वा जृभ्रमुत्रसाम्' इति सूत्रे के धातवो निर्दिष्टाः सन्ति ?

(च) सिव्-त्रस्-छो-सो-दो-पुष्-शुष्-नश्धातूनां प्रयोगः केष्वर्थेषु भवति ?

(छ) 'नश्+लुट्(थ)' इत्यत्र किं रूपं निष्पद्यते ?

(ज) रधादयो धातवः कति ? के च ते ?

(झ) पुष्-धातोः परस्य च्लेः स्थाने केन सूत्रेण किमादिश्यते ?

(ञ) नृत्-धातोर्विकल्पेन इडागमः कुत्र कुत्र भवति ?

४. **व्यध्-धातोर्विधिलिङि रूपाणि लिखत ।**

५. **अधस्तनप्रयोगेषु धातु-लकार-विभक्तीर्निदर्शयत**

व्यद्धा, पोक्ष्यति, नङ्क्ष्यति, छ्यति, स्यन्ति, द्यतु, अशुषत्, त्रेसिथ, शाता, अनत्स्र्यत्, दीव्येत् ।

६. **दिव्-धातोर्लटि लोटि च रूपाणि लिखत ।**

७. **सूत्रार्थं सोदाहरणं लिखत**

(क) दिवादिभ्यः श्यन्

(ख) ओतः श्यनि

(ग) मस्जिनशोर्झलि

(घ) विभाषा घ्राधेट्शाच्छासः

८. **अधस्तनप्रयोगाणां ससूत्रं सिद्धिपथं प्रदर्शयत**

(क) दीव्यति

(ख) अदीव्यन्

(ग) अदेविष्टाम्

(घ) नर्तिष्यति

(ङ) त्रेसतुः

(च) श्यति

(छ) अशात्

(ज) अशासीत्

(झ) विध्यति

(ञ) नेशिथ

९. **अधस्तनक्रियापदानां वाक्येषु प्रयोगं दर्शयत**

नश्यन्ति, अनृत्यत्, पुष्यसि, विव्याध, शातारः, त्रस्येत्, नृत्यन्तु, अदेवीत् ।

१०. **दिव्-धातोरर्थभेदान् निर्दिश्य तदनुकूलान् प्रयोगान् प्रदर्शयत ।**

एकविंशः पाठः

# दिवादिगणे आत्मनेपद्युभयपदिधातवः

**षूङ् प्राणिप्रसवे ॥१३॥** (सू- वेट्, सकर्मकः, आत्मनेपदी)

**सूयते । सुषुवे । क्रादिनियमादिट् । सुषुविषे । सुषुविवहे । सुषुविमहे । सोता । सविता । सविष्यते । सोष्यते ॥**

षूङ् (सू) इति धातुः प्राणिप्रसवे (प्राण्युत्पादने) अर्थे वर्तते । ङित्वादात्मनेपदम् । धातुरयं लिटि 'श्र्युकः किति' इति वैकल्पिकस्य इटो निषेधानन्तरं क्रादिनियमात् सेड् वर्तते, लुडादौ तु 'स्वरतिसूतिसूयति...' इति वेट् । लिटि ध्वमि 'विभाषेटः' इति ढत्वविकल्पो बोध्यः ।

सू लट् (ल्) - सू त - सू य त (दिवादिभ्यः श्यन्) - **सूयते** ।

सू लिट् (ल्) - सू त - सू एश् (ए) - सू सू ए - सु सू ए - सु सुव् ए (अचि श्नु...) - **सुषुवे** (आदेशप्रत्यययोः) । ध्वमि क्रादिनियमादिटि, उवङादेशे, सकारस्य षत्वे, धकारस्य विभाषेटः वैकल्पिके ढत्वे- **सुषुविढ्वे/सुषुविध्वे** ।

सू लुट् (ल्) - सू त - सू तास् त - सू इतास् त (स्वरति...) - सू इतास् डा (आ) - सू इत् आ - सो इत् आ (सार्वधातुकार्धधातुकयोः) - स् अव् इत् आ - **सविता**, इडभावे- **सोता** । लृडादौ- सविष्यते/सोष्यते, सूयताम्, असूयत, सूयेत, सविषीष्ट/सोषीष्ट, असविष्ट/असोष्ट, असविष्यत/असोष्यत इत्यादि ।

**दूङ् परितापे ॥१४॥** (दू- सेट्, अकर्मकः, आत्मनेपदी)

**दूयते ॥**

दू-धातो रूपसिद्धिप्रक्रिया सू-धातुसदृशैव, केवलम् इडागमोऽत्र 'आर्धधातुकस्येड्वलादेः' इत्यनेन नित्यं भवति । अतोऽत्र लुडादौ आर्धधातुकलकारेषु सू-धातोः इट्पक्षवत्प्रक्रिया अवलम्बनीया ।

**दीङ् क्षये ॥१५॥** (दी- अनिट्, अकर्मकः, आत्मनेपदी)

**दीयते ॥**

### युडागमविधायकं विधिसूत्रम्

**दीङो युडचि क्ङिति ।६।४।६३।**

**दीङः परस्याजादेः क्ङित आर्धधातुकस्य युट् ।**

(दीङः, आर्धधातुके, अचि, क्ङिति, युट्)

**सरलार्थः** - दीङ्-धातोः परस्य अजादेः कितः ङितश्च आर्धधातुकसंज्ञकस्य प्रत्ययस्य 'युट्' इत्यागमो भवति । युटः उकार-टकारौ इतौ, प्रत्ययस्य टिदागमत्वात् तस्यैव आद्यवयवत्वं बोध्यम् ।

**वा. वुग्युटावुवङ्यणोः सिद्धौ वक्तव्यौ । दिदीये ॥**

(वुक्-युटौ, उवङ्-यणोः, सिद्धौ, वक्तव्यौ)

**सरलार्थः** - उवङादेशस्य, यणश्च दृष्ट्या वुक्, युट् इत्येतौ आगमौ सिद्धौ भवतः । युडागमस्य आभीयत्वेन 'असिद्धवदत्राभात्' इत्यनेन असिद्धत्वे प्राप्ते अनेन वार्तिकेन सिद्धे 'एरनेकाचोऽसंयोगपूर्वस्य' इति यण् न प्राप्नोति ।

दी लिट् (ल्) - दी त - दी एश् (ए) - दी दी ए - दि दी ए - दि दीय् ए (दीङो युडचि क्ङिति) - **दिदीये** ।

### आत्वादेशविधायकं विधिसूत्रम्

**मीनातिमिनोतिदीङां ल्यपि च ६।१।५०॥**

**एषामात्त्वं स्याल्ल्यपि चादशित्येज्निमित्ते । दाता । दास्यते ।**

(मीनाति-मिनोति-दीङाम्, ल्यपि, एचः, च, अशिति, उपदेशे, आत्)

**सरलार्थः** - ल्यप्-प्रत्ययस्य विषये, शिद्भिन्नस्य एच्-निमित्तकस्य प्रत्ययस्य विवक्षायां च मीञ् (मी) हिंसायाम्, डुमि (मि) प्रक्षेपणे, दीङ् (दी) क्षये इत्येतेषां धातूनां आकारान्तादेशो भवति ।

गुणं बाधित्वा अनेन आकारान्तादेशो विधीयते । दी लुट् (ल्) - दी त - दी तास् त - दा तास् त (मीनातिमिनोतिदीङां ल्यपि च) - दा तास् डा (आ) - दा त् आ - **दाता** ।

दी लृट् (ल्) - दी त - दी स्य त - दा स्य त (मीनाति...) - **दास्यते** ।

**वा. स्थाघ्वोरित्त्वे दीङः प्रतिषेधः । अदास्त ॥**

(स्थाघ्वोः, इत्त्वे, दीङः, प्रतिषेधः)

**सरलार्थः** - दीङ्-धातोर्विषये 'स्थाघ्वोरिच्च' इति सूत्रेण प्राप्तस्य इत्वस्य निषेधो भवति ।

दी लुङ् (ल्) - अदी ल् - अदी त -अदी च्लि त - अदी सिच् (स्) त - अदा स् त (मीनाति...), अत्र दारूपधातुत्वाद् घुसंज्ञायां 'स्थाघोरिच्च' इति आकारस्य इत्वे प्राप्ते, अनेन वार्तिकेन तन्निषेधे- **अदास्त** ।

**डीङ् विहायसा गतौ ॥१६॥** (डी- सेट्, सकर्मकः, परस्मैपदी)

डीयते । डिड्ये । डयिता ॥

डी-धातोः 'उदृदन्तैः...' इति कारिकायां पाठाद् धातुरयं सेट्, ङित्वादात्मनेपदी च ।

**पीङ् पाने ॥१७॥** (पी- अनिट्, सकर्मकः, आत्मनेपदी)

**पीयते । पेता । अपेष्ट ॥**

पी-धातौ लिटि क्रादिनियमान्नित्यमिट्, अन्यत्र तु इण्निषेधो बोध्यः ।

**माङ् माने ॥१८॥** (मा- अनिट्, सकर्मकः, आत्मनेपदी)

**मायते । ममे ॥**

**जनी प्रादुर्भावे ॥१९॥** (जन्- सेट्, अकर्मकः, आत्मनेपदी)

जनी (जन्) इति धातुः प्रादुर्भावे (जनने) अर्थे वर्तते ।

### जादेशविधायकं विधिसूत्रम्

**ज्ञाजनोर्जा ७।३।७९॥**

**अनयोर्जादेशः स्याच्छिति । जायते । जज्ञे । जनिता । जनिष्यते ।**

(ज्ञा-जनोः, शिति, जा)

**सरलार्थः** - शित्-प्रत्यये परे सति ज्ञा-धातोः, जन्-धातोश्च स्थाने 'जा' इत्यादेशो भवति । सार्वधातुकलकारेषु अनेन जादेशो विधीयते ।

लटि पूर्ववत् 'जन् य ते' इत्यवस्थायामनेन सूत्रेण जनो जादेशे-**जायते** । आतामादौ- जायेते, जायन्ते इत्यादि । लोटि जायताम्, जायेताम्, जायन्ताम् इत्यादीनि, लङि अजायत, अजायेताम्, अजायन्त इत्यादीनि, विधिलिङि जायेत, जायेयाताम्, जायेरन् इत्यादीनि रूपाणि भवन्ति । लिडाद्यार्धधातुकलकारेषु तु 'जन्' इत्यस्मिन्नेव व्यवहारः । जन्-धातोः सेट्त्वाल्लिटि हलादिषु विभक्तिषु सर्वत्रैव इडागमो भवति, तेन सर्वा विभक्तयोऽजादित्वं प्राप्नुवन्ति । तथा च सर्वासामपित्वादसंयोगादित्वाच्च कित्वम् । अत एव 'गमहनजनखनघसां

लोपः क्ङित्यनङि' इत्यनेन सर्वत्रैव उपधाया लोपः, नकारस्य श्चुत्वेन ञकारः, जञोर्ज्ञश्च सर्वत्रैव विधीयन्ते । यथा- जन्लिट्(ल्) - जन्त - जन्एश्(ए) - जन् जन्ए - ज जन्ए - ज ज्न्ए (गमहनजन...) - ज ज्ञ्'ए (स्तोः...)- जज्ञ्ए - जज्ञे । शेषरूपाणि- जज्ञाते, जज्ञिरे । जज्ञिषे, जज्ञाथे, जज्ञिध्वे । जज्ञे, जज्ञिवहे, जज्ञिमहे । लुटि, लृटि, आशीर्लिङि, लृङि च विशेषकार्याभावाद् एध्-धातुवदेव अस्यापि रूपाणि जायन्ते, हलादित्वाद् अडाडागमयोरेव पार्थक्यम् । लुङि तु-

### विभाषया चिणादेशविधायकं सूत्रम्

**दीपजनबुधपूरितायिप्यायिभ्योऽन्यतरस्याम् ३।१।६१।।**

**एभ्यश्च्लेश्चिण्वा स्यादेकवचने तशब्दे परे ।**

(दीप-जन-बुध-पूरि-तायि-प्यायिभ्यः, ते, च्लेः, चिण्, अन्यतरस्याम्)

**सरलार्थः** - एकवचनसंज्ञके 'त'शब्दे परे सति दीपी (दीप्) दीप्तौ, जनी (जन्) प्रादुर्भावे, बुध (बुध्) अवगमने, पूरी (पूर्) आप्यायने, तायृ (ताय्) सन्तानपालनयोः, ओप्यायी (प्याय्) वृद्धौ, इत्येतेभ्यो धातुभ्यः परस्य च्लेः स्थाने विकल्पेन 'चिण्' इत्यादेशो भवति । चिण्णित्यत्र चकारणकारौ इतौ, तेन 'इ' इत्येव अवशिष्यते ।

जन्-धातोर्लुङि, अडागमे, लस्य स्थाने तादेशे 'अजन् त' इत्यवस्थायां शपं बाधित्वा च्लौ, सिजादेशं बाधित्वा अनेन सूत्रेण विकल्पेन च्लेश्चिण्यनुबन्धलोपे 'अजन् इ त' इत्यवस्थायाम्-

### चिणो लुगादेशविधायकं सूत्रम्

**चिणो लुक् ६।४।१०४।।**

**चिणः परस्य तशब्दस्य लुक् स्यात् ।**

(चिणः, लुक्)

**सरलार्थः** - चिणः परस्य 'त' इति प्रत्ययस्य लुग् भवति ।

अनेन सूत्रेण तशब्दस्य लुकि 'अजन् इ' इति जाते, णित्वाद् 'अत उपधायाः' इत्यनेन उपधाया अकारस्य वृद्धौ प्राप्तायाम्-

### वृद्ध्यादेशनिषेधकं सूत्रम्

**जनिवध्योश्च ७।३।३५।।**

**जनिवध्योश्च न वृद्धिश्चिणि, ञ्णिति कृति च । अजनि । अजनिष्ट । अजनिष्यत् ।**

(जनि-वध्योः, च, चिण्कृतोः, ञ्णिति, उपधायाः, वृद्धिः, न)

**सरलार्थः** - चिण्-कृत्-ञित्-णित्प्रत्ययेषु परेषु सत्सु जन्-धातोः, वध्-धातोश्च उपधायाः स्थाने वृद्धिर्न भवति ।

अनेन सूत्रेण वृद्धिनिषेधे '**अजनि**' इति सिद्धम् । चिणभावे तु च्लेः सिचि 'अजन् स् त' इत्यवस्थायां सिचो इडागमेऽनुबन्धलोपे 'अजन् इस् त' इति जाते, सकारस्य षत्वे, तकारस्य ष्टुत्वेन टकारे '**अजनिष्ट**' इत्यपि सिद्ध्यति । आतामादिषु शेषविभक्तिषु नित्यं सिजादेशः, सस्य षत्वञ्च भवतः । थासि थस्य ष्टुत्वमपि भवति । ध्वमि 'धि चे'ति सलोपः, इणः षीध्वमिति धस्य ढत्वञ्च । जन्-धातोर्लुङि रूपाणि - अजनि/अजनिष्ट, अजनिषाताम्, अजनिषत । अजनिष्ठाः, अजनिषाथाम्, अजनिढ्वम् । अजनिषि, अजनिष्वहि, अजनिष्महि ।

**दीपी दीप्तौ ॥२०॥** (दीप्- सेट्, अकर्मकः, आत्मनेपदी)

**दीप्यते । दिदीपे । अदीपि, अदीपिष्ट ॥**

दीप्त्यर्थको दीपी (दीप्) इति धातुरनुदात्तेत्वादात्मनेपदी वर्तते ।

दीप् लुङ् (ल्) - अदीप् ल् - अदीप् त - अदीप् च्लि त - अदीप् चिण् (इ) त (दीपजन...) - अदीप् इ (चिणो लुक्) - **अदीपि**, चिणभावे च्लेः सिचि, सिच इडागमे- अदीप् इस् त - अदीप् इष् त - अदीप् इष् ट - **अदीपिष्ट** ।

**पद गतौ ॥२१॥** (पद्- अनिट्, सकर्मकः, आत्मनेपदी)

**पद्यते । पेदे । पत्ता । पत्सीष्ट ॥**

### चिणादेशविधायकं विधिसूत्रम्

**चिण् ते पदः ३।१।६०॥**

**पदेश्च्लेश्चिण् स्यात्तशब्दे परे । अपादि । अपत्साताम् । अपत्सत ॥**

(पदः, ते, च्लेः, चिण्)

**सरलार्थः** - एकवचनसंज्ञके त-शब्दे परे सति पद्-धातोः परस्य 'च्लि' इत्यस्य स्थाने 'चिण्' इत्यादेशो भवति । अनेन सिचं बाधित्वा च्लेः स्थाने चिणादेशो भवति ।

पद् लुङ् (ल्) - अपद् ल् - अपद् त - अपद् च्लि त - अपद् चिण् (इ) त (चिण् ते पदः) - अपद् इ (चिणो लुक्) - अपाद् इ (अत उपधायाः) - **अपादि** ।

**विद सत्तायाम्** ॥२२॥ (विद्- अनिट्, अकर्मकः, आत्मनेपदी)

**विद्यते । वेत्ता । अवित्त ॥**

सत्तार्थको विद (विद्) अनुदात्तेत्वाद् आत्मनेपदी च वर्तते ।

विद् लुङ् (ल्) - अविद् ल् - अविद् त - अविद् च्लि त - अविद् सिच् (स्) त - अविद् त (झलो झलि) - अवित् त (खरि च) - **अवित्त** ।

**बुध अवगमने** ॥२३॥ (बुध्- अनिट्, अकर्मकः, आत्मनेपदी)

**बुध्यते । बोद्धा । भोत्स्यते । भुत्सीष्ट । अबोधि, अबुद्ध । अभुत्साताम् ॥**

बुध् लुट् (ल्) - बुध् त - बुध् तास् त - बुध् तास् डा (आ) - बुध् त् आ - बोध् त् आ (पुगन्त...) - बोध् ध् आ (झषस्तथोर्धोऽधः) - बोद् ध् आ (झलां जश् झशि) - **बोद्धा** ।

बुध् लृट् (ल्) - बुध् त - बुध् स्य त - भूध् स्य त (एकाचो वशो भष्...) - भोध् स्य त (पुगन्त...) - भोत् स्य त (खरि च) - भोत् स्य ते - भोत्स्यते । एवमाशीर्लिङि 'भुत्सीष्ट' इत्यादावपि भष्भावो बोध्यः ।

बुध् लुङ् (ल्) - अबुध् ल् - अबुध् त - अबुध् च्लि त - अबुध् चिण् (इ) त (दीपजनबुध...) - अबुध् इ (चिणो लुक्) - अबोध् इ (पुगन्त...) - **अबोधि**, चिणभावपक्षे च्लेः सिचि- अबुध् स् त - अबुध् त (झलो झलि) - अबुध् ध (झषस्तथोः...) - अबुद् ध (झलां जश् झषि) - **अबुद्ध** । तसादौ सिचि, सकारपरकत्वाद् धातोर्बकारस्य भष्भावे- **अभुत्साताम्** इत्यादि ।

**युध संप्रहारे** ॥२४॥ (युध्- अनिट्, सकर्मकः, आत्मनेपदी)

**युध्यते । युयुधे । योद्धा । अयुद्ध ॥**

**सृज विसर्गे** ॥२५॥ (सृज्- अनिट्, सकर्मकः, आत्मनेपदी)

**सृज्यते । ससृजे । ससृजिषे ॥**

सृज्-धातोर्लिटि क्रादिनियमान्नित्यमिडागमो बोध्यः ।

### अमागमविधायकं विधिसूत्रम्

**सृजिदृशोर्झल्यमकिति ६।१।५८॥**

**अनयोरमागमः स्याज्झलादावकिति । स्रष्टा । स्रक्ष्यते । सृक्षीष्ट । असृष्ट । असृक्षाताम् ॥**

(सृजि-दृशोः, अकिति, झलि, अम्)

**सरलार्थः** - किद्भिन्ने झलादि-प्रत्यये परे सति सृज विसर्गे, दृशिर् प्रेक्षणे इत्यनयोः धात्वोः 'अम्' इत्यागमो भवति । मित्वाद् धातोरन्त्यादचः परस्यावयवत्वम् ।

सृज् लुट् (ल्) - सृज् त - सृज् तास् त - सृ अज् तास् त (सृजिदृशोर्झल्यमकिति) - स्रज् तास् त (इको यणचि) - स्रष् तास् त (व्रश्चभ्रस्ज...) - स्रष् तास् डा (आ) - स्रष् त् आ - स्रष् ट् आ - **स्रष्टा** । एवं लृटि 'सृज् स्य त' इत्यवस्थायामनेन सूत्रेण अमि, यणि 'स्रज् स्य तु इति जाते, जकारस्य षत्वे, षकारस्य कत्वे, सकारस्य षत्वे, कषसंयोगे क्षत्वे, टेरेत्वे- **स्रक्ष्यते** । लिङ्-लुङादावपि जस्य षत्वादिकं बोध्यम् ।

**मृष तितिक्षायाम् ॥२६॥** (मृष्- सेट्, सकर्मकः, उभयपदी)

**मृष्यति, मृष्यते । ममर्ष । ममर्षिथ । ममृषिषे । मर्षितासि । मर्षितासे । मर्षिष्यति, मर्षिष्यते ॥**

मृष-धातोरन्त्यः अकारः स्वरित् इच्च, अतो धातुरयमुभयपदी वर्तते ।

**णह बन्धने ॥२७॥** (नह्- अनिट्, सकर्मकः, उभयपदी)

**नह्यति, नह्यते । ननाह । नेहिथ, ननद्ध । नेहे । नद्धा । नत्स्यति । अनात्सीत्, अनद्ध ॥**

णह-धातोर्णकारस्य 'णो नः' इति नत्वे, अन्त्यस्य स्वरितस्य अकारस्य च 'उपदेशेऽजनुनासिक इत्' इतीत्संज्ञायां लोपे 'नह्' इति धातुः स्वरितेत्वादुभयपदी वर्तते । झलि पदान्ते च प्राप्तं ढत्वं बाधित्वा नह्-धातोर्हकारस्य 'नहो धः' इत्यनेन धत्वं भवति । कृते धत्वे धकारात्परयोः तकार-थकारयोः 'झषस्तथोर्धोऽधः' इति धत्वम्, पूर्वधकारस्य च जश्त्वं भवति । किति लिटि सेटि थलि च 'अत एकहल्मध्ये...' इत्यादिना एत्वाभ्यासलोपौ विधीयेते ।

नह् लिट् (ल्) - नह् सिप् (सि) - नह् थल् (थ) - नह् इथ (ऋतो भारद्वाजस्य) - नह् नह् इथ - न नह् इथ - नेह् इथ (अत एक...) - **नेहिथ**, इडभावे- न नह् थ - न नध् थ (नहो धः) - न नध् ध (झषस्तथोः...) - न नद् ध (झलां जश् झशि) - **ननद्ध** । वे, मे च क्रादिनियमान्नित्यमिटि, एत्वाभ्यासलोपे- नेदिथ, नेदिम । आत्मनेपदे तु पित्वाभावेन सर्वविभक्तेः कित्वात् सर्वत्र एत्वाभ्यासलोपे- नेहे, नेहाते, नेहिरे इत्यादि । लुङादौ झलादिप्रत्ययेषु हस्य धत्वादिप्रक्रियया- नद्धा, नत्स्यति इत्यादीनि रूपाणि जायन्ते ।

इति दिवादयः ॥४॥

**अजनि/अजनिष्ट**

'जनी प्रादुर्भावे' इति धातोरनुदात्तस्य ईकारस्य इत्संज्ञायां लोपे 'जन्' इत्यस्मात् सामान्यभूतकालिकक्रियावृत्तौ 'लुङ्' इति सूत्रेण लुङ्यनुबन्धलोपे 'लुङ्लङ्लृङ्क्ष्वडुदात्तः' इत्यनेन अडागमेऽनुबन्धलोपे 'अजन् ल्' इति जाते, धातोरनुदात्तेत्वाद् लस्य स्थाने आत्मनेपदसंज्ञके प्रथपुरुषस्यैकवचने तादेशे 'अजन् त' इति जाते, सार्वधातुकसंज्ञायां प्राप्तं शपं बाधित्वा 'च्लि लुङि' इत्यनेन च्लौ प्रत्यये 'च्लेः सिच्' इत्यनेन च्लेः सिजादेशे प्राप्ते तं प्रबाध्य 'दीपजनबुधपूरितायिप्यायिभ्योऽन्यतरस्याम्' इत्यनेन विकल्पेन चिणादेशेऽनुबन्धलोपे 'अजन् इ त' इति जाते 'चिणो लुक्' इति सूत्रेण त-शब्दस्य लुकि 'अजन् इ' इति जाते 'अत उपधायाः' इति सूत्रेण उपधावृद्धौ प्राप्तायां 'जनिवध्योश्च' इत्यनेन तन्निषेधे, वर्णयोगे 'अजनि' इति रूपं सिद्धम् । चिणभावपक्षे च्लेः सिजादेशेऽनुबन्धलोपे 'अजन् स् त' इति जाते, सिच आर्धधातुकसंज्ञायाम् 'आर्धधातुकस्येड्वलादेः' इति इडागमे 'अजन् इस् त' इति जाते, सकारस्य षत्वे, तकारस्य ष्टुत्वे, वर्णयोगे 'अजनिष्ट' इत्यपि रूपं साधु ।

**धातुरूपावलिः**

**प्राणिप्रसवार्थकस्य सू-धातोर्लटि रूपाणि-**

| | | |
|---|---|---|
| सूयते | सूयेते | सूयन्ते |
| सूयसे | सूयेथे | सूयध्वे |
| सूये | सूयावहे | सूयामहे |

**प्रादुर्भावार्थकस्य जन्-धातोर्लङि रूपाणि-**

| | | |
|---|---|---|
| अजायत | अजायेताम् | अजायन्त |
| अजायथाः | अजायेथाम् | अजायध्वम् |
| अजाये | अजायावहि | अजायामहि |

**सत्तार्थकस्य विद्-धातोर्लृटि रूपाणि-**

| | | |
|---|---|---|
| वेत्स्यते | वेत्स्येते | वेत्स्यन्ते |
| वेत्स्यसे | वेत्स्येथे | वेत्स्यध्वे |
| वेत्स्ये | वेत्स्यावहे | वेत्स्यामहे |

## वाक्येषु प्रयोगानुशीलनम्

१. प्राणिनः प्रतिदिनं जायन्ते ।

२. गौः परह्यः वत्समसूयत ।

३. माता पुत्रं सूयते ।

४. अस्माकं देशे बह्व्यः प्राकृतसम्पदो विद्यन्ते ।

५. ध्यानेन पठसि चेद् अवश्यमेव व्याकरणं भोत्स्यसे ।

६. साधकाः कष्टं मृष्यन्ते ।

७. गोपालः पशुं रज्वा अनात्सीत् ।

## अभ्यासः

### १. सूत्राणि शुद्धमुच्चारयत

(क) सृजिदृशोर्झल्यमकिति

(ख) जनिबध्योश्च

(ग) दीपजनबुधपूरितायिप्यायिभ्योऽन्यतरस्याम्

(घ) मीनातिमिनोतिदीङां ल्यपि च

(ङ) दीङो युडचि क्ङिति

### २. कोष्ठस्थसमुचितपदैः रिक्तस्थानं पूरयत

(क) जन्-धातुः ...................... वर्तते । (सकर्मकः, अकर्मकः, द्विकर्मकः)

(ख) सू-धातुः ...................... अस्ति । (सेट्, वेट्, अनिट्)

(ग) मृष्-धातुः ...................... प्रयुज्यते । (परस्मैपदे, आत्मनेपदे, उभयपदे)

(घ) युध्-धातोर्लृटि तिपि ................ इति रूपम् । (योत्स्यते, योधिस्यते, योत्स्यति)

(ङ) नह्-धातुः ...................... अर्थे प्रयुज्यते । (संप्रहणे, विसर्गे, बन्धने)

३. **अधोऽङ्कितानां प्रश्नानामुत्तराणि लिखत**

(क) डी-धातोः कोऽर्थः ?

(ख) जन्-धातोर्जादेशः केन सूत्रेण कुत्र कुत्र भवति ?

(ग) सू-धातोर्लिटि कथं नित्यमिट् ?

(घ) दी-दू-पी-मा-दीप्-जन्-पद्-विद्-बुध्-युध्-सृज्-मृष्धातूनामर्थान् लिखत ।

(ङ) 'अपादि' इत्यत्र तशब्दस्य लुक् कथम् ?

(च) 'दीप्+लिट्(तिप्)' इत्यत्र किं रूपं निष्पद्यते ?

(छ) 'भुत्सीष्ट' इत्यत्र धातु-लकार-विभक्तीर्निर्दिशत ।

(ज) 'दीपजनबुध...' इत्यादिसूत्रे निर्दिष्टधातवः के ?

(झ) नह्-धातोरुभयपदप्रयोगे कारणं किम् ?

(ञ) दी-धातौ कुत्र कुत्र युडागमो विधीयते ?

४. **जन्-धातोर्लुङि लुटि च रूपाणि लिखत ।**

५. **प्रमुखसूत्रनिदर्शनपूर्वकं रूपसिद्धिप्रकारं प्रदर्शयत**

(क) जायते (ख) डीयते

(ग) सुषुविथे (घ) दिदीये

(ङ) दाता (च) नह्यते

(छ) अदास्त (ज) अबुद्ध

(झ) स्रष्टा (ञ) ननद्ध

६. **निर्दिष्टधातूनां रूपाणि दर्शयत**

(क) मृष्-धातोर्लृटि (ख) युध्-धातोर्लोटि

(ग) सृज्-धातोर्विधिलिङि

७. **दिवादिगणस्य पाठयोः पठितानां धातूनां सकर्मकाकर्मकत्वे सेट्त्वानिट्त्वे च निर्धारयत ।**

द्वाविंशः पाठः

# स्वादिगणपठिता धातवः

स्वादिप्रकरणे सार्वधातुकलकारेषु शपं प्रबाध्य 'श्नु इति विकरणप्रत्ययो भवति। श्नु इत्यत्र शकारस्य इत्संज्ञायां तस्य लोपे 'नु' इत्यवशिष्यते। शकारस्य इत्संज्ञा भवति। अत्र 'सार्वधातुकमपित्' इति ङिद्वद्भावेन 'क्ङिति च' इति अङ्गस्य गुणनिषेधो भवति। 'श्नु इत्यत्र स्थितस्य उकारस्य पित्-विभक्तिषु गुणे न कापि समस्या। 'श्नु इत्यस्य उकारस्य अजादिसार्वधातुके प्रत्यये परे 'हुश्नुवोः सार्वधातुके' इत्यनेन यण् भवति। प्रकरणारम्भे 'सु इति धातुपाठात् 'स्वादिः' इति प्रकरणस्य नाम।

**षुञ् अभिषवे ॥१॥** (सु- अनिट्, अर्थवशात् सकर्मकोऽकर्मकश्च, उभयपदी)

षुञ् (सु) इति धातुः अभिषवेऽर्थे वर्तते। अभिषवश्च स्नपनम् (जलादिनाऽभिषेककरणम्), पीडनम् (शस्यादीनां मर्दनम्), स्नानम् (शोधनम्), सुरासन्धानम् (मदिरोत्पादनक्रिया) चेति। धातुरयं चतुर्ष्वर्थेषु स्नानेऽर्थेऽकर्मकः, शेषेषु त्रिष्वर्थेषु सकर्मको वर्तते। आद्यषकारस्य 'धात्वादेः षः सः' इत्यनेन सत्वे, अन्त्यञकारस्य चेत्संज्ञायां लोपे 'सु इत्येवाऽवशिष्यते। ञित्वादुभयपदी। अनिट् चायं धातुः।

### श्नुविकरणप्रत्ययविधायकं विधिसूत्रम्

**स्वादिभ्यः श्नुः ३।१।७३॥**

**शपोऽपवादः। सुनोति। सुनुतः। हुश्नुवोरिति यण्। सुन्वन्ति। सुनोषि। सुनुथः। सुनुथ। सुनोमि।सुन्वः, सुनुवः। सुन्मः, सुनुमः। सुनुते। सुन्वाते। सुन्वते। सुन्वहे, सुनुवहे। सुन्महे, सुनुमहे। सुषाव। सुषुवे। सोता। सुनु। सुनवानि। सुनवै। सुनुयात्॥**

(स्वादिभ्यः, कर्तरि, सार्वधातुके, श्नुः)

**सरलार्थः** - कर्तरि अर्थे विहिते सार्वधातुकसंज्ञके प्रत्यये परे सति स्वादि-गणपठितेभ्यो धातुभ्यः श्नु-प्रत्ययो विधीयते। सार्वधातुकलकारेषु शपं बाधित्वा अनेन सूत्रेण श्नु-प्रत्ययो भवति। शकारस्य इत्संज्ञायां लोपे 'नु' इत्येव अवशिष्यते। तस्य च शित्वात् सार्वधातुकसंज्ञा, अपित्-सार्वधातुकत्वाद् ङिद्वद्भावश्च भवति।

सु-धातोर्लटि 'सु ल्' इत्यवस्थायां क्रियाफलेऽकर्तृगे सति लस्य स्थाने परस्मैपदसंज्ञके तिपि 'सु ति' इति जाते, तिपः सार्वधातुकसंज्ञायां शपं बाधित्वा अनेन सूत्रेण श्नु-प्रत्ययेऽनुबन्धलोपे 'सु नु ति' इति जाते, शित्वात् श्नु इत्यस्यापि सार्वधातुकसंज्ञायां तस्य अपित्वाद् ङिद्वद्भावे 'सार्वधातुकार्धधातुकयोः' इत्यनेन उभयत्र उकारयोर्गुणे प्राप्ते, ङित्परत्वात् पूर्वस्योकारस्य 'क्ङिति च' इति गुणनिषेधे, परस्योकारस्य गुणे 'सुनोति' इति सिद्ध्यति। अनयैव रीत्या सिपि, मिपि च सुनोषि, सुनोमि इत्येते रूपे जायेते। तसादिषु अपिद्विभक्तिष' श्नोस्तिङश्च ङित्वादुभयत्र गुणनिषेधो बोध्यः। तसि- सुनुतः। झौ झस्यन्तादेशे 'सु नु अन्ति' इत्यवस्थायामियङादेशं बाधित्वा 'हुश्नुवोः सार्वधातुके' इत्यनेन यणि 'सुन्वन्ति' इति रूपम्। थसि, थे च सुनुथः, सुनुथ इत्येते रूपे। वसि, मसि तु 'लोपश्चास्यान्यतरस्यां म्वोः' इत्यनेन वैकल्पिके उकारलोपे 'सुन्वः/सुनुवः', 'सुन्मः/सुनुमः' इति।

क्रियाफले कर्तृगे तु आत्मनेपदे, तङां सर्वेषामपित्वात् सर्वत्रैव गुणनिषेधो भवति। अजादिषु विभक्तिषु हुश्नुवोरिति यण् विधीयते। ते- सुनुते। आतामि- सु नु आताम् - सु नुआते (टेरेत्वम्) - सु न् य् आते (हुश्नुवोरिति यण्) - सुन्वाते। झे- सु नु झ - सु नु अत (आत्मनेपदेष्वनतः) - सु नु अते - सु न् व् अते - सुन्वते। वसि मसि च 'लोपश्चास्यान्यतरस्यां म्वोः' इति विकल्पेन उलोपः। लिटि- सिपि थलि भारद्वाजमतेन वैकल्पिके इटि 'सुषविथ/सुषोथ' इति। उत्तमपुरुषे णलि णिद्विकल्पनाद् वैकल्पिक्यां वृद्धौ 'सुषाव/सुषवु इति। वस्मसौ तु वमावादेशयोः क्रादिनियमान्नित्यमिटि सुषुविव, सुषुविम इत्येते रूपे जायेते। आत्मनेपदे हलादिषु विभक्तिषु नित्यमेव इडागमो भवति। लोटि विध्यर्थे सिपि, सेर्ह्यादेशे 'सु नुहि' इत्यवस्थायां हेरपित्वाद् ङिद्वद्भावेन गुणनिषेधे 'उतश्च प्रत्ययादसंयोगपूर्वात्' इत्यनेन हेर्लुकि 'सुनु' इति सिद्ध्यति। लुङि तु-

### इडागमविधायकं विधिसूत्रम्

**स्तुसुधूञ्भ्यः परस्मैपदेषु ७।२।७२॥**

**एभ्यः सिच इट् स्यात्परस्मैपदे। असावीत्। असोष्ट ॥**

(स्तु-सु-धूञ्भ्यः, सिचः, परस्मैपदेषु, इट्)

**सरलार्थः** - परस्मैपदसंज्ञक-प्रत्यये परे सति स्तु, सु, धूञ् (धू), इत्येतेभ्यो धातुभ्यः परस्य सिचः'इट्' इत्यागमो भवति।

सु-धातोर्लुङि, अडागमे, लस्य तिपि, शपं बाधित्वा च्लौ, च्लेः सिचि 'असु स्+ति' इत्यवस्थायाम्

अनेन सूत्रेण सिच इटि 'असु इस्+ति' इति जाते, इतश्चेति इलोपे, 'अस्तिसिचोऽपृक्ते' इति ईडागमे, सिचि वृद्धिरिति वृद्धौ, आवादेशे, सलोपे, सवर्णदीर्घे 'असावीत्' इति सिद्ध्यति । आत्मनेपदे तु इडभावे, गुणे, सन्ध्यादिकार्ये 'असोष्ट' इति ।

**चिञ् चयने ॥२॥ (चि- अनिट्, सकर्मकः, ञित्वादुभयपदी)**

**चिनोति । चिनुते ॥**

चिञ् (चि) इति धातुश्चयनेऽर्थे वर्तते ।

चि लट् (ल्) - चि तिप् (ति) - चि श्नु (नु) ति (स्वादिभ्यः श्नुः) - चि नो ति (सार्वधातुकार्धधातुकयोः) - **चिनोति** । आत्मनेपदे तु ङित्वाद् गुणाभावे- **चिनुते** ।

## कुत्वादेशविधायकं विधिसूत्रम्

**विभाषा चेः ८।३।५८॥**

**अभ्यासात्परस्य चेः कुत्वं वा स्यात्सनि लिटि च । चिकाय, चिचाय । चिक्ये, चिच्ये । अचैषीत्, अचेष्ट ।**

(अभ्यासात्, चेः, सन्लिटोः,कु)

**सरलार्थः** - सन्-प्रत्यये लिट्-लकारे च परे सति अभ्यासात् परस्य 'चि' इति धातुरूपस्य अङ्गस्य चकारस्य स्थाने कवर्गादेशो विकल्पेन भवति ।

चि लिट् (ल्) - चि तिप् (ति) - चि णल् (अ) - चि चि अ - चि कि अ (विभाषा चेः) - चि कै अ (अचो ञ्णिति) - चि क् आय् अ (एचोऽयवायावः) - **चिकाय**, कत्वाभावे- **चिचाय** । आत्मनेपदे- चि ति - चि एश् (ए) - चि चि ए - चि कि ए - चि क् य् ए (इको यणचि) - **चिक्ये**, कुत्वाभावे- **चिच्ये** ।

**स्तृञ् आच्छादने ॥३॥** (स्तृ- अनिट्, सकर्मकः, उभयपदी)

**स्तृणोति । स्तृणुते ॥**

ञित्वादुभयपदी स्तृञ् (स्तृ) इति धातुराच्छादनेऽर्थे वर्तते । लटि पूर्ववत्प्रक्रियया 'स्तृनोति' इति जाते 'ऋवर्णान्नस्य णत्वं वाच्यम्' इति नकारस्य णत्वे- **स्तृणोति**, एवमात्मनेपदे- **स्तृणुते** ।

## हलादिशेषनियामकं सूत्रम्

**शर्पूर्वाः खयः ७।४।६१॥**

**अभ्यासस्य शर्पूर्वाः खयः शिष्यन्तेऽन्ये हलो लुप्यन्ते । तस्तार । तस्तरतुः । तस्तरे । गुणोऽर्तीति**

**गुणः । स्तर्यात् ।**

(अभ्यासस्य, शर्-पूर्वाः, खयः, हल्, शेषः)

**सरलार्थः** - अभ्यासे स्थितेषु हल्-वर्णेषु यदि शर्-प्रत्याहारस्थवर्णाद् अव्यवहितपरे खय्-प्रत्याहारस्थवर्णाः सन्ति चेत् तादृशाः खय्-वर्णा एव अवशिष्यन्ते, आदिस्थेन शरा सहितानाम् अन्येषां हल्-वर्णानां लोपो भवति ।

स्तृ-धातोर्लिटि, तिपि, णलि, द्वित्वे 'स्तृ स्तृ अ' इति जाते अभ्याससंज्ञायाम् 'उरत्' इत्यनेन अत्वे, रपरत्वे 'स्तर् स्तृ अ' इत्यवस्थायाम् अनेन सूत्रेण हलादिशेषं बाधित्वा खय्शेषे 'त स्तृ अ' इति जाते 'अचो ञ्णिति' इति वृद्धौ, रपरत्वे, वर्णयोगे- तस्तार । अतुसादौ 'ऋतश्च संयोगादेर्गुणः' इति गुणे- तस्तरतुः, तस्तरुः इत्यादि । आत्मनेपदे ते, तस्य एशादेशे, द्वित्वे, अभ्यासकार्ये 'त स्तृए' इत्यवस्थायाम्, ङित्वाद् गुणनिषेधे, पुनः 'ऋतश्च संयोगादेर्गुणः' इत्यनेन गुणे 'तस्तरे' इति सिद्ध्यति । एवं पिद्भिन्नासु परस्मैपदविभक्तिषु आत्मनेपदविभक्तिषु च सर्वत्रैव अनेन गुणो विधीयते । ऋदन्तधातुत्वात् थलि इडागमो न भवति, वे मे तु 'कृसृभृवृ...' इत्यादिना सूत्रेण नित्यमिट् । आत्मनेपदे ध्वमि 'विभाषेटः' इत्यनेन धस्य वा धत्वम् । लृटि, लृङि चोभयोः पदयोः 'ऋद्धनोः स्ये' इत्यनेन नित्यमिडागमो भवति । लिङि परस्मैपदे 'गुणोऽर्तिसंयोगाद्योः' इत्यनेन गुणो भवति । आत्मनेपदे तु-

### विभाषया इडागमविधायकं विधिसूत्रम्

**ऋतश्च संयोगादेः ७।३।४३॥**

**ऋदन्तात्संयोगादेर्लिङ्सिचोरिड् वा स्यात्तङि । स्तरिषीष्ट, स्तृषीष्ट । अस्तरिष्ट, अस्तृत ॥**

(संयोगादेः, ऋतः, च, लिङ्-सिचोः, आत्मनेपदेषु, इट्, वा)

**सरलार्थः** - आत्मनेपदसंज्ञके तङि परे सति ऋदन्ताद् (ह्रस्वाद् ऋकारान्ताद्) धातोः संयोगादेरुत्तरयोः स्थितयोर्लिङ्-सिचोर्विकल्पेन 'इट्' इत्यागमो भवति ।

अनेन इट्पक्षे 'सार्वधातुकार्धधातुकयोः' इत्यनेन गुणे 'स्तरिषीष्ट' इति निष्पद्यते, इडभावे तु 'उश्च' इति कित्वाद् गुणनिषेधे 'स्तृषीष्ट' इति रूपं बोध्यम् । इट्पक्षे गुणः, इडभावे च कित्वाद् गुणनिधेषश्चेत्येते कार्ये लुङ्यात्मनेपदेऽपि स्मर्तव्ये । तत्र झलादौ 'ह्रस्वादङ्गात्' इति सिचो लुगपि भवत्येव ।

**धूञ् कम्पने ॥४॥** (धू- वेट्, सकर्मकः, उभयपदी)

**धूनोति । धूनुते । स्वरतीति वेट् । दुधविथ, दुधोथ ॥**

कम्पनार्थको धूञ् (धू) इति धातुः 'स्वरतिसूतिस्यतिधूञूदितो वा' इत्यनेन वेट् भवति । किति लिटि तु धातुरयं सेट्, तत्र सेट्त्वविधानप्रक्रिया च यथा-

### इडागमनिषेधविधायकं सूत्रम्

**श्र्युकः किति ७।२।११॥**

**श्रिञ्, एकाच उगन्ताच्चगित्कितोरिण्न । परमपि स्वरत्यादिविकल्पं बाधित्वा पुरस्तात्प्रतिषेधकाण्डारम्भसामर्थ्यादनेन निषेधे प्राप्ते क्रादिनियमान्नित्यमिट् । दुधुविव । दुधुवे । अधावीत् । अधविष्ट, अधोष्ट । अधविष्यत्, अधोष्यत् । अधविष्यताम्, अधोष्यताम् । अधविष्यत, अधोष्यत ॥**

(श्रि-उकः, एकाचः, किति, इट्, न)

**सरलार्थः** - श्रिञ् (श्रि) इति धातोः, एकाच्-धातुभ्यः, उगन्त-धातुभ्यश्च परस्य गितः कितश्च प्रत्ययस्य इडागमो न भवति । अनेन सूत्रेण इण् निषेधे प्राप्ते अत्र क्रादिनियमान्नित्यमेव इडागमो भवति । अत्र स्मर्तव्यो विषयो यद्यपि 'श्र्युकः किति ७।२।११ इत्यस्मात् 'स्वरतिसूतिसयतिधूञूदितो वा ७।२।४३ इति सूत्रं परं वर्तते तथापि 'श्र्युकः किति ७।२।११' इत्यनेन 'स्वरतिसूतिसूयतिधूञूदितो वा ७।२।४३' इति सूत्रं बाध्यते, पुरस्तात्प्रतिषेधकाण्डारम्भसामर्थ्यादिति ।

धू-धातोर्लिटि, वसि, वे 'धू व इति जाते नित्यं बाधित्वा 'स्वरति...' इत्यादिना सूत्रेण प्राप्तस्य वैकल्पिकस्य इडागमस्य अनेन सूत्रेण निषेधे क्रादिनियमान्नित्यमिडागमे 'धू इव' इति जाते, द्वित्वे, अभ्यासकार्ये 'दु धू इव' इत्यवस्थायां निषिद्धे गुणे ऊकारस्य उवङादेशे, वर्णयोगे- **दुधुविव** । एवं मसि- दुधुविम । आत्मनेपदे सर्वत्र कित्वाद् गुणनिषेधे, उवङि- **दुधुवे** इत्यादि । लुङि परस्मैपदे- अटि, तिपि, इलोपे 'स्वरति...' इति विकल्पेन प्राप्तमिटं प्रबाध्य 'स्तुसुधूञ्भ्यः...' इत्यादिना नित्यमिटि, ईटि 'सिचि वृद्धिः परस्मैपदेषु' इति वृद्धौ, आवादेशे, सिचो लुकि, दीर्घे च- **अधावीत्** । आत्मनेपदे- अधू स् त - अधू इस् त (स्वरति...) - अधो इस् त (सार्वधातु...) - अध् अव् इस् त - अध् अव् इष् त - अध् अव् इष् ट - **अधविष्ट**, इडभावे- **अधोष्ट** । लृङि उभयोः पदयोः 'स्वरति...' इति वेटि, गुणे, इट्पक्षेऽवादेशे- अधविष्यत्/अधोष्यत्, अधविष्यत/अधोष्यत इत्यादीनि रूपाणि जायन्ते ।

**इति स्वादयः**

**असावीत्**

अभिषवार्थकातः ञकारेत्संज्ञकात् **'षु'धातोर्धात्वादेः षः स** इत्यनेन सत्वे सु-धातोः सामान्यभूतकालस्य विवक्षायाम् 'लुङ्' इति सूत्रेण लुङ्यनुबन्धलोपे 'सु ल्' इति जाते 'लुङ्लङ्...' इति अट्यनुबन्धलोपे, लटः स्थाने परगामिनि क्रियाफले द्योत्ये परस्मैपदसंज्ञके प्रथमपुरुषस्यैकवचने तिबादेशेऽनुबन्धलोपे 'असु ति' इति जाते सार्वधातुकसंज्ञायां प्राप्तं शपं बाधित्वा धातोश्च्लि-प्रत्यये, तस्य स्थाने सिजादेशेऽनुबन्धलोपे 'असु स् ति' इति जाते सिच आर्धधातुकसंज्ञायां प्राप्तस्य इडागमस्य निषेधानन्तरम् 'स्तुसुधूञ्भ्यः परस्मैपदेषु' इत्यनेन सिच इटि 'असु इस् ति' इति स्थिते 'इतश्च' इति तिप इलोपे 'अस्ति सिचोऽपृक्ते' इत्यपृक्तस्य ईडागमेऽनुबन्धलोपे 'असु इस् ईत्' इति स्थितौ 'सिचि वृद्धिः परस्मैपदेषु' इति वृद्धौ 'असौ इस् ईत्' इति जाते 'इट ईटि' इति सलोपे, सवर्णदीर्घे, औकारस्य आवादेशे, वर्णसम्मेलने 'असावीत्' इति रूपं साधु ।

**धातुरूपावलिः**

**सु-धातोर्लटि परस्मैपदे रूपाणि-**

| | | |
|---|---|---|
| सुनोति | सुनुतः | सुन्वन्ति |
| सुनोषि | सुनुथः | सुनुथ |
| सुनोमि | सुन्वः/सुनुवः | सुन्मः/सुनुमः |

**सु-धातोर्लटि आत्मनेपदे रूपाणि-**

| | | |
|---|---|---|
| सुनुते | सुन्वाते | सुन्वते |
| सुनुषे | सुन्वाथे | सुनुध्वे |
| सुन्वे | सुन्वहे/सुनुवहे | सुन्महे/सुनुमहे |

**स्तृ-धातोर्लिटि परस्मैपदे रूपाणि-**

| | | |
|---|---|---|
| तस्तार | तस्तरतुः | तस्तरुः |
| तस्तर्थ | तस्तरथुः | तस्तर |
| तस्तार/तस्तर | तस्तरिव | तस्तरिम |

## वाक्येषु प्रयोगानुशीलनम्

१. त्वं वृथा पुष्पाणि न चिनुयाः ।

२. उष्णकाले जनाः शीतजलेन सुनुयुः ।

३. स्वस्थो जनः प्रतिदिनं सुनोति ।

४. वयं पक्वानि फलानि चिन्महे ।

५. वायुः पत्राणि धुनोति ।

६. सा उष्णजलेन शिशुमसावीत् ।

७. मेघः सूर्यप्रकाशमस्तृणोत् ।

## अभ्यासः

१. **सूत्राणि शुद्धमुच्चारयत**

(क) स्वादिभ्यः श्नुः ।
(ख) शर्पूर्वाः खयः ।
(ग) स्तुसुधूञ्भ्यः परस्मैपदेषु
(घ) श्र्युकः किति ।

२. **समानधातु-लकार-पुरुष-वचनानां क्रियापदे परस्परं मेलयत**

| **परस्मैपदम्** | **आत्मनेपदम्** |
|---|---|
| चिनुताम् | अधोष्यावहि |
| सुनुयात | अधुन्महि |
| सुनोषि | धविष्येथे |
| अचिन्वन् | चेषीय |
| चीयासम् | अचिन्वत |
| धविष्यथ | सुनुषे |
| अधोष्याव | चिन्वाताम् |
| अधुन्म | सुन्वीध्वम् |

३. **कोष्ठस्थसमुचितपदै रिक्तस्थानं पूरयत**

(क) स्वादिगणस्य विकरणप्रत्ययः ............... वर्तते । (सार्वधातुकः, आर्धधातुकः)

(ख) 'अस्तृषि' इति क्रियापदम् ...................... अस्ति । (परस्मैपदि, आत्मनेपदि)

(ग) 'तस्तरतुः' इत्यत्र ...................... इत्यनेन गुणो विधीयते ।
(सार्वधातुकार्धधातुकयोः, ऋतश्च संयोगादेर्गुणः)

(घ) चि-धातोर्लोटि सिपि ...................... इति रूपम् । (चिनु, चिनुष्व)

(ङ) धू-धातुः ...................... अर्थे प्रयुज्यते । (चयने, कम्पने)

४. **अधोऽङ्कितानां प्रश्नानामुत्तराणि लिखत**

(क) सु-धातुः केष्वर्थेषु प्रयुज्यते ?

(ख) स्वादिगणस्य विकरणप्रत्ययः कः ? तस्यानुबन्धविनिर्मुक्तस्वरूपञ्च किम् ?

(ग) 'दुधुविव' इत्यत्र कथं नित्यमिट्सिद्धः ?

(घ) चि-धू-स्तृधातूनामर्थान् लिखत ।

(ङ) केषु प्रत्ययेषु परतः श्नु-प्रत्ययस्य उकारस्य लोपो भवति ?

(च) 'धू+लुट्(थ)' इत्यत्र किं रूपं निष्पद्यते ?

(छ) 'असोष्ट' इत्यत्र धातु-लकार-विभक्तीर्निर्दिशत ।

(ज) 'स्तुसुधूञ्भ्यः' इत्यत्र केषां धातूनां निर्देशो विहितोऽस्ति ?

(झ) अभिषव-पदबोध्या अर्थाः के ?

(ञ) चि-धातोः कुत्वं कस्मिन् लकारे भवति ?

५. **धू-धातोर्लुङि लृटि चोभयोः पदयो रूपाणि लिखत ।**

६. **प्रमुखसूत्रनिदर्शनपूर्वकं रूपसिद्धिप्रकारं प्रदर्शयत**

(क)सुनुते (ख) सुनोति (ग) सुन्वः (घ)सुन्वते (ङ) सूयात्

(च) चिकाय (छ) तस्तार (ज) स्तरिषीष्ट (झ) दुधुविव (ञ) चिच्ये

७. **अधस्तनानां सोपसर्गक्रियापदानाम् अर्थम् अन्विष्य वाक्येषु पदप्रयोगकौशलञ्च दर्शयत**

परिचिनोति, निश्चिनोमि, सञ्चिनोषि, उपचिन्वन्ति

त्रयोविंशः पाठः

# अथ तुदादिप्रकरणम्

तुदादिगणे शपं प्रबाध्य 'शु इति विकरणप्रत्ययो भवति। शप्रत्यये शकारस्य अनुबन्धलोपे 'अ' इत्यवशिष्यते। शित्वात् 'तिङ्शित्सार्वधातुकम्' इति सार्वधातुकसंज्ञा अपित्त्वात् 'सार्वधातुकमपित्' इति ङिद्वद्भावश्च भवतः। तेन 'क्ङिति च'ति गुणनिषेधो भवति। अत्र प्रकरणाऽरम्भे तुद्धातुरस्तीति तुदादिरिति प्रकरणस्य नाम।

**तुद व्यथने ॥१॥** (तुद्-अनिट्, सकर्मकः, उभयपदी)

व्यथनार्थकः तुद-धातोऽकारः स्वरितः, इच्च। अस्मादारभ्य लिप उपदेशे इति धातुपर्यन्ता दश धातवः स्वरितेत्वाद् उभयपदिनः सन्ति। तुद्-धातोर्वर्तमानक्रियावृत्तित्वविवक्षयां लटि, तिपि, शपि प्राप्ते सूत्रमिदमारभ्यते-

### शविकरणविधायकं विधिसूत्रम्

**तुदादिभ्यः शः ३।१।७७॥**

**शपोऽपवादः। तुदति। तुदतः। तुदते। तुतोद। तुतोदिथ। तुतुदे। तोत्ता। तोत्स्यति। तोत्स्यते। तुदतु। तुदताम्। अतौत्सीत्। अतुत्त।**

(तुदादिभ्यः, कर्तरि, सार्वधातुके, शः)

**सरलार्थः** - तुदादिगणपठितेभ्यः धातुभ्यः शपं प्रबाध्य 'श' इति विकरणप्रत्ययो भवति। शकारस्य 'लशक्वतद्धिते' इतीत्संज्ञायां लोपे अकारः शिष्यते। शपश्चानुबन्धलोपे अकार एव शिष्यते। किन्तु शप्-विकरणस्य पित्त्वम्, श-विकरणप्रत्ययस्य च अपित्त्वम् इति तयोर्भेदः। तस्यापित्त्वात् 'सार्वधातुकमपित्' इति सूत्रेण ङिद्वद्भावे'तुद्' इत्यस्योकारस्य लघूपधगुणे प्राप्ते 'क्ङिति च' इति निषिध्यते।

परस्मैपदे- तुद् लट् (ल्) - तुद् तिप् (ति) (अकर्तृगे क्रियाफले परस्मैपदम्, तिप्-प्रत्ययः) - तुद् श (अ) ति (शपम्प्रबाध्य शः, शविकरणस्यापित्त्वाद् ङित्त्वम्) - तुद् अ ति - (लघूपधगुणनिषेधः) - तुदति। एवं तसादौ- तुदतः, तुदन्ति, तुदसि, तुदथः, तुदथ, तुदामि, तुदावः, तुदामः।

आत्मनेपदे- तुद् लट् (ल्) - तुद् त (कर्तृगामिनि क्रियाफले आत्मनेपदम्, तप्रत्ययः) - तुद् श (अ) त (शपम्प्रबाध्य शः, तस्य ङित्त्वञ्च) - तुद् अ त (लघूपधगुणनिषेधः) - तुद् अ ते

(टेरेत्वम्) - तुदते । एवमेव आतामादौ- तुदेते, तुदन्ते, तुदसे, तुदेथे, तुदध्वे, तुदे, तुदावहे, तुदामहे ।

लिटि परस्मैपदे- तुद् लिट् (ल्) - तुद् तिप् (ति) - तुद् णल् (अ)- तुद् तुद् अ - तु तुद् अ - तुतोद् अ (पुगन्तलघूपधस्य च) - तुतोद । अतुसि कित्वेन गुणनिषेधे- तुतुदतुः, उसि- तुतुदुः । थलि- तुद् थल् (थ)-तुद् इथ (क्रादिनियमान्नित्यमिट्)- तुद् तुद् इथ - तु तुद् इथ - तुतोद् इथ (पुगन्तलघूपधस्य च) - तुतोदिथ । थसादौ- तुतुदथुः, तुतुद, तुतोद, तुतुदिव, तुतुदिम । आत्मनेपदे- तुद् लिट् (ल्)तुद् त - तुद् ए (लिटस्तझयोरेशिरेच्) - तुद् तुद् ए - तु तुद् ए - तुतुदे (कित्वाद् लघूपधगुणनिषेधः) । आतामि- तुतुदाते । झे इरेजादेशे- तुतुदिरे । थास् (से), ध्वम्, वहि, महिङ् इत्येतेषु क्रादिनियमान्नित्यमिटि- तुतुदिषे, तुतुदाथे, तुतुदिध्वे, तुतुदे, तुतुदिवहे, तुतुदिमहे ।

लुडादौ आर्धधातुकेषु 'आर्धधातुकस्येड्वलादेः' इत्यनेन प्राप्त इट् 'एकाच उपदेशेऽनुदात्तात्' इत्यनेन निषिध्यते । तुद् लुट् (ल्) - तुद् ति - तुद् तास् ति - तुद् तास् डा (आ)(लुटः प्रथमस्य डारौरसः)- तुद् त् आ (डित्त्वविधानसामर्थ्यादभस्यापि टेर्लोपः) - तोद् ता (पुगन्त...) - तोत् ता (खरि च) - तोत्ता । तसि झौ च- तोत्तारौ, तोत्तारः इत्यादि । एवमात्मनेपदेऽपि प्रथमपुरुषे । सिबादौ- तोत्तासि, तोत्तास्थः इत्यादि । थासादौ- तोत्तासे, तोत्तासाथे इत्यादि । लृटि- तोत्स्यति, तोत्स्यते इत्यादि । लुटि- तुदतु/तुदतात्, तुदताम् इत्यादि । लङि- अतुदत्, अतुदत इत्यादि । विधिलिङि- तुदेत्, तुदेत इत्यादि । आशीर्लिङि- तुद्यात्, तुत्सीष्ट इत्यादि । लुङि- तुद् लुङ् (ल्) - अतुद् ल् - अतुद् तिप् (ति) - अतुद् च्लि ति - अतुद् सिच् (स्) ति - अतुद् स् त् (इतश्च) - अतुद् स् ईत् (अस्तिसिचोऽपृक्ते) - अतौद् स् ईत् (वदव्रजहलन्तस्याचः) - अतौत् स् ईत् (खरि च) - अतौत्सीत् । आत्मनेपदे- तुद् लुङ् (ल्) - अतुद् ल् - अतुद् त - अतुद् च्लि त - अतुद् सिच् (स्) त - अतुद् स् त ('लिङ्सिचावात्मनेपदेषु इति सिचः कित्वेन गुणनिषेधः) - अतुद् त (झलो झलि) - अतुत् त (खरि च) - अतुत्त । तसादौ- अतौत्ताम्, अतुत्साताम् इत्यादि । लृङि- अतोत्स्यत्, अतोत्स्यत इत्यादि ।

**णुद प्रेरणे ॥२॥** (नुद्- अनिट्, सकर्मकः, उभयपदी)

**नुदति, नुदते । नुनोद । नोत्ता ॥**

प्रेरणार्थकस्य णुद-धातोराद्यस्य णकारस्य 'णो नः' इति नत्वे, अन्त्यस्य स्वरितस्य अकारस्य 'उपदेशेऽजनुनासिक इत्' इत्संज्ञायां लोपे 'नद्' इत्येवावशिष्यते । अस्योभयपदिधातुनः

सर्वाणि रूपाणि तुद्-धातुवदेव प्रक्रियया निष्पद्यन्ते ।

**भ्रस्ज पाके ॥३॥** (भ्रस्ज्- अनिट्, सकर्मकः, उभयपदी)

**ग्रहिज्येति सम्प्रसारणम् । सस्य श्चुत्वेन शः । तस्य जश्त्वेन जः । भृज्जति, भृज्जते ॥**

पाके'र्थे प्रयुज्यमानः स्वरितेतो भ्रस्ज्-धातोर्ङिति किति च प्रत्यये परतः सति 'ग्रहिज्यावयिव्यधि...' इत्यादिना सूत्रेण रेफस्य सम्प्रसारणं भवति । सकारस्य च जकारेण योगात् 'स्तोः श्चुना श्चुः' इति श्चुत्वेन शकारः, तस्य च 'झलां जश् झशि' इति जश्त्वेन जकारो विधीयते । तेनोक्तप्रत्ययेषु भ्रस्ज्-धातुः 'भृज्ज्' इति स्वरूपे परिवर्तते । सार्वधातुकलकारेषु श-विकरणस्याऽपित्सार्वधातुकतया ङित्वे सिद्धे सर्वत्र प्रक्रियेयमवलम्बनीया ।

भ्रस्ज् लट् (ल्) - भ्रस्ज् तिप् (ति) - भ्रस्ज् श (अ) ति (तुदादिभ्यः शः) - भ् ऋ अस्ज् अ ति (ग्रहिज्या...) - भृस्ज् अ ति (सम्प्रसारणाच्च) - भृश्ज् अ ति (स्तोः...) भृज्ज् अ ति (झलां जश् झशि) - भृज्जति । एवं तसादौ- भृज्जतः, भृज्जन्ति इत्यादि । कर्तृगामिनि क्रियाफले तु आत्मनेपदे- भ्रस्ज् त - भ्रस्ज् अ त - भृस्ज् अ त - भृश्ज् अ त - भृज्ज् अ त - भृज्ज् अ ते - **भृज्जते** इति पूर्ववत् प्रक्रिया जायते । आतामादावपि पूर्ववत्- भृज्जेते, भृज्जन्ते इत्यादि । एवमेव प्रक्रिया लोडादिष्वपि सार्वधातुकलकारेषु बोध्या । आर्धधातुकलकारेषु विशेषप्रक्रियामाह-

### विभाषया रमागमविधायकं विधिसूत्रम्

**भ्रस्जोरोपधयोरमन्यतरस्याम् ६।४।४७॥**

**भ्रस्जे रेफस्योपधायाश्च स्थाने रमागमो वा स्यादार्द्धधातुके । मित्त्वादन्त्यादचः परः । स्थानषष्ठीनिर्देशाद्रोपधयोर्निवृत्तिः । बभर्ज । बभर्जतुः । बभर्जिथ, बभर्ष्ठ । बभ्रज्ज । बभ्रज्जतुः । बभ्रज्जिथ । स्कोरिति सलोपः । व्रश्चेति षः । बभ्रष्ठ । बभर्जे, बभ्रज्जे । भ्रर्ष्टा, भ्रष्टा । भर्क्ष्यति, भ्रक्ष्यति ।**

(भ्रस्जः, र-उपधयोः, आर्धधातुके, रम्, अन्यतरस्याम्)

**सरलार्थः** - आर्धधातुकसंज्ञके प्रत्यये परे सति भ्रस्ज्-धातो रेफस्य उपधायाश्च स्थाने विकल्पेन 'रम्' इत्यागमो भवति । आगमेऽस्मिन् न केवलम् आगमत्वम्, आदेशत्वमपि वर्तेते । यद्यपि अयमागमोऽस्ति तथापि आदेशवद् निर्दिष्टस्थानिनौ विस्थाप्य प्रवर्तते, सूत्रेऽस्मिन् 'रोपधयोः' इति स्थानषष्ठीनिर्देशात् । अतोऽत्र रमि कृते 'भ्रस्ज्' इत्यस्य रेफः, उपधाया जकारश्च निवर्तेते (लुप्येते) । रमो मकार इत्, अकारश्च उच्चारणार्थः, 'र्' इति

शेषः । मित्वाद् अन्त्यादचोऽकारस्य अनन्तरमस्य स्थापनं भवति ।

भ्रस्ज्-धातोर्लिटि, तिपि 'लिट् च' इत्यार्धधातुकसंज्ञायाम्- भ्रस्ज् ति - भर्ज् ति (भ्रस्जो रोपधयो...) - भर्ज् णल् (अ) - भर्ज् भर्ज् अ - भ भर्ज् अ - ब भर्ज् अ - **बभर्ज**, रमभावपक्षे- भ्रस्ज् ति - भ्रस्ज् अ - भ्रस्ज् भ्रस्ज् अ - भ भ्रस्ज् अ - ब भ्रस्ज् अ - ब भ्रश्ज् अ (स्तोः...) - ब भ्रज्ज् अ (झलां जश् झशि) - **बभ्रज्ज** । एवं बभर्जतुः/बभ्रज्जतुः, बभर्जुः/बभ्रज्जुः । थलि उभयोः पक्षयोः 'ऋतो भारद्वाजस्य' इति वैकल्पिक इट्, इडभावे रम्पक्षे 'व्रश्चभ्रस्ज...' इति जकारस्य षत्वम्, इट्-रमोरभावे च 'स्कोः संयोगाद्योरन्ते च' इति सलोपश्च । भ्रस्ज् थल् (थ) - भ्रस्ज् इथ - भर्ज् इथ - भर्ज् भर्ज् इथ - भ भर्ज् इथ - ब भर्ज् इथ - **बभर्जिथ**, इडभावे- ब भर्ज् थ - ब भर्ष् थ (व्रश्चभ्रस्ज...) - बभर्ष् ठ (ष्टुना ष्टुः) - **बभर्ष्ठ**, रमभावे इट्पक्षे- भ्रस्ज् इथ, द्वित्वे, अभ्यासकार्ये- ब भ्रस्ज् इथ, श्चुत्वे, जश्त्वे- ब भ्रज्ज् इथ - **बभ्रज्जिथ**, उभयोरपि इडमोरभावे- ब भ्रस्ज् थ - ब भ्रज् थ (स्कोः...) - ब भ्रष् थ (व्रश्चभ्रस्ज...) - ब भ्रष् ठ - **बभ्रष्ठ** इति रूपचतुष्टयं साधु । वे, मे च क्रादिनियमान्नित्यमिटि- बभर्जिव/बभ्रज्जिव, बभर्जिम/बभ्रज्जिम । आत्मनेपदे थास्, ध्वम्, वहि, महि इत्येतेषु क्रादिनियमान्नित्यमिट्, पूर्ववत्प्रक्रियया च- बभर्जे/बभ्रज्जे, बभर्जाते/बभ्रज्जाते, बभर्जिरे/बभ्रज्जिरे इत्यादीनि रूपाणि जायन्ते । एवमेव प्रक्रिया लिङ्भिन्नेष्वार्धधातुकलकारेष्वपि बोध्या । आशीर्लिङि तु कित्वे, ङित्वे च सिद्धे विशेषमाह-

**वा. क्ङिति रमागमं बाधित्वा संप्रसारणं पूर्वविप्रतिषेधेन । भृज्ज्यात् । भृज्ज्यास्ताम् । भृज्ज्यासुः । भर्क्षीष्ट, भ्रक्षीष्ट । अभार्क्षीत्, अभ्राक्षीत् । अभर्ष्ट, अभ्रष्ट ।**

(क्ङिति, रम्-आगमम्, बाधित्वा, संप्रसारणम्, पूर्वविप्रतिषेधेन)

**सरलार्थः** - किति, ङिति चाऽऽर्धधातुकसंज्ञके प्रत्यये परे सति पूर्वस्य विप्रतिषेधेन रमागमं बाधित्वा सम्प्रसारणं भवति ।

भ्रस्ज् ल् (आशिषि लिङ्लोटौ) - भ्रस्ज् तिप् (ति) - भ्रस्ज् यास् ति (यासुट्...), रमागमे, 'ग्रहिज्या...' इति सम्प्रसारणे च प्राप्ते, परत्वाद् रमागमे प्राप्ते अनेन वार्तिकेन पूर्वविप्रतिषेधेन सम्प्रसारणे, पूर्वरूपे- भृस्ज् यास् ति - भृश्ज् यास् ति - भृज्ज् यास् ति - भृज्ज् यास् त् - भृज्ज् या त् (स्कोः...) - **भृज्ज्यात्** । एवम्प्रकारेण तसादौ- भृज्ज्यास्ताम्, भृज्ज्यासुः । भृज्ज्याः, भृज्ज्यास्तम्, भृज्ज्यास्त । भृज्ज्यासम्, भृज्ज्यास्व, भृज्ज्यास्म । आत्मनेपदे तु वैकल्पिको रमागमः- भ्रस्ज् ल् - भ्रस्ज् त - भ्रस्ज् सीयुट् (सीय्) त (लिङः सीयुट्) - भ्रस्ज् सीय् स्त (सुट् तिथोः) - भ्रस्ज् सीस्त (लोपो व्योर्वलि) - भर्ज् सीस्त (भ्रस्जो रोप...) -

भर्ष् सीस्त (व्रश्चभ्रस्ज...) - भर्क् सीस्त (षढोः कः सि) - भर्क् षीष्त (आदेशप्रत्यययोः) - भर्क् षीष्ट (ष्टुना ष्टुः) - **भर्क्षीष्ट**, रमभावे- भ्रस्ज् सीस्त - भ्रज् सीस्त (स्कोः...), जस्य षत्वे, षस्य कत्वे, उभयोः सकारयोः षत्वे, तस्य ष्टुत्वे- भ्रक् षीष्ट - **भ्रक्षीष्ट** । तसादौ- भर्क्षीयास्ताम्/भ्रक्षीयास्ताम्, भर्क्षीरन्/भ्रक्षीरन् इत्यादि ।

लुङि-भ्रस्ज् ल् - अभ्रस्ज् ल् - अभ्रस्ज् ति - अभ्रस्ज् च्लि ति - अभ्रस्ज् सिच् (स्) ति - अभ्रस्ज् स् त् - अभ्रस्ज् स् ईत् (अस्तिसिचोऽपृक्ते) - अभर्ज् स् ईत् (भस्जो...) - अभार्ज् स् ईत् (वदव्रज...) अभार्ष् स् ईत् (व्रश्चभ्रस्ज...) - अभार्क् स् ईत् (षढोः...) - अभार्क् ष् ईत् - **अभार्क्षीत्**, रमभावे संयोगादेः सकारस्य लोपे पूर्ववत्- **अभ्राक्षीत्** । तामि, तमि, ते च 'झलो झलि' इति सिचः सलोपे- अभार्ष्टाम्/अभ्राक्ष्टाम् इत्यादि । आत्मनेपदे त, थास्, ध्वम् इत्येतेषु 'झलो झलि' इति सिज्लोपे- अभर्ष्ट/अभ्रष्ट, अभर्क्षाताम्/अभ्रक्षाताम्, अभर्क्षत/अभ्रक्षत इत्यादि । लृङि- अभर्क्ष्यत्/अभ्रक्ष्यत्, अभर्क्ष्यत/अभ्रक्ष्यत इत्यादि ।

**कृष विलेखने ॥४॥** (कृष्- अनिट्, सकर्मकः, उभयपदी)

**कृषति, कृषते । चकर्ष ।**

स्वरितेतः कृष्-धातोर्लटि तुद्-धातुवद्रूपाणि निष्पद्यन्ते । लिटि तिपि, णलि, द्वित्वे, अभ्यासस्य ऋकारस्य अत्व-रपरत्वे, अभ्यासकार्ये, अनभ्यासस्य लघूपधगुणे- चकर्ष । तसि अतुसः कित्वे, धातोर्लघूपधगुणे च प्राप्ते-

**वा. ऋदुपधेभ्यो लिटः कित्वं गुणात् पूर्वविप्रतिषेधेन । चकृषतुः। चकृषे ॥**

(ऋत्-उपधेभ्यः, लिटः, कित्वम्, गुणात्, पूर्वविप्रतिषेधेन)

**सरलार्थः** - ह्रस्व ऋकार उपधायां यस्य स ऋदुपधः, तादृशेभ्यो धातुभ्यो गुणात् पूर्वविप्रतिषेधेन कित्वं भवति ।

अनेन वार्तिकेन पूर्वविप्रतिषेधेन कित्वे सिद्धे गुणनिषेधे- चकृषतुः । चकृषुः । थलि, वे, मे च क्रादिनियमान्नित्यमिटि- चकर्षिथ, चकृषथुः, चकृष । चकर्ष, चकृषिव, चकृषिम । आत्मनेपदेऽनेन वार्तिकेन कित्वाद् गुणनिषेधः, थासादौ नित्यमिट् च बोध्यः ।

### आमागमविधायकं विधिसूत्रम्

**अनुदात्तस्य चर्दुपधस्याऽन्यतरस्याम् ६।१।५९॥**

**उपदेशेऽनुदात्तो य ऋदुपधस्तस्यामवा स्याज्झलादावकिति । क्रष्टा, कर्ष्टा । कृक्षीष्ट ॥**

(उपदेशे, अनुदात्तस्य, ऋत्-उपधस्य, च, अकिति, झलि, अम्, अकिति, अन्यतरस्याम्)

**सरलार्थः** - धातूपदेशकाले यो धातुः अनुदात्त ऋकारोपधश्च वर्तते, तस्य किद्भिन्ने झलादि-प्रत्यये परे सति विकल्पेन 'आम्' इत्यागमो भवति । मित्वादन्त्यादचः परावयवत्वम् ।

कृष् लुट् (ल्) - कृष् तिप् (ति) - कृष् तास् ति - कृ अष् तास् ति (अनुदात्तस्य...) - क्रष् तास् ति (इको यणचि) - क्रष् तास् डा (आ) - क्राष् त् आ - क्रष् ट् आ (ष्टुना ष्टुः) - **क्रष्टा**, अमभावे लघूपधगुणे, रपरत्वे, पूर्ववत् शेषप्रक्रियया- **कर्ष्टा** । एवं तसादौ- क्रष्टारौ/कर्ष्टारौ, क्रष्टारः/कर्ष्टारः । क्रष्टासि/कर्ष्टासि, क्रष्टासे/कर्ष्टासे इत्यादि । एवमेव लृटि- क्रक्ष्यति/कर्क्ष्यति, क्रक्ष्यते/कर्क्ष्यते इत्यादि । लोटि- कृषतु/कृषतात्, कृषताम् इत्यादि । लङि- अकृषत्, अकृषत इत्यादि । विधिलिङि- कृषेत्, कृषेत इत्यादि । आशीर्लिङि- कृष्यात्, आत्मनेपदे 'लिङ्सिचावात्मनेपदेषु' इति कित्वेन अमभावे, सीयुट्-सुट्-कत्व-षत्व-क्षत्व-ष्टुत्वादिपूर्ववत्कार्ये- **कृक्षीष्ट** इत्यादि ।

**वा. स्पृशमृशकृषतृपदृपां च्लेः सिज्वा वाच्यः । अक्राक्षीत्, अकार्क्षीत्, अकृक्षत् । अकृष्ट । अकृक्षाताम् । अकृक्षत । क्सपक्षे- अकृक्षत । अकृक्षाताम् । अकृक्षन्त ॥**

(स्पृश-मृश-कृष-तृप-दृपाम्, च्लेः, सिच्, वा, वाच्यः)

**सरलार्थः** -स्पृश्, मृश्, कृष्, तृप्, दृप् इत्येतेषां धातूनां परस्य च्लेः स्थाने विकल्पेन 'सिच्' इत्यादेशो भवति । 'च्लेः सिच्' इत्यनेन प्राप्तं सिचं बाधित्वा 'शल इगुपधादनिट क्सः' इति क्सादेशे प्राप्ते तस्य विकल्पार्थं वार्तिकमिदम् ।

कृष्-धातोर्लुङि, अटि, तिपि, च्लौ 'अकृष् च्लि ति' इत्यवस्थायां सिजादेशं बाधित्वा क्सादेशे प्राप्ते तमपि प्रबाध्य अनेन वार्तिकेन विकल्पेन सिचि- अकृष् स् ति - अकृष् स् त् - अकृष् स् ईत् - अकृ अष् स् ईत् (अनुदात्तस्य...) - अक्रष् स् ईत् - अक्राष् स् ईत् (वदव्रज...) - अक्राक् स् ईत् (षढोः...) - अक्राक् ष् ईत् - **अक्राक्षीत्**, अमभावे- **अकार्क्षीत्**, सिजभावे क्सादेशे- **अकृक्षत्** । ताम्, तम्, त इत्येतेषु 'झलो झलि' इति सलोपो बोध्यः । आत्मनेपदे-सिच्पक्षे- अकृष्ट, अकृक्षाताम्, अकृक्षत इत्यादि, क्सपक्षे- अकृक्षत, अकृक्षाताम्, अकृक्षन्त इत्यादि ।

**मिल सङ्गमे ॥५॥** (मिल्- सेट्, सकर्मकः, उभयपदी)

मिलति । मिलते । मिमेल । मिमिले । मेलिता । अमेलीत् ।

मिल्धातोर्लटि तुद्धातुवद्रूपाणि जायन्ते । अस्य सेट्त्वात् थलादिषु इडागमस्थेष्वेव विशेषः, शेषेषु तुदवदेव प्रक्रिया ज्ञेया ।

**मुच्लृ मोक्षणे ॥६॥** (मुच्- अनिट्, सकर्मकः, उभयपदी)

### नुमागमविधायकं विधिसूत्रम्

**शे मुचादीनाम् ७।१।५९॥**

**मुच्लुप्विद्लिप्सिच्कृत्खिद्पिशां नुम् स्यात् शे परे। मुञ्चति, मुञ्चते। मोक्ता। मुच्यात्। मुक्षीष्ट। अमुचत्, अमुक्त। अमुक्षाताम्॥**

(मुचादीनाम्, शे, नुम्)

**सरलार्थः** - श-प्रत्यये परे सति मुच्-लुप्-विद्-सिच्-कृत्-खिद्-पिश् इत्येतेषां धातूनां नुम् (न्) इत्यागमो भवति। मित्वादन्त्यादचः परावयवत्वम्।

अनेन नुमि कृते तस्य अनुस्वारे परसवर्णे च सार्वधातुकलकारेषु मुच्-धातुः 'मुञ्च्' इति स्वरूपे परिवर्तते।

मुच् लट् (ल्) - मुच् तिप् (ति) - मुच् अ ति - मुन् च् अ ति (शे मुचादीनाम्) - मुं च् अ ति - मुञ् च् अ ति -**मुञ्चति**। एवं तसादौ- मुञ्चतः, मुञ्चन्ति इत्यादि। एवमात्मनेपदे- मुञ्चते, मुञ्चेते, मुञ्चन्ते इत्यादि। एवमेव प्रक्रिया लोडादावपि सार्वधातुकलकारेषु बोध्या। लिटि मुमोच, मुमुचे इत्यादीनि रूपाणि, तत्र थलादौ, थासादौ च क्रादिनियमान्नित्यम् इडागमो भवतीति स्मर्तव्यम्।

पदान्ते झलि च परे मुच्धातोः चकारस्य कुत्वम्, अनुदात्तत्वाद् लुडादौ आर्धधातुकलकारेषु इण्निषेधश्च।

मुच् लुट् (ल्) - मुच् तिप् (ति) - मुच् तास् ति - मुक् तास् ति (चोः कुः) - मोक् तास् ति (पुगन्त...) - मोक् तास् डा (आ) - मोक् त् आ – **मोक्ता**। मोक्तारौ, मोक्तारः। सिबादौ- मोक्तासि, मोक्तासे इत्यादि। लृटि पूर्ववत्- मुच् स्य ति - मुक् स्य ति - मोक् स्य ति - मोक् ष्य ति (आदेशप्रत्यययोः)- **मोक्ष्यति**। एवमात्मनेपदे- मोक्ष्यते इत्यादि। आशीर्लिङि यासुटि- मुच् यास् ति - मुच् यास् त् - मुच् या त् (स्कोः...) - **मुच्यात्**। आत्मनेपदे सीयुटि, सुटि च- मुच् सीय् स् त - मुच् सीस्त (लोपो व्योर्वलि) - मुक् सीस्त (चोः कुः) - मुक् षीस्त (उभयत्र षत्वम्) - मुक् षीष्ट (ष्टुना ष्टुः) - **मुक्षीष्ट** इत्यादि।

लुङि परस्मैपदे लृदित्वात् सिचं बाधित्वा 'पुषादिद्युताद्यलृदितः परस्मैपदेषु' इति च्लेरङादेशः, 'लिङ्सिचावात्मनेपदेषु इति सिचः कित्वाद् गुणनिषेधः, ते, थासि, ध्वमि च 'झलो झलि' इति सलोपश्च। पूर्ववत्- अमुच् च्लि ति - अमुच् अ ति (पुषादि...) - अमुच् अ त् - **अमुचत्**। तसादौ- अमुचताम्, अमुचन् इत्यादि। आत्मनेपदे तु च्लेः सिजादेशे- अमुच् स्

त - अमुच् त (झलो झलि) - अमुक् त (चोः कुः) - **अमुक्त** । आतामि- अमुच् स् आताम् - अमुक् स् आताम् - अमुक् ष् आताम् - अमुक्षाताम् । अमुक्षत इत्यादि । लृङि- अमोक्ष्यत्, अमोक्ष्यत इत्यादि ।

**लुप्लृ छेदने ॥७॥** (लुप्- अनिट्, सकर्मकः, उभयपदी)

**लुम्पति, लुम्पते । लोप्ता । अलुपत्, अलुप्त ॥**

छेदनार्थकस्य लुप्-धातोः सार्वधातुकलकारेषु 'शे मुचादीनाम्' इति नुमागमे, नस्यानुस्वारपरसवर्णाभ्यां मकारे- लुम्पति, लुम्पते इत्यादीनि रूपाणि जायन्ते । लुङि परस्मैपदे लृदित्वात् च्लेरङि अलुपत् इत्यादि, आत्मनेपदे ते सिचो सलोपे- अलुप्त इत्यादि ।

**विद्लृ लाभे ॥८॥** (विद्- वेट्, सकर्मकः, उभयपदी)

**विन्दति, विन्दते । विवेद, विविदे । व्याघ्रभूतिमते सेट् । वेदिता । भाष्यमतेऽनिट् । परिवेत्ता ॥**

लाभेऽर्थे प्रयुज्यमानो विद्-धातुः व्याघ्रभूति-नामधेयस्य ऋषेर्मते सेट्, भाष्यकारस्य पतञ्जलेर्मते तु अनिट् वर्तते । लिटि उभयपक्षस्वीकरणे नित्यमिडागमो भवति, सेट्पक्षे 'आर्धधातुकस्येड्वलादेः' इति, अनिट्पक्षे च क्रादिनियमात् । लडादौ सार्वधातुकलकारेषु 'शे मुचादीनाम्' इति नुमागमे, नस्यानुस्वारपरसवर्णाभ्यां नकारे- विन्दति, विन्दते इत्यादीनि रूपाणि जायन्ते । लुडादौ आर्धधातुकेषु सेट्पक्षे- वेदिता, वेदिष्यति इत्यादि, अनिट्पक्षे- वेत्ता, वेत्स्यति इत्यादि । 'परिवेत्ता' इति 'परि' इत्युपसर्गपूर्वकस्य विद्-धातोर्लुटि तिपि भाष्यकारमते रूपम् । लुङि परस्मैपदे लृदित्वात् च्लेरङि अविदत् इत्यादि, आत्मनेपदे पूर्ववत्- अवित्त इत्यादि ।

**षिच क्षरणे ॥९॥** (सिच्- अनिट्, सकर्मकः, उभयपदी)

**सिञ्चति, सिञ्चते ॥**

स्वरितेतः सिच्-धातो रूपाणि तत्सिद्धिप्रक्रिया च लुङ्भिन्नेषु लकारेषु मुच्-धातुवदेव भवतीति ज्ञेयम् । लुङि तु-

### अङादेशविधायकं विधिसूत्रम्

**लिपिसिचिह्वश्च ३।१।५३॥**

**एभ्यश्च्लेरङ् स्यात् । असिचत् ॥**

(लिपि-सिचि-ह्वः, च, च्लेः, अङ्)

**सरलार्थः** - लिप (लिप्) उपदेहे, षिच (सिच्) क्षरणे, ह्वेञ् (ह्वे) स्पर्धायाम् इत्येतेभ्यो धातुभ्यः परस्य च्लेः स्थाने अङादेशो भवति । अनेन उभयोः पदयोः च्लेरङ् विधीयते परन्तु आत्मनेपदे वक्ष्यमाणसूत्रेण विकल्प्यते ।

परस्मैपदे पूर्ववत्- असिच् च्लि ति - असिच् अ ति (लिपिसिचिह्वश्च) - असिच् अ त् - असिचत् । तसादौ- असिचताम्, असिचन् इत्यादि । आत्मनेपदे तु-

## विभाषया अङादेशविधायकं विधिसूत्रम्

**आत्मनेपदेष्वन्यतरस्याम् ३।१।५४।।**

**लिपिसिचिह्वः परस्य च्लेरङ् वा । असिचत, असिक्त ।।**

(लिपि-सिचि-ह्वः, आत्मनेपदेषु, च्लेः, अङ्, अन्यतरस्याम्)

**सरलार्थः** - आत्मनेपदसंज्ञके प्रत्यये परे सति लिप (लिप्) उपदेहे, षिच (सिच्) क्षरणे, ह्वेञ् (ह्वे) स्पर्धायाम् इत्येतेभ्यो धातुभ्यः परस्य च्लेः स्थाने विकल्पेन अङादेशो भवति । पूर्वसूत्रेण नित्यम् अङि सिद्धे विकल्पार्थं सूत्रमिदम् । पक्षान्तरे 'सकृद्गतौ...' इति परिभाषया च्लेः सिजादेशो भवति ।

पूर्ववद् 'असिच् च्लि त' इत्यवस्थायां सिचं बाधित्वा पूर्वसूत्रेण प्राप्तं नित्यमङं प्रबाध्य अनेन वैकल्पिके'ङि- असिच् अ त - **असिचत**, पक्षान्तरे सिचि- असिच् स् त - असिच् त (झलो झलि) - असिक् त (चोः कुः) - **असिक्त** । आतामादौ- असिचेताम्/असिक्षाताम्, असिचन्त/असिक्षत इत्यादि ।

**लिप उपदेहे ।।१०।।** (लिप्- अनिट्, सकर्मकः, उभयपदी)

**उपदेहो वृद्धिः । लिम्पति, लिम्पते । लेप्ता । अलिपत्, अलिपत, अलिप्त ।।**

स्वरितेतो लिप्-धातुः उपदेहेऽर्थे प्रयुज्यते । यद् यत्र वा उपदिह्यते तद् वर्धते, अतोऽत्र उपदेह-पदस्य वृद्धिरित्यर्थः स्वीकृतोऽस्ति । अस्य लिप्-धातो रूपाणि लुङ्भिन्नेषु लकारेषु लुप्-धातुवद्प्रक्रियया निष्पद्यन्ते । लुङि च सिच्-धातुवत्प्रक्रिया जायते, केवलं चकारस्य कुत्वमेव सिच्-धातौ अस्माद् अधिकं भवतीति स्मर्तव्यम् ।

### इत्युभयपदिनः

**कृती छेदने ।।११।।** (कृत्- लिट्-लुट्-लुङ्लकारेषु सेट्, लृट्-लृङोर्वेट्, सकर्मकः, परस्मैपदी)

**कृन्तति । चकर्त । कर्तिता । कर्तिष्यति । कर्त्स्यति । अकर्तीत् ।।**

छेदनार्थकस्य कृती-धातोरन्त्य ईकार उदात्तः, इच्च। उदात्तेत्वादयं मुचादिधातुः परस्मैपदी वर्तते। सार्वधातुकलकारेषु शप्रत्यये 'शे मुचादीनाम्' इति नुमागमे विहिते, नस्यानुस्वारे परसवर्णे च 'कृन्त्' इत्यवस्था जायते। तेन लडादौ सार्वधातुकेषु- कृन्तन्ति, कृन्तन्तु/कृन्ततात्, अकृन्तत्, कृन्तेत् इत्यादीनि रूपाणि निष्पद्यन्ते। लिडादिषु सेट्त्वाद् इडागमो विधीयते परन्तु लृट्-लृङ्लकारयोः स्य-विकरणस्य सकारादिप्रत्ययत्वात् प्राप्तं नित्यमिडागमम्प्रबाध्य 'सेऽसिचि कृतचृतच्छृदतृदनृतः' इति सूत्रेण विकल्पेन इडागमो भवति। लुङि 'नेटि' इति वृद्धिनिषेधे लघूपधगुणो विधीयते। तेन आर्धधातुकलकारेषु- चकर्त, कर्तिता, कर्तिष्यति/कर्त्स्यति, कृत्यात्, अकर्तीत्, अकर्तिष्यत्/अकर्त्स्यत् इत्यादीनि रूपाणि सिद्ध्यन्ति।

**खिद परिघाते ॥१२॥** (खिद्- अनिट्, सकर्मकः, परस्मैपदी)

**खिन्दति। चिखेद। खेत्ता ॥**

उदात्तेतः खिद्-धातोर्मुचादित्वात् सार्वधातुकलकारेषु 'शे मुचादीनाम्' इति नुमागमे पूर्ववत्प्रक्रियया- खिन्दन्ति, खिन्दतः, खिन्दन्ति इत्यादि।

**पिश अवयवे ॥१३॥** (पिश्- सेट्, सकर्मकः, परस्मैपदी)

**पिंशति। पेशिता ॥**

पिश्-धातोरपि मुचादित्वात् श-प्रत्यये परे नुमागमे, नस्यानुस्वारे- पिंशति, पिंशतः, पिंशन्ति इत्यादि।

**ओव्रश्चू छेदने ॥१४॥** (व्रश्च्- वेट्, सकर्मकः, परस्मैपदी)

**वृश्चति। वव्रश्च। वव्रश्चिथ, वव्रष्ठ। व्रश्चिता, व्रष्टा। व्रश्चिष्यति, व्रक्ष्यति। वृश्च्यात्। अव्रश्चीत्, अव्राक्षीत् ॥**

छेदनार्थकस्य ओव्रश्चू-धातोः ओकारस्य, ऊकारस्य च इत्संज्ञायां लोपे 'व्रश्च्' इति शिष्यते। ऊदित्वात् 'स्वरतिसूतिसूयति...' इत्यादिना सूत्रेण धातुरयं वेट्।

व्रश्च्-धातोर्लटि, तिपि, श-प्रत्यये 'व्रश्च् अ ति' इत्यवस्थायां सार्वधातुकसंज्ञायां श-प्रत्ययस्य अपित्सार्वधातुकत्वेन ङित्वे सिद्धे 'ग्रहिज्या...' इत्यादिना सूत्रेण पूर्वं रेफस्य सम्प्रसारणे, पूर्वरूपे 'वृश्च् अ ति' इति जाते पुनः वकारस्य सम्प्रसारणे प्राप्ते 'न सम्प्रसारणे सम्प्रसारणम्' इति तन्निषेधे, वर्णयोगे- **वृश्चति**। एवंप्रक्रियया तसादौ- वृश्चतः, वृश्चन्ति

इत्यादि। एवं लोडादिष्वपि सार्वधातुकलकारेषु- वृश्चतु/वृश्चतात्, अवृश्चत्, वृश्चेत् इत्यादि।

लिटि धातोर्द्वित्वविधानानन्तरं सर्वत्र 'लिट्यभ्यासस्योभयेषाम्' इति अभ्यासस्य रेफस्य सम्प्रसारणेन ऋकारः, तस्य च 'उरत्' इति सूत्रेण अत्वं रपरत्वं चेति प्रक्रिया जायते। थलि, वे, मे च 'स्वरति...' इति वेट्। यथा-

व्रश्च् ल् - व्रश्च् तिप् (ति) - व्रश्च् णल् (अ) - व्रश्च् व्रश्च् अ - वृश्च् व्रश्च् अ (लिट्यभ्यास..., सम्प्रसारणाच्च, न सम्प्रसारणे...) - वर्श्च् व्रश्च् अ (उरत्, उरण् रपरः) - व व्रश्च् अ (हलादिशेषः) - **वव्रश्च**। थलि- व्रश्च् थ - व्रश्च् इथ (स्वरति...) - व्रश्च् व्रश्च् इथ - वृश्च् व्रश्च् इथ - वर्श्च् व्रश्च् इथ् - व व्रश्च् इथ - वव्रश्चिथ, इडभावे पूर्ववत् 'व व्रश्च् थ' इत्यवस्थायां श्चुत्वेन निष्पन्नस्य शकारस्य असिद्धत्वात् 'स्कोः...' इति शलोपे- व व्रच् थ - व व्रष् थ (व्रश्चभ्रस्ज...) - व व्रष् ठ (ष्टुना ष्टुः) - **वव्रष्ठ**। एवं लुटि- व्रश्चिता/व्रष्टा, लृटि इडभावे शलोप-षत्व-कत्व-षत्व-क्षत्वेषु- व्रश्चिष्यति/व्रक्ष्यति इत्यादि। आशीर्लिङि यासुटः कित्वङित्वाद् 'ग्रहिज्या...' इति सम्प्रसारणे- वृश्च्यात्, वृश्च्यास्ताम्, वृश्च्यासुः इत्यादि। लुङि इट्पक्षे 'नेटि' इत्यनेन हलन्तलक्षणवृद्धेर्निषेधे लघूपधगुणे- **अव्रश्चीत्**, इडभावे- अव्रश्च् स् ईत् - अव्राश्च् स् ईत् (वदव्रज...) - अव्राच् स् ईत् (स्कोः...) - अव्राष् स् ईत् (व्रश्चभ्रस्ज...) - अव्राक् स् ईत् (षढोः कः षि) - अव्राक् ष् ईत् - **अव्राक्षीत्**। इडभावे ताम्-तम्-ध्वंसु 'झलो झलि' इति सिचः सलोपे- अव्राष्टाम् इत्यादि। लृङि- अव्रश्चिष्यत्/अव्रक्ष्यत् इत्यादि।

**व्यच व्याजीकरणे ॥१५॥** (व्यच्- सेट्, सकर्मकः, परस्मैपदी)

**विचति। विव्याच। विविचतुः। व्यचिता। व्यचिष्यति। विच्यात्। अव्याचीत्, अव्यचीत्। 'व्यचेः कुटादित्वमनसि' इति तु नेह प्रवर्तते अनसीति पर्युदासेन कृन्मात्रविषयत्वात्॥**

व्यच्-धातोः सार्वधातुकलकारेषु, आशीर्लिङि च 'ग्रहिज्या...' इति यकारस्य सम्प्रसारणं भवति। लिटि 'लिट्यभ्यासस्योभयेषाम्' इति सम्प्रसारणम्, अतुसादौ तु 'सम्प्रसारणं तदाश्रयं च कार्यम्...' इति परिभाषया द्वित्वात् पूर्वं सम्प्रसारणं विधेयम्।

**उछि उञ्छे ॥१६॥** (उछ्- सेट्, सकर्मकः, परस्मैपदी)

**उञ्छति। 'उञ्छः कणश आदानं कणिशाद्यर्जनं शिलम्'। इति यादवः॥**

उछ्-धातोः इदित्वात् 'इदितो नुम् धातोः' इति नुम्, तस्य अनुस्वारो परसवर्णश्च। लिटि 'इजादेश्च गुरु...' इति आम्।

**ऋच्छ गतीन्द्रियप्रलयमूर्तिभावेषु ॥१७॥** (ऋच्छ्- सेट्, अकर्मक, परस्मैपदी)

**ऋच्छति । ऋच्छत्यॄतामिति गुणः । द्विहल्ग्रहणस्याऽनेकहलुपलक्षणत्वान्नुट् । आनर्च्छ । आनर्च्छतुः । ऋच्छिता ॥**

ऋच्छ्-धातुः गत्यर्थे, इन्द्रियप्रलयार्थे, मूर्तिभावार्थे च प्रयुज्यते । लिटि 'ऋच्छत्यॄताम्' इति गुणो भवति, 'तस्मान्नुड् द्विहलः' इत्यनेन नुडागमश्च भवति, तत्र द्विहलशब्दस्य अनेकहल उपलक्षणत्वात् ।

ऋच्छ् लिट् (ल्) - ऋच्छ् ति - ऋच्छ् णल् (अ) - ऋच्छ् ऋच्छ् अ - अर्च्छ् ऋच्छ् अ (उरत्) - अ ऋच्छ् अ - आ अर्च्छ् अ (अत आदेः) - आ अर्च्छ् अ (ऋच्छत्यॄताम्) - आन् अर्च्छ् अ (तस्मान्नुड् द्विहलः) - **आनर्च्छ** ।

**उज्झ उत्सर्गे ॥१८॥** (उज्झ्- सेट्, सकर्मकः, परस्मैपदी)

**उज्झति ॥**

लिटि 'इजादेश्च गुरु...' इति आम् ।

**लुभ विमोहने ॥१९॥** (लुभ्- सकर्मकः, अन्तर्हिते तु लोभकर्मणि अकर्मकः, परस्मैपदी)

**लुभति ॥**

### विभाषया इडागमविधायकं विधिसूत्रम्

**तीषसहलुभरुषरिषः ७।२।४८॥**

**इच्छत्यादेः परस्य तादेरार्धधातुकस्येड्वा स्यात् । लोभिता, लोब्धा । लोभिष्यति ॥**

(इष-सह-लुभ-रुष-रिषः, ति, आर्धधातुके, इट्, वा)

**सरलार्थः** - इष्, सह्, लुभ्, रुष्, रिष् इत्येतेभ्यो धातुभ्यः परस्य तकारादेः आर्धधातुकस्य विकल्पेन इडागमो भवति ।

लुटि तासि, डाभावे, टिलोपे च 'लुभ् ता' इत्यवस्थायाम् अनेन सूत्रेण विकल्पेन इडागमे, लघूपधगुणे-**लोभिता**, इडभावे 'झषस्तथोर्धोऽधः' इति धत्वे-**लोब्धा** ।

तृप तृम्फ तृप्तौ ॥२०-२१॥ (तृप्, तृम्फ्- सेटौ, अकर्मकौ, परस्मैपदिनौ)

**तृपति । ततर्प । तर्पिता । अतर्पीत् ॥ तृम्फति ॥**

तृम्फ्-धातोः शस्य ङित्वाद् 'अनिदितामि'ति नलोपः ।

**वा. शे तृम्फादीनां नुम्वाच्यः । आदिशब्दः प्रकारे, तेन येऽत्र नकारानुषक्तास्ते तृम्फादयः । ततृम्फ । तृफ्यात् ॥**

(शे, तृम्फ-आदीनाम्, नुम्, वाच्यः)

**सरलार्थः** - श-प्रत्यये परे सति तृम्फादीनां धातूनां नुमागमो भवति । अत्र आदि-शब्दः प्रकारवाचकः, प्रकार-शब्दश्च सादृश्यरूपेऽर्थे विद्यते । नकारसंयुक्ताः सर्वे धातवस्तृम्फादयः कथ्यन्ते ।

तृम्फधातोर्लटि तिपि शप्रत्यये शस्यापित्त्वेन 'सार्वधातुकमपिदि'ति ङिद्वद्भावेन 'अनिदितां हल उपधायाः क्ङिति इति सूत्रेण उपधाया नकारस्य लोपे- तृफ् अ ति, 'शे तृम्फादीनामि'ति नुमागमेऽनुबन्धलोपेऽनुस्वारपरसवर्णयोः वर्णसम्मेलने च- तृम्फति । लिटि तिपि णलादेशे अभ्याससंज्ञायां द्वित्वे ऋकारस्य अत्वे रपरत्वे, हलादिशेषे- ततृम्फ । आशिषि लिङि तिपि आर्धधातुकसंज्ञायां यासुडागमे यासुटो ङित्त्वेन 'अनिदितामि'ति उपधाया नकारस्य लोपे- तृफ्यात् ।

**मृड पृड सुखने ॥२२-२३॥** (मृड्, पृड्- सेटौ, सकर्मकौ, परस्मैपदिनौ)

**मृडति । पृडति ॥**

**शुन गतौ ॥२४॥** (शुन्- सेट्, सकर्मकः, परस्मैपदी)

**शुनति ॥**

**इष' इच्छायाम् ॥२५॥** (इष्- सेट्, सकर्मकः, परस्मैपदी)

**इच्छति । एषिता, एष्टा । एषिष्यति । इष्यात् । ऐषीत् ॥**

लटि 'इषुगमियमां छः' इति षकारस्य छत्वम्, 'छे च' इति तुक् । लिटि 'अभ्यासस्यासवर्णे' इति इयङ् ।लुटि 'तीषसह...' वेट् ।

**कुट कौटिल्ये ॥२६॥** (कुट्- सेट्, अकर्मकः, परस्मैपदी)

**गाङ्कुटादीति ङित्वम् । चुकुटिथ । चुकोट, चुकुट । कुटिता ॥**

कुट्-धातौ ञित्-णिद्भिन्नप्रत्ययानाम् 'गाङ्कुटादिभ्यः...' इति ङिद्वद्भावो भवति, तेन गुणवृद्धी निषिध्यते । कुट्-धातोरारभ्य णू स्तवने इति धातुपर्यन्ता धातवो कुटादयः सन्ति ।

**पुट संश्लेषणे ॥२७॥** (पुट्- सेट्, सकर्मकः, परस्मैपदी, कुट्-धातुवद्रूपाणि)

**पुटति । पुपोट । पुटिता ॥**

**स्फुट विकसने ॥२८॥** (स्फुट्- सेट्, अकर्मकः, परस्मैपदी)

**स्फुटति । पुस्फोट । स्फुटिता ॥**

लिटि 'शर्पूर्वाः खयः' इति खय्शेषे- पुस्फोट, पुस्फुटतुः, पुस्फुटुः इत्यादि ।

**स्फुर स्फुल सञ्चलने ॥२९-३०॥** (स्फुर्, स्फुल्- सेटौ, अकर्मकौ, परस्मैपदिनौ)

**स्फुरति । स्फुलति ॥**

### विभाषया षत्वादेशविधायकं विधिसूत्रम्

**स्फुरतिस्फुलत्योर्निर्निविभ्यः ८।३।७६॥**

**षत्वं वा स्यात् । निःष्फुरति । निःस्फुरति ॥**

(निर्-नि-विभ्यः, स्फुरति-स्फुलत्योः, सः, मूर्धन्यः, वा)

**सरलार्थः** - निर्, नि, वि इत्येतेभ्य उपसर्गेभ्य उत्तरस्य स्फुर्-धातोः, स्फुल्-धातोश्च सकारस्य स्थाने विकल्पेन मूर्धन्यः (षकारः) आदेशो भवति ।

'निर्' इत्युपसर्गपूर्वकाद् स्फुर्-धातोर्लटि, तिपि, शे- 'निर्+स्फुरति' इत्यवस्थायाम् अनेन षत्वपक्षे रेफस्य विसर्गे- निःष्फुरति, षत्वाभावे- निःस्फुरति । एवम्- निःष्फुलति/निःस्फुलति इत्यादि ।

**णू स्तवने ॥३१॥** (नू- सेट्, सकर्मकः, परस्मैपदी)

**परिणूतगुणोदयः । नुवति । नुनाव । नुविता ॥**

परिणूतो गुणानामुदयो यस्य सः- परिणूतगुणोदयः । नू-धातो रूपाणि नु-धातुवदेव, तथापि ऊकारन्तपाठस्य प्रयोजनं तु क्त्वा-क्त-क्तवतु-सन्प्रत्ययेषु विद्यते इति दर्शनाय उदाहरणमिदं प्रदत्तमस्ति । नू-धातोः कुटादित्वात् तस्माद् इटो ङिद्वद्भावो भवति, तेन तत्र गुणवृद्धी निषिध्यते । सार्वधातुकलकारेष्वपि श-प्रत्ययस्य ङित्वाद् न गुणवृद्धी । अतः सर्वत्रैव उवङादेशेन उकारो दृश्यते ।

**टुमस्जो शुद्धौ ॥३२॥** (मस्ज्- सेट्, अकर्मकः, परस्मैपदी)

**मज्जति । ममज्ज । ममज्जिथ । मस्जिनशोरिति नुम् ॥**

मस्ज्धातोर्लटि तिपि श-प्रत्यये सकारस्य श्चुत्वेन शकारे तस्य जश्त्वेन जकारे- मज्जति । लिटि तिपि णलि द्वित्वेऽभ्यासकार्ये 'म मस्ज् अ' सकारस्य श्चुत्वेन शकारे तस्य 'झलां जश् झशि' इति जश्त्वेन जकारे- ममज्ज । थलि 'ऋतो भारद्वाजस्य' इति वेटि पूर्ववत्- **ममज्जिथ**,

इडभावे 'मस्जिनशोर्झलि' इति नुमागमे, मित्वात् 'मिदचोऽन्त्यात् परः' अन्त्यादचोऽकारात् परत्र प्राप्ते-

**वा. मस्जेरन्त्यात्पूर्वो नुम्वाच्यः । संयोगादिलोपः । ममङ्क्थ । मङ्क्ता । मङ्क्ष्यति । अमाङ्क्षीत् । अमाङ्क्ताम् । अमाङ्क्षुः ॥**

(मस्जेः, अन्त्यात्, पूर्वः, नुम्, वाच्यः)

**सरलार्थः** - मस्ज्-धातोः अन्त्यवर्णात् (जकारात्) पूर्वं नुमागमो भवति ।

अनेन सूत्रेण जकारात् पूर्वं नुमागमे 'म मस् न् ज् थ' इति जाते 'स्कोः...' इत्यादिना सूत्रेण सकारस्य लोपे, जकारस्य 'चोः कुः' इति कुत्वेन गकारे, तस्य चर्त्वेन ककारे 'ममन् क् थ' इति जाते नकारस्य अनुस्वारे परसवर्णे च- **ममङ्थ** । एवं मङ्क्ष्यति इत्यादावपि ।

**रुजो भङ्गे ॥३३॥** (रुज्- अनिट्, सकर्मकः, परस्मैपदी)

**रुजति । रोक्ता । रोक्ष्यति । अरौक्षीत् ॥**

लुटि कुत्वचर्त्वे, लृट्-लृङोः कुत्व-चर्त्व-षत्व-क्षत्वानि लुङि 'वदव्रज...' इति वृद्धिरपि ।

**भुजो कौटिल्ये ॥३४॥** (भुज्- अनिट्, अकर्मकः, परस्मैपदी)

**रुजिवत् ।**

भुज्-धातोः सर्वाणि रूपाणि रुज्-धातुवत्प्रक्रियया निष्पद्यन्ते ।

**विश प्रवेशने ॥३५॥** (विश्- अनिट्, सकर्मकः, परस्मैपदी)

**विशति ॥**

लुङि च्लेः सिजादेशं बाधित्वा 'शल इगुपधादनिटः क्सः' इति क्सादेशे- अविक्षत् इत्यादि ।

**मृश आमर्शने ॥३६॥** (मृश्- अनिट्, सकर्मकः, परस्मैपदी)

**आमर्शनं स्पर्शः ॥ 'अनुदात्तस्य चर्दुपधस्यान्यतरस्याम्' । अम्राक्षीत्, अमार्क्षीत्, अमृक्षत् ॥**

आमर्शनपदेन स्पर्शः बोध्यते, अतो मृश्-धातुः स्पर्शनार्थको वर्तते । लिटि क्रादिनियमान्नित्यमिट्, लुडादौ 'अनुदात्तस्य...' इति विकल्पेन अम्, लृडादौ 'व्रश्चभ्रस्ज...' इति षत्वादिकं च । लुङि क्सादेशं बाधित्वा 'स्पृशमृशकृषतृपदृपाम्...' इति वा सिच्, सिच्पक्षे वा आम् च, सिजभावे क्सादेशः, सर्वपक्षे षत्व-कत्व-षत्व-क्षत्वम् ।

**षद्लृ विशरणगत्यवसादनेषु ॥३७॥** (सद्- अनिट्, अर्थवैविध्यात् सकर्मकोऽकर्मकश्च, परस्मैपदी)

**सीदतीत्यादि ॥**

विशरण-पदस्य दुःखमित्यर्थः । सार्वधातुकलकारेषु 'पाघ्राध्मा...' इत्यादिना सूत्रेण 'सद्' इत्यस्य स्थाने 'सीद' इत्यादेशो भवति । तेन- सीदति, सीदतः, सीदन्ति इत्यादीनि रूपाणि जायन्ते । लुङि लृदित्वाच्च्लेरङ् ।

**शद्लृ शातने ॥३८॥** (शद्- अनिट्, सकर्मकः, शिति आत्मनेपदी, अन्येषु परस्मैपदी)

सार्वधातुकलकारेषु शद्-धातोः स्थाने 'पाघ्राध्मा...' इत्यनेन 'शीय' इत्यादेशो भवति ।

## आत्मनेपदनियामकं सूत्रम्

**शदेः शितः १।३।६०॥**

**शिद्भाविनोऽस्मात्तङानौ स्तः । शीयते । शीयताम् । अशीयत । शीयेत । शशाद । शत्ता । शत्स्यति । अशदत् । अशत्स्यत् ॥**

(शितः, शदेः, आत्मनेपदम्)

**सरलार्थः** - शित्-प्रत्ययस्य प्रकृतिभूतात् शद्-धातोः तङ्, शानच्-कानचौ च भवन्ति । अनेन सार्वधातुकलकारेषु शद्-धातुरात्मनेपदी भवति ।

लटि अनेन सूत्रेण आत्मनेपदे- शद् त - शद् श (अ) त - शद् अ ते - शीय अ ते (पाघ्राध्मा...) - **शीयते** (अतो गुणे) । एवमेव प्रक्रिया लोटि, लङि, विधिलिङि चावलम्बनीया । लिडादावार्धधातुके तु शितः प्रकृतेरभावात् शद्-धातोः परस्मैपदे, शीयादेशस्य चाप्रसक्ते- शशाद इत्यादि ।

**कॄ विक्षेपे ॥३९॥** (कॄ- सेट्, सकर्मकः, परस्मैपदी)

लिड्भिन्नेषु लकारेषु आगामिसूत्रेण धातोः ॠकारस्य इत्वे, रपरत्वे धातुरयं 'किर्' इति स्वरूपे परिवर्तते ।

## इदादेशविधायकं विधिसूत्रम्

**ॠत इद्धातोः ७।१।१००॥**

**ॠदन्तस्य धातोरङ्गस्य इत्स्यात् । किरति । चकार । चकरतुः । चकरुः । करीता, करिता । कीर्यात् ॥**

(ॠतः, धातोः, अङ्गस्य, इत्)

**सरलार्थः** - ॠकारान्तस्य धातोः अन्त्यवर्णस्य (ॠकारस्य) स्थाने ह्रस्व इकार आदेशो भवति । 'उरण् रपरः' इति रपरत्वे 'इर्' इति आदिश्यते ।

कॄ लट् (ल्) - कॄ तिप् (ति) - किर् ति (ॠत इद्धातोः) - किर् श (अ) ति - **किरति** ।

लिटि 'इत्त्वोत्त्वाभ्यां गुणवृद्धी पूर्वविप्रतिषेधेन' इति वृद्धिर्गुणो वा भवति । तत्र णिति 'अचो ञ्णिति' इति वृद्धिः अथवा 'ॠच्छत्यॄताम्' इति कृते वा गुणे 'अत उपधायाः' इति वृद्धिः । अतुसादौ किति 'ॠच्छत्यॄताम्' इति गुणः । लुटि, लृटि च 'वॄतो वा' इति इटो वा दीर्घः । आशीर्लिङि 'हलि च' इति उपधादीर्घः । लुङि 'सिचि वृद्धिरि'ति वृद्धिः, 'वॄतो वा' इति प्राप्तस्य दीर्घस्य 'सिचि च परस्मैपदेषु' इति निषेधश्च ।

### सुडागमविधायकं विधिसूत्रम्

**किरतौ लवने ६।१।१४०॥**

**उपात्किरतेः सुट् छेदने । उपस्किरति ॥**

(उपात्, किरतौ, लवने, सुट्, कात्, पूर्वः)

**सरलार्थः** - लवनम् = छेदनम्, छेदनेऽर्थे द्योत्ये उप-शब्दात् परस्य कॄ-धातोः (ककारात् पूर्वम्) 'सुट्' इत्यागमो भवति । उकार-टकारौ इतौ ।

'उप' इत्युपसर्गकात् कॄ-धातोर्लटि 'उप किरति' इत्यवस्थायामनेन सुडागमेऽनुबन्धलोपे- **उपस्किरति** ।

**वा. अडभ्यासव्यवायेऽपि सुट्कात्पूर्व इति वक्तव्यम् । उपास्किरत् । उपचस्कार ॥**

(अट्-अभ्यास-व्यवाये, अपि, सुट्, कात्, पूर्वः, इति वक्तव्यम्)

**सरलार्थः** - अडागमेन, अभ्यासेन च व्यवधाने कृते सत्यपि 'किरतौ लवने' इति सूत्रेण ककारात् पूर्वं सुडागमो भवति ।

उपपूर्वकात् कॄ-धातोर्लङि तिपि'उप+अकिरत्' इत्यवस्थायाम् 'किरतौ लवने' इति उपशब्दाद् अव्यवहितपरस्मिन् सुटि प्राप्ते अस्य वार्तिकस्य सहयोगेन ककारात् पूर्वं सुटि, सवर्णदीर्घे- **उपास्किरति** । एवम् उपपूर्वकात् कॄ-धातोर्लिटि तिपि 'उप+चकार' इत्यवस्थायाम् अभ्यासव्यवधाने सत्यपि ककारात् पूर्वस्मिन् सुटि- **उपचस्कार** ।

### सुडागमविधायकं विधिसूत्रम्

**हिसायां प्रतेश्च ६।१।१४१॥**

**उपात्प्रतेश्च किरतेः सुट् स्यात् हिंसायाम् । उपस्किरति । प्रतिस्किरति ॥**

(उपात्, प्रतेः, च, किरतौ, सुट्, कात्, पूर्वः, हिंसायाम्)

**सरलार्थः** - हिंसारूपेऽर्थे उप-शब्दात्, प्रति-शब्दात् च परस्य कृ-धातोः ककारात् पूर्वस्मिन् सुडागमो भवति ।

उप किरति - उप स्किरति - **उपस्किरति** । प्रति किरति - प्रति स्किरति - **प्रतिस्किरति** ।

**गॄ निगरणे ॥४०॥** (गॄ- सेट्, सकर्मकः, परस्मैपदी)

लिङ्भिन्नेषु लकारेषु 'ॠत इद्धातोः' इति इत्वे, रपरत्वे 'गिर्' इति धातुस्वरूपम् ।

## लकारादेशविधायकं विधिसूत्रम्

**अचि विभाषा ८।२।२१॥**

**गिरते रेफस्य लो वाऽजादौ प्रत्यये । गिरति, गिलति । जगार, जगाल । जगरिथ, जगलिथ । गरीता, गरिता, गलीता, गलिता ॥**

(ग्रः, रः, अचि, लः, विभाषा)

**सरलार्थः** - अजादौ प्रत्यये परे सति गॄ-धातो रेफस्य स्थाने विकल्पेन लकारादेशो भवति ।

गॄ लट् (ल्) - गॄ तिप् (ति) - गिर् ति (ॠत इद्धातोः) - गिर् श (अ) ति - गिल् अ ति (अचि विभाषा) - **गिलति**, लत्वाभावपक्षे- **गिरति** । लत्वाभावपक्षे गॄ-धातो रूपाणि कॄ-धातुवत्, लत्वविकल्प एवात्र विशेषः ।

**प्रच्छ ज्ञीप्सायाम् ॥४१॥** (प्रच्छ्- अनिट्, सकर्मकः (द्विकर्मकः), परस्मैपदी)

**ग्रहिज्येति संप्रसारणम् । पृच्छति । पप्रच्छ । पप्रच्छतुः । पप्रच्छुः । प्रष्टा । प्रक्ष्यति । अप्राक्षीत् ॥**

प्रच्छ्-धातोः सार्वधातुकलकारेषु,आशीर्लिङि च ङित्वात्, 'ग्रहिज्या...' इति रेफस्य सम्प्रसारणं भवति ।

प्रच्छ् लट् (ल्) - प्रच्छ् ति - प्रच्छ् अ ति - प् ऋ अच्छ् अ ति (ग्रहिज्या...) - पृच्छ् अ ति (सम्प्रसारणाच्च) - **पृच्छति** । लिटि अतुसादौ अपि संयोगादिधातुत्वात् कित्वाभावाद् न सम्प्रसारणम्, थलि 'ऋतो भारद्वाजस्य' इति वेट्, वमयोः क्रादिनियमान्नित्यमिट् च । लुडादौ 'व्रश्चभ्रस्ज...' इति छकारस्य षत्वे 'निमित्तापाये नैमित्तिकस्याप्यपायः' इति छनिमित्तस्य तुग्रूपस्य चकारस्य निवृत्तिः, लृडादिषु सादौ प्रत्यये कत्व-षत्व-क्षत्वनि । यथा- प्रच्छ् लुङ्

(ल्) - अप्रच्छ् ल् - अप्रच्छ् ति - अप्रच्छ् च्लि ति - अप्रच्छ् सिच् (स्) ति - अप्रच्छ् स् त् - अप्रच्छ् स् ईत् - अप्राच्छ् स् ईत् (वदव्रज...) - अप्राष् स् ईत् (व्रश्चभ्रस्ज..., चकारस्य निवृत्तिश्च) - अप्राक् स् ईत् (षढोः...) - अप्राक् ष् ईत् - **अप्राक्षीत्** ।

इति परस्मैपदिनः ।

अथाऽऽत्मनेपदिनः ।

**मृङ् प्राणत्यागे ॥४२॥** (मृ- अनिट्, अकर्मकः, लट्-लोट्-लङ्-लिङ्-लुङ्लकारेषु आत्मनेपदी, शेषलकारेषु परस्मैपदी)

### आत्मनेपदप्रत्ययविधाननियामकं सूत्रम्

**म्रियतेर्लुङ्लिङोश्च १।३।६१॥**

**लुङ्लिङोः शितश्च प्रकृतिभूतान्मृङस्तङ् नान्यत्र । रिङ् । इयङ् । म्रियते । ममार । मर्ता । मरिष्यति । मृषीष्ट । अमृत ॥**

(म्रियतेः, लुङ्-लिङोः, शितः, च, आत्मनेपदम्) अत्र 'प्रकृतिभूतात्' इति पदम् अध्याहार्यम् ।

**सरलार्थः** - मृङ् प्राणत्यागे इति धातोः लुङ्लकारे, लिङ्लकारे, सार्वधातुकलकारेषु च आत्मनेपदं भवति, शेषलकारेषु तु परस्मैपदं भवति । यद्यपि मृङ्धातोर्ङित्त्वेन आत्मनेपदं सिद्धम्, तथापि अनेन सूत्रेण सर्वत्र न अपि तु लुङि, लिङि, शिति विकरणे च विवक्षिते एव आत्मनेपदं भवतीति नियम्यते । एतेन लिटि, लुटि, लृटि, लृङि च परस्मैपदमेव । सार्वधातुकलकारेषु श-प्रत्यये 'रिङ् शयग्लिङ्क्षु इति ऋकारस्य रिङादेशो भवति, रिङ इकारस्य च 'अचि श्नु...' इति इयङादेशो विधीयते ।

मृ-धातोर्लटि, लटः स्थाने अनेन सूत्रेण आत्मनेपदे, त-प्रत्यये,शपं बाधित्वा शप्रत्ययेऽनुबन्धलोपे 'रिङ् शयग्लिङ्क्षु' इति ऋकारस्य रिङादेशेऽनुबन्धलोपे 'अचिश्नुधातु०' इति सूत्रेण इकारस्य इयङादेशे, टेरेत्त्वे-**म्रियते** । लिटि, लुटि च अनेन आत्मनेपदनिषेधात् परस्मैपदे- ममार, मर्ता इत्यादि । लृटि, लृङि च परस्मैपदे 'ऋद्धनोः स्ये' इति इडागमः । आशीर्लिङि अनेन आत्मनेपदे 'उश्च' इति कित्वाद् गुणनिषेधः । लुङि आत्मनेपदे, च्लेः सिचि, इण्निषेधे 'अमृ स् त' इत्यवस्थायाम् 'ह्रस्वादङ्गात्' इति सिचो लुकि- **अमृत** ।

**पृङ् व्यायामे ॥४३॥** (व्याप् (वि+आ(ङ्)+पृ)- अनिट्, अकर्मकः, आत्मनेपदी)

**प्रायेणायं व्याङ्पूर्वः । व्याप्रियते । व्यापप्रे । व्यापप्राते । व्यापरिष्यते । व्यापृत । व्यापृषाताम् ॥**

पृङ्धातोः प्रायशो वि, आङ् इत्युपसर्गद्वयपूर्वकस्य एव प्रयोगो दृश्यते। श-प्रत्यये परे 'रिङ्शयग्लिङ्क्षु इति रिङादेशः। व्यापृ लट् (ल्) - व्यापृ त - व्यापृ अ त - व्यापृ अ त (रिङ्...) - व्याप्रिय् अ त (अचि श्नु...' - **व्याप्रियते** (टित आत्मनेपदानां टेरे)। एवं लोडादावपि। लृट्-लृङो 'ऋद्धनोः स्ये' इति इट्। आशीर्लिङि 'उश्चु इति कित्। लुङि मृधातुवत्।

**जुषी प्रतिसेवनयोः ॥४४॥** (जुष्- सेट्, सकर्मकः, आत्मनेपदी)

**जुषते। जुजुषे ॥**

**ओविजी भयचलनयोः ॥४५॥** (उद्विज् (उत्+विज्)- सेट्, अर्कमकः, आत्मनेपदी)

**प्रायेणायमुत्पूर्वः। उद्विजते ॥**

विज्-धातुः प्रायेण 'उत्' इत्युपसर्गपूर्व एव (उद्विज् इति स्वरूपेण) प्रयुज्यते।

## ङिद्वद्विधायकमतिदेशसूत्रम्

**विज इट् १।२।२॥**

**विजेः पर इडादिप्रत्ययो ङिद्वत्। उद्विजिता ॥**

(विजः, इट्, ङित्)

**सरलार्थः** - ओविजी (विज्) भयचलनयोरिति धातोः परस्य इडादि-प्रत्ययस्य ङिद्वद्भावो भवति। यस्य प्रत्ययस्य आदौ इट् वर्तते स इडादिप्रत्ययः।

अनेन सूत्रेण इडादिप्रत्ययस्य ङिद्वद्भावेन गुणो निषिध्यते। उदुपसर्गपूर्वकाद् विज्धातोर्लुटि, लस्य स्थाने ते, तासौ, तस्य डादेशे 'उद् विज् तास् आ' इति जाते, तास आर्धधातुकत्वेन इडागमे, अनेन सूत्रेण तासः ङित्वे, प्राप्तस्य लघूपधगुणस्य निषेधे 'उद् विज् इ तास् आ' इति जाते तासः टेर्लोपे, वर्णयोगे- उद्विजिता। एवं लृडादावपि इटि गुणनिषेधो बोध्यः।

**इति तुदादयः ॥६॥**

**मुञ्चति**

'मुच्लृ मोचने' इत्यर्थकाद् लृदित उभयपदिनश्च मुच्-धातोर्वर्तमानक्रियावृत्तौ 'वर्तमाने लट्' इति लट्यनुबन्धलोपे 'मुच् ल्' इति जाते, लस्य स्थाने परगामिक्रियाफले द्योत्ये 'तिप्तस्झि...' इत्यादिना सूत्रेण प्रथमपुरुषस्यैकवचने तिबादेशेऽनुबन्धलोपे 'मुच् ति' इति जाते, प्राप्तं शपं बाधित्वा 'तुदादिभ्यः शः' इत्यनेन श-प्रत्ययेऽनुबन्धलोपे 'मुच् अ ति' इति जाते, श-प्रत्ययस्य अपित्सार्वधातुकत्वेन ङित्वात् प्राप्तस्य लघूपधगुणस्य निषेधे 'शे मुचादीनाम्' इति सूत्रेण धातोर्नुमागमेऽनुबन्धलोपे, मित्वादन्त्यादचः परावयवत्वे 'मुन् च् अ ति' इति जाते, नस्यानुस्वारे परसवर्णे च 'मुञ् च् अ ति' इति जाते वर्णसम्मेलने 'मुञ्चति' इति रूपं सिद्धम् ।

**धातुरूपावलिः**

**तुद्-धातोर्लटि आत्मनेपदे रूपाणि-**

| | | |
|---|---|---|
| तुदते | तुदेते | तुदन्ते |
| तुदसे | तुदेथे | तुदध्वे |
| तुदे | तुदावहे | तुदामहे |

**सिच्-धातोर्लङि परस्मैपदे रूपाणि-**

| | | |
|---|---|---|
| असिञ्चत् | असिञ्चताम् | असिञ्चन् |
| असिञ्चः | असिञ्चतम् | असिञ्चत |
| असिञ्चम् | असिञ्चाव | असिञ्चाम |

**प्रच्छ्-धातोर्लोटि विध्यादिष्वर्थेषु रूपाणि-**

| | | |
|---|---|---|
| पृच्छतु | पृच्छताम् | पृच्छन्तु |
| पृच्छ | पृच्छतम् | पृच्छत |
| पृच्छानि | पृच्छाव | पृच्छाम |

## वाक्येषु प्रयोगानुशीलनम्

१. कुपुत्रो मातापितरौ अपि तुदति ।

२. मृगशावका मातरं न मुञ्चन्ते ।

३. अलसश्छात्रो विद्यां न विन्दते ।

४. ममानुजा ह्यो मातुलगृहमविशत् ।

५. मृतेऽपि शरीरे आत्मा न म्रियते ।

६. शिष्या विद्यायै गुरुं जुषन्ते ।

७. उत्तमा जनाः केवलं मानमिच्छन्ति ।

८. छात्रा अनवगतान् विषयान् शिक्षकं पृच्छन्तु ।

## अभ्यासः

### १. शुद्धमुच्चारयत

(क) हिंसायां प्रतेश्च

(ख) शे मुचादीनाम्

(ग) म्रियतेर्लुङ्लिङोश्च

(घ) ऋत इद्धातोः

### २. अधस्तनवाक्यानां समीचीनत्वाऽसमीचीनत्वे समुचितचिह्नाभ्यां निर्धारयत

(क) तुदादिगणपठितानां धातूनां सार्वधातुकलकारेषु कित्वाद् गुणो निषिद्ध्यते । ( )

(ख) शद्-धातुर्लृदिदस्ति । ( )

(ग) विश्-धातुरुभयपदे प्रयुज्यते । ( )

(घ) 'विज इट्' इति सूत्रमिडागमं करोति । ( )

(ङ) स्फुर-स्फुलधात्वोः प्रयोगः समानेऽर्थे भवति । ( )

### ३. रिक्तस्थानं पूरयत

(क) मृङ्-धातोर्लिटि आत्मनेपदनिषेधकं सूत्रम् ........................... ।

(ख) प्रच्छ्-धातोर्लृटि तिपि ........................... रूपम् ।

(ग) श-प्रत्ययस्य ङित्वविधायकं सूत्रम् ........................... वर्तते ।

(घ) 'मृषीष्ट' इत्यत्र 'उश्च' इत्यनेन ........................... क्रियते ।

(ङ) विज्-धातुः प्रायः ........................... इत्युपसर्गपूर्व एव प्रयुज्यते ।

४. **अधोऽङ्कितानां प्रश्नानामुत्तराणि लिखत**

(क) तुद्धातुः कस्मिन्नर्थे प्रयुज्यते ?

(ख) मुचादयः के ? शप्रत्यये परे मुचादिषु को विशेषः ?

(ग) 'लोभिता, लोब्धा' इत्यत्र केन सूत्रेण इडागमविकल्पः ?

(घ) इष्-धातोः षकारस्य छत्वं केन सूत्रेण भवति ?

(ङ) 'ममङ्क्थ' इत्यादौ मस्ज्-धातोर्नुमागमः कुत्र ?

(च) 'ललज्जे' इत्यत्र कथमेत्वाभ्यासलोपौ न ?

(छ) मृङ्-धातोः कुत्र कुत्र परस्मैपदम् ?

(ज) पृङ्-धातुः प्रायः किम्पूर्वः प्रयुज्यते ?

(झ) 'प्रष्टा' इति प्रयोगे प्रच्छ्-धातोश्चकारः कथं लुप्यते ?

(ञ) 'तृफ्यात्' इत्यादौ नलोपविधायकं सूत्रं किम् ?

(ट) शप्-शविकरणयोः किं पार्थक्यम् ?

(ठ) विद्लृ-धातुः कस्य मते सेट् कस्य मते अनिडिति लिखत ।

(ड) 'अतुत्त' इत्यत्र सलोपविधायकं सूत्रं किम् ?

५. **पाठे प्रदत्तान् सकर्मकाकर्मकान् धातून् वर्गीकृत्य तेषां सेट्त्वानिट्त्ववेट्त्वविचारञ्च कुरुत ।**

६. **मुच्-धातोर्लुङि उभयोपदयोः सर्वाणि रूपाणि लिखत ।**

७. **मृङ्धातोर्लटि सर्वाणि रूपाणि लिखत ।**

८. **प्रमुखसूत्रनिदर्शनपूर्वकं रूपसिद्धिप्रकारं प्रदर्शयत**

(क) तुतोदिथ (ख) मुञ्चति (ग) कर्त्तिष्यति (ग) तृफ्यात् (ङ) ममज्ज

(च) अप्राक्षीत् (छ) म्रियते (ज) व्यापृत (झ) उद्विजिता (ञ) लज्जते

९. **अधस्तनप्रयोगाणामर्थमन्विष्य पदानां वाक्ये प्रयोगं दर्शयत**

उपस्किरति, उपास्किरत्, प्रतिस्किरति, सङ्गिरते, उद्गिरति, निगिलति

१०. **तुदादिधातुनिर्मितानि क्रियापदानि प्रयुज्य पञ्च वाक्यानि रचयत ।**

चतुर्विंशः पाठः

# अथ रुधादयः

रुधादिगणे पठितेभ्यो धातुभ्यः शपोऽपवादत्वेन'श्नम्' इति विकरणप्रत्ययो जायते । श्नमः शकारमकारौ इतौ स्तः । मित्त्ववशात् प्रत्ययस्याऽस्य 'न' इत्यनुबन्धविनिर्मुक्तस्वरूपं धातोरन्त्यादचः परत्वेन अवतिष्ठते । तथा च प्रत्ययस्वरूपभेदेन प्रत्ययस्य अवस्थितिभेदेन च गणेऽस्मिन् पठितानां धातूनां सार्वधातुकलकारेषु रूपाणि पूर्वगणपठितेभ्यो धातुभ्यो विलक्षणान्येव भवन्ति । गणारम्भे रुध्-धातोः पाठात् 'रुधादिः' इति गणस्य संज्ञा ।

**रुधिर् आवरणे ॥१॥** (रुध्- अनिट्, सकर्मकः, उभयपदी)

आवरणार्थकस्य रुधिर् इति धातोः 'इर्'भागस्य 'इर इत्संज्ञा वाच्या' इति वार्तिकेन इत्संज्ञा विधीयते । धातुरयं द्विकर्मको वर्तते । अस्माद् धातोरारभ्य उतृदिर् हिंसानादरयोरिति धात्वन्ता नव धातव इरित उभयपदिनश्च सन्ति । इरित्वादेव एतेषां लुङि च्लेः स्थाने विकल्पेन अङादेशो भवति ।

रुध्-धातोर्लटि, तिपि, तिपः सार्वधातुकत्वेन शपि प्राप्ते-

### श्नाविकरणविधायकं विधिसूत्रम्

**रुधादिभ्यः श्नम् ३।१।७८॥**

**शपोऽपवादः । रुणद्धि । श्नसोरल्लोपः । रुन्धः । रुन्धन्ति । रुणत्सि । रुन्धः । रुन्ध । रुणध्मि । रुन्ध्वः । रुन्ध्मः । रुन्धे । रुन्धाते । रुन्धते । रुन्त्से । रुन्धाथे । रुन्द्ध्वे । रुन्धे । रुन्ध्वहे । रुन्ध्महे । रुरोध । रुरुधे । रोद्धा । रोत्स्यति । रोत्स्यते । रुणद्धु । रुन्धात् । रुन्द्धाम् । रुन्धन्तु । रुन्धि । रुणधानि । रुणधाव । रुणधाम । रुन्द्धाम् । रुन्धाताम् । रुन्धताम् । रुन्त्स्व । रुणधै । रुणधावहै । रुणधावहै । अरुणत्-द् । अरुन्धाम् । अरुन्धन् । 'दश्चे'ति रुः । अरुणः । अरुणत्-द् । अरुन्धम् । अरुन्द्ध । अरुणधम् । अरुन्ध्व । अरुन्ध्म । अरुन्द्ध । अरुन्धताम् । अरुन्धत । अरुन्धाः । अरुन्धाथाम् । अरुन्ध्वम् । अरुन्धि । अरुन्ध्वहि । अरुन्ध्महि । समानाश्रये आभीयत्वेन अल्लोपस्याऽसिद्धत्वादनिदितामिति नलोपो न । रुन्ध्यात् । रुन्धीत । रुध्यात् । रुत्सीष्ट । अरुधत् । अरौत्सीत् । 'लिङ्सिचा'विति कित्त्वम् । अरुद्ध । अरोत्स्यत् । अरोत्स्यत ॥**

(रुधादिभ्यः, कर्तरि, सार्वधातुके, श्नम्)

**सरलार्थः** - कर्त्रर्थे विहिते सार्वधातुकसंज्ञके प्रत्यये परे सति रुधादिगणपठितेभ्यो धातुभ्यः 'श्नम्' इति विकरणप्रत्ययो भवति। श्नमः शकारस्य 'लशक्वतद्धिते' इति मकारस्य च 'हलन्त्यम्' इति इत्संज्ञायां लोपे 'न' इत्येवावशिष्यते। मित्वाद् धातोरन्त्यादचः परत्र च तस्यावस्थानम्।

अनेन सूत्रेण शपं बाधित्वा श्नमि, अनुबन्धलोपे, मित्वाद् 'रुध्' इत्यस्य उकारात् परत्र तस्य स्थितौ 'रुनध् ति' इति जाते 'अट्कुप्वाङ्नुम्व्यवायेऽपि' इति नस्य णत्वे 'रुणध् ति' इत्यवस्थायां 'झषस्तथोर्धोऽधः' इति तकारस्य धत्वे, पूर्वधकारस्य 'झलां जश् झशि' इति जश्त्वे- **रुणद्धि**।

तसादीनां ङित्वात् सार्वधातुकलकारेषु 'श्नसोरल्लोपः' इत्यनेन श्नमोऽकारस्य लोपो भवति। धकारात् परयोः तकारथकारयोः 'झषस्तथोर्धोऽधः' इति धत्वम्, 'झरो झरि सवर्णे' इति पूर्वधकारस्य वैकल्पिको लोपश्च।

रुध् लट् (ल्) - रुध् तस् - रुनध् तस् (रुधादिभ्यः श्नम्) - रुन् ध् तस् (श्नसोरल्लोपः) - रुन् ध् धस् (झषस्तथोर्धोऽधः) - रुन् धस् (झरो झरि सवर्णे) - रुं धस् (नश्चापदान्तस्य झलि) - रुन् धस् (अनुस्वारस्य ययि परसवर्णः) रुन्धस् - रुन्धर् - **रुन्धः**, सवर्णलोपाभावे- रुन् ध् धस् - रुन् द् धस् (झलां जश् झशि) - रुं द् धस् - रुन् द् धस् - रुन्द्धस् - रुन्द्धर् - **रुन्द्धः**। उभयोः पक्षयोः परसवर्णस्यासिद्धत्वाद् णत्वाभावो बोध्यः। झौ- रुनध् अन्ति - रुन् ध् अन्ति - रुं ध् अन्ति- रुन् ध् अन्ति- रुन्धन्ति। सिपि- रुनध् सि - रुनत् सि (खरि च) - रुनत्सि - **रुणत्सि** (अट्कुप्वाङ्नुम्व्यवायेऽपि)। थस्-थयोः तस्वत्प्रक्रियया- रुन्धः/रुन्द्धः, रुन्ध/रुन्द्ध। मिपि णत्वे- रुणध्मि। वस्-मसोः परसवर्णस्यासिद्धत्वाद् णत्वाभावे- रुन्ध्वः, रुन्ध्मः। कर्तृगामिनि क्रियाफले लस्य आत्मनेपदे सर्वविभक्तीनाम् अपित्सार्वधातुकतया ङित्वात् सर्वत्र श्नमोऽकारस्य लोपो ज्ञेयः। रुध् लट् (ल्) - रुध् त - रुनध् त - रुन्ध् त (श्नसोरल्लोपः) - रुन्ध् ते (टित आत्मनेपदानां टेरे) - रुन्ध् धे - रुन् धे - रुं धे - **रुन्धे**, सवर्णलोपाभावे- **रुन्द्धे**। आतामि श्नमोऽल्लोपे- **रुन्धाते**। झे- रुनध् झ - रुनध् अत (आत्मनेपदेष्वनतः) - रुन्ध् अत (श्नसोरल्लोपः) - रुन्ध् अते - रुंध् अते - रुन्ध् अते -**रुन्धते**। सिपि- रुनध् थास् - रुनध् से (थासः से) - रुन्ध् से - रुन्त् से (खरि च) - रुंत् से - रुन्त् से -**रुन्त्से**। थसादौ- रुन्धाथे, रुन्ध्वे/रुन्द्ध्वे। रुन्धे, रुन्ध्वहे, रुन्ध्महे।

लुङि-रुध्-धातोर्लुङि रुध् ल्, अडागमे, तिपि, च्लिप्रत्यये, तत्र सिजादेशे प्राप्ते, (इरितो वा) विकल्पेन च्लेरङि, अनुबन्धलोपे ङित्वाद् लघूपधगुणनिषेधे, (इतश्च) इकारस्य लोपे-**अरुधत्**, अङादेशाभावे सिचि अरुध्स्ति, इकारलोपे, तकारस्य अपृक्तसंज्ञायाम्, (अस्तिसिचोऽपृक्ते)

ईडागमे अरुध् स् ईत्, (वदव्रजहलन्तस्याचः)वृद्धौ अरौध्सीत्(खरि च) चर्त्वे-**अरौत्सीत्**। आत्मनेपदे तु लुङि, ते, अटि, सिचि, अरुध्स्त, (लिङ्सिचा०) सिचः कित्त्वे, (झलो झलि) सलोपे, (झषस्तथो...) तस्य धकारे, जश्त्वे-**अरुद्ध**।

**भिदिर् विदारणे ॥२॥** (भिद्- अनिट्, सकर्मकः, उभयपदी)

**भिनत्ति। भिन्ते ॥**

**छिदिर् द्वैधीकरणे ॥३॥** (छिद्- अनिट्, सकर्मकः, उभयपदी)

छिनत्ति। छिन्ते।

**युजिर् योगे ॥४॥** (युज्- अनिट्, सकर्मकः, उभयपदी)

युनक्ति। युङ्क्ते।

**रिचिर् विरेचने ॥५॥** (रिच्- अनिट्, सकर्मकः, उभयपदी)

**रिणक्ति, रिङ्क्ते। रिरेच। रेक्ता। रेक्ष्यति। अरिणक्। अरिचत्, अरैक्षीत्, अरिक्त।**

**विचिर् पृथग्भावे ॥६॥** (विच्- अनिट्, सकर्मकः, उभयपदी)

**विनक्ति, विङ्क्ते ॥**

**क्षुदिर् संपेषणे ॥७॥** (क्षुद्- अनिट्, सकर्मकः, उभयपदी)

**क्षुणत्ति, क्षुन्ते। क्षोत्ता। अक्षुदत्, अक्षौत्सीत्, अक्षुत्त।**

**उच्छृदिर् दीप्तिसेवनयोः ॥८॥** (छृद्- अनिट्, अर्थवशात् सकर्मकोऽकर्मकश्च, उभयपदी)

**छृणत्ति, छृन्ते। चच्छर्द। सेसिचीति वेट्। चच्छृदिषे, चच्छृत्से। छर्दिता। छर्दिष्यति, छर्त्स्यति। अच्छृदत्, अच्छर्दीत्, अच्छर्दिष्ट।**

**उतृदिर् हिंसाऽनादरयोः ॥९॥** (तृद्- अनिट्, सकर्मकः, उभयपदी)

**तृणत्ति, तृन्ते।**

**कृती वेष्टने ॥१०॥** (सेट्, सकर्मकः, परस्मैपदी)

**कृणत्ति ॥**

## अथ परस्मैपदिनः

**तृह हिसि हिंसायाम् ॥११-१२॥** (तृह्, हिस्- सेटौ, सकर्मकौ, परस्मैपदिनौ)

### इमागमविधायकं विधिसूत्रम्

**तृणह इम् ७।३।९२॥**

**तृहः श्नमि कृते इम् स्याद्धलादौ पिति । तृणेढि । तृण्ढः । ततर्ह । तर्हिता । अतृणेट् ।**

(तृणहः, पिति, हलि, सार्वधातुके, इम्)

**सरलार्थः** - हलादौ पिति सार्वधातुके परे सति कृतस्यश्नम्-प्रत्ययस्य तृह्-धातोः'इम्' इत्यागमो भवति । तिप्-प्रत्ययः पित्, हलादिः, सार्वधातुकसंज्ञकश्च, अतः तस्मिन् परे सति तृह्-धातोः कृतस्य श्नम्-प्रत्ययस्य 'तृणह्' इति स्वरूपस्य 'इम्' आगमो विधीयते । इमो मित्त्वादन्त्यादचः परत्त्वम् । श्नम्-विकरणसहितस्याङ्गस्य इमागमविधानात् तस्यैवाऽन्त्यादचः श्नमोऽकारात्पर इमागमः स्थापनीयः ।

तृह्-धातोर्लटि, तिपि, शपम्प्रबाध्य श्नमि 'तृनह् ति' इति जाते 'ऋवर्णान्नस्य णत्वं वाच्यम्' इति णत्वे 'तृणह् ति' इत्यवस्थायाम् अनेन सूत्रेण इमागमेऽनुबन्धलोपे, मित्वाद् विकरणसहितस्य 'तृणह्' इत्यङ्गस्य अन्त्यादचः अकारात् परावयवत्वे 'तृण इह् इम्' इति जाते, गुणे 'तृणेह् ति', 'हो ढः' इति हकारस्य ढत्वे 'तृणेढ् ति',तिपस्तकारस्य 'झषस्तथोर्धोऽधः' इति धत्वे, तस्य ष्टुत्वेन ढकारे 'तृणेढ् ढि' इति जाते पूर्वढकारस्य 'ढो ढे लोपः' इति लोपे 'तृणेढि' इति रूपम् । तसि- तृणह् तस्, तसोऽपित्त्वाद् ङिद्वद्भावे 'श्नसोरल्लोपः' इति श्नमोऽकारस्य लोपे, हकारस्य ढत्वे, तकारस्य धत्वे, ष्टुत्वे, पूर्वढकारस्य लोपे- तृण्ढः ।

### नकारलोपविधायकं विधिसूत्रम्

**श्नान्नलोपः ६।४।२३॥**

**श्नमः परस्य नस्य लोपः स्यात् । हिनस्ति । जिहिंस । हिंसिता ॥**

(श्नात्, नलोपः)

**सरलार्थः** - 'श्नम्' इति विकरणप्रत्ययाद् उत्तरस्य नकारस्य लोपो भवति ।

'हिनन् स्' इत्यवस्थायां श्नमः परस्य नुमो नकारस्याऽनेन सूत्रेण लोपो भवति ।

हिस् लट् (ल्) - हिस् तिप् (ति) - हिनस् ति (रुद्धादिभ्यः श्नम्) - हिनन् स् ति (इदितो नुम् धातोः) - हिनस् ति (श्नान्नलोपः) - हिनस्ति । तसादौ ङिति 'श्नसोरल्लोपः' इति

श्नमोऽकारस्यापि लोपो भवति । हिस् लट् (ल्) - हिस् तस् - हिनस् तस् - हिनन् स् तस् - हिनस् तस् (श्नान्नलोपः) - हिन् स् तस् (श्नसोरल्लोपः) - हिंस् तस् (अनुस्वारस्य ययि परसवर्णः) - हिंस्तस् - हिंस्तर् - हिंस्तः । एवं प्रकारेण झौ- हिंसन्ति । सिबादौ- हिनस्सि, हिंस्थः, हिंस्थ, हिनस्मि, हिंस्वः, हिंस्मः ।

लिटि- जिहिंस, जिहिंसतुः, जिहिंसुः इत्यादि । लुटि- हिंसिता, हिंसितारौ, हिंसितारः इत्यादि । लृटि- हिंसिष्यति, हिंसिष्यतः, हिंसिष्यन्ति इत्यादि । लोटि तिपि- हिनस्तु, तातङ्पक्षे ङित्वात् श्नमोऽकारलोपे- हिंस्तात् । तसादौ ङित्वादलोपे- हिंस्ताम्, हिंसन्तु । सिपि- श्नमि नुमि च कृते- हिनन् स् सि - हिनन् स् हि (सेर्ह्यपिच्च) - हिनन् स् धि (हुझल्भ्यो हेर्धिः) - हिनस् धि (श्नान्नलोपः) - हिन् स् धि (श्नसोरल्लोपः, ह्यादेशस्य अपित्वविधानाद्ङित्वे सिद्धेऽनेन अल्लोपः) -हिन् धि (धि च) - हिन्धि । तातङ्पक्षे- हिंस्तात् । हिंस्तम्, हिंस्त । उत्तमपुरुषे आडागमस्य पित्वाद् अल्लोपाभावे- हिनसानि, हिनसाव, हिनसाम । लुङि-

### दकारादेशविधायकं विधिसूत्रम्

**तिप्यनस्तेः ८।२।७३॥**

**पदान्तस्य सस्य दः स्यात्तिपि न त्वस्तेः । 'ससजुषो रुः' इत्यस्यापवादः । अहिनत्, अहिनद् । अहिंस्ताम् । अहिंसन् ॥**

(पदस्य, अन्ते, सः, तिपि, दः, अनस्तेः) अनस्तेः न अस्तेः, अस्-धातुं वर्जयित्वा इत्यर्थः ।

**सरलार्थः** - तिप्-विभक्तौ परायां सत्यां पदान्ते स्थितस्य अस्-धातुभिन्नस्य सकारस्य स्थाने दकार आदेशो भवति । तिपो इकारस्य लोपे, तकारस्य च हल्ङ्यादिलोपे कृते प्रत्ययलक्षणमाश्रित्य अनेन सूत्रेण दत्वं विधीयते ।'ससजुषो रुः' इत्यनेन प्राप्तं रुत्वम् अनेन बाध्यते ।

हिस् लङ् (ल्) - अहिस् ल् - अहिस् तिप् (ति) - अहिनस् ति (रुधादिभ्यः श्नम्) - अहिनन्स् सि (इदितो नुम् धातोः) - अहिनस् सि (श्नान्नलोपः) - अहिनस् त् (इतश्च) - अहिनस् (हल्ङ्याब्भ्यो दीर्घात्...) - अहिनद् (तिप्यनस्तेः) - अहिनत् (वाऽवसाने) । चर्त्वाभावे- अहिनद् । तसादौ ङिति 'श्नसोरल्लोपः' इति अलोपे- अहिंस्ताम्, अहिंसन् इत्यादि । सिपि तु-

### विभाषया रु इत्यादेशविधायकं विधिसूत्रम्

**सिपि धातो रुर्वा ८।२।७४॥**

**पदान्तस्य धातोः सस्य रुः स्याद्वा, पक्षे दः । अहिनः, अहिनत्, अहिनद् ॥**

(धातोः, पदस्य, अन्ते, स, रुः, वा) स इति 'ससजुषो रुः' इत्यत अनुवृत्तं लुप्तषष्ठीकं पदम् ।

**सरलार्थः** - सिप्-विभक्तौ परायां सत्यां धातोः पदान्ते स्थितस्य सकारस्य स्थाने विकल्पेन 'रु (र्)' इत्यादेशो भवति । 'ससजुषो रुः' इत्यनेन नित्यमेव प्राप्तेऽनेन विकल्प्यते । विकल्पाभावपक्षे 'झलां जशोऽन्ते' इति सकारस्य जश्त्वेन दकारादेशो भवति ।

हिस् लङ् (ल्) - अहिस् ल् - अहिस् सिप् (सि) - अहिनस् सि (रुधादिभ्यः श्नम्) - अहिनन्स् सि (इदितो नुम् धातोः) - अहिनस् सि (श्नान्नलोपः) - अहिनस् स् (इतश्च) - अहिनस् (हल्ङ्याब्भ्यो दीर्घात्...) - अहिनर् (सिपि धातो रुर्वा) - अहिनः । रुत्वाभावपक्षे- अहिनस् - अहिनद् (झलां जशोऽन्ते) - अहिनत् (वाऽवसाने) । चर्त्वाभावपक्षे- अहिनद् इति त्रीणि रूपाणि सिद्ध्यन्ति । मिपि- अहिनसम् । लिङि यासुडागमस्य ङित्वात् सर्वत्र श्नमोऽकारलोपो बोध्यः । विधिलिङि- हिंस्यात्, हिंस्याताम्, हिंस्युः इत्यादि । आशीर्लिङि- हिंस्यात्, हिंस्यास्ताम्, हिंस्यासुः इत्यादि । लुङि- अहिंसीत्, अहिंसिष्टाम्, अहिंसिषुः इत्यादि । लृङि- अहिंसिष्यत्, अहिंसिष्यताम्, अहिंसिष्यन् इत्यादि ।

**उन्दी क्लेदने ॥१३॥** (उन्द्- सेट्, सकर्मकः परस्मैपदी)

**उनत्ति । उन्तः । उन्दन्ति । उन्दाञ्चकार । औनत्, औनद् । औन्ताम् । औन्दन् । औनः, औनत्, औनद् । औनदम् ॥**

उन्द् लट् (ल्) - उन्द् तिप् (ति) - उनन्द् ति - उनद् ति (श्नान्नलोपः) - उनत् ति (खरि च) - उनत्ति । तसि, थसि, थे च वैकल्पिकसवर्णलोपो ज्ञेयः । उन्द् तस् - उनन्द् तस् - उनद् तस् (श्नान्नलोपः) - उन् द् तस् (श्नसोरल्लोपः) - उन् तस् (झरो झरि सवर्णे) - उन्तस् - उन्तर् - उन्तः, सवर्णलोपाभावपक्षे- उन् द् तस् - उन् त् तस् (खरि च) - उन्त्तस् - उन्त्तर् - उन्त्तः । झौ श्नमोऽल्लोपे- उन्दन्ति । सिबादौ- उनत्सि, उन्थः/उन्त्थः, उन्थ/उन्त्थ । उनद्मि, उन्द्वः, उन्द्मः ।लिटि- उन्दाञ्चकार, उन्दाम्बभूव, उन्दामास इत्यादि । लुटि उन्दिता, लृटि उन्दिष्यति इत्यादि । लोटि- उनत्तु/उन्तात्/उन्त्तात्, उन्ताम्/उन्त्ताम्, उन्दन्तु । सिपि श्नमि कृते- उनन्द् सि - उनन्द् हि (सेर्ह्यपिच्च) - उनन्द् धि (हुझल्भ्यो हेर्धिः) - उनद् धि (श्नान्नलोपः) - उन्द् धि (श्नसोरल्लोपः) - उद् धि (अनिदितां हल उपधाया क्ङिति) -उद्धि । तातङ्पक्षे- उन्तात्/उन्त्तात् । उन्तम्/उन्त्तम्, उन्त/उन्त्त । उनदानि, उनदाव, उनदाम ।

लङि- उन्द् ल् - आ उन्द् ल् (आडजादीनाम्) - औन्द् ल् (आटश्च) औन्द् तिप् (ति) - औनन्द् ति (रुधादिभ्यः श्नम्) - औनद् ति (श्नान्नलोपः) - औनद् त् - औनद् (हल्ङ्ब्भ्यो

दीर्घात्...) - औनत् (वाऽवसाने), चर्त्वाभावे- औनद् । तसि- औन्ताम्/औन्त्ताम्, झौ- औन्दन् । सिपि पूर्ववत्- औनद् सि - औनद् स् (इतश्च) - औनद् (हल्ङ्ब्भ्यो दीर्घात्...) - औनर् (दश्च) - औन:, रुत्वाभावपक्षे- औनद् - औनत् (वाऽवसाने), चर्त्वाभावे- औनद् । थसि- औन्तम्/औन्त्तम्, औन्त/औन्त्त । उत्तमपुरुषे- औनदम्, औन्द्व, औन्द्म । लिङि यासुटो ङित्वात् सर्वत्र श्नमोऽल्लोपः । विधिलिङि- उन्द्यात्, उन्द्याताम्, उन्द्युः इत्यादि । आशीर्लिङि 'अनिदितां हल उपधाया क्ङिति' इति नलोपे- उद्यात्, उद्यास्ताम्, उद्यासुः इत्यादि । लुङि- औन्दीत्, लृङि- औन्दिष्यत् इत्यादि ।

**अञ्जू व्यक्ति-म्रक्षण-कान्ति-गतिषु ॥१४॥** (अञ्ज्- सेट्, अर्थवशात् सकर्मकोऽकर्मकश्च, परस्मैपदी)

**अनक्ति । अङ्क्तः । अञ्जन्ति । आनञ्ज । आनञ्जिथ, आनङ्क्थ । अञ्जिता, अङ्क्ता । अङ्ग्धि । अनजानि । आनक् ॥**

**अञ्जेः सिचि ७।२।७१॥**

**अञ्जेः सिचो नित्यमिट् स्यात् । आञ्जीत् ॥**

(अञ्जेः, सिचि, इट्)

**सरलार्थः** - अञ्ज्-धातोर्विहितस्य सिचो नित्यम् इट् इत्यागमो भवति । ऊदित्वात् 'स्वरतिसूतिसूयतिधूञूदितो वा' इत्यनेन वैकल्पिके इटि सिद्धे तं बाधित्वा अनेन सूत्रेण नित्यमिड् विधीयते ।

अञ्ज् लुङ् (ल्) - आ अञ्ज् ल् - आञ्ज् ल् - आञ्ज् ति - आञ्ज् सिच् (स्) ति - आञ्ज् इस् ति (अञ्जेः सिचि) - आञ्ज् इस् त् - आञ्ज् इस् ईत् - आञ्ज् इ ईत् - आञ्ज् ईत् - **आञ्जीत्** ।

**तञ्चू संकोचने ॥१५॥** (तञ्च्- ऊदित्वाद् वेट्, सकर्मकः, परस्मैपदी)

**तनक्ति । तङ्क्ता । तञ्चिता ॥**

**ओविजी भय-सञ्चलनयोः ॥१६॥** (विज्- सेट्, अकर्मकः, परस्मैपदी)

**विनक्ति । विङ्क्तः । विज इडिति ङित्त्वम् । विविजिथ । विजिता । अविनक् । अविजीत् ॥**

**शिष्लृ विशेषणे ॥१७॥** (शिष्- अनिट्, अर्थवशात् सकर्मकोऽकर्मकश्च, परस्मैपदी)

**शिनष्टि । शिंष्टः । शिंषन्ति । शिनक्षि । शिशेष । शिशेषिथ । शेष्टा । शेक्ष्यति । हेर्धिः । शिण्ड्ढि । शिनषाणि । अशिनट् । शिंष्यात् । शिष्यात् । अशिषत् ॥**

शिष्-धातोर्लृदित्वाद् लुङि च्लेः सिचं बाधित्वा अङ् विधीयते ।

**एवं पिष्लृ संचूर्णने ॥१८॥** (पिष्- अनिट्, सकर्मकः, परस्मैपदी)

पिष्-धातोर्लृदित्वाल्लुङि च्लेरङ् विधीयते । अस्य सर्वाणि रूपाणि शिष्-धातुवदेव प्रक्रियया निष्पद्यन्ते । यथा- पिनष्टि, पिपेष, पेष्टा, पेक्ष्यति, पिनष्टु/पिंष्टात्, अपिनट्/अपिनड्, पिंष्यात्, पिष्यात्, अपिषत्, अपेक्ष्यत् इत्यादि ।

**भञ्जो आमर्दने ॥१९॥** (भञ्ज्- अनिट्, सकर्मकः, परस्मैपदी)

**श्नान्नलोपः । भनक्ति । बभञ्जिथ, बभङ्क्थ । भङ्क्ता । भङ्ग्धि । अभाङ्क्षीत् ॥**

**भुजपालनाऽभ्यवहारयोः ॥२०॥** (भुज्- अनिट्, सकर्मकः, पालने (अवने) अर्थे परस्मैपदी, पालनभिन्नेषु अभ्यवहारादिषु (भोजनादिषु) अर्थेषु आत्मनेपदी)

**भुनक्ति । भोक्ता । भोक्ष्यति । अभुनक् ॥**

भुज्धातोर्लटि तिपि श्नमि 'चो कुः' इति जकारस्य कुत्वे चर्त्वे च 'भुनक्ति' इति रूपम् ।

## आत्मनेपदप्रत्ययविधाननियामकं सूत्रम्

**भुजोऽनवने १।३।६६॥**

**तङानौ स्तः । ओदनं भुङ्क्ते । अनवने किम् ? महीं भुनक्ति ॥**

(भुजः, अनवने, आत्मनेपदम्) अनवने न अवने, रक्षणभिन्नेऽर्थे इत्यर्थः ।

**सरलार्थः** - अवनम्- पालनं रक्षणं वा, एतदर्थं विहाय अन्येषु अर्थेषु भुज्-धातोरात्मनेपदम् (तङ्, शानच्-कानचौ चेति) भवति । 'ओदनं भुङ्क्ते' इत्यस्मिन् वाक्ये भुज्-धातू रक्षणार्थो नास्ति अपि तु भक्षणार्थः, अतोऽत्र अनेन सूत्रेण आत्मनेपदम् । 'महीं भुनक्ति' इत्यत्र तु भुज्-धातोः पालनार्थत्वाद् अस्य सूत्रस्य अप्रवृत्तत्तौ 'शेषात् कर्तरि परस्मैपदम्' इत्यनेन परस्मैपदमेव ।

भुज्-धातोर्लटि 'भुजोऽनवने' इति आत्मनेपदे तप्रत्यये, श्नमि 'भुनज् त' इति जाते तप्रत्ययस्य अपित्त्वाद् ङित्त्वेन 'श्नसोरल्लोपः' इति अकारलोपे, जकारस्य कुत्वचर्त्वयोः, नकारस्यानुस्वारपरसवर्णयोः 'भुङ्क् त' इत्यवस्थायां टेरेत्वे, वर्णयोगे च 'भुङ्क्ते' इति रूपम् ।

## अथात्मनेपदिनः ।

**ञिइन्धी दीप्तौ ॥२१॥** (इन्ध्- सेट्, अकर्मकः, अनुदात्तेत्त्वाद् आत्मनेपदी)

**इन्द्धे । इन्धाते । इन्धते । इन्त्से । इन्ध्वे । इन्धाञ्चक्रे । इन्धिता । इन्धाम् । इन्धाताम् । इनधै । ऐन्ध । ऐन्धाताम् । ऐन्द्धाः ॥**

इन्ध् लट् (ल्) - इन्ध् त - इनन्ध् त (श्नम्) - इनध् त (श्नान्नलोपः) - इन् ध् त (श्नसोरल्लोपः) - इन् ध् ते (टित आत्मनेपदानां टेरे) - इन् ध् धे (झषस्तथोर्धोऽधः) - इं ध् धे (नश्चापदान्तस्य झलि) - इन् ध् धे (अनुस्वारस्य ययि परसवर्णः) - इन् द् धे (झलां जश् झशि) - इन् धे (झरो झरि सवर्णे) - **इन्धे**, सवर्णलोपाभावे- इन् द् धे - **इन्द्धे** इति रूपद्वयम् । तसादौ- इन्धाते, इन्धते । इन्त्से, इन्धाथे, इन्ध्वे/इन्द्ध्वे । इन्धे, इन्ध्वहे, इन्ध्महे ।

लिटि 'इजादेश्च गुरुमतोऽनृच्छः' इत्यनेन आमि कृ, भू, अस् इत्येतेषामनुप्रयोगे- इन्धाञ्चक्रे, इन्धाम्बभूव, इन्धामास इत्यादि । लुटि- इन्धिता, लृटि- इन्धिष्यते इत्यादि । लोटि- इन्धाम्/इन्द्धाम्, इन्धाताम्, इन्धताम् इत्यादि ।

**विद विचारणे ॥२२॥** (विद्- अनिट्, सकर्मकः, अनुदात्तेत्त्वाद् आत्मनेपदी)

**विन्त्ते । वेत्ता ॥**

विद् लट् (ल्) - विद् तिप् (ति) - विनद् त (श्नम्) - विन्द् त (श्नसोरल्लोपः) - विन्त् त (खरि च) - विन्त् ते (टित आत्मनेपदानां टेरे) - विन् ते (झरो झरि सवर्णे) - विं ते (नश्चापदान्तस्य झलि) - विन् ते (अनुस्वारस्य ययि परसवर्णः) -**विन्ते**, सवर्णलोपाभावे- विन्त् ते -**विन्त्ते** (अनुस्वारपरसवर्णौ) । आतामादौ- विन्त्ताम्, विन्दते । विन्त्से, विन्दाथे, विन्ध्वे/विन्द्ध्वे । विन्दे, विन्द्वहे, विन्द्महे । लिडादौ- विविदे, वेत्ता, वेत्स्यते, विन्ताम्/विन्त्ताम्, अविन्त/अविन्त्त, विन्दीत, वित्सीष्ट, अवित्त, अवेत्स्यत इत्यादीनि रूपाणि बोध्यानि ।

**इति रुधादयः ॥७॥**

**रुन्धः / रुन्द्धः**

'रुधिर् आवरणे' इत्यर्थकाद् इरित उभयपदिनश्च रुध्-धातो 'वर्तमाने लट्' इति लट्यनुबन्धलोपे 'रुध् ल्' इति जाते, लस्य स्थाने परगामिक्रियाफले द्योत्ये 'तिप्तस्झि...' इत्यादिना सूत्रेण प्रथमपुरुषस्य द्विवचने तसादेशे 'रुध् तस्' इति जाते, सार्वधातुकसंज्ञायां प्राप्तं शपं बाधित्वा 'रुधादिभ्यः श्नम्' इत्यनेन श्नम्-प्रत्ययेऽनुबन्धलोपे, मित्वादन्त्यादच उकारात् परत्र स्थापिते 'रुनध् तस्' इति जाते, तसोऽपित्सार्वधातुकत्वेन ङित्वात् 'श्नसोरल्लोपः' इति सूत्रेण श्नमोऽकारस्य लोपे 'रुन् ध् तस्' इति जाते 'झषस्तथोर्धोऽधः' इत्यनेन तसः तकारस्य स्थाने धकारादेशे 'रुन् ध् धस्' इति जाते 'झरो झरि सवर्णे' इति पूर्वधकारस्य वैकल्पिके लोपे 'रुन् धस्' इति जाते 'नश्चापदान्तस्य झलि' इति नस्यानुस्वारे 'अनुस्वारस्य ययि परसवर्णः' इत्यनुस्वारस्य परसवर्णे, वर्णयोगे, सकारस्य रुत्वे विसर्गे च 'रुन्धः' इति रूपं सिद्धम्। धलोपाभावपक्षे पूर्वधकारस्य 'झलां जश् झशि' इति जश्त्वे 'रुन्द्धः' इत्यपि रूपं सिद्धं भवति।

**धातुरूपावलिः**

**रुध्-धातोर्लटि परस्मैपदे रूपाणि-**

| | | |
|---|---|---|
| रुणद्धि | रुन्धः / रुन्द्धः | रुन्धन्ति |
| रुणत्सि | रुन्धः / रुन्द्धः | रुन्ध / रुन्द्ध |
| रुणध्मि | रुन्ध्वः | रुन्ध्मः |

**भुज्-धातोः पालने (अवने) अर्थे लटि रूपाणि-**

| | | |
|---|---|---|
| भुनक्ति | भुङ्क्तः | भुञ्जन्ति |
| भुनक्षि | भुङ्क्थः | भुङ्क्थ |
| भुनज्मि | भुञ्ज्वः | भुञ्ज्मः |

**भुज्-धातोः पालनभिन्ने (भोजनादौ) अर्थे लटि रूपाणि-**

| | | |
|---|---|---|
| भुङ्क्ते | भुञ्जाते | भुञ्जते |
| भुङ्क्षे | भुञ्जाथे | भुङ्ग्ध्वे |
| भुञ्जे | भुञ्ज्वहे | भुञ्ज्महे |

## वाक्येषु प्रयोगानुशीलनम्

१. ह्यः सायं भीषणवर्षा मार्गान् अरुन्धन् ।

२. दुष्टजनो वचनवाणैः सज्जनहृदयं भिनत्ति ।

३. कृषकः परशुना काष्ठं छिन्ते ।

४. सूचीकारो वस्त्रखण्डान् अयुनक् ।

५. शासकः स्वदेशं सम्यक् भुञ्ज्यात् ।

६. नक्तं दधि कदापि न भुञ्जीत ।

७. त्वं कीटमपि न हिन्धि ।

## अभ्यासः

**१. सूत्राणि पठित्वा सोदाहरणमर्थं लिखत**

(क) रुधादिभ्यः श्नम्

(ख) श्नसोरल्लोपः

(ग) भुजोऽनवने

(घ) सिपि धातो रुर्वा

(ङ) तिप्यनस्तेः

(च) श्नान्नलोपः

**२. समानधातु-लकार-पुरुष-वचनके क्रियापदे परस्परं मेलयत**

| परस्मैपदम् | आत्मनेपदम् |
|---|---|
| युनज्मि | अरुद्ध |
| भिन्दन्ति | युक्षीयास्ताम् |
| रुन्धि | चिच्छिदिषे |
| चिच्छेदिथ | अयोक्ष्यथाः |
| भिन्द्याः | भिन्दते |
| अरौत्सीत् | भिन्दीथाः |
| युज्यास्ताम् | रुन्त्स्व |
| अयोक्ष्यः | युञ्जे |

**३. अधोऽङ्कितानां प्रश्नानामुत्तराणि लिखत**

(क) रुध्धातो सकर्मकत्वाऽकर्मकत्वे विवेचयत ।

(ख) हिस्-धातुः कस्मिन्नर्थे प्रयुज्यते ?

(ग) रुध्-धातोर्लुङि तिपि परस्मैपदे कानि रूपाणि ?

(घ) तृह्-धातौ को विशेषः ?

(ङ) भुज्-धातुः कयोरर्थयोः प्रयुज्यते ?

(च) 'भुङ्क्ते' इत्यत्र केन सूत्रेण आत्मनेपदम् ? पदस्यास्य कोऽर्थः ?

(छ) 'हिनस्ति' इत्यत्र केन सूत्रेण नुमो नकारस्य लोपः ?

(ज) रुधादिगणस्य विकरणप्रत्ययः कः ? स च कस्याऽपवादकः ?

(झ) श्नमि मित्करणस्य किं प्रयोजनम् ?

(ञ) रुधिरादयो नव इरितो धातवः के ? तेषु इरित्करणस्य को लाभः ?

४. **निर्देशानुसारेण सर्वाणि रूपाणि लिखत**

(क) छिद्-धातोर्लटि परस्मैपदे (ख) तृह्-धातोर्लङि

(ग) भुज्-धातोर्लिटि आत्मनेपदे

५. **प्रमुखसूत्रनिदर्शनपूर्वकं रूपसिद्धिप्रकारं प्रदर्शयत**

(क) रुन्धे (ख) रुन्द्धः (ग) अरुणत्

(घ) तृणेढि (ङ) हिनस्ति (च) जिहिंस

(छ) बुभोज (ज) अभुनक् (झ) भुङ्क्ते

(ञ) अहिनः

६. **अधस्तनप्रयोगाणां धातु-लकार-पद-पुरुष-वचनानि निर्धारयत**

रोत्स्यते, रुन्धाम्, रुन्धीथाः, भिन्दाते, भित्सीष्ट, हिनस्मि, युङ्क्षे, भुनजानि, इन्द्धे

७. **अधस्तनपदानां वाक्ये प्रयोगं कुरुत**

युञ्जताम्, जिहिंसुः, अहिंसीः, अभुक्षाताम्, रोत्स्यति, भिन्दाते, भुङ्क्ष्व, विनक्ति, रिणक्ति

८. **पाठे आगतान् सेडनिटो धातून् वर्गीकुरुत ।**

९. **पाठाधारेण रुधादिगणपठितेषु धातुषु सकर्मकान् अकर्मकान् च धातून् पृथक्कृत्य तेषां धातूपदेशस्वरूपाणि अनुबन्धविनिर्मुक्तस्वरूपाणि च सारिण्यां दर्शयत ।**

पञ्चविंशः
पाठः

# अथ तनादिप्रकरणम्

(अथ स्वरितेतो ञितश्च-उभयपदिनः) ।

तनादिप्रकरणे शपं प्रबाध्य उ इति विकरणप्रत्ययो भवति । उविकरणस्य पिति प्रत्यये सर्वत्र गुणो भवति । किति तु न । अतः पूर्वगणेभ्योऽत्र गणस्थधातूनां रूपाणि विलक्षणानि भवन्ति । तनु विस्तारे इति धातु अस्य गणस्यादिमो धातुः, अत एव गणोऽयं तनादिगणः ।

**तनु विस्तारे ॥१॥** (सेट्, सकर्मकः, उभयपदी, उकारोऽनुबन्धः स्वरितः)

विस्तारार्थकात् तन्धातोः लटि तस्य परस्मैपदे तिप्रत्यये 'तन्+ति' इत्यवस्थायां तिपः सार्वधातुकसंज्ञायां शपि प्राप्ते आह-

## उ इति विकरणविधायकं विधिसूत्रम्

**तनादिकृञ्भ्यः उः ३।१।७९॥**

**तनादेः, कृञश्च उः प्रत्ययः स्यात्कर्त्रर्थे सार्वधातुके । तनोति । तनुते । ततान । तेने । तनितासि, तनितासे । तनिष्यति, तनिष्यते । तनोतु । तनुताम् । अतनोत् । अतनुत । तनुयात् । तन्वीत । तन्यात् । तनिषीष्ट । अतनीत् । अतानीत् ।**

(तनादिकृञ्भ्यः,धातोः, परः, उ, प्रत्ययः, कर्तरि, सार्वधातुके )

**सरलार्थः–** तनादिगणपठितेभ्यो धातुभ्यः, कृञ्धातोश्च परः कर्त्रर्थके सार्वधातुके परे उप्रत्ययो भवति । अनेन सूत्रेण शपं प्रबाध्य उप्रत्यये तन् उ ति इति जाते '**सार्वधातुकार्धधातुकयोः**' इति गुणेन ओकारे वर्णसम्मेलने तनोति इति रूपम् । तसादौ आत्मनेपदे च अपिति ङित्त्वेन गुणाभावे तनुतः । झौ 'इको यणचि' इति यणि तन्वन्ति । तनोषि, तनुथः, तनुथ, तनोमि । वसि मसि च 'लोपश्चास्यान्यतरस्यां म्वोः' इति विभाषया उकारस्य लोपे तन्वः-तनुवः । तन्मः-तनुमः ।

आत्मने पदे सर्वत्र ङित्वेन गुणाभावे, अजादौ यणि च तनुते, तन्वाते, तन्वते, तनुषे, तन्वाथे, तनुध्वे, तन्वे, तन्वहे-तनुवहे, तन्महे-तनुमहे ।

लिटि ततान । **अत एकहल्मध्ये**....इति एत्वाभ्यासलोपौ तेनतुः, तेनुः । आत्मनेपदे तेने तेनाते

तेनिरे । लुटि तनितासि तनितासे । लृटि तनिष्यति, तनिष्यते । लोटि तनोतु, तनुताम् । लङि अतनोत् अतनुत । वि.लिङि तनुयात्, तन्वीत । आशीर्लिङि तन्यात्, तनिषीष्ट । परस्मैपदे लुङि **अतो हलादे**रिति वा वृद्धिः- अतानीत् अतनीत् । आत्मनेपदे तु अतन् स् त इति स्थिते

### सिचः लुग्विधायकं विधिसूत्रम्-

**तनादिभ्यस्तथासोः २।४।७९॥**

**तनादेः सिचो वा लुक् स्यात्तथासोः । अतत । अतनिष्ट । अतथाः । अतनिष्ठाः । अतनिष्यत् । अतनिष्यत । षणु दाने ॥२॥ सनोति, सनुते ॥**

(तनादिभ्यः, सिचः, विभाषा, लुक्, तथासोः)

**सरलार्थः-** तनादिगणपठितेभ्यो धातुभ्यः परस्य सिचो विभाषया लुग् भवति तप्रत्यये, थास्प्रत्यये च परयोः ।

प्रकृतसूत्रेण सिचः विभाषया लुकि, '**अनुदात्तोपदेशवनतितनोत्या**....' इत्यादिना सूत्रेण नकारस्य लोपे अतत । नकारलोपाभावे अतनिष्ट । अतथाः, अतनिष्ठाः । लृङि अतनिष्यत्, अतनिष्यत ।

**षणु दाने ॥२॥** (सेट्, सकर्मकः, उभयपदी, उकारोऽनुबन्धः स्वरितः) सनोति, सनुते **॥** **धात्वादेः षः सः** इति षकारस्य सकारादेशः ।

सन्धातोः लट्लकाराद् वि.लिङ्पर्यन्तं तन्धातुवद् रूपाणि भवन्ति । सनोति, सनुते । ससान, सेने । सनितासि, सनितासे । सनिष्यति, सनिष्यते । सनोतु, सनुताम् । असनोत्, असनुत । सनुयात्, सन्वीत । आ.लिङि सन् यास् ति इति स्थिते-

### आत्वविधायकं विधिसूत्रम्

**ये विभाषा ६।४।७९॥**

**जनसनखनामात्वं वा यादौ क्ङिति । सायात्, सन्यात् ॥**

(ये, क्ङिति, जनसनखनाम्, अङ्गस्य, आत्)

**सरलार्थः-** यकारादौ क्ङिति प्रत्यये परे जन्-सन्-खन् इत्येतेषां धातूनामन्त्यस्य स्थाने विभाषया आकारः आदेशो भवति । प्रकृतसूत्रेण नकारस्य विभाषया आकारे सायात् इति रूपम्, आत्वाभावे सन्यात् इति च रूपे सिद्ध्यतः । परस्मैपदे लुङि असानीत्, असनीत् (अतो हलादेर्लघोः) ।

आत्मनेपदे लुङि तु असन् स् त् इति स्थिते-

## आकारादेशविधायकं विधिसूत्रम्

**जनसनखनां सञ्झलोः ६।४।४३॥**

**एषामाकारोऽन्तादेशः स्यात् सनि झलादौ क्ङिति । असात, असनिष्ट । असाथाः, असनिष्ठाः ॥ क्षणु हिंसायाम् ॥३॥ क्षणोति, क्षणुते ॥ ह्मयन्तेति न वृद्धिः । अक्षणीत् । अक्षत, अक्षणिष्ट । अक्षथाः, अक्षणिष्ठाः ॥ क्षिणु हिंसायाम् ॥४॥ उप्रत्यये लघूपधस्य गुणो वा क्षेणोति, क्षिणोति । क्षेणिता । अक्षेणीत्, अक्षित, अक्षेणिष्ट ॥ तृणु अदने ॥५॥ तृणोति, तर्णोति, तृणुते, तर्णुते ॥ डुकृञ् करणे ॥६॥ करोति ॥**

(जनसनखनाम्, आत्, सञ्झलोः, क्ङिति)

**सरलार्थः-** सनि परे, झलादौ किति ङिति प्रत्यये च परे जन्-सन्-खन्- इत्येतेषां धातूनां स्थाने आकारोऽन्तादेशो भवति ।

अनेन सूत्रेण नकारस्य आकारोऽन्तादेशे, सिचः **तनादिभ्यस्तथासोः** इति लुकि असात इति, सिचः लोपाभावे इडागमे झलादित्वाभावादात्वाभावे असनिष्ट इति च रूपे सिद्ध्यतः । लृङि असनिष्यत्, असनिष्यत ।

**क्षणु हिंसायाम् ॥३॥** (सेट्, सकर्मकः, उभयपदी, उकारोऽनुबन्धः स्वरितः)

लटि सन्वद्रूपाणि क्षणोति, क्षणुते । लिटि संयोगस्य सत्वाद् एत्वाभ्यासलोपौ न चक्षाण, चक्षणे । क्षणितासि, क्षणितासे । क्षणिष्यति, क्षणिष्यते । क्षणोतु, क्षणुताम्, अक्षणोत्, अक्षणुत । क्षणुयात्, क्षण्वीत । क्षण्यात्, क्षणिषीष्ट । परस्मैपदे लुङि **ह्मयन्तेति न वृद्धिः** अक्षणीत् । आत्मनेपदे लुङि अक्षत, अक्षणिष्ट । अक्षणिष्यत्, अक्षणिष्यत ।

**क्षिणु हिंसायाम् ॥४॥** (सेट्, सकर्मकः, उभयपदी, उकारोऽनुबन्धः स्वतितः)

क्षिधातोः उप्रत्यये क्षिधातोः इकारस्य पुगन्तलघूपधस्य च इति सूत्रेण प्राप्तो गुणः **संज्ञापूर्वको विधिरनित्यः** इति परिभाषावादिमते नभवति । केषाञ्चिन्मते तु गुणो भवत्येव इत्यतो विकल्पः फलति तदाह- **उप्रत्यये लघूपधस्य गुणो वा** । क्षेणोति, क्षिणोति । चिक्षेण, चिक्षिणे । क्षेणितासि, क्षेणितासे । क्षेणिष्यति, क्षेणिष्यते । क्षेणोतु, क्षिणोतु, क्षेणुते, क्षिणुते । अक्षेणोत्, अक्षिणोत्, अक्षेणुत, अक्षिणुत । क्षेणुयात्, क्षिणुयात्,क्षेण्वीत, क्षिण्वीत । क्षिण्यात्, क्षेणिषीष्ट । अक्षेणीत्, अक्षित, अक्षेणिष्ट । अक्षेणिष्यत्, अक्षेणिष्यत ॥

**तृणु अदने ॥५॥** (सेट्, सकर्मकः, उभयपदी, उकारानुबन्धलोपः)

अत्रापि लघुपधगुणस्य वैकल्पिकत्वाद् गुणस्थलेषु सर्वत्र रूपद्वयम्- तृणोति, तर्णोति, तृणुते,

तर्णुते । ततर्ण, ततृणे । तर्णितासि, तर्णितासे । तर्णिष्यति, तर्णिष्यते । तृणोतु, तर्णोतु, । तृणुताम्, तर्णुताम् । अतृणोत्, अतर्णोत् । अतृणुत, अतर्णुत । तृणुयात्, तर्णुयात्, तृण्वीत, तर्ण्वीत । तृण्यात्, तर्णिषीष्ट । अतर्णीत्, अतृत, अतर्णिष्ट । अतर्णिष्यत्, अतर्णिष्यत ।

**डुकृञ् करणे ॥६॥** (अनिट्, सकर्मकः, उभयपदी, डुञोरनुबन्धलोपः)

करणार्थकात्कृधातोः लटि, तिपि, उप्रत्यये च कृते 'कृ उ ति' इत्यवस्थायाम् उप्रत्ययस्यार्धधातुकत्वाद् ऋकारस्य **सार्वधातुकार्धधातुकयो**रिति गुणे रपरत्वे, तिपः सार्वधातुकत्वात् पुन उकारप्रत्ययस्य गुणे ओकारे वर्णसम्मेलने **करोति** इति रूपं सिद्धचति ।

तसि कृधातोः ऋकारस्य गुणे रपरत्वे च कृतयोः कर् उ तस् इत्यवस्थायां तसो ङित्वाद् गुणाभावे-

## उकारादेशविधायकं विधिसूत्रम्

**अत उत्सार्वधातुके ६।४।११०॥**

**उप्रत्ययान्तस्य कृञोऽकारस्य उः स्यात्, सार्वधातुके क्ङिति । कुरुतः ।**

(उतः, प्रत्ययाद्, करोतेः, अङ्गस्य, अतः, च, उत्, क्ङिति, सार्वधातुके)

**सरलार्थः-** उप्रत्ययान्तस्य कृञ्धातोः ह्रस्वाकारस्य स्थाने उकारादेशो भवति किति ङिति च सार्वधातुके परे ।

अनेन सूत्रेण अकारस्य उकारादेशे कुरुतस् इति जाते रुत्वे विसर्गे च कुरुतः इति रूपं सिद्धचति ।

बहुवचने झिप्रत्यये **कृ उ झि** इत्यत्र झस्यान्तादेशे गुणे **कर् उ अन्ति** इत्यवस्थायाम् अत उत्वे यणि **कुर् व् अन्ति** इति जाते उकारस्य '**हलि च**' इति उपधादीर्घे प्राप्ते-

## दीर्घनिषेधविधायकं सूत्रम्

**न भकुर्छुराम् ८।२।७९॥**

**भस्य, कुर्छुरोश्चोपधाया न दीर्घः । कुर्वन्ति ॥**

(र्वोः, भकुर्छुराम्, दीर्घः, न)

**सरलार्थः-** रेफवान्तस्य भस्याङ्गस्य, कुर् छुर् इत्यनयोश्चोपधायाः दीर्घादेशो न भवति । एतेन दीर्घनिषेधे **कुर्वन्ति** इति रूपं सिद्धम् । करोषि । कुरुथः। कुरुथ । करोमि । वसि मसि च 'कृ उ वस्', 'कृ उ मस्' इत्युभयत्र ऋकारस्य आर्धधातुकगुणे अत उत्त्वे च कुर् उ वस्, कुर्

उ मस् इति जाते '**उतश्च प्रत्ययादसंयोगपूर्वाद्**' इति सूत्रेण विभाषया उप्रत्ययलोपे प्राप्ते-

## उकारस्य लोपविधायकं विधिसूत्रम्

**नित्यं करोतेः ६।४।१०८॥**

**करोतेः प्रत्ययोकारस्य नित्यं लोपो, म्वोः परयोः । कुर्वः । कुर्मः । कुरुते । चकार, चक्रे । कर्तासि, कर्तासे । करिष्यति, करिष्यते । करोतु । कुरुताम् । अकरोत् । अकुरुत ।**

(करोतेः, अङ्गस्य, प्रत्ययाद्, उतः,च, नित्यं, लोपः, म्वोः)

**सरलार्थः**- मकारे वकारे च परे करोतेः (डुकृञ् करणे इति धातोः) प्रत्ययोकारस्य नित्यं लोपो भवति । अनेन सूत्रेण वकारे मकारे च परे प्रत्ययोकारस्य नित्यतया लोपे सस्य रुत्वे विसर्गे च **कुर्वः**, **कुर्मः** इति रूपे सिद्ध्यतः ।

कुरुते इत्यत्र कृधातोर्लटि आत्मनेपदे तप्रत्यये उप्रत्यये ऋकारस्यार्धधातुकगुणे रपरत्वे अत उत्वे तप्रत्ययस्य ङिद्वद्भावेन उकारस्य गुणनिषेधे टेरेत्वे च **कुरुते** इति रूपं सिद्धम् ।

लिटि क्रादिनियमेन नित्यमिण्निषेधः चकार, चक्रतुः, चक्रुः, चकर्थ, चक्रथुः, चक्र, चकार, चकर, चकृव, चकृम । आत्मनेपदे चक्रे, चक्राते, चक्रिरे, चक्रिषे, चक्राथे, चक्रिढ्वे, चक्रे, चक्रिवहे, चक्रिमहे ।

लुटि कर्तासि, कर्तासे । लृटि 'कृ स्य ति' इत्यवस्थायां '**ऋद्धनोः स्ये**' इतीडागमे धातोर्गुणे वर्णसम्मेलने षत्वे च **करिष्यति** इति रूपम् । वि.लिङि 'कुरु यात्' इति स्थिते-

## उकारलोपविधायकं विधिसूत्रम्

**ये च ६।४।१०९॥**

**कृञ उलोपो, यादौ प्रत्यये । कुर्यात् । कुर्वीत । क्रियात् । कृषीष्ट । अकार्षीत् । अकृत । अकरिष्यत् । अकरिष्यत ।**

(करोतेः, अङ्गस्य, उतः, प्रत्ययस्य, ये, च, नित्यं, लोपः)

**सरलार्थः**- यकारादौ प्रत्यये परे करोतेः प्रत्ययोकारस्य लोपो भवति । अनेन उकारप्रत्ययस्य नित्यं लोपे **कुर्यात्** इति रूपं सिद्ध्यति । आत्मनेपदे सीयुडागमे सस्य लोपे (लिङः सलोपोऽनन्त्यस्य) कुरु ईत इति जाते यणि वर्णसम्मेलने **कुर्वीत** । कुर्वीयाताम्, कुर्वीरन्, कुर्वीथाः, कुर्वीयाथाम्, कुर्वीध्वम्, कुर्वीय, कुर्वीवहि, कुर्वीमहि ।

आशीर्लिङि '**रिङ्शयग्लिङ्क्षु**' अनेन ऋतः रिङादेशे **क्रियात्** इति रूपं भवति । क्रियात्,

क्रियास्ताम्, क्रियासुः, क्रियाः,क्रियास्तम्, क्रियास्त, क्रियासम्, क्रियास्व, क्रियास्म । आत्मनेपदे कृषीष्ट । लुङि 'सिचि वृद्धिः परस्मैपदेषु' इति वृद्धौ अकार्षीत् । अकार्ष्टाम्, अकार्षुः, अकार्षीः, अकार्ष्टम्, अकार्ष्ट, अकार्षम्, अकार्ष्व, अकार्ष्म । आत्मनेपदे लुङि 'ह्रस्वादङ्गाद्' इति सलोपः अकृत, अकृषाताम्, अकृषत, अकृष्ठाः, अकृषाथाम्, अकृढ्वम्, अकृषि, अकृष्वहि, अकृष्महि । अकरिष्यत्, अकरिष्यत ।

## सुडागमविधायकं विधिसूत्रद्वयम्-

**संपरिभ्यां करोतौ भूषणे ६।१।१३८॥**

**समवाये च ६।१।१३८॥**

**सम्परिपूर्वस्य करोतेः सुट् भूषणे, सङ्घाते चार्थे । संस्करोति । अलङ्करोतीत्यर्थः । संस्कुर्वन्ति । सङ्घीभवन्तीत्यर्थः । संपूर्वस्य क्वचिदभूषणेऽपि सुट् । 'संस्कृतं भक्षाः' इति ज्ञापकात् ।**

(संपरिभ्याम्, करोतौ भूषणे, समवाये च, सुट्)

**सरलार्थः-** भूषणे समूहे चार्थे सम्, परि इत्येताभ्यामुपसर्गाभ्यां परस्य कृधातोः सुडागमः भवति । सुडित्यत्र उकारस्य टकारस्य च इत्संज्ञायां लोपे च सकार एव शिष्यते । सुटः टित्त्वादाद्ययवयवत्वम् । अनेन समुपसर्गात् कृधातौ परे संस्कृ इति, पर्युपसर्गात् कृधातौ परे परिष्कृ इति च रूपे भवतः । संस्करोति, परिष्करोतीत्यादीनि च रूपाणि ।

## सुड्विधायकं विधिसूत्रम्

**उपात्प्रतियत्नवैकृतवाक्याध्याहारेषु च ६।१।१३९॥**

**उपात्कृञः सुट् स्यादेष्वर्थेषु चात्प्रागुक्तयोरर्थयोः । प्रतियत्नो-गुणाधानम् । विकृतमेव वैकृतं-विकारः । वाक्याध्याहारः-आकाङ्क्षितैकदेशपूरणम् । उपस्कृता कन्या । उपस्कृता ब्राह्मणाः । एधोदकस्योपस्कुरुते । उपस्कृतं भुङ्क्ते । उपस्कृतं ब्रूते ।**

(उपात्, करोतौ, सुट्, प्रतियत्नवैकृतवाक्याध्याहारेषु च)

**सरलार्थः-** उपोपसर्गात् परस्य कृधातोः प्रतियत्नादिष्वलङ्कारादिषु चार्थेषु सुडागमो भवति । **उपस्कृता कन्या**, अलङ्कृता इत्यर्थः । **उपस्कृता ब्राह्मणाः**, समुदिता इत्यर्थः । **एधोदकस्योपस्कुरुते**, गुणाधानं करोति इत्यर्थः । **उपस्कृतं भुङ्क्ते**, विकृतमित्यर्थः । **उपस्कृतं** ब्रूते, वाक्याध्याहारेण ब्रूते इत्यर्थः सर्वत्र प्रकृतसूत्रेण सुडागमः ।

**वनु याचने ॥७॥ वनुते । मनु अवबोधने ॥ ८॥ मनुते ॥ मेने । मनिता । मनिष्यते । मनुताम् । अमनुत । मन्वीत । मनिषीष्ट । अमत, अमनिष्ट । अमनिष्यत ॥**

**वनु याचने ॥७॥** (सेट्, सकर्मकः, आत्मनेपदी, उकारोऽनुबन्धोऽनुदात्तः)

वन्धातोः रूपाणि प्रायः तन्धातुवद् भवन्ति । वनुते । लिटि-'**न शसददवादिगुणानाम्**' इति एत्वाभ्यासलोपौ न ववने । वनिता । वनिष्यते । वनुताम् । अवनुत । वन्वीत । वनिषीष्ट । अवनिष्ट । अवनिष्यत ।

**मनु अवबोधने ॥८॥** (सेट्, सकर्मकः, आत्मनेपदी, उकारः अनुदात्तः)

मनुते । एत्वाभ्यासलोपौ मेने । मनिता । मनिष्यते । मनुताम् । अमनुत । मन्वीत । मनिषीष्ट । तनादिभ्यस्तथासोः अमत, अमनिष्ट । अमनिष्यत ।**इति तनादयः ॥८॥**

**तनोति/तनुते**

विस्तारार्थकात् तनुधातोरुकारस्यानुबन्धलोपे लटि, परस्मैपदे तिपि, सार्वधातुकसंज्ञायां 'तनादिकृञ्भ्य उः' इति सूत्रेण शपम्प्रबाध्य उप्रत्यये, तन्+उ+ति इत्यवस्थायां उकारस्य सार्वधातुकार्धधातुकयोः इति ओकारे गुणे, वर्णसम्मेलने तनोति इति रूपं सिद्ध्यति । आत्मनेपदे तु तन् लट्, त इत्यवस्थायां तकारस्य ङिद्वद्भावे, उप्रत्यये, तन्+उ+त इत्यवस्थायां ङित्त्वाद् गुणनिषधे, अकारस्य टिसंज्ञायाम्, 'टित आत्मनेपदानां टेरे' इति टेरेत्वे तनुते ।

**अतत/अतनिष्ट**

तन्धातोर्लुङि, अडागमे, आत्मनेपदे तप्रत्यये अ तन् त इति जाते सार्वधातुकसंज्ञायां शपम्प्रबाध्य च्लौ, च्लेः सिजादेशेऽनुबन्धलोपे 'अ तन् स् त' इति जाते 'तनादिभ्यस्तथासोः' इति सूत्रेण तप्रत्यये परे सिचो विकल्पेन लुकि 'अ तन् त' इत्यवस्थायां त इत्यस्यापित्त्वेन ङित्त्वात् तस्मिन् परे 'अनुदात्तोपदेशवनति०' इत्यादिसूत्रेण नकारस्य लोपे अतत इति रूपम् । सिज्लुगभावे अ तन् स् त इत्यवस्थायां सिच इडागमे 'अ तन् इ स् त' इत्यवस्थायां सकारस्य षत्वे तकारस्य ष्टुत्वे वर्णयोगे च अतनिष्ट इति रूपम् ।

## वाक्येषु प्रयोगनिदर्शनानि

१. गुरुः शिष्यान् पाठयित्वा विद्यां तनोति ।

२. भाष्यग्रन्थाः सूत्रार्थान् तन्वन्ति ।

३. विद्वान् स्वकीर्तिं तनोतु ।

४. आस्तिको जनः पापं न कुरुते ।

५.कवयः कवितावाचनं करिष्यन्ति ।

६. मनुष्यो निष्फलं कर्म न कुर्यात् ।

७. नास्तिकः शास्त्रवचनं न मनुते ।

८. नेतारो जनादेशं मन्वीरन् ।

## अभ्यासः

१. **एकवाक्येन उत्तरयत**

(क) तन्धातोः प्रयोगः कस्मिन्नर्थे भवति ?

(ख) तनादिधातुभ्यः को विकरणप्रत्ययो जायते ?

(ग) कृधातोरर्थं लिखत ।

(घ) करोति इत्यत्र 'अत उत्सार्वधातुके' इति उत्त्वं कथं न भवति ?

(ङ) कृधातोः लिटि कुत्रचिदपि इडभावे कारणं दर्शयत ।

(च) मन्धातुः कस्मिन् अर्थे प्रयुज्यते ?

(छ) तन्धातोः लटि आत्मनेपदस्य रूपावलीं लिखत ।

(ज) कृधातोः लङि परस्मैपदस्य रूपाणि लिखत ।

(झ) मन्धातोः लुङि आत्मनेपदस्य रूपतालिकां दर्शयत ।

(ञ) अतत इत्यत्र नलोपविधायकं सूत्रं किम् ?

(ट) अतनीत्/अतानीत् इत्यत्र केन वृद्धिविकल्पः ?

(ठ) 'कुर्वन्ति' इत्यत्र उपधादीर्घनिषेधः केन ?

२. **अधोनिर्दिष्टानां प्रयोगाणां धातुलकारपदपुरुषवचनानि निर्धारयत–**

तेनुः, अमनिष्यत, तन्वे, चकृषे, तनुत, करवै, अतनुतम्, तन्वीय, मनिताध्वे, अतानिष्टम्, कुर्वे, करिष्ये, कुरु, मनिषीयास्ताम्, अकुरुध्वम्, कुर्याम्, मन्वीमहि, कृषीष्ठाः, अकृढ्वम्, अकार्षम्, अमन्वत, अकरिष्यावहि, मन्वाथे, मनुध्वम्, कुर्वीयाथाम् ।

३. **अधस्तनानां सूत्राणामर्थं लिखत**

(क) तनादिभ्यस्तथासोः (ख) न भकुर्छुराम्

(ग) नित्यं करोतेः (घ) ये च

(ङ) सम्परिभ्यां करोतौ भूषणे

४. **यथायथं मिथो मिलयत**

| परस्मैपदम् | आत्मनेपदम् |
|---|---|
| तनुथः | कुर्वीवहि |
| तेनिव | अकरिष्यथाः |
| तनवावः | कुर्महे |
| कुर्मः | तनवावहै |
| कर्तास्मि | अकुर्वाथाम् |
| अकुरुतम् | तेनिवहे |
| कुर्याव | तन्वाथे |
| अकरिष्यः | कर्त्ताहे |

५. **अधः प्रदत्तानां रूपाणां सिद्धिप्रक्रियां ससूत्रं दर्शयत**

तनुतः, अतथाः, कुर्वन्ति, कुर्मः, कुर्यात्, अमत ।

६. **निर्देशानुसारेण रूपाणि लिखत**

(क) तन्धातोर्लुङि आत्मनेपदे (ख) कृधातोर्लटि परस्मैपदे

(ग) कृधातोर्लुङि परस्मैपदे (घ) मन्धातोराशीर्लिङि

७. **प्रमुखसूत्रनिदर्शनपूर्वकं रूपसिद्धिप्रकारं दर्शयत**

(क) तनोति (ख) तेने (ग) अतत/अतनिष्ट

(घ) कुर्वन्ति (ङ) कुर्वः (च) चक्रे

(छ) अकार्षीत् (ज) संस्कुर्वन्ति (झ) मन्वीत

८. **अधस्तनपदानां वाक्ये प्रयोगं कुरुत–**

तनोति । चकार । अकार्षीत् । मनुते । अतनोत् । कुरुषे । अकुर्वन् । मन्वते ।

षड्विंशः पाठः

# अथ क्र्यादिप्रकरणम्

क्र्यादिप्रकरणे सार्वधातुकलकारेषु शपं बाधित्वा श्ना (ना) इति विकरणप्रत्ययो विधीयते, तस्य च शित्वात् सार्वधातुकसंज्ञा भवति। अपित्सार्वधातुकत्वाद् ङिद्वद्भावेन अङ्गस्य गुणनिषेधो भवति। आरम्भे डुक्रीञ् (क्री) इति धातोः पाठात् प्रकरणस्य नाम क्र्यादि इति जातमस्ति।

**डुक्रीञ् द्रव्यविनिमये ॥१॥** (द्रव्यविनिमयार्थको डुक्रीञ् (क्री) इति धातुरनिट्, सकर्मकः, उभयपदी च वर्तते, डुञोरनुबन्धौ)

## श्नाविकरणविधायकं सूत्रम्

**क्र्यादिभ्यः श्ना ३।१।८१॥**

**शपोऽपवादः। क्रीणाति। 'ई हल्यघोः'। क्रीणीतः। 'श्नाभ्यस्तयोरातः'। क्रीणन्ति। क्रीणासि। क्रीणीथः। क्रीणीथ। क्रीणामि। क्रीणीवः। क्रीणीमः।**

**क्रीणीते। क्रीणाते। क्रीणते। क्रीणीषे। क्रीणाथे। क्रीणीध्वे। क्रीणे। क्रीणीवहे। क्रीणीमहे।**

**चिक्राय। चिक्रियतुः। चिक्रियुः। चिक्रयिथ। चिक्रेथ। चिक्रिये। क्रेता। क्रेष्यति। क्रेष्यते।**

**क्रीणातु। क्रीणीतात्। क्रीणीताम्। क्रीणीताम्। क्रीणाताम्। क्रीणताम्॥ क्रीणीयात्। क्रीणीत। क्रीयात्। क्रेषीष्ट। अक्रैषीत्। अक्रेष्ट। अक्रेष्यत्। अक्रेष्यत। प्रीञ् तर्पणे, कान्तौ च ॥२॥ प्रीणाति। प्रीणीते। श्रीञ् पाके ॥३॥ श्रीणाति, श्रीणीते॥ मीञ् हिंसायाम् ॥४॥**

(क्र्यादिभ्यः, धातोः, परः, श्ना, प्रत्ययः, कर्तरि, सार्वधातुके)

**सरलार्थः**- क्र्यादिभ्यो धातुभ्यः पर श्ना इति विकरणप्रत्ययो भवति कर्त्रर्थे सार्वधातुके परे।

क्री-धातोर्लटि, ञित्वात् क्रियाफलेऽकर्तृगे सति परस्मैदे तिपि, सार्वधातुकसंज्ञायाम्, शपम्प्रबाध्य (**क्र्यादिभ्यः श्ना**) श्ना-प्रत्ययेऽनुबन्धलोपे, शित्वात् सार्वधातुकसंज्ञायाम्, श्नाप्रत्ययस्य अपित्सार्वधातुकत्वात् (**सार्वधातुकमपित्**) ङिद्वत्वे, ङित्वाद् धातोर्गुणनिषेधे, (**अट्कुप्वाङ्नुम्..**) नकारस्य णत्वे-क्रीणाति।

तसादिहलादिष्वपिद्विभक्तिषु '**ई हल्यघोः**' इति 'श्ना इत्यस्याकारस्य ईत्वे- क्रीणीतः इति। झौ अन्तादेशे कृते '**श्नाभ्यस्तयोरातः**' इति आकारलोपे, गुणनिषेधे, नकारस्य णत्वे च-क्रीणन्ति। कर्तृगामिनि क्रियाफले तु आत्मनेपदे क्री+त, सार्वधातुकसंज्ञायाम्, शपम्प्रबाध्य श्ना-प्रत्यये, अपित्सार्वधातुकत्वेन ङित्वे, गुणनिषेधे 'क्री+ना+त' अत्र (**ई हल्यघोः**) श्ना

इत्यस्याकारस्येत्वे,णत्वे-क्रीणीते । क्रीणाते । क्रीणते । क्रीणीषे । क्रीणाथे । क्रीणीध्वे । क्रीणे । क्रीणीवहे । क्रीणीमहे ।

लिटि चिक्राय, चिक्रिये । लुटि क्रेतासि, क्रेतासे । लृटि क्रेष्यति, क्रेष्यते । परस्मैपदे लोटि क्रीणातु,क्रीणीतात्, क्रीणीताम् । आत्मनेपदे लोटि क्रीणीताम् । क्रीणाताम् । क्रीणताम् ॥ विधिलिङि क्रीणीयात्, क्रीणीत । आशिर्लिङि क्रीयात्, क्रेषीष्ट । लुङि अक्रैषीत्, अक्रेष्ट । लृङि अक्रेष्यत्, अक्रेष्यत ।

**प्रीञ् तर्पणे, कान्तौ च ॥२॥** (अनिट्, तर्पणेऽर्थे सकर्मकः कान्तावर्थे त्वकर्मकः, उभयपदी) ञकारोऽनुबन्धः । प्रीणाति । प्रीणीते । पिप्राय, पिप्रिये । प्रेतासि, प्रेतासे । प्रेष्यति, प्रेष्यते । प्रीणातु, प्रीणीताम् । अप्रीणात्, अप्रीणीत । प्रीणीयात्, प्रीणीत । प्रीणात्, प्रेषीष्ट । अप्रैषीत्, अप्रेष्ट । अप्रेष्यत् अप्रेष्यत । प्रीधातुः प्रायेण क्रीधातुवत् ।

**श्रीञ् पाके ॥३॥** (पाकार्थकश्रीधातुः उभयपदी, अनिट्, सकर्मकः) 'कारोऽनुबन्धः । श्रीधातोः प्रायेण प्रीधातुवद् रूपाणि भवन्ति । श्रीणाति, श्रीणीते । शिश्राय, शिश्रिये । श्रेतासि, श्रेतासे । श्रेष्यति, श्रेष्यते । श्रीणातु, श्रीणीताम् । अश्रीणात्, अश्रीणीत । श्रीणीयात्, श्रीणीत । श्रीयात्, श्रेषीष्ट । अश्रैषीत्, अश्रेष्ट । अश्रेष्यत्, अश्रेष्यत ।

**मीञ् हिंसायाम् ॥४॥** (हिंसार्थकमीधातुः उभयपदी, अनिट्, सकर्मकः) ञकारोऽनुबन्धः ।

### णकारादेशविधायकं विधिसूत्रम्

**हिनुमीना ८।४।१५॥**

**उपसर्गस्थान्निमित्तात्परस्यैतयोर्नस्य णः स्यात् । प्रमीणाति, प्रमीणीते । मीनातीत्यात्त्वम् । ममौ मिम्यतुः । ममिथ, ममाथ । मिम्ये । माता । मास्यति । मीयात्, मासीष्ट । अमासीत् । अमासिष्टाम् । अमास्त ॥ षिञ् बन्धने ॥५॥ सिनाति, सिनीते । सिषाय, सिष्ये । सेता ॥ स्कुञ् आप्लवने ॥६॥**

(उपसर्गाद्, रषाभ्याम्, हिनुमीना, नः, णः)

**सरलार्थः-** उससर्गस्थरेफषकाराभ्यां परस्य हिनुमीना इत्यनयोः नकारस्य स्थाने णकारादेशो भवति । अनेन सूत्रेण प्रमीनाति इति प्रयोगे नस्य स्थाने णकारादेशे प्रमीणाति इति रूपं सिद्ध्यति । एवमेव प्रमीणीते इति च । लिटि परस्मैपदे ममौ, मिम्यतुः, मिम्युः, ममिथ-ममाथ, मिम्यथुः, मिम्य, ममौ, मिम्यिव, मिम्यिम । आत्मनेपदे मिम्ये, मिम्याते, मिम्यिरे, मिम्यिषे, मिम्याथे, मिम्यिढ्वे-मिम्यिध्वे, मिम्ये, मिम्यिवहे, मिम्यिमहे ।

लुटि मातासि, मातासे । लृटि मास्यति, मास्यते । मीनातु, मीनीताम् । लङि अमीनात्, अमीनीत । विधिलिङि मीनीयात्, मीनीत । आ.लिङि मीयात्, मासीष्ट । लुङि 'यमरमनमातां

सक् च अमासीत्, अमास्त । लृङि अमास्यत्, अमास्यत ।

**षिञ् बन्धने ॥५॥** (बन्धनार्थकषिधातुः उभयपदी, अनिट्, सकर्मकः) ञकारः इत् ।

सिनाति, सिनीते । सिषाय, सिष्ये । सेतासि, सेतासे । सेष्यति, सेष्यते । सिनातु, सिनीताम् । असिनात्, असिनात । सिनीयात्, सिनीत । सीयात्, सेषीष्ट । 'सिचि वृद्धिः परस्मैपदेषु' इति वृद्धिः असैषीत्, असेष्ट । असेष्यत्, असेष्यत ।

**स्कुञ् आप्लवने ॥६॥** ( आप्लवनार्थकः स्कुधातुः उभयपदी, अनिट्, सकर्मकः) आप्लवनं नाम गतिविशेषः ।

### विभाषया श्नुविधायकं विधिसूत्रम्

**स्तन्भुस्तुन्भुस्कन्भुस्कुन्भुस्कुञ्भ्यः श्नुश्च ३।१।८२॥**

**चात् श्ना । स्कुनोति, स्कुनाति । स्कुनुते, स्कुनीते । चुस्काव, चुस्कुवे । स्कोता । अस्कौषीत्, अस्कोष्ट ॥ स्तन्भ्वादयश्चत्वारः सौत्राः । सर्वे रोधनार्थाः परस्मैपदिनः ॥**

(स्तन्भुस्तुन्भुस्कन्भुस्कुन्भुस्कुञ्भ्यः, ना, श्नुश्च)

**सरलार्थः-** स्तन्भु-स्तुन्भु-स्कन्भु-स्कुन्भु-स्कुञ् एतेभ्यो धातुभ्यः परः श्नाप्रत्ययो भवति चकारात् श्नुप्रत्ययोऽपि भवति ।

### शानजादेशविधायकं विधिसूत्रम्

**हलः श्न शानज्झौ ३।१।८३॥**

**हलःपरस्य श्नः शानजादेशः स्याद्धौ परे । स्तभान ॥**

(हलः, श्नः, शानच्, हौ)

**सरलार्थः-** हलः परस्य श्नाप्रत्ययस्य स्थाने शानच्-आदेशो भवति हिपरे ।

### विभाषया अङ्विधायकं विधिसूत्रम्

**जुस्तन्भ्रुम्रुचुम्लुचुग्रुचुग्लुचुग्लुञ्चुश्विभ्यश्च ३।१।५८॥**

**च्लेरङ् वा स्यात् ।**

(जुस्तन्भ्रुम्रुचुम्लुचुग्रुचुग्लुचुग्लुञ्चुश्विभ्यश्च च्लेः वा अङ्)

**सरलार्थः-** जु-स्तन्भ्रु-म्रुचु-म्लुचु-ग्रुचु-ग्लुचु-ग्लुञ्चु-श्वि एतेभ्यः धातुभ्यः परस्य च्लेः विभाषया अङादेशो भवति ।

### षकारादेशविधायकं विधिसूत्रम्

**स्तन्भेः ८।३।६७॥**

**स्तन्भेः सौत्रस्य सस्य षः स्यात् । व्यष्टभत् । अस्तम्भीत् । युञ् बन्धने ॥७॥ युनाति, युनीते । योता । क्नूञ् शब्दे ॥८॥ क्नूनाति, क्नूनीते । क्नविता । द्रूञ् हिंसायाम् ॥९॥ द्रूणाति, द्रूणीते । पूञ् पवने ॥१०॥**

**सरलार्थः-** स्तन्भधातोः अवयवस्य सस्य स्थाने षकारादेशो भवति । अनेन व्यस्तभत् इत्यत्र सकारस्य षकारादेशः ।

**युञ् बन्धने ॥७॥** (बन्धनार्थको युधातु उभयपदी, अनिट्, सकर्मकः।)

युनाति, युनीते । युयाव, युयुवे । योतासि, योतासे । योष्यति, योष्यते । युनातु, युनीताम् । अयुनात्, अयुनीत । युनीयात्, युनीत । यूयात्, योषीष्ट । अयौषीत्, अयोष्ट । अयोष्यत्, अयोष्यत इति पूर्ववद् रूपाणि ।

**क्नूञ् शब्दे ॥८॥** (शब्दकरणार्थकः क्नूधातुः, सेट्, उभयपदी, अकर्मकः) 'कारः इत् ।

क्नूनाति, क्नूनीते । चुक्नाव, चक्नुवे । क्नवितासि, क्नवितासे । क्नविष्यति, क्नविष्यते । क्नूनातु, क्नूनीताम् । अक्नूनात्, अक्नूनीत । क्नूनीयात्, क्नूनीत । क्नूयात्, क्नविषीष्ट । अक्नावीत्, अक्नविष्ट । अक्नविष्यत्, अक्नविष्यत ।

**द्रूञ् हिंसायाम् ॥९॥** (हिंसार्थको द्रूधातुः सेट्, उभयपदी, सकर्मकः) ञकारः इत् ।

द्रूणाति, द्रूणीते । दुद्राव, दुद्रुवे । द्रवितासि, द्रवितासे । द्रविष्यति, द्रविष्यते । अद्रूणात्, अद्रूणीत । द्रूणीयात्, द्रूणीत । द्रूयात्, द्रविषीष्ट । अद्रावीत्, अद्रविष्ट । अद्रविष्यत्, अद्रविष्यत ।

**पूञ् पवने ॥१०॥** (सेट्, सकर्मकः, उभयपदी) ञकारः इत् ।

**ह्रस्वादेशविधायकं विधिसूत्रम्-**

**प्वादीनां ह्रस्वः ७।३।८०॥**

**पूञ्-लूञ्-स्तृञ्-कृञ्-वृञ्-धूञ्-शॄ-पॄ-वॄ-भॄ-मॄ-दॄ-जॄ-झॄ-धॄ-नॄ-कॄ-ॠ-गॄ-ज्या-री-ली-ब्ली-प्लीनां चतुर्विंशतेः शिति ह्रस्वः । पुनाति । पुनीते । पविता । दॄ विदारणे ॥११॥ दृणाति, दृणीते । लूञ् छेदने ॥१२॥ लुनाति । लुनीते ॥ स्तृञ् आच्छादने ॥१३॥ स्तृणाति । शर्पूर्वाः खयः । तस्तार तस्तरतुः । तस्तरे । स्तरीता, स्तरिता । स्तृणीयात्, स्तृणीत । स्तीर्यात् ॥**

(प्वादीनाम्, अचः ह्रस्वः)

**सरलार्थ-** प्वादीनां धातूनामचः स्थाने ह्रस्वादेशो भवति ।

पू-धातोर्लटि, तिपि, शपं बाधित्वा श्ना-प्रत्ययेऽनुबन्धलोपे 'पू ना ति' इत्यवस्थायाम् अनेन सूत्रेण ह्रस्वे, ङित्वाद् गुणनिषेधे- पुनाति, पुनीतः, पुनन्ति, पुनासि, पुनीथः, पुनीथ, पुनामि, पुनीवः, पुनीमः । आत्मनेपदे- पुनीते इत्यादि । लिटि पुपाव, पुपुवे । पवितासि, पवितासे । पविष्यति, पविष्यते । पुनातु, पुनीताम् । अपुनात् । अपुनीत । पुनीयात्, पुनीत । पूयात्, पविषीष्ट । अपावीत्, अपविष्ट । अपविष्यत्, अपविष्यत ।

**दॄ विदारणे ॥११॥** (विदारणार्थकः दॄधातुः सेट्, परस्मैपदी, सकर्मकश्च वर्तते)

'प्वादीनां ह्रस्वः' इति ह्रस्वे दृणाति । लिटि ददार । अतुसि 'शॄदॄपां ह्रस्वो वा' इति विभाषया ह्रस्वादेशे दद्रतुः, ददरतु इत्यादीनि रूपाणि । लुटि 'वृतो वा' इति इटो वा दीर्घे दरिता,दरीता । लृटि दरिष्यति, दरीष्यति । दृणातु । अदृणात् । दृणीयात् । दीर्यात् । अदारीत् । अदरीष्यत्,अदरिष्यत् ।

**लूञ् छेदने ॥१२॥** (छेदनेऽर्थे वर्तमानो लूञ् (लू) इति धातुः सेट्, सकर्मकः, उभयपदी वर्तते) ञकार इत् । लूधातोः पूधातुवत् प्रक्रियया रुपाणि निष्पद्यन्ते । लुनाति, लुनीते । लुलाव, लुलुवे । लवितासि, लवितासे । लविष्यति, लविष्यते । लुनातु, लुनीताम् । अलुनात्, अलुनीत । लुनीयात्, लुनीत । लूयात्, लविषीष्ट । अलावीत्, अलविष्ट । अलविष्यत्, अलविष्यत ।

**स्तॄञ् आच्छादने ॥१३॥** -आच्छादनार्थकः स्तॄधातुः सेट्, उभयपदी, सकर्मको वर्तते, ञकार इत् ।

स्तृणाति, स्तृणीते । लिटि 'शर्पूर्वाः खयः' तस्तार, तस्तरतुः । तस्तरे । लुटि स्तरीता, स्तरिता । स्तरीष्यति, स्तरिष्यति । स्तरीष्यते, स्तरिष्यते । स्तृणातु, स्तृणीताम् । अस्तृणात्, अस्तृणीत । अस्तृणीयात्, स्तृणीत । परस्मैपदे आ.लिङि स्तीर्यात् ।

आत्मनेपदे आ.लिङि 'स्तॄ सीय् स् तु इति जाते-

### विभाषया इडागमविधायकं विधिसूत्रम्

**लिङ्सिचोरात्मनेपदेषु ७।२।४२॥**

**वृङ्वृञ्भ्याम् ॠदन्ताच्च परयोलिङ्सिचोरिड् वा स्यात्तङि ॥**

(वृतः, लिङ्सिचोः, इड् वा, आत्मनेपदेषु)

**सरलार्थः-** वृङ्वृञ्भ्यां धातुभ्याम्, ॠदन्ताद् धातोश्च परयोर्लिङ्सिचोः विभाषया इडागमो भवति आत्मनेपदसंज्ञकेषु प्रत्ययेषु परेषु । अनेन सीय् इत्यस्य विभाषया इडागमेऽनुबन्धलोपे 'स्तॄ इ सीय् स् तु इति जाते 'वृतो वा' इति विभाषया इटो दीर्घे प्राप्ते आह-

## दीर्घविधिनिषेधकं सूत्रम्-

**न लिङि ७।२।३९॥**

**वृत इटो लिङि न दीर्घः । स्तरिषीष्ट । उश्चेति कित्वम् । स्तीर्षीष्ट । सिचि च परस्मैपदेषु । अस्तारीत् । अस्तारिष्टाम् । अस्तारिषुः । अस्तरीष्ट, अस्तरिष्ट, अस्तीर्ष्ट ॥ कॄञ् हिंसायाम् ॥१४॥ कृणाति, कृणीते । चकार, चकरे । वॄञ् वरणे ॥१५॥ वृणाति, वृणीते । ववार, ववरे । वरिता वरीता । उदोष्ठ्येत्युत्वम् । वूर्यात् । वरिषीष्ट, वूर्षीष्ट । अवारीत् । अवारिष्टाम् । अवरिष्ट, अवरीष्ट, अवूर्ष्ट ॥ धूञ् कम्पने ॥१६॥ धुनाति, धुनीते । धविता, धोता । अधावीत् । अधविष्ट, अधोष्ट ॥ ग्रह उपादाने ॥१७॥ गृह्णाति, गृह्णीते । जग्राह, जगृहे ॥**

( वृत, इटः, लिङि, दीर्घः न)

**सरलार्थः-** वृङ्वृञ्भ्यां धातुभ्याम्, ॠदन्ताद् धातोश्च परस्य इटः स्थाने दीर्घादेशो न स्यात् । अनेन दीर्घनिषेधे धातोर्गुणे स्तरिषीष्ट इति रूपम् । इडागमाऽभावे 'उश्च' इति झलादिलिङः कित्वेन गुणनिषेधे 'ॠत इद्धातोः' इति सूत्रेण इत्वे, रपरत्वे, 'हलि च' इति दीर्घे स्तीर्षीष्ट इति रूपम् । आतामादिषु स्तरिषीयास्ताम्, स्तरिषीरन्, स्तरिषीष्ठाः, स्तरिषीयास्थाम् इत्यादीनि रूपाणि ।

लुङि परस्मैपदे 'सिचि वृद्धिः परस्मैपदेषु' इति वृद्धौ अस्तारीत् । आत्मनेपदे तु लिङ् सिचोरात्मनेपदेषु इति सूत्रेण विभाषया इटि 'वृतो वा' इति विभाषया इटो दीर्घे अस्तरीष्ट, अस्तरिष्ट, अस्तीर्ष्ट इति रूपाणि । लृङि अस्तरीष्यत्, अस्तरिष्यत्, अस्तरीष्यत, अस्तरिष्यत इति रूपाणि ।

**कॄञ् हिंसायाम् ॥१४॥** (हिंसार्थकः **कॄ**धातुः सेट्, उभयपदी सकर्मकश्च वर्तते, ञकार इत्)

कृणाति, कृणीते । चकार, चकरे । करीता, करिता । करीष्यति-करिष्यति, करीष्यते-करिष्यते । कृणातु, कृणीताम् । अकृणात्, अकृणीत । कृणीयात्, कृणीत । कीर्यात्, करिषीष्ट-कीर्षीष्ट । अकारीत्, अकरिष्ट-अकीर्ष्ट । अकरीष्यत्,अकरिष्यत्, अकरीष्यत, अकरिष्यत इत्यादीनि रूपाणि पूर्ववद् बोध्यानि ।

**वॄञ् वरणे ॥१५॥** (वरणार्थको वॄधातुः, सेट्, उभयपदी सकर्मकश्च वर्तते, ञकार इत्)

वृणाति, वृणीते । ववार, ववरे । वरिता, वरीता । वरीष्यति-वरिष्यति, वरीष्यते-वरिष्यते । वृणातु, वृणीताम् । अवृणात्, अवृणीत । वृणीयात्, वृणीत । 'उदोष्ठ्यपूर्वस्य' उत् रपरः 'हलि चे'ति दीर्घे वूर्यात् । वरिषीष्ट, वूर्षीष्ट । अवारीत् । अवारिष्टाम् । अवरिष्ट, अवरीष्ट, अवूर्ष्ट ॥ अवरीष्यत्, अवरिष्यत्, अवरीष्यत-अवरिष्यत इत्यादीनि रूपाणि कृधातुवद् ज्ञेयानि ।

**धूञ् कम्पने ॥१६॥** (कम्पनार्थको धूधातुः, सेट्, उभयपदी सकर्मकः, ञकार इत्)

धुनाति, धुनीते । दुधाव, दुधुवे । 'स्वरतिसूतिसूयतिधूञूदितो वा' इति वेट् धविता, धोता । धविष्यति-धोष्यति, धविष्यते-धोष्यते । धुनातु, धुनीताम् । अधुनात्, अधुनीत । धुनीयात्, धुनीत । धूयात्, धविषीष्ट-धोषीष्ट । अधावीत्, अधविष्ट-अधोष्ट । अधविष्यत्-अधोष्यत्, अधविष्यत-अधोष्यत इत्यादीनि रूपाणि पूर्ववद् बोध्यानि ।

**ग्रह उपादाने ॥१७॥** (ग्रहणार्थको ग्रहधातुः, सेट्, उभयपदी, सकर्मकश्च अकारोऽनुबन्धः स्वरितः)

लटि, तिपि, श्नाप्रत्यये 'ग्रह् ना ति' इत्यवस्थायां श्नाप्रत्ययस्य अपित्सार्वधातुकत्वेन ङित्वाद् 'ग्रहिज्ये'ति रेफस्य सम्प्रसारणे, 'सम्प्रसारणाच्च' इति पूर्वरुपे 'गृह् ना ति' इति जाते 'ऋवर्णान्नस्य णत्वं वाच्यम्' इति नकारस्य णत्वे- गृह्णाति । गृह्णीतः, गृह्णन्ति इत्यादीनि रूपाणि । आत्मनेपदे- गृह्णीते, गृह्णाते, गृह्णते इत्यादीनि ।

लिटि तिपि णलि धातोर्द्वित्वे, हलादिशेषे च गग्रह् अ इत्यवस्थायां अभ्यासगकारस्य 'कुहोश्चुः' इति चवर्गादेशे उपधावृद्धौ जग्राह इति रूपम् । अतुसादौ 'असंयोगाल्लिट् कित्' इति कित्वेन धातोः 'ग्रहिज्यावयिव्यधिवष्टि........' इत्यादिना सम्प्रसारणे ततः धातोर्द्वित्वे अभ्यासादिकार्ये पदत्वे रुत्वे विसर्गे च जगृहतुः इति रूपम् । जगृहुः, जग्रहिथ, जगृहथुः, जगृह, जग्राह, जग्रह, जगृहिव, जगृहिम ।

लुटि- 'ग्रह् इ ता' इति जाते आह-

### इटः दीर्घादेशविधायकं विधिसूत्रम्

**ग्रहोऽलिटि दीर्घः ७।२।३७॥**

**एकाचो ग्रहो विहितस्येटो दीर्घो, न तु लिटि । ग्रहीता । गृह्णातु । हलः श्नः शानज्झाविति श्नः शानजादेशः गृहाण । गृह्यात् । ग्रहीषीष्ट । ह्म्यन्तेति न वृद्धिः । अग्रहीत् । अग्रहीष्टाम् । अग्रहीष्ट । अग्रहीषाताम् ।**

(ग्रहः, दीर्घः, अलिटि)

**सरलार्थः-** एकाचः ग्रह्धातोः विहितस्य इटः स्थाने दीर्घादेशो भवति लिटि परे असति । अनेन सूत्रेण इकारस्य दीर्घे- ग्रहीता । ग्रहीष्यति, ग्रहीष्यते । गृह्णातु, गृह्णीताम् । अगृह्णात्, अगृह्णीत । गृह्णीयात्, गृह्णीत । गृह्यात्, ग्रहीषीष्ट । ह्म्यन्तेति वृद्धिनिषेधः अग्रहीत्, अग्रहीष्ट । अग्रहिष्यत्, अग्रहिष्यत ।

**॥ इत्युभयपदिनः ॥**

## अथ परस्मैपदिनः ।

**कुष निष्कर्षे ॥१८॥ कुष्णाति । कोषिता ॥ अश भोजने ॥१९॥ अश्नाति । आश । अशिता । अशिष्यति । अश्नातु । अशान ॥ मुष स्तेये ॥२०॥ मोषिता । मुषाण । ज्ञा अवबोधने ॥२१॥ जज्ञौ ॥ वृङ् संभक्तौ ॥२२॥ वृणीते। ववृषे । ववृढ्वे । वरिता, वरीता । अवरीष्ट, अवरिष्ट, अवृत ॥**

**कुष निष्कर्षे ॥१८॥** (निष्कषार्थकः कुष्धातुः परस्मैपदी, सेट्, सकर्मकश्च वर्तते) अकारोऽनुबन्धः उदात्तः।)

कुष्णाति । चुकोष । कोषिता । कोषिष्यति । कुष्णातु । अकुष्णात् । कुष्णीयात् । कुष्यात् । अकोषीत् । अकोषिष्यत् ।

**अश भोजने ॥१९॥** (भोजनार्थकोऽश्धातुः, परस्मैपदी,सेट्,सकर्मकश्च वर्तते)

अश्नाति । आश । अशिता । अशिता । अशिष्यति । अश्नातु । 'हलः श्नः शानज्झौ' इति शानजि अशान । आश्नात् । अश्नीयात् । अश्यात् । आशीत् । आशिष्यत् ।

**मुष स्तेये ॥२०॥** (स्तेयार्थको मुष्धातुः, परस्मैपदी,सेट्,सकर्मकश्च वर्तते)

मुष्णाति । मुमोष । मोषिता । मोषिष्यति । मुष्णातु । अमुष्णात् । मुष्णीयात् । मुष्यात् । अमोषीत् । अमोषिष्यत् इत्यादीनि पूर्ववत् रूपाणि ।

**ज्ञा अवबोधने ॥२१॥** (ज्ञानार्थको ज्ञाधातुः अनिड्, सकर्मकः परस्मैपदी च वर्तते )

अवबोधनार्थको ज्ञा-धातुरनिट्, सकर्मकः, परस्मैपदी च वर्तते । अस्य च सार्वधातुकलकारेषु 'ज्ञाजनोर्जा' इति सूत्रेण जादेशो भवति, तेन जानाति, जानीतः, जानन्ति, जानासि, जानीथः, जानीथ, जानामि, जानीवः जानीमः । जज्ञौ । ज्ञाता । ज्ञास्यति । अजानात् । जानीयात् । आशीर्लिङि वान्यस्य संयोगादेरिति एत्वविकल्पे ज्ञेयाद्, ज्ञायाद् इति रूपद्वयम् बोध्यम् । लुङि तु यमरमनमातां सक् चेत्यनेन सिच इडागमे, धातोः सगागमे च अज्ञासीत् । लृङि अज्ञास्यत् ।

**वृङ् संभक्तौ ॥२२॥**

वृणीते । ववृषे । ववृढ्वे । वरिता, वरीता । अवरीष्ट, अवरिष्ट, अवृत ॥

इति क्र्यादयः ॥९॥

**क्रीणीतः**

क्रीधातोः 'वर्तमाने लट्' इति सूत्रेण लटि अनुबन्धलोपे लस्य स्थाने 'तिप्तस्झिः०' इत्यादिना सूत्रेण तसादेशे 'क्री तस्' इति जाते तसः 'तिङ्शित्सार्वधातुकम्' इति सूत्रेण सार्वधातुकसंज्ञायां प्राप्तं शपं प्रबाध्य 'क्र्यादिभ्यः श्ना' इति सूत्रेण श्नाप्रत्ययेऽनुबन्धलोपे क्री ना तस् इति जाते श्नाप्रत्ययस्यापि शित्त्वेन सार्वधातुकसंज्ञायां 'सार्वधातुकार्धधातुकयोः' इति सूत्रेण प्राप्तस्य गुणस्य 'सार्वधातुकमपित्' इति ङित्त्वेन अभावे तसोऽपि ङित्त्वाद् 'ई हल्यघोः' इति सूत्रेण ईत्वे 'अट्कुप्वाङ्नुम्व्यवायेऽपि' इति सूत्रेण णत्वे सस्य रुत्वे विसर्गे क्रीणीतः इति रूपं सिद्धम् ।

**ग्रहीता**

ग्रह्धातोः 'अनद्यतने लुट्' इति सूत्रेण लुटि अनुबन्धलोपे लस्य स्थाने 'तिप्तस्झिः०' इत्यादिना सूत्रेण तिबादेशेऽनुबन्धलोपे ग्रह् ति इति जाते शपं बाधित्वा 'स्यतासी लृलुटोः' इति सूत्रेण तासिप्रत्ययेऽनुबन्धलोपे ग्रह् तास् ति इति स्थिते 'आर्धधातुकं शेषः' इति सूत्रेण तासः आर्धधातुकसंज्ञायाम् 'आर्धधातुकस्येड् वलादेः' इति सूत्रेण इडागमेऽनुबन्धलोपे 'लुटः प्रथमस्य डारौरसः' इति सूत्रेण डादेशेऽनुबन्धलोपे ग्रह् इ तास् आ इति जाते डित्त्वसामर्थ्याद् अभस्यापि टेर्लोपे 'ग्रहोऽलिटि दीर्घः' इति सूत्रेण इटो दीर्घे वर्णयोगे ग्रहीता इति रूपं सिद्धम् ।

**क्रीधातोः लट्लकारे परस्मैपदस्य रूपाणि**

| **एकवचने** | **द्विवचने** | **बहुवचने** |
|---|---|---|
| क्रीणाति | क्रीणीतः | क्रीणन्ति |
| क्रीणासि | क्रीणीथः | क्रीणीथ |
| क्रीणामि | क्रीणीवः | क्रीणीमः |

**क्रीधातोः लट्लकारस्य आत्मनेपदस्य रूपाणि**

| **एकवचने** | **द्विवचने** | **बहुवचने** |
|---|---|---|
| क्रीणीते | क्रीणाते | क्रीणते |
| क्रीणीषे | क्रीणाथे | क्रीणीध्वे |
| क्रीणे | क्रीणीवहे | क्रीणीमहे |

**ज्ञाधातोः लट्लकारस्य रूपाणि**

| **एकवचने** | **द्विवचने** | **बहुवचने** |
|---|---|---|
| जानाति | जानीतः | जानन्ति |
| जानासि | जानीथः | जानीथ |
| जानामि | जानीवः | जानीमः |

## वाक्येषु प्रयोगनिदर्शनानि

१. छात्रः पठनार्थं पुस्तकं क्रीणीते ।

२. पिता पुत्रार्थं वस्त्राणि अक्रीणात् ।

३. पुत्रः सम्यक् पठित्वा पितरं प्रीणाति ।

४. ज्ञानवान् पुत्रः कुलं पुनाति ।

५. विवेकी जनः शास्त्रसारं गृह्णीते ।

६. उपासका एकादश्यां फलानि अश्नन्ति ।

७. चौराः परेषां धनानि मुष्णन्ति ।

८. व्याकरणज्ञः शुद्धं पठनं लेखनञ्च जानाति ।

## अभ्यासः

१. **क्रीधातोः प्रयोगः कस्मिन् अर्थे भवति ?**

२. **क्र्यादिगणे कतमो विकरणप्रत्ययो विहितोऽस्ति ?**

३. **श्नाप्रत्ययस्य ईत्वलोपौ केषु केषु परेषु भवत इति स्पष्टयत ।**

४. **प्रीधातोरर्थः कः ?**

५. **ग्रहधातोरर्थं विलिख्य केषु लकारेषु अस्य संप्रसारणं भवति ? लकारान् लिखत ।**

६. **पूधातोरर्थं निर्दिश्य केषु लकारेषु पूधातोर्ह्रस्वं भवति ? इति दर्शयत ।**

७. **अश्-मुष्-ज्ञाधातुनामर्थान् लिखत ।**

८. **अत्र पाठे पठितान् सेटोऽनिटो धातून् वर्गीकृत्य प्रदर्शयत ।**

९. क्रीणासि, गृह्णीमः, पुनाति, जानन्ति, अश्नातु इति पदानि योजयित्वा एकैकं वाक्यं रचयत ।

१०. क्रीधातोः लटि परस्मैपदस्य पूधातोः लोटि आत्मनेपदस्य च रूपाणि लिखत ।

११. ग्रहधातोः लिटि लुटि च परस्मैपदस्य रूपावली लिखत ।

१२. अधोनिर्दिष्टानां प्रयोगाणां धातुलकारपदपुरुषवचनानि निर्धारयत–

क्रीणत । गृह्णे । क्रेष्यामहे । अग्रहीः । क्रीणीहि । मुष्णीयासम् । क्रीणीयुः । अक्रेष्यन् । अगृह्णाम् । पुनताम् । चिक्रियिषे । जगृहुः । पुनीथ । ग्रहीष्ये । गृह्णीष्व । अशान । प्रीणीते ।

१३. अधस्तनानां सूत्राणामर्थं लिखत

(क) क्र्यादिभ्यः श्ना

(ख) ग्रहोऽलिटि दीर्घः

(ग) हलः श्नः शानज्झौ

(घ) प्वादीनां ह्रस्वः

१४. अधोलिखितयोः द्वयोः पदयो रूपाणि यथायथं मिथो मेलयत

| | |
|---|---|
| परस्मैपदम् | आत्मनेपदम् |
| क्रीणीवः | क्रेषीयास्थाम् |
| अक्रीणन् | अग्रहीष्येताम् |
| जगृहथुः | अगृह्णीध्वम् |
| गृह्णीयात् | जगृहाथे |
| पवितास्मि | पविषीष्ठाः |
| पूयाः | पुनीध्वे |
| क्रीयास्तम् | अक्रीणत |
| अग्रहीष्यताम् | क्रीणीवहे |
| पुनीथ | गृह्णीत |
| अगृह्णीत | पविताहे |

१५. अधोलिखितानां रूपाणां सिद्धिप्रक्रियां दर्शयत

क्रीणाति । गृह्णीतः । ग्रहीता । गृहाण । पुनन्ति । जानाति ।

सप्तविंशः पाठः

# अथ चुरादिप्रकरणम्

तिङन्तेषु दशषु गणेषु अन्तिमश्चुरादिगणः । अन्येषु गणेषु यादृशो विकरणप्रत्ययो भवति, तादृशो विकरणप्रत्ययोऽत्र न भवति । अत्र लडाद्युत्पत्तेः पूर्वं णिच्प्रत्ययो भवति । अयं णिच् प्रकृतेरेवार्थं द्योतयतीति स्वार्थिकः । णिजन्तप्रकरणस्थस्तु हेतुमान् णिच् । अत्र स्वार्थे णिच्प्रत्यये ण्यन्तस्य 'सनाद्यन्ता धातवः' इति धातुसंज्ञायां ण्यन्तादेव लकाराद्युत्पत्तिर्न तु केवलाद् चुरादिभ्यः धातुभ्य इति विशेषः ।

**गणपरिचयः**

अस्माभिः भ्वादित आरभ्य क्र्यादिगणपर्यन्ता धातवः तेषां रूपसाधनप्रकियाश्च अधीताः । प्रतिगणं क्वचिद् शप्-श्यन्-श्नु-श्नमादिविकरणानां पार्थक्यप्रक्रियया क्वचिच्च विकरणगतया लुक्श्लुरूपविशिष्टप्रक्रियया च गणगतानां रूपाणां भिन्नता अनुभूता । इह हि चोरयति चोरयतः चोरयन्ति इत्यादीनि रूपाणि पूर्वगणसिद्धरूपतो नूनमेव भिन्नानि दृश्यन्ते । अत्र का विशिष्टा प्रक्रिया यया पूर्वगणतो विलक्षणानि एतानि रूपाणि दृष्टानीति विषयं चुरादिगणप्रक्रियाया अध्यनतोऽत्र बोद्धुं शक्ष्यामः ।

अस्मिन् गणे पठितेभ्यो धातुभ्यः स्वार्थे णिच्प्रत्ययो भवति । पुनः णिज्विशिष्टस्य '**सनाद्यन्ता धातवः**' इति धातुसंज्ञायां लडादिलकाराः शबादिविकरणकार्याणि च प्रवर्तन्ते । रूपसिद्धिप्रक्रिया प्रायशो भ्वादिप्रकरणेन समानैव जायते । चुरादिगणस्था णिज्विशिष्टा धातवः । अनेकाच्त्वात् सर्वे सेट एव भवन्ति । एतान् सर्वान् विषयान् अस्मिन् पाठे विस्तरशो वयं पठिष्यामः।

**चुर स्तेये ॥१॥** (सेट्, सकर्मकः, उभयपदी )अनुबन्धविनिर्मुक्ताच् चुर्धातोः-

### णिच्प्रत्ययविधायकं विधिसूत्रम्

**सत्यापपाशरूपवीणातूलश्लोकसेनालोमत्वचवर्मवर्णचूर्णचुरादिभ्यो णिच् ३।१।२५॥**

**एभ्यो णिच् स्यात् । चूर्णान्तेभ्यः 'प्रातिपदिकाद्धात्वर्थे' इत्येव सिद्धे तेषामिह ग्रहणं प्रपञ्चार्थम् । चुरादिभ्यश्तु स्वार्थे । 'पुगन्ते'ति गुणः । 'सनाद्यन्ता' इति धातुत्वम् । तिप्शबादि । गुणाऽयादेशौ । चोरयति ।**

(सत्यापपाशरूपवीणातूलश्लोकसेनालोमत्वचवर्मवर्णचूर्णचुरादिभ्यः, णिच्)

**सरलार्थः-** आपुगागमसहितात् सत्य-प्रातिपदिकात्, पाश-रूप-वीणा-तूल-श्लोक-सेना-लोम-त्वच-वर्म-वर्ण-चूर्ण-प्रातिपदिकेभ्यः, चुरादिगणपठितेभ्यो धातुभ्यश्च स्वार्थे णिच्-

प्रत्ययो भवतीति सूत्रार्थः । णिचि णकारचकारौ अनुबन्धौ इ इत्येव अवशिष्यते । चुर्-धातोरनेन सूत्रेण स्वार्थे णिचि अनुबन्धलोपे 'चुर्+इ' इत्यवस्थायां पुगन्तलघूपधस्येति गुणे 'चोरि' इत्यस्य 'सनाद्यन्ता धातवः' इति धातुसंज्ञायां लटि, तिपि, शपि, गुणे, अयादेशे 'चोरयति' इति सिद्धयति, एवं तसादावपि । अत्र परगामिनि क्रियाफले 'शेषात्कर्तरीति' परस्मैपदं विहितम्, कर्तृगामिनि क्रियाफले तु-

## आत्मनेपदविधायकं विधिसूत्रम्

**णिचश्च १।३।७४।।**

**णिजन्तादात्मनेपदं स्यात् कर्तृगामिनि क्रियाफले । चोरयते । चोरयामास । चोरयिता । चोर्यात् । चोरयिषीष्ट । 'णिश्री'ति चङ् । 'णौ चङी'ति ह्रस्वः । 'चङी'ति द्वित्वम् । 'हलादिशेषः' । 'दीर्घो लघो'रित्यभ्यासस्य दीर्घः । अचूचुरत् । अचूचुरत ।।**

अनेन सूत्रेण कर्तृगामिनि क्रियाफले आत्मनेपदं भवति, तेन सर्वे णिजन्ता धातव उभयपदिनो भवन्ति । अनेन आत्मनेपदे पूर्ववदेव प्रक्रियया चोरयते, चोरयेते, चोरयन्ते इत्यादीनि रुपाणि निष्पद्यन्ते ।

लिटि अनेकाच्त्वाद् आमादिकं विधेयम् । लुङि अटि तिपि णिश्रिद्रुश्रुभ्यः कर्तरि चङिति सिचं बाधित्वा च्लेश्चङि, 'णौ चङ्युपधाया ह्रस्वः' इति ह्रस्वे, चङीति द्वित्वे, हलादिशेषे, दीर्घो लघोरिति अभ्यासस्य दीर्घे- अचूचुरत् इत्यादि ।

**कथ वाक्यप्रबन्धे ।।२।। अल्लोपः ।।** (कथनार्थकः कथधातुः उभयपदी, सकर्मकः सेट्) कथधातोः अकारः अननुनासिकः तेन 'उपदेशेऽजनुनासिक इत्' इति अकारस्य नेत्संज्ञा अपि तु णिचः विवक्षायाम् 'अतो लोपः' इति अकारलोपः ।

**अचः परस्मिन्पूर्वविधौ १।१।५७।।**

**अल्विध्यर्थमिदम् । परनिमित्तोऽजादेशः स्थानिवत् स्यात्स्थानिभूतादचः पूर्वत्वेन दृष्टस्य विधौ कर्तव्ये । इति स्थानिवत्त्वान्नोपधावृद्धिः । कथयति । अग्लोपित्वाद्दीर्घसन्वद्भावौ न । अचकथत् ।**

(परस्मिन्, अचः, आदेशः, स्थानिवत्, पूर्वविधौ)

**सरलार्थः-** परनिमित्तकः अचः स्थानिकः आदेशः स्थानिवृत्तिधर्मवान् भवति स्थानिभूताद् अचः पूर्वत्वेन दृष्टस्य स्थाने विधौ कर्तव्ये ।

**कथयति**

कथधातोःस्वार्थे (सत्याप) णिचि,(अतो लोप) धातोरकारलोपे,कथ् इ इत्यत्र उपधासज्ञायाम्, (अत उपधायाः) उपधावृद्धिस्तु न,(अचः परस्मिन् पूर्वविधौ) अल्लोपस्य स्थानिवत्त्वेन अनपुधत्वाद् वर्णयोगे कथि इत्यस्य (सनाद्यन्ता..) इति धातुसंज्ञायाम्, लटि,तिपि, शपि,

कथि+अ+ति सार्वधातुकसंज्ञायाम्, अङ्गसंज्ञायाम्, (सार्वधातुकार्धधातुकयोः) गुणे, अयादशे, वर्णसम्मेलने च कथयति इति रूपं सिद्धम् ।

कथयाञ्चकार, कथयिता, कथयितासे, कथयिष्यति, कथयिष्यते, कथयतु, कथयताम्, अकथयत्, अकथयत, कथयेत्, कथयेत, कथ्यात्, कथयिषीष्ट । लुङि-

**अचकथत्**

ण्यन्ताद् धातुसंज्ञकात् कथि इत्यस्माद् लुङि, अडागमे, तिपि, च्लौ, प्राप्तं सिजादेशम्प्रबाध्य (णिश्रिदुस्रुभ्यःकर्तरि चङ्) चङादेशे, (इतश्च) इलोपे, (णेरनिटि) णिलोपे, अकथ्+अत् (चङि) धातोर्द्वित्वे,अभ्यासकार्ये, हलादिशेषे, ह्रस्वे, (कुहोश्चुः)ककारस्य चुत्वे,अचकथ्+अत् अग्लोपित्वात् सन्वद्भावदीर्घयोर्निषेधे अचकथत् ।

**गण संख्याने ॥३॥ गणयति ।** (संख्यानार्थकः गणधातुः उभयपदी, सकर्मकः सेट्, अकारान्तो धातुः) 'अतो लोपः' इति अकारलोपः । गणधातोः रूपाणि कथधातुवत्- गणयाञ्चकार,गणयाञ्चक्रे, गणयिता, गणयितासे, गणयिष्यति, गणयिष्यते, गणयतु, गणयताम्, अगणयत्, अगणयत, गणयेत्, गणयेत, गण्यात्, गणयिषीष्ट । लुङि कथवत् अजगणत् इति जाते-

### ईकारादेशविधायकं विधिसूत्रम्

**ई च गणः ७।४।९७॥**

**गणेरभ्यासस्य ई स्याच्चङ्परे णौ चादत् । अजीगणत् । अजगणत् ॥**

(गणः, अभ्यासस्य, ई, चङ्परे णौ अच्च)

**सरलार्थः-** गणधातोरभ्यासस्य ईकारादेशो भवति चङ्परके णौपरे सति, चाद् एकस्मिन् पक्षे अत् आदेशोऽपि भवति । अनेन पक्षे ईकारादेशे अजीगणत् इति रूपम्, ईकाराभावपक्षे अजगणत् इति च रूपे सिद्ध्यतः । लृङि अगणयिष्यत्, अगणयिष्यत ।

**अचूचुरत्**

चुर् धातोः **'सत्यापपाश...'** इत्यादिना सूत्रेण णिच्यनुबन्धलोपे तस्य आर्धधातुकत्वाद् लघूपधगुणे चोरि इत्यस्य **'सनाद्यन्ता धातवः'** इति धातुत्वे लुङ्लकारेऽनुबन्धलोपे अडागमे ततः परस्मैपदस्य प्रथमपुरुषस्य एकवचने विवक्षिते **'तिप्-तस्-झि०'** इत्यादिना सूत्रेण तिबादेशेऽनुबन्धलोपे शपं प्रबाध्य च्लिप्रत्यये च्लेः स्थाने प्राप्तं सिजादेशं बाधित्वा **'णिश्रिद्रुस्रुभ्यः कर्तरि चङ्'** इति चङादेशेऽनुबन्धलोपे अचोर् इ अ ति इति जाते **'णौ चङ्युपधाया ह्रस्वः'** इति उपधाया ह्रस्वे **'चङि'** इति चुर् इत्यस्य द्वित्वे पूर्वाभ्यासे हलादिशेषे च कृते अचुचुर् इ अति इति जाते **'णेरनिटि'** इति णेर्लोपे **'सन्वल्लघुनि०'** इति सन्वद्भावे **'दीर्घो लघोः'** इति अभ्यासस्य उकारस्य दीर्घे इकारस्य लोपे **अचूचुरत्** इति रूपं सिद्धम् ।

**कथयति**

कथधातोः **'सत्यापपाश०'** इत्यादिना सूत्रेण णिच्प्रत्ययेऽनुबन्धलोपे कथ इ इति जाते णिच्प्रत्ययस्य **'आर्धातुकं शेषः'** इति सूत्रेण आर्धधातुकसंज्ञायाम् **'अतो लोपः'** इति सूत्रेण अकारस्य लोपे कथ् इ इत्यत्र **'अत उपधायाः'** इति सूत्रेण वृद्धौ प्राप्तायाम् **'अचः परस्मिन् पूर्वविधौ'** इति सूत्रेण अल्लोपस्य स्थानिवद्भावाद् वृद्ध्यभावे कथि इत्यस्य **'सनाद्यन्ता धातवः'** इति सूत्रेण धातुसंज्ञायां लटि तिपि शपि गुणे अयादेशे च विहिते 'कथयति' इतिरूपं सिद्धम् ।

**चुर्धातोः लुङ्लकारस्य रूपाणि**

| | **एकवचने** | **द्विवचने** | **बहुवचने** |
|---|---|---|---|
| **प्रथमपुरुषे** | अचूचुरत् | अचूचुरताम् | अचूचुरन् |
| **मध्यमपुरुषे** | अचूचुरः | अचूचुरतम् | अचूचुरत |
| **उत्तमपुरुषे** | अचूचुरम् | अचूचुराव | अचूचुराम |

**गणधातोः लुङ्लकारस्य परस्मैपदस्य रूपाणि**

| | **एकवचने** | **द्विवचने** | **बहुवचने** |
|---|---|---|---|
| प्रथमपुरुषे | अजीगणत् | अजीगणताम् | अजीगणन् |
| **मध्यमपुरुषे** | अजीगणः | अजीगणतम् | अजीगणत |
| **उत्तमपुरुषे** | अजीगणम् | अजीगणाव | अजीगणाम |
| | **एकवचने** | **द्विवचने** | **बहुवचने** |
| **प्रथमपुरुषे** | अजगणत् | अजगणताम् | अजगणन् |
| **मध्यमपुरुषे** | अजगणः | अजगणतम् | अजगणत |
| **उत्तमपुरुषे** | अजगणम् | अजगणाव | अजगणाम |

## वाक्येषु प्रयोगनिदर्शनानि

१. कृपणा जनाः परधनानि चोरयन्ते ।

२. भगवान् कृष्णो दधि चोरयाञ्चक्रे ।

३. बिडालो दुग्धं चोरयिष्यते ।

४. छात्राः परीक्षायां प्रश्नस्य उत्तरं न चोरयन्तु ।

५. कश्चिद् दुष्टः छात्रो ह्यो रामस्य पुस्तकम् अचोरयत् ।

६. मूषका धान्यानि अचूचुरन् ।

७. रामः स्वयात्रावृत्तान्तं कथयति ।

८. गुरुः स्वविचारम् अचकथत् ।

९. दैवज्ञो ग्रहनक्षत्राणि गणयति ।

१०. शूरः पुरुषः स्वविपक्षं न अजीगणत् ।

## अभ्यासः

१. **चुरादिधातोः स्वार्थे कः प्रत्ययो भवति ससूत्रं लिखत ।**

२. **णिज्विशिष्टस्य धातुसंज्ञाविधायकं सूत्रं लिखत ।**

३. **चुर्धातुः कस्मिन् अर्थे प्रयुज्यते ?**

४. **चुर्धातोः आत्मनेपदं कथं सिद्ध्यति ।**

५. **चोरि इत्यतो लिटि परे कः प्रत्ययः केन भवतीति लिखत ।**

६. **चुर्धातोः लुङि च्लेः स्थाने क आदेशः केन सूत्रेण भवतीति लिखत ।**

७. **कथधातोरर्थः कः ?**

८. **कथधातोरकारान्तपाठेन किं किं प्रयोजनं सिद्ध्यति ?**

९. **गणधातुः कस्मिन् अर्थे प्रयुक्तो भवति ?**

१०. **चुर्धातोः लुङि परस्मैपदे रूपाणि प्रदर्शयत ।**

११. **कथधातोः लटि गणधातोः लुङि च रूपावलीं लिखत ।**

१२. **चुर्-कथ-गण-धातूनां क्रियापदानि प्रयुज्य प्रत्येकं द्वे द्वे वाक्ये निर्मात ।**

१३. **अधोलिखितानां रूपाणां धातुलकारपदपुरुषवचनानि निर्दिशत**

चोरयसे । चोरयिष्येथे । कथयामि । चोरयेयाथाम् । गणयिष्यामि । चोरयाञ्चकृढ्वे । अचूचुरे । कथयितास्मि । चोरयितास्वहे । चोरयिषीष्ट । अचोरयत । चोरयस्व । चोरयेतम् । अचोरयेथाम् । चोरयेमहि । अचोरयिष्यध्वम् । गणयथ । चोरयिष्यथः । चोरयन्ताम् । अकथयताम् । चोरयेयुः । अजगणन् ।

१४. **अधोनिर्दिष्टानां प्रयोगाणां सिद्धिप्रक्रियां लिखत**

चोरयते । चोरयतु । अचूचुरत । कथयति । अजीगणत् ।

१५. **अधस्तनानि रिक्तस्थानानि समुचितैः पदैः पूरयत**

(क) चोरि अ ति इत्यवस्थायां गुणः ..................... सूत्रेण भवति ।

(ख) कथ इ इत्यवस्थायाम् अलोपः ..................... सूत्रेण भवति ।

(ग) चोरयाञ्चक्रे ..................... चोरयाञ्चक्रिरे ।

(घ) गणधातोरभ्यासस्य ईत्वम् ..................... इति सूत्रं करोति ।

(ङ) चुरादिभ्यो धातुभ्यः स्वार्थे ..................... प्रत्ययो भवति ।

(च) गण् इ इत्यत्र अलोपस्य स्थानिवद्भावम् ..................... इति सूत्रं करोति ।

१६. **उपयुक्तकथने (✓) इति चिह्नम् अनुपयुक्तकथने (✗) इति चिह्नं दत्त**

(क) चुरादिगणे पठितेभ्यो धातुभ्यः शप्विकरणं न भवति । ( )

(ख) चुर्धातुः सेट् वर्तते । ( )

(ग) हलादौ आर्धधातुके परे णेर्लोपो भवति । ( )

(घ) अग्लोपात् कथधातोः लुङि सन्वद्भावो न भवति । ( )

(ङ) कथगणधातू सकर्मकौ सेटौ स्तः । ( )

(च) णिज्विशिष्टस्य धातुसंज्ञा 'भूवादयो धातवः' इति सूत्रेण भवति । ( )